रामायणम् ।

बालकाण्डम् ।

महर्षि-वाल्मीकि-प्रणीतम् ।

रामानुज-कृत-टीका-समेतम् ।

श्रीयुक्त द्वारकानाथभञ्ज महानुभावस्याभ्यनुज्ञया

श्रीहेमचन्द्र भट्टाचार्य्येण

संशोधितं, भाषान्तरितं, प्रकाशितञ्च ।

VOL—I.

कलिकाताराजधान्यां

वाल्मीकियन्त्रे

श्री[illegible] चक्रवर्त्तिना [illegible]

मुद्रितम् ।

[illegible] १८[illegible]



विज्ञापनम्।

दुर्दान्त-दृप्त-दानव-दम्भ-[illegible]-कीर्ति-[illegible]-कुल-कुमारस्य रामस्य लोक-चरित-चित्रित [illegible] रामायणं [illegible] विद्वज्जनपरि-वदाम्। अपूर्वरस-भावविशेषोदाररमणीयस्मिन् [illegible] विषयान्तराभिलाषमपनयतो [illegible] आदरः। [illegible] तु कवि-कुलोपजीवकः [illegible] बहुदिनादारभ्य [illegible]सम्पपाद-यितुं मनसि मे महान् प्रयत्नः समभवत्। किन्तु [illegible] बहुव्ययसापेक्ष[illegible] निरपेक्षप्राचण्यात्। अथ [illegible] तिथौ [illegible] धर्मकामेन श्रीमता द्वारकानाथ भञ्जेनाज्ञया मदीयं [illegible] विभाव च चरितवैभवं प्रतिपादनाय-कस्य आदिष्टोऽस्मि भाषानुवाद सटीकं च रामायणं प्रचार-यितुम्। प्रारब्धे [illegible] कार्येऽस्मिन् ग्रन्थस्यातिदुस्तरतया [illegible]शप्रचलितेषु आदर्शेषु भिन्नप्रायं पाठपरि-पाटीकमालोक्य [illegible]रभयं, मतिमकरवञ्च दाक्षि-णात्यानां पाश्चात्यानां च पुस्तकानामाश्रये। तत्रत्या हि सर्वे लिपिकराः संस्कारविरहात् सन्दर्भस्य वैषम्यमवैषम्यं वा

किमप्यलभमानः [illegible] कृत्वैवादर्शं लिखन्ति। वङ्गदेशे तु तद्वैपरीत्यमेव दृश्यते। अत्र हि बहुषु शास्त्रेषु कृतश्रमाः प्रायशः पण्डिता एव लिपिकराः। अतस्ते संशोधनानुरोधे ऽपेक्षातः स्वकपोलकल्पितं पाठमाकस्मात् योजयन्ति। तेन एतद्देशप्रचलितेषु तेषु तेषु ग्रन्थेषु परस्परवैषम्यं श्लोकाधिक्य मध्यायाधिक्यञ्च समुपजातम्। न जाने किमिदमनुचितं सन्देहदोलायितधिया। अतोऽहमिदानीमभ्यर्थये प्रेक्षावता-माभिमुख्यमिति।

कलिकाता
ब्राह्मसमाजस्य
संवत् १९२५।

श्रीहेमचन्द्र भट्टाचार्य्यस्य।

टीकाकृतो मंगलाचरणम् ।

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

श्रीरघुनाथाय नमः ।

श्रीमद्राघवपादपद्मयुगलं पद्मार्चितं पद्मया
पद्मस्थेन तु पद्मजेन विनुतं पद्माश्रयस्याप्यये ।
यद्देवैश्च नुतं सुखैकनिलयं सर्व्वाश्रयं निष्क्रियं
शश्वच्छङ्करशङ्करं मुहुरहो संनौमि तत्स्मृतये ॥ १ ॥
श्रीमद् ब्रह्म तदेव बीजममलं यस्याङ्कुरश्चिन्मयः
काण्डैः सप्तभिरन्वितोऽतिविततो ह्यध्यायशाखोदितः ।
पत्रैस्तत्त्वसहस्रकैः सुविलसच्छाखाशतैः पञ्चभि-
रामप्राप्तिफलप्रदो विजयते रामायणः स्वस्तरुः ॥ २ ॥
वाल्मीकिगिरिसम्भूता रामाम्भोनिधिसङ्गता ।
श्रीमद्रामायणी गङ्गा पुनाति भुवनत्रयम् ॥ ३ ॥
वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥ ४ ॥
रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुञ्च प्रणमामि पुनः पुनः ॥ ५ ॥
कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ६ ॥
वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।
शृण्वन् रामकथानादं को न याति परां गतिम् ॥ ७ ॥

यः पिबन् सततं रामचरितामृतसागरम् ।
अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ ८ ॥
गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ ९ ॥
अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १० ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ११ ॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥ १२ ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ १३ ॥
जयति रघुवंशतिलकः कौशल्याहृदयनन्दनो रामः ।
दशवदननिधनकारी दाशरथिः पुण्डरीकाक्षः ॥ १४ ॥
जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥ १५ ॥
नत्वा रामं शिवं साम्बं रामो रामप्रवर्तकः ।
रामायणस्य तिलकं कुरुते रामतुष्टये ॥ १६ ॥

रामायणम् ।

बालकाण्डम् ।

प्रथमः सर्गः ।

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ १ ॥

ननु रामायणस्य ऐहिकामुष्मिकफलदत्वे मानाभावात् किं तद्व्या-
ख्यानेन ? इति चेत् न, 'इदं पवित्रं पापघ्नम्' इत्यादि 'जनश्च शूद्रोऽ-
पि महत्त्वमीयात्' इत्यन्तश्लोकैरैहिकार्थसाधकत्वस्य स्पष्टमेव श्रूयमा-
णत्वात् 'शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा । स याति ब्रह्मणः
स्थानं ब्रह्मणा पूज्यते सदा' इति मूलरामायणवचनेन ब्रह्मलोकावाप्तेः
फलस्य स्पष्टमुक्तत्वाच्च । अपि गायत्र्या ब्रह्मानुसन्धानाद् ब्रह्मलोका-
प्तिवत् तत्प्रतिपाद्यस्य लीलावतारस्य तथा रामस्य विभववैभवानु-
सन्धानेन ब्रह्मलोकावाप्तिरुचितैव । न च 'काव्यालापांश्च वर्जयेत्'
इति निषेधप्रसक्तिः, तस्य अनभिप्रेतपुरुषार्थासाधनकाव्यविषय-

त्वात् । तत्रास्याध्ययने त्रैवर्णिकस्य सर्वाधिकारः गायत्रीप्रतिपाद्यार्थ-प्रतिपादकत्वात् । श्रवणे तु स्त्रीशूद्रादीनामप्यधिकारः । अथादि-कविर्वाल्मीकिः सर्वोत्तमवस्तुवर्णनाय कृतसङ्कल्पो दिव्यतत्काव्य-कृतिशक्तिलाभाय तादृशवस्तुज्ञानाय च कृतकष्टसमाधिसाधित-परमपुण्यचयः तत्पुण्यचयसम्प्रीतभगवन्नियोगसमुपागतं देवर्षिं ना-रदमभ्यर्च्य 'कोऽन्वस्मिन्'—इत्यादि पप्रच्छ । स च देवर्षिः रामकथा-मुदितमना रामचरितमनुस्मृत्य संक्षेपत उपदिश्य यथागतं जगाम । ततस्तदनुग्रहलब्धं रामचरितं सरहस्यं निरवशेषं तत्प्रसादादेव सम्यक् विज्ञाय भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमो-चनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः स्वकृत-शतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्या-विन्यासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुश-लवाभ्याम-ग्राहयत् । तस्यास्य दिव्यकाव्यस्य आद्यः सर्गो वाल्मीकेर्नारदस्यो-पदेशरूपः । तत्र 'नापृष्टः कस्यचिद् ब्रूयात्' इति न्यायेनापेक्षितप्र-श्नोपक्षेपः । तपःस्वाध्यायेत्यादि श्रुत्वा चैतदित्यन्तेन सम्बन्धः । 'तप-स्तेन युतः स्वाध्यायः तपःस्वाध्याय इति व्याख्यानम्' इत्यापस्तम्बोक्तेः स्वाध्यायशब्देनाप्रायत्यानध्ययन-कालदेश-परिहारादि-नियमोपेततत्-तदर्थावबोधपर्यन्तं स्वशाखाध्ययनमुच्यते, तस्मिन्निरतः तदभ्यास-निरत इति यावत् । यत्तु तपश्च स्वाध्यायश्च तपःस्वाध्यायौ तयोर्निरत तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमादि कर्मोच्यते । यद्वा 'यस्य ज्ञानमयं तपः' इति श्रुतेः तपःशब्देन ब्रह्मविषयज्ञानमुच्यते इति तन्न तपोविशिष्टेषु विशेषप्रसिद्ध्या निपुङ्गवशब्देन सर्वोत्कृष्टतपःसम्पत्ते-रुक्तत्वात्' इति कतकमतम् । एवं हि तपोरतमित्येव सिद्धे स्वाध्याय-योगवैयर्थ्यापत्तिः, तस्मात् तपःशब्देन निदिध्यासनरूपपरिपाकवत्

को न्वस्मिन् सांप्रतं लोके गुणवान् कश्च वीर्य्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥ २ ॥

ब्रह्मज्ञानमुच्यते । 'मुनिपुङ्गवशब्देन मननजन्यपरिपाकवत्त्वमेवोच्यते इति तेन गतार्थता' इत्यन्ये । वाग्विदां स्वरूपतोऽर्थतश्च शब्दब्रह्मतत्त्व-विदां पाणिनिपतञ्जल्यादीनां मध्ये वरं श्रेष्ठं, मुनिशब्द उक्तार्थः, तेषु पुङ्गवं श्रेष्ठं नारदं तपस्वी कृच्छ्रचान्द्रायणोपवासादिलक्षणं मुख्यं तपः 'तपो नानशनात् परम्' इति श्रुतेः । स्वाध्यायरूपञ्च तपः, समस्तेन्द्रियाणाम् ऐकाग्र्यरूपं तपः, तद्वान् वाल्मीकिः । वल्मीकस्यापत्यं 'वल्मीकप्रभवो यस्मात् तस्माद् वाल्मीकिरित्यसौ' इति ब्रह्म-वैवर्त्तोक्तेः । वल्मीकप्रभवत्वेन गोणीपुत्रादिवत् गौणमस्य वल्मीका-पत्यत्वम् । गृहीत्वेङ्गसाधुरपत्यार्थः । यद्वा 'वल्मीक इति ऋषिविशेषस्य संज्ञा' इत्याहुः । नारदं नराणामिदं नारं अज्ञानं, तत् द्यति खण्डयति ज्ञानोपदेशेनेति नारदः । 'गायन् नारायणकथां सदा पापभयापहाम् । नारदो नाशयन्नेति नृणामज्ञानजं तमः' इति नारदीयोक्तेः । तं पप्रच्छ इत्यन्वयः । अत्र प्रष्टुरुक्तविशेषणेन दिव्यार्थविषयश्रवणाधि-कारसम्पदुक्ता, वक्तुरपि उक्तविशेषणैः सार्वज्ञ्यादि प्रतिपादितं, ग्रहणधारणहेतु शिष्यानुग्रहशक्तिमत्त्वञ्च प्रतिपादितम् ॥ १ ॥

अथ प्रश्नमभिनयति—को न्विति । नुशब्दो वितर्के, सांप्रतं वर्त्त-मानकाले अस्मिन् लोके भूलोके को नु गुणवान् प्रशस्तबहुगुणवा-नित्यर्थः । भूमप्रशंसादौ मतुप् । अस्यैव प्रपञ्चः, कश्च वीर्य्यवानित्यादि दिव्याङ्गबलादिजशक्तिविशेषेण पराभिभवसामर्थ्यं वीर्य्यं तद्वान्, कश्च श्रौतस्मार्त्तसकलधर्मरहस्यज्ञः, बह्वीमपि अपकृतिमुपेक्ष्य एका-मपि उपकृतिं बह्वीं मन्यते इति कृतज्ञः । सत्यवाक्यः, सर्वावस्था-

चारित्रेण च को युक्तः सर्व्वभूतेषु को हितः ।
विद्वान् कः कः समर्थश्च कश्चैकप्रियदर्शनः ॥ ३ ॥
आत्मवान् को जितक्रोधो द्युतिमान् कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे* ॥ ४ ॥

अपि यथाश्रुतदृष्टतत्त्वार्थवक्ता । दृढव्रतः, आपद्यपि धर्माय परिगृहीतव्रतविशेषस्य त्यागरहितः ॥ २ ॥

चारित्रेणेति । चरित्रमेव चारित्रं । स्वार्थे कण् । वृत्तसम्पद् अनेनोच्यते,—सर्वभूतेषु सर्वप्राणिषु मध्ये कः पुमान् हितः ऐहिकामुष्मिकहितवक्ता अप्रत्युह्यः यत्तु सर्वप्राणिषु सापराधिष्वपि हितकरणशील इति व्याचक्षते तत्तु हितयोगे चतुर्थ्यापत्तेरयुक्तम् । विद्वान्, आत्मानात्मसकलपदार्थतत्त्वज्ञः । समर्थः, लौकिकव्यवहारे प्रजारञ्जनादौ चातुर्य्यं सामर्थ्यं तद्वान् । कामाधिकसौन्दर्य्यवत्त्वेन नित्यसुखरूपत्वेन च एकप्रियं केवलप्रियं दुःखासम्भिन्नप्रियत्ववद् दर्शनं यस्य सः । यत्तु एकं प्रतिप्रियं दर्शनं यस्येति तदयुक्तं, सर्वप्रियत्वस्याप्रतिपादनात् । 'एकः अद्वितीयः स चासौ प्रियदर्शनश्च इत्यर्थः' इति तीर्थः † ॥ ३ ॥

आत्मवानिति । वशीकृतान्तःकरण इत्यर्थः । जितक्रोधः

---

*"सञ्जातकोपात् कस्माच्च देवता अपि बिभ्यति ॥" इति वा पाठः ।

†एकप्रियदर्शनः एकरूपप्रियदर्शनः । लोके हि कस्यचित् दर्शनं कदाचित् प्रियं भवति, कदाचिदप्रियं भवति, अयन्तु न तथा । किन्तु 'क्षणे क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः' इत्युक्तरीत्या सदानुभवेऽपि अपूर्ववद्विस्मयमादधान इत्यन्ये व्याचक्षते ।

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
महर्षे ! त्वं समर्थोऽसि ज्ञातुमेवंविधं नरम् ॥ ५ ॥
श्रुत्वा चैतत् त्रिलोकज्ञो वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ॥ ६ ॥

निन्दाहिंसादिजनकचित्तवृत्तिविशेषरहितः, क्रोधोऽत्र कामादीनामपि उपलक्षणम्। द्युतिः सर्वलोकस्य दिदृक्षाजनको देहकान्तिविशेषः, तद्वान्। अनसूयकः विद्यैश्वर्यादिसम्पत्सु परोत्कर्षासहनमसूया, तद्रहितः। असूयतेः कण्ड्वादियगन्तात् उपतापार्थात् ण्वुल्। संयुगे युद्धकाले जातरोषस्य कस्य रोषात् देवाश्च देवा अपि इन्द्रादयोऽपि। अपिना असुराश्च बिभ्यति अतिनम्रवतोऽस्मानपि अस्य क्रोधः संहरिष्यतीति भयं प्राप्नुवन्तीत्यर्थः। कस्येति सम्बन्धसामान्ये षष्ठी इत्यन्ये। 'कस्य संयुगे कस्माद् बिभ्यति' इति तीर्थः ॥ ४ ॥

एतदिति। उक्तगुणसामान्यापेक्षया नपुंसकं एतद् दिव्यपुरुषगुणजातं कथयसीति श्रोतुमहमिच्छामि। उक्तगुणसामग्र्यस्य एकत्र दुर्लभत्वात् तादृशपुरुषविशेषज्ञाने मे परं सर्वस्मादपि कौतुकान्तरात् उत्कटं कौतुकं वर्त्तते। ननु एवंविधो नरो मयापि दुर्ज्ञेयः इत्याह,—हि यतः महर्षे! अपरोक्षीकृताशेषार्थं त्वं एवंविधमुक्तगुणवन्तं नरं दिव्यपुरुषं ज्ञातुं समर्थोऽसि सर्वलोकप्रसिद्धसामर्थ्योऽसि, तस्मात् त्वत्त एव श्रोतुमिच्छामीति पूर्वेण सम्बन्धः ॥५॥

श्रुत्वेति। एतदुक्तप्रश्नजातम्। त्रिलोकज्ञः भूर्भुवःस्वर्लोकलक्षणान् त्र्यवयवलोकान् तत्रत्यवृत्तान्तं जानातीत्यर्थः। एवं च द्विगुत्वाभावात् न क्लीबम्। नारदः वाल्मीकेरेतत् वचः श्रुत्वा श्रूयता-

बहवो दुर्लभाश्चैव ये त्वया कीर्त्तिता गुणाः ।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ॥ ७ ॥
इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्य्यो द्युतिमान् धृतिमान् वशी ॥ ८ ॥
बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रुनिवर्हणः ।
विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः ॥ ९ ॥

मिति च आमन्त्र्य, एकाग्र्यसिद्धये अभिमुखीकृत्य स्वगतस्य अर्थस्य चिरं प्रतिपिपादयिषितस्य जिज्ञासुलाभेन प्रहृष्टो भूत्वा वक्ष्यमाणं वाक्यमब्रवीत् ॥ ६ ॥

बहव इति । ये बहवो गुणास्त्वया कीर्त्तिता, ते एकत्र प्राकृतपुरुषमात्रे दुर्लभा एव । च पादपूरणे । अथापि हे मुने ! यस्तैर्युक्तः, तं बुद्ध्वा स्मृत्वा अहं वक्ष्यामि; तादृशो नरः श्रूयतां । प्राप्तकाले लोट् । तस्य श्रवणं ते प्राप्तकालमित्यर्थः ॥ ७ ॥

इक्ष्वाकिति । इक्ष्वाकुवंशात् प्रभवः आविर्भावो यस्य स तथा । रामो नाम राम इति नाम्ना प्रसिद्धः जनैश्च श्रुतः अस्ति । तस्मिन्नेव एकत्र सर्वे त्वत्पृष्टगुणा अन्ये च गुणा इति शेषः । तच्चेदं यौगिकं नाम, रमन्ते योगिनोऽस्मिन् । यद्वा रमयति लोकानिति यौगिकत्व प्रदर्शनात् तथान्ते नारकपुरुषादिवत् अन्येषामपि इष्यत इति दीर्घः । तानेव गुणानाह, नियतात्मा निगृहीतान्तःकरणः । वीर्य्यं व्याख्यातम् । द्युतिः कान्तिः, आपत्स्वप्यदोऽविहतचित्तस्य धृतिः, सदाम् । वशी जिताशेषवहिरिन्द्रियः ॥ ८ ॥

बुद्धिमानिति । प्रशस्तबुद्धिः बुद्धेः प्राशस्त्यं च सकृत् गृहीताविस्म

महोरस्को महेष्वासो गूढजत्रुररिन्दमः।
आजानुबाहुः सुशिराः सुललाटः सुविक्रमः ॥ १० ॥

स्यावापोद्वापादिशक्तिमत्त्वं सर्वत्र प्रशंसायां मतुप्। नीतिः कामन्दकादिप्रसिद्धराजनीतिः, तद्वान् तज्ज्ञाता, वाग्मी प्रशस्तवाक्, श्रीमान् सर्वातिशायि-शोभैश्वर्यादियुक्तः, यद्वा 'ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्' इत्युक्तश्रौतश्रीमान्। शत्रूणां बाह्यान्तराणां निबर्हणः नाशकर्त्ता। बाहुलकात् कर्त्तरि ल्युट्। विपुलांस इत्यादिना सामुद्रिकलक्षणं कथ्यते, विपुलौ मांसलोन्नतौ अंसौ भुजशिरसी यस्य सः। 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इति कोषः। अस्य सुलक्षणत्वं च वररुचिनोक्तम्,—'कक्षः कुक्षिश्च वक्षश्च घ्राणस्कन्धौ ललाटिका। सर्वभूतेषु निर्दिष्टा उन्नतास्ते सुखप्रदा' इति। महाबाहुः। आन् महत इति आत्वम्। 'शिरो ललाटश्रवणे ग्रीवा वक्षश्च हृत् तथा। उदरं पाणिपादश्च पृष्ठं दश महत् सुखम्' इति शास्त्रे अस्य सुलक्षणत्वमुक्तम्। कम्बुग्रीवः, कम्बुवत् रेखात्रयविशिष्टग्रीवः। महाहनुः मांसलकपोलापरभागः। 'पूर्णमांसलहनुस्तु भूपतिः' इति संहिता ॥९॥

महोरस्क इति। महत् विशालमुरो यस्य सः, 'उरः शिरो ललाटश्च' इत्युपक्रम्य 'विशालास्ते सुखप्रदाः' इत्युक्तेः। महेष्वासः, महान् इष्वासो धनुर्यस्य; गूढजत्रुः, गूढे मांसलत्वात् निमग्ने जत्रुणी वक्षोंऽससन्धिगते अस्थिनी यस्य; अरिन्दमः निजभक्तानामरीन् कामादीन् निजभक्तान्तरायकर्तृपापानिव दमयति इत्यरिन्दमः, यद्वा अरिन्दम इति राज्ञोऽन्वर्थसंज्ञा, धनञ्जय इतिवत्।

समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः ॥ ११ ॥

आजानुबाहुः जानुपर्यन्तदीर्घबाहुः । 'दीर्घभुजबाहुमुष्कश्च चिरं जीवी धनी नरः' इति शास्त्रे । सुशिराः 'समवृत्तशिराश्चैव छत्राकारशिरास्तथा एकच्छत्रां महीं भुङ्क्ते दीर्घमायुश्च विन्दति' इति नारदः । सुललाटः रेखाधिकललाटः । 'ललाटे यस्य दृश्यन्ते चतुस्त्र्येकरेखिकाः । शतद्वयं शतं षष्टिः तस्यायुर्विंशतिस्तथा' इति कात्यायनः । सुविक्रमः गजसिंहादिगतिसदृशगतिः, विक्रमः पादविक्षेपः । 'सरोगतिश्च नाभिश्च गम्भीरः स प्रशस्यते' इति शास्त्रे ॥ १० ॥

सम इति । समः नातिदीर्घो नातिह्रस्वः 'षण्णवत्यङ्गुलोत्सेधो यो मांशः स दिवौकसाम्' इत्युक्तेः । समानि अन्यूनानधिकपरिमाणानि विभक्तानि पृथग्भूतानि अङ्गानि अवयवा यस्य सः । 'भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ । कूर्परौ मणिबन्धौ च जानुनी वृषणौ कटी । करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः' इत्युक्तेः । स्निग्धवर्णः स्निग्धश्यामलवर्ण इत्यर्थः । 'स्निग्धेन्द्रनीलवर्णस्तु भोगं विन्दति पुष्कलम्' इत्युक्तेः । प्रतापः स्मृतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । 'प्रतापौ पौरुषातपौ' इति कोशः । पीनवक्षाः मांसलसमोन्नतवक्षाः । विशालाक्षः विस्तृतायतनेत्रः । 'नासिका चक्षुषी कर्णौ यस्यायतौ' इत्युक्तेः । लक्ष्मीवान् सीताख्यलक्ष्मीश्रीमान्, सर्वावयवसौन्दर्यवान् वा । मोपधत्वाद् वत्वम् । एवमुक्तरीत्या शुभानि सामुद्रिकशास्त्रोक्तानि लक्षणानि यस्य स शुभलक्षणः ॥ ११ ॥

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥ १२ ॥
प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ॥ १३ ॥

धर्मज्ञ इति । सत्या अमोघाः, सन्धा 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ।' इत्यादिरूपिणी प्रतिज्ञा यस्य । यशस्वी रावणवधादिना दिव्ययशाः । ज्ञानसम्पन्नः ब्रह्मज्ञानपरिपूर्णः, अतएव जटायुषं प्रति—'मया त्वं समनुज्ञातो गच्छ लोकान् अनुत्तमान्' इत्युक्तिः सङ्गच्छते; ब्रह्मज्ञस्यैव ब्रह्मोपदेशे अधिकारात् विना ब्रह्मोपदेशं अनुत्तमलोकप्राप्त्यसम्भवात् । न विद्यन्ते उत्तमा येभ्यस्ते अनुत्तमाः । 'आत्मानं मानुषं मन्ये रामो दशरथात्मजम्' इत्यादि वचस्तु मायामात्रमिति अन्यत्र विस्तरः । शुचिः प्रातःस्नानादिना प्राणायामाभ्यासादिना प्रत्याहारादिजन्यरागद्वेषहानेन च मायिकशरीरत्वाच्च नित्यं वाह्यान्तरशुद्धः । वश्यः पित्राचार्य्यदेवेषु विनीतः । समाधिमान् निजतत्त्वसमाधिमान् * ॥ १२ ॥

प्रजापतीति । प्रजापतिसमः, यद्यपि रामो ब्रह्मैव, तथापि मानुषधर्माणां शोकमोहादीनां मायिकानां तत्र दर्शनेन औपाधिकभेदमादाय तत्समत्वोक्तिः । भार्गवलोकप्रतिबन्धरूपात् जटायुर्मोक्षप्रदानरूपात् स्वेन सह सर्वायोध्यावासिजनस्य शरीरस्य ब्रह्मलोकनयनरूपाच्च कारणात् तत्समत्वं, सर्वथा सतत्त्वस्यैवेह-

(*) समाधिः आश्रितरक्षणचिन्ता, तद्वान् । इति केचित् ।

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥ १४ ॥
सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ॥ १५ ॥

षेषु योग्यत्वात् । श्रीमानिलेयनादीनां पौनःपुन्यं सकलैश्वर्यादिमत्त्वबोधनार्थं धाता पितेव सर्वप्रजाधारणपोषणसामर्थ्ययुक्तः, रिपुनिषूदनः आश्रितजनरिपुनाशकः कामादिरिपुनाशकश्च, अन्यथा जगद्दौर्भाग्यतो विदोषाभावेन एतद्विशेषणासङ्गतिः स्यात् । बाहुलकात् कर्त्तरि तृन् । जीवलोकस्य प्राणिसमूहस्य सकलव्यवहारप्रवर्त्तकत्वेन रक्षिता धर्मस्य वर्णाश्रमधर्मस्य मर्यादापरिपालनद्वारा रक्षिता ॥ १३ ॥

रक्षितेति । स्वस्य धर्मस्य यज्ञाध्ययनदानदण्डयुद्धादिरूपस्य रक्षिता सादरमनुष्ठाता, स्वजनस्य स्वभक्तजनस्य अवश्यम्भाविनोऽपि अनिष्टस्य निरासपूर्वकं परमेष्टमोक्षदानेन रक्षिता, यथाम्बरीषप्रह्लादध्रुवादीनां रक्षणेन प्रसिद्धमेव, वेदानां ऋग्यजुःसामाथर्वणां छन्दःकल्पव्याकरणज्योतिषनिरुक्तशिक्षारूपवेदाङ्गानां तत्त्वज्ञः पाठतोऽर्थतश्च ज्ञाता शस्त्रास्त्रादिप्रतिपादकं शास्त्रं धनुर्वेदः, तस्मिन् निष्ठितः सम्यक् तज्ज्ञाता ॥ १४ ॥

सर्वेति । सांख्ययोगतर्कपूर्वोत्तरमीमांसासूत्राणि तद्व्याख्यानानि शास्त्राणि स्मृतय उपस्मृतयश्च तत्त्वार्थशासकत्वात् शास्त्रं, सर्वमूलशब्दशासकत्वात् व्याकरणञ्च शास्त्रं तथैव कामन्दकादीनाम् अपि नीतिशास्त्राणि सर्वेषाम् एषाम् अर्थतत्त्वज्ञः, स्मृतिमान् ऊहाधीतवेद-

सर्व्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः ।
आर्य्यः सर्व्वसमश्चैव सदैव प्रियदर्शनः ॥ १६ ॥
स च सर्वगुणोपेतः कौशल्यानन्दवर्द्धनः ।
समुद्र इव गाम्भीर्य्ये धैर्य्येण हिमवानिव ॥ १७ ॥

शास्त्रार्थविस्मरणरहितः । प्रतिभानवान्, व्यवहारकाले श्रुतस्य अश्रुतस्य च उचितार्थस्य शीघ्रं प्रतिभासः प्रतिभानं, तद्वान् । तदुक्तं,—'प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः' इति । सर्वलोकप्रियः इष्टस्सर्व्वलोकानाम् इहामुत्र हितावहः । साधुः मृदु-मधुरस्वभावः । अदीनात्मा, सहजासाधारणगाम्भीर्य्यभावेन अदीन-स्वभावः अतिव्यसनपरम्परायामपि अक्षुभितान्तःकरणो वा । विच क्षणः, यथोचित-लौकिकालौकिक-सर्वक्रियासु कुशलः ॥ १५ ॥

सर्वदेति । सर्वदा होमदेवपूजासभाधिष्ठानकालेषु तत्तत्-कालोचितैः सद्भिः सात्त्विकस्वभावैः पुरोहितद्विजमन्त्रिप्रधानादिभिः सिन्धुभिः नदीभिः समुद्र इव अधिगतः सेवितः, यद्वा सद्भिर्भक्तैः सदा सेवितः भगवत्सेवायां कालनियमाभावात् दृष्टान्तेन तं प्राप्तानां सतां भक्तानां तेन सह ऐक्यं ध्वनयति, आर्य्यः सर्वपूज्यः सर्वेषु सुखदुःखोदर्केषु समः हर्षविषादरहितः, शत्रुमित्रोदासी-नेषु वैषम्यरहितः, तत्तत्कर्मानुरूपफलदाता इत्यर्थः इत्यन्ये । स-दैव सर्वावस्थासु मुहुर्मुहुरनुभवेऽपि अननुभूतपूर्ववत् विस्मयनीय-दर्शनः ॥ १६ ॥

स चेति । स रामः सर्वः गुणैर्युक्तः कर्मैः स्वकमायैव कौशल्या-नन्दवर्द्धनत्वेन महाकुलप्रसूतत्वप्रधानमहिषीपुत्रत्वादिस्वरूपाभिव्य-

विष्णुना सदृशो वीर्य्ये सोमवत् प्रियदर्शनः ।
कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः ॥ १८ ॥
धनदेन समस्त्यागे सत्ये धर्म्म इवापरः ।
तमेवं गुणसम्पन्नं रामं सत्यपराक्रमम् ॥ १९ ॥

केचित्तु धर्मस्य सत्ता दर्शिता । गाम्भीर्य्यमगाधाशयत्वं तत्र समुद्र-तुल्यः * धैर्य्यं मनसाप्यधृष्यत्वम् इष्टवियोगादौ अनभिभूतचित्तत्वं च । रणे अचलतया सहायाभावेऽपि स्थितिश्च तेन हिमवत्-सदृशः ॥ १७ ॥

विष्णुनेति । यद्यपि रामो विष्णुरेव सर्वरूपश्च, तथापि मानुषो-पाधिभेदात् सर्वत्र सादृश्यं द्रष्टव्यम्, यद्वा विष्णुना सदृश इति अन-न्वयालङ्कारः । चन्द्रवत् प्रजाव्यवहारनिरीक्षणकाले सौम्यदर्शनः । क्रोधे युद्धकालिके कालाग्निसदृशः परैरधृष्य इति यावत् † । क्षमा प्रतिकारसामर्थ्येऽपि अपकारसहिष्णुता, तया पृथिवी-तुल्यः ॥ १८ ॥

धनदेति । त्यागे धनत्यागे धर्मार्थधनव्ययविषये अपेक्षितधन-सम्पत्तौ धनदेन नवनिधीशेन समः । अस्मिन्नेवांशे उपमा, न तु त्यागांशे ; तस्य धनसंग्रह एव प्रवृत्तेः । धनव्ययव्यवहारस्तु कतिपय-

---

(*) गाम्भीर्य्यं नाम स्वान्तर्गतपदार्थाप्रकाशकत्वं, यथा समुद्रः स्वान्तर्गतं रत्नादिम् अप्रकाशयन्नेव वर्त्तते तथाऽयमपि स्वीयं परत्वं अप्रकटयन्नेवास्ते इत्यर्थः । इति केचित् ।

(†) स्वविषयापराधमेव स्वयं सहते स्वभक्तापराधकारके तु अयमयम इव कोपमावहतीत्यर्थः । इति केचित् ।

ज्येष्ठं श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतम् ।
प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया ॥ २० ॥
यौवराज्येन संयोक्तुमैच्छत् प्रीत्या महीपतिः ।
तस्याभिषेकसम्भारान् दृष्ट्वा भार्य्याथ कैकयी ॥ २१ ॥

भिदश्रेभ्यो भगवदाज्ञया कतिपयधनदानमाचारादिति बहवः * । सत्ये सत्यवचने अपरो धर्म इव, धर्मस्य मूर्त्यन्तरमिवेत्युत्प्रेक्षा । एतदन्तं बालकाण्डीयार्थसंग्रहः । तमेवमित्यादिना अयोध्या-काण्डीयार्थसंग्रहः आरभ्यते । तत्र इक्ष्वाकुवंशप्रभव इत्यनेन भगवदाविर्भावः सूचितः । महावीर्य्यः धनुर्निबर्हण इत्यनेन विश्वामित्रानुग्रहज-ब्रह्मास्त्रसम्पत्ति-ताड़कावधादि सूचितम् । लक्ष्मी-वानित्यनेन सीतापरिणयः सूचितः । सत्यपराक्रममित्यनेन भार्गव-लोकप्रतिबन्धादि सूचितम् । एवं गुणसम्पन्नं प्रागुक्तरीत्या सकल-कल्याणगुणयुक्तं सत्यपराक्रमम् अमोघपराक्रमम् ॥ १९ ॥

ज्येष्ठमिति । श्रेष्ठगुणैः यौवराज्याभिषेकार्हगुणैर्युक्तं प्रकृतीनां प्रजानां हितैः इहामुत्र हितावहैः युक्तं ज्येष्ठं सुतं रामं प्रकृतिप्रियकाम्यया प्रकृतीनां प्रियं कर्त्तुमिच्छया । काम्यचः काम्यजिति प्राप्तः । प्रकृतिसम्बन्धेन आत्मनः प्रियं कर्त्तुमिच्छया युवराजेन हि प्रजाकृत्ये सम्पादिते सति व्यवहारादिनिरीक्षणा-जन्यश्रमनिवृत्तिरूपं प्रियं स्वस्य भवतीति वयम् ॥ २० ॥

यौवराज्येनेति । युवराजस्य भावो यौवराज्यं, पितरि राज्यं

(*) धनं ददतीति धनदाः, धनदातारः तेषां इना अधिपतयः चिन्तामणिकल्पवृक्षप्रभृतयः, तैः समः । इति केचित् ।

पूर्वं दत्तवरा देवी वरमेनमयाचत ।
विवासनञ्च रामस्य भरतस्याभिषेचनम् ॥ २२ ॥
स सत्यवचनाद्राजा धर्म्मपाशेन संयतः ।
विवासयामास सुतं रामं दशरथः प्रियम् ॥ २३ ॥

कुर्वत्येव सर्वराज्यव्यापारे अभिषेकपूर्वमधिकृतः पुत्रो युवराजः। संयोक्तुं योजयितुं महीपतिर्दशरथः ऐच्छत्। अथ तस्य रामस्य यौवराज्याभिषेके अपेक्षितान् सम्भारान् 'औदुम्बर्यासन्दीतस्यै प्रादेशमात्राः पादाः स्युः' इत्यादिना बह्वृचब्राह्मणेन उपदिश्यमानान् दधिमधुसर्पिरादीन् संभृतान् दृष्ट्वा मन्थरावचनात् ज्ञात्वा कैकयी राज्ञः कनीयसी भार्य्या। अत्र कैकयीत्येव यद्यपि केकयशब्दाद् अञि केकयमित्रयुप्रलयानामित्यादिना यादेरियादेशे गुणे आदिवृद्धौ ङीपि यस्येति लोपे साधु, तथापि 'अपि माषं मषं कुर्य्यात् छन्दोभङ्गं न कारयेत्' इति न्यायेन कैकयीति प्रयोगः। पुंयोगलक्षणे ङीपि केकयीति पाठ इत्यन्ये। पूर्वं पूर्वस्मिन् काले इन्द्रसहायार्थं प्रवृत्तदशरथस्य दैत्यैर्युद्धकाले दशरथे परप्रयुक्तामासुरीं मायां शम्बराङ्कमुनिदत्तविद्यया निवारयित्र्यै कैकेय्यै तुष्टेन दशरथेन दत्तौ वरौ यस्यै, सा देवी सैव राज्याभिषेकसमये प्राप्ताभिषेका देवी तद्वत् प्रियतमा एवं वक्ष्यमाणप्रकारं वरं प्राप्तकालत्वादयाचत राजानं याचेर्द्विकर्मकत्वात् वरद्वयमाह,—रामस्य राज्यादुद्वासनं, भरतस्य स्वपुत्रस्य अभिषेचनम् ॥ २१ ॥ २२ ॥

स इति। सत्यवचनात् धर्मपरनिर्देशेन सत्यप्रतिज्ञत्वादित्यर्थः।

स जगाम वनं वीरः प्रतिज्ञामनुपालयन् ।

पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात् ॥ २४ ॥

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह ।

स्नेहाद् विनयसम्पन्नः सुमित्रानन्दवर्द्धनः ॥ २५ ॥

भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् ।

रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥ २६ ॥

अतो हेतोः सत्यरूपेण धर्मपाशेन संयतः बद्धः सन् दशरथः प्रियं सुतमपि विवासयामास ॥ २३ ॥

स इति । वीरः अनेकैरपराङ्मुखतया योद्धापि स रामः पितुः प्रतिज्ञां सत्यतया स्वविवासनेन अनुपालयन्, यद्वा कैकेयी-सन्निधौ पितृवचनपरिपालनविषयां स्वकृतां प्रतिज्ञां परिपालयन्, पितृवचनकृतात् निर्देशात् आज्ञातः । मातुश्च कैकेय्याः प्रिय-कारणात् प्रियसिद्धिनिमित्तं वनं जगाम । अनेन 'पितृ-तत्पत्नी-सन्तोषकरणमेव सर्वात्मना पुत्रस्य धर्मः' इति भगवता उप-दिष्टम् ॥ २४ ॥

तमिति । व्रजन्तं तं भ्रातरं, प्रियः रामे सहजप्रीतिमान् भ्रातुः रामस्य दयितः प्रियः सौभ्रात्रं सुभ्रातृभावं स्नेहमिति यावत् । स्नेहादेव जगाम, न पित्रादिनिर्देशादिति भावः । अथ रामस्य दयिता इष्टा प्राणसमा निरतिशयप्रेमास्पदा हिता नित्यं हितकरी जनकस्य कुले अन्वये जाता, अयोनिजा, तथापि सौरध्वजस्य देवयजनशाकुन्तपक्षालाभिर्भूतला-देवमर्त्तिः । अतएवाह देवमायेवेति । सैव पश्चिमोदयविनि-

जनकस्य कुले जाता देवमायेव निर्मिता।

सर्वलक्षणसम्पन्ना नारीणामुत्तमा बधूः ॥ २७ ॥

सीताप्यनुगता रामं शशिनं रोहिणी यथा *।

पौरैरनुगतो दूरं पित्रा दशरथेन च ॥ २८ ॥

शृङ्गवेरपुरे सूतं गङ्गाकूले व्यसर्जयत्।

गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥ २९ ॥

तथा देवैरेव स्वकार्य्यसिद्ध्याकाङ्क्षिभिः निर्म्मिता आविर्भाविता। यद्वा इवशब्द एवार्थे, देवेन भगवता आविर्भाविता स्वमायैव, भगवतोऽनाद्यन्ता सर्वकार्य्यसहायभूता सहजशक्तिरेव हि माया। यत्तु तिलोत्तमादिवत् देवमायेव स्थितेति तन्न निर्म्मितपदवैयर्थ्यापत्तेः †। सर्वैः स्त्रीलक्षणैः सम्पन्ना युक्ता सीतेति। सीता लाङ्गलपद्धतिः, तदुत्थत्वात् सीतां शशिनं रोहिणीव राममनुगता ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

शृङ्गेति। गङ्गाकूले वर्त्तमाने शृङ्गवेरपुरे स्थितं निषादाधिपतिं प्रियम् इष्टं गुहम् आसाद्य ततसहितो लक्ष्मणादिसहितश्च रामः सूतं रथेन स्वप्रापणार्थमागतं गङ्गाकूले व्यसर्जयत् परावर्त्तितवान् ॥ २९ ॥

(*) "वभौ सानुगता रामं निशाकरमिव प्रभा।" इति वा पाठः।

(†) असुरव्यामोहनार्थं अमृतविनियोगसमये सन्निर्मिता देवस्य विष्णोः माया इव। इति तीर्थः।

गुहेन सहितो रामो लक्ष्मणेन च सीतया ।
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ॥ ३० ॥
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् ।
रम्यमावसथं कृत्वा रममाणा वने त्रयः ॥ ३१ ॥
देवगन्धर्वसङ्काशास्तत्र ते न्यवसन् सुखम् ।
चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ॥ ३२ ॥
राजा दशरथः स्वर्गं जगाम विलपन् सुतम् ।
गते तु तस्मिन् भरतो वशिष्ठप्रमुखैर्द्विजैः ॥ ३३ ॥

गुहेनेति पूर्वार्द्धं पूर्वश्लोकान्वयि । अथ ते सीतारामलक्ष्मणाः वनेन पुरोवर्त्तिग्रामवनद्वारेण वनं अपरं वनं गत्वा । ते वनं पादचाराः तेन वनं गत्वा इत्यर्थः इति सम्प्रदायः * ॥ ३० ॥

चित्रेति । अनु पश्चात् भरद्वाजस्य शासनात् चित्रकूटं प्राप्य तत्र रम्यम् आवसथं पर्णशालां कृत्वा तत्र वने रममाणा त्रयः देवगन्धर्वसदृशाः सुखं न्यवसन् इत्यन्वयः ॥ तदा पुत्रशोकातुरः अनिर्वार्य्यपुत्रवियोगजन्यशोकपीड़ितः ॥ ३१ ॥ ३२ ॥

राजेति । तस्मिन् दशरथे गते लोकान्तरं गते मृते वशिष्ठाद्यैर्द्विजैस्त्रैवर्णिकैः इदमुपलक्षणं तत्सहितैर्मन्त्रिवृद्धैरित्यपि बोध्यम् । राज्याय राज्यं कर्त्तुं तैर्नियुज्यमानः प्रेर्य्यमाणः महाबलः समर्थोऽपि सौभ्रात्रात् राज्यं नैच्छत्, ततः रामपादप्रसादकः पूज्यं

(*) अवनेनेति पदच्छेदः, लोकरक्षणहेतुनेत्यर्थः । इति केचित् ।

नियुज्यमानो राज्याय नैच्छद् राज्यं महाबलः।
स जगाम वनं वीरो रामपादप्रसादकः ॥ ३४ ॥
गत्वा तु स महात्मानं रामं सत्यपराक्रमम्।
अयाचद् भ्रातरं राममार्य्यभावपुरस्कृतः ॥ ३५ ॥

रामं प्रसादयितुं वनं जगाम। पादशब्दः पूज्यवाची ॥ ३३ ॥ ३४ ॥

गत्वेति। स भरतः महात्मानं सत्यप्रतिज्ञत्वादिधर्म्मैः महानुभवं भ्रातरं रामं गत्वा आर्य्यभावपुरस्कृतः विनीतवेषः तं रामं राज्याय प्रतिनिवृत्तिं अयाचत, याचेर्द्विकर्मकः ॥ ३५ ॥

ननु पितृमातृदत्तराज्यं तवैव योग्यमिति मम प्रतिनिवृत्तिरनुचिता; इत्यत आह,—त्वमेवेति। सर्वगुणश्रेष्ठे ज्येष्ठे सति कनिष्ठो न राज्यार्ह इति धर्मं त्वमेव जानासीति त्वमेव राजा इति वचो राममब्रवीत्। रामोऽपि रमयतीति व्युत्पत्त्या आश्रितचित्तरञ्जकोऽपि पितुरादेशात् राज्यं नैच्छदित्युत्तरेणान्वयः, अत्र हेतुगर्भं विशेषणम्। परमोदारः स्वसुखसाधनस्य परस्मै दानमौदार्य्यम्, तद्युतः सुमुखः राज्यादपि वने अम्लानाभ्यधिकमुखप्रसादयुक्तः सुमहायशाः 'प्रतिज्ञापालनजन्ययशोभङ्गभिया नैच्छत्' इति कतकव्रतः। तीर्थस्तु 'परमोदारः याचकाभीष्टप्रदाननिरतः अर्थिलाभेन प्रसन्नमुखः, सुमहायशाः अर्थवैमुख्येन प्रसिद्धकीर्त्तिरपि पितुराज्ञयैव भरतवाक्यं नैच्छत' इत्याह *। ततः अस्य भरतस्य राज्याय

(*) च शब्दात् तदवसाने तु ऐच्छत् इत्यर्थः, तथाच विप्रतेवैफल्यं नास्तीति भावः। इति केचित्।

त्वमेव राजा धर्मज्ञ इति रामो वचोऽब्रवीत् ।
रामोऽपि परमोदारः सुमुखः सुमहायशाः ॥ ३६ ॥
न चैच्छत् पितुरादेशात् राज्यं रामो महाबलः ।
पादुके चास्य राज्याय न्यासं दत्त्वा पुनः पुनः ॥ ३७ ॥
निवर्त्तयामास ततो भरतं भरताग्रजः ।
स काममनवाप्यैव रामपादावुपस्पृशत् ॥ ३८ ॥ ३८ ॥
नन्दिग्रामेऽकरोद् राज्यं रामागमनकाङ्क्षया ।
गते तु भरते श्रीमान् सत्यसन्धो जितेन्द्रियः ॥ ३९ ॥

राज्यलक्षणसामर्थ्यं लब्धुं अहल्यादौ दृष्टशक्तिकाचिन्त्यवैभवस्व-पदस्पृष्टे पादुके न्यासरूपेण दत्त्वा पुनः पुनः प्रतिनिवृत्तिं याचमानं भरतं चतुर्दश समानन्तरं सर्व्वथा प्रतिनिवर्त्तितव्यमित्यभ्युपेत्य निवर्त्तयामास । अस्येति राज्यापेक्षया षष्ठी, दत्त्वेत्यत्र अस्मै इत्यर्थसम्भ्रमम् । दत्त्वेत्यन्वयेऽपि सम्प्रदानस्य शेषत्वविवक्षया षष्ठीत्यन्ये, ननु निक्षेपे मुख्यदानाभावान्न चतुर्थी दत्त्वेत्यन्वयेऽपीति तन्न, खण्डिकोपाध्यायः तस्मै चपेटां ददातीति महाभाष्यप्रयोगविरोधात् । स भरतः रामप्रतिनिवृत्तिरूपं काममनवाप्यैव रामपादौ नमस्कुर्वन् प्रतिनिवृत्त इति शेषः ॥ ३६ ॥ ३७ ॥ ३८ ॥

नन्दिग्रामे इति । ततो नमस्कृत्य प्रतिनिवृत्तः नन्दिग्रामे स्थित्वा रामश्चतुर्दशसमाख्यप्रतिज्ञातसमयानन्तरं राज्याय आगमिष्यति इति रामागमनाकाङ्क्षया पादुके पुरस्कृत्य राज्यमकरोत् । उत्तरार्द्धं स्पष्टम् ॥ ३९ ॥

रामस्तु पुनरालक्ष्य नागरस्य जनस्य च।
तत्रागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥ ४० ॥
प्रविश्य तु महारण्यं रामो राजीवलोचनः।
विराधं राक्षसं हत्वा शरभङ्गं ददर्श ह ॥ ४१ ॥
सुतीक्ष्णञ्चाप्यगस्त्यञ्च अगस्त्यभ्रातरं तथा।
अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ॥ ४२ ॥

राम इति। उक्तगुणविशिष्टो रामस्तु अत्यासन्नतया नागरस्य मन्त्रिवृद्धादिपौरजनस्य भरतस्य च तत्र चित्रकूटे आगमनमालक्ष्य सम्भाव्य तेषां निवर्त्तनप्रयासात् वरम् इतोऽपि दूरगमनमिति संचिन्त्य दण्डकान् दण्डकारण्यानि अवान्तरवनबहुत्वात् बहुवचनं तेषां रक्षोघोरादिभूयिष्ठत्वादेकाग्रः सज्जो भूत्वा प्रविवेश, हेति प्रसिद्धौ ॥४०॥

प्रविश्येति। महारण्यमिति आरण्यकाण्डकथासंग्रहः। राजीवं पद्मं अनेन राक्षसयुद्धारम्भहृतहर्षो ध्वनितः। शरभङ्गाद्या ऋषयः ॥ ४१ ॥

सुतीक्ष्णमिति। चापीति निपातसमुच्चयः पद्यपूरकः अगस्त्यभ्राता इध्मवाहनो नाम, इति केचित्। 'ततो मुनेरगस्त्यस्य भ्राताऽगस्त्य इति श्रुतः, स चिन्वन् कानने वन्यं सखीभिः कौपितोऽशपत्' इति मार्कण्डेयपुराणे श्रूयते *। दिव्यं धनुरादिकं कार्य्याय प्रतिसृष्टवाके-त्यैवंरूपादगस्त्यवचनात् ऐन्द्रं इन्द्रादगस्त्यस्यागतं शरासनं धनुः जग्राह। पूर्वं भार्गवं जित्वा ततः प्राप्तं यद् वैष्णवं धनुर्भार्गवसा

(*) अगस्त्यभ्राता सुदर्शनाख्यः; तदुक्तं सनत्कुमारसंहितायाम् अगस्त्येन—'यवीयानेव मे भ्राता सुदर्शन इति स्मृतः'।

खड्गञ्च परमप्रीतस्तूणी* चाक्षयसायकौ ।

वसतस्तस्य रामस्य वने वनचरैः सह ॥ ४३ ॥

ऋषयोऽभ्यागमन् सर्वे वधायासुररक्षसाम् ।

स तेषां प्रतिशुश्राव राक्षसानां तदा वने ॥ ४४ ॥

प्रतिज्ञातस्य रामेण वधः संयति रक्षसाम् ।

ऋषीणामग्निकल्पानां दण्डकारण्यवासिनाम् ॥ ४५ ॥

रामेण वरुणे न्यस्तं सत् इन्द्रेण वरुणाद् आनीयागस्त्ये स्थापितमित्यर्थे आरण्यकाण्डे स्फुटम् । यदा इन्द्रो विष्णुः ॥ ४२ ॥

खड्गञ्चेति । अनुरूपनिजायुधलाभात् परमप्रीतः, अक्षयाः सायकाः वाणाः ययोः तौ, तूणी इषुधी, वनचरैः वानप्रस्थैः ॥ ४३ ॥

ऋषय इति । तद्वने वसतो रामस्यान्तिकं असुराः कबन्धादयः रक्षांसि खरादयः तेषां वधाय वधं प्रार्थयितुं सर्वे ऋषयः अभ्यागमन् । स रामः तेषां राक्षसानां वधं तस्मिन् वने तेभ्यो ऋषिभ्यः प्रतिशुश्राव ; प्राप्तकालम् असुररक्षो योधयिष्ये नोपेक्षे इति तद्वचोऽङ्गीकृतवान् इत्यर्थः ॥ ४४ ॥

प्रतिज्ञात इति । अग्निकल्पानां अग्निसदृशानां ऋषीणां सन्निधाविति शेषः, अपेक्षित इति वा शेषः । संयति युद्धे अचिन्त्यामितनिजशक्तिवैभवात् रक्षसां वधः प्रतिज्ञातश्चेति सम्बन्धः ॥ ४५ ॥

(*) तूणिरिति योगरूढ़ इकारान्तपुंलिङ्गशब्दः, "अच इः" इति उणादिसूत्रेण कविः पविः रविः सखिः इत्यादिवत् अकारान्ततूणधातोः इप्रत्ययेन सिद्धः । तूणिशब्दस्तु कस्मिन्नपि प्रचलितेऽभिधाने न दृश्यते ।

तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥ ४६ ॥
ततः शूर्पणखावाक्याद् उद्युक्तान् सर्वराक्षसान् ।
खरं त्रिशिरसं चैव दूषणञ्चैव राक्षसम् ॥ ४७ ॥
निजघान रणे रामस्तेषां चैव पदानुगान् ।
वने तस्मिन् निवसता जनस्थाननिवासिनाम् ॥ ४८ ॥
रक्षसां निहतान्यासन् सहस्राणि चतुर्दश ।
ततो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्च्छितः ॥ ४९ ॥

तेनेति । तेन रामेण तत्रैव दण्डकारण्यदक्षिणप्रदेशवर्त्तिपञ्चवट्याश्रमे, जनस्थानं नाम दण्डकारण्ये रावणबलनिवेशस्थानं, कामरूपिणी इच्छया नानारूपधारिणी यद्वा पुंसां काम्यमानरूपवती विरूपिता कर्णनासाच्छेदेन वैरूप्यं प्रापिता शूर्पणखेत्यत्र नखमुखात् संज्ञायाम् इति ङीप्निषेधः । पूर्वपदात् संज्ञायाम् इति णत्वम् । विगतं रूपं विरूपं तत्सञ्जातमस्या इति तारकादित्वाद् इतच् ॥ ४६ ॥

तत इति । ततः तद्वैरूप्यकरणानन्तरं सर्वराक्षसान् जनस्थाननिवासिन इति शेषः । उद्युक्तान् युद्धार्थं सन्नद्धान् ॥ ४७ ॥

पदानुगान् अनुचरान् निवसता रामेणेति शेषः । उभयश्लोकान्वयि ॥ ४८ ॥

रक्षसामिति । चतुर्दशसहस्राणि तत्संख्याकानि तेषामिति शेषः । ज्ञातयः खरादयो हि रावणस्य वैमात्रेयाः श्रुत्वा शूर्पणखामुखात् इति शेषः । मूर्च्छितः व्याप्तः ॥ ४९ ॥

सहायं वरयामास मारीचं नाम राक्षसम् ।
वार्य्यमाणः सुबहुशो मारीचेन स रावणः ॥ ५० ॥
न विरोधो बलवता क्षमो रावण तेन ते ।
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ॥ ५१ ॥
जगाम सहमारीचस्तस्याश्रमपदं तदा ।
तेन मायाविना दूरमपवाह्य नृपात्मजौ ॥ ५२ ॥
जहार भार्य्यां रामस्य गृध्रं हत्वा जटायुषम् ।
गृध्रञ्च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीम् ॥ ५३ ॥

क्रोधेन व्याप्तः स रावणः मारीचेन बहुशः बहुवारं परदाराभिमर्शनस्य परमाधर्मत्वं बलवद्विरोधस्य निजनाशान्तत्वम्, अतस्तेन रामेण बलवता विश्वामित्राश्रमे मदनुभूतबलेन सह तव विरोधो न क्षमो युक्तः न हितश्च, इति वार्य्यमाणोऽपि मारीचं नाम प्रसिद्धं राक्षसं सीताहरणे सहायं वरयामास, वृञ् वरणे इति स्वार्थे णिजन्तोऽपि ॥ ५० ॥

नेति पूर्वार्द्धं पूर्वान्वयि । कालचोदितः मृत्युप्रेरितः रावणस्तद्वाक्यं मारीचवाक्यन्तु अनादृत्य ॥ ५१ ॥

सहमारीचः मारीचसहितः। वोपसर्जनस्येति विकल्पात् सहस्य सादेशाभावः । तस्य खरादिहन्तृत्वेन प्रसिद्धस्य रामस्य आश्रमपदम् आश्रमस्थानं जगाम । ततस्तेन मायाविना मारीचेन तौ नृपात्मजौ रामलक्ष्मणौ दूरम् अपवाह्य अपसार्य ॥ ५२ ॥

जहारेति । हत्वा हतप्रायं कण्ठगतप्राणं कृत्वा रामस्य भार्य्यां जहारेति सम्बन्धः । निहतं निहतप्रायं श्रुत्वा लक्ष्मणमुखादिति शेषः ॥ ५३ ॥

राघवः शोकसन्तप्तो विललापाकुलेन्द्रियः ।
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषम् ॥ ५४ ॥
मार्गमाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥ ५५ ॥
तं निहत्य महाबाहुर्ददाह स्वर्गतश्च सः ।
स चास्य कथयामास शबरीं धर्मचारिणीम् ॥ ५६ ॥

विललाप पर्य्यदेवयत् । आकुलेन्द्रियः शोकपरवशेन्द्रियः* तेनैव शोकेन निवृत्तिहेतुमप्राप्तेन† अभिभूयमान एव सन् गृध्रं रावणेन सीता अपहृतेति निवेद्य मृतं दग्ध्वा विधिना संस्कृत्य ॥ ५४ ॥

सीतां वने मार्गमाणः मार्गयमाणः इत्यर्थः । रूपेण विकृतं कबन्धं राक्षसं ददर्शेति सम्बन्धः ॥ ५५ ॥

तमिति । तं कबन्धं निहत्य ददाह । महाबाहुः रामः । स च कबन्धः स्वर्गतः स्वर्गगमनयोग्यं सौन्दर्यं प्राप्तवान् । ततः तेन रूपेण अस्य रामस्य ॥ ५६ ॥

(*) ननु विष्णववतारस्य अस्य कथं शोकमोहौ सम्भवतः ? सत्यम्, अज्ञानमूलयोस्तयोः असम्भवेऽपि निरुपमप्रेमकरुणाप्रसूतौ तौ सम्भवत एव अनुकूलनायकस्य पुरुषोत्तमस्य यदि लोकोत्तरगुणविशिष्टवस्तुविनाशेऽपि तौ न स्यातां, तर्हि कथं पुरुषोत्तमः स्यात् ? तच्च कथम् अतिसुन्दरं स्यात् ? वक्ष्यति,—'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ।' इति केचित् व्याचक्षते ।

(†) गृध्रहननजनितेन सीताहरणादप्यधिकेन । इति केचित् ।

श्रमणीं धर्मनिपुणामभिगच्छेति राघव ।
सोऽभ्यगच्छन् महातेजाः शबरीं शत्रुसूदनः ॥ ५७ ॥
शबर्य्या पूजितः सम्यग् रामो दशरथात्मजः ।
पम्पातीरे हनुमता सङ्गतो वानरेण ह ॥ ५८ ॥
हनुमद्-वचनाच्चैव सुग्रीवेण समागतः ।
सुग्रीवाय च तत् सर्वं शंसद् रामो महाबलः ॥ ५९ ॥
आदितस्तद् यथा वृत्तं सीतायाश्च विशेषतः ।
सुग्रीवश्चापि तत् सर्वं श्रुत्वा रामस्य वानरः ॥ ६० ॥

श्रमणीं तापसीं धर्मनिपुणां सकलधर्मज्ञां धर्मचारिणीम् इत्यस्य तु सकलधर्मानुष्ठात्रीमित्यर्थः। श्रमणीमित्यत्र कर्त्तरि ल्युट्, तपसा श्राम्यतीत्यर्थात्। तामभिगच्छ इति कथयामासेत्यन्वयः ॥ ५७ ॥

शबर्य्येति। सम्यक् पूजितः यथाविधि अर्घाद्युपचारैः पूजितः पम्पेत्यादिना किष्किन्धाकाण्डकथासंग्रहः। सङ्गतः मिलितः ॥ ५८ ॥

हनुमद्वचनात् 'सुग्रीवो युष्मन्मैत्रीमपेक्षते' इत्यादिरूपात्, समागतः मैत्रीं कृतवान्, हनुमच्छ्रौ [illegible] दौर्बल्यञ्च सुग्रीवायेति सङ्गतायेति शेषः। शंसत् अकथयत्, छान्दसोऽड्-अभावः। महाबलः सुग्रीवेण स्वकार्य्यसाधकमहाबलत्वेनावगतः ॥ ५९ ॥

आदित इति। जन्मारभ्य इत्यर्थः। तत् प्रसिद्धं वृत्तं चरितं सीतायाश्च वृत्तं विशिष्य रावणापहारान्तं अशंसत् यद्यपि महाबलत्वाद् बिना सहायं सर्वविनाशकः, तथापि लोकरीतिमनुसृत्य सुग्रीव-

चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकम्।
ततो वानरराजेन वैरानुकथनं प्रति ॥ ६१ ॥
रामायावेदितं सर्वं प्रणयाद् दुःखितेन च।
प्रतिज्ञातश्च रामेण तदा वालिवधं प्रति ॥ ६२ ॥
वालिनश्च बलं तत्र कथयामास वानरः।
सुग्रीवः शङ्कितश्चासीत् नित्यं वीर्य्येण राघवे ॥ ६३ ॥

मैत्रीमुद्दिश्य सर्वमकथयत् इति बोद्धव्यम्। वानरः सुग्रीवोऽपि रामस्य सम्बन्धि तत् सर्वं श्रुत्वा ॥ ६० ॥

स्वसमानदुःखसद्भावसम्बन्धलाभात् प्रीतः सुग्रीवः अग्निसाक्षिकम् अग्निरेव साक्षात् द्रष्टा यस्य तादृशं सख्यं चकार। ततो वैरानुकथनं वालिनस्तव च वैरं किं कारणमिति रामकृतप्रश्नं प्रति प्रश्नोत्तरम् इति यावत् ॥ ६१ ॥

रामाय यत् प्रत्युत्तरमावेदितव्यं, तत् सर्वं रामवत् दारापहारादिकष्टैः सञ्जातदुःखेन सुग्रीवेण प्रणयात् रामाय आवेदितम्। तदा तद्वृत्तान्तश्रवणानन्तरकाले रामेण वालिवधं प्रति वालिवधमुद्दिश्य अवश्यं वालिनं वधिष्यामीति प्रतिज्ञातम् ॥ ६२ ॥

वालिनश्च इति। तत्र ऋष्यमूकपर्वते वानरः सुग्रीवः वालिनो बलं अरुणोदयानन्तरं सूर्य्योदयात् प्रागेव चतुः-समुद्रलङ्घनादिरूपं कथयामास। किञ्च सुग्रीवः रामो वालिनुल्यो न वेति शङ्कितः सञ्जातशङ्कः आसीत् ॥ ६३ ॥

राघवेति। राघवस्य वालिसद्भावबले विश्वासार्थमुत्तमं वच

राघवप्रत्ययार्थन्तु दुन्दुभेः कायमुत्तमम् ।
दर्शयामास सुग्रीवो महापर्वतसन्निभम् ॥ ६४ ॥
उत्स्मयित्वा महाबाहुः प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ ६५ ॥
बिभेद च पुनस्तालान् सप्तैकेन महेषुणा ।
गिरिं रसातलञ्चैव जनयन् प्रत्ययं तदा ॥ ६६ ॥
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ ६७ ॥

प्रत्ययनोत्तमसाधनं महापर्वतसदृशं दुन्दुभेर्दैत्यस्य शरीरं दर्शयामास । यस्य कायः इदानीमेतादृशः, तादृशो दुन्दुभिर्वालिना हत्वा एतावद् दूरं प्रक्षिप्त इत्युक्त्वा दर्शयामासेत्यर्थः ॥ ६४ ॥

उत्स्मयित्वेति वाङ्गलकात स्वार्थे णिच् । ईषत् स्मितं कृत्वा ॥ ६५ ॥

बिभेदेति । पुनश्च प्रत्ययं जनयन् स्वबलविश्वासमुत्पादयन्, छेत्तौ शक्ता, कालमपि छेत्तुः । तदा एकेनैव महेषुणा सन्तप्रयोगेनैव सप्ततालान् सप्तशालवृक्षान्, तत्समीपस्थं गिरिं पर्वतं, रसातलं षष्ठमधोलोकञ्च बिभेद । अतल-वितल-सुतल-तलातल-महातल-रसातल-पातालाः इति सप्त अधोलोकाः, एकतालभान-भेदेन अस्य वालिसाम्यशङ्का जायेत, तन्निरासार्थम् अनुक्तानामपि अन्यतालगिरिप्रस्थादीनां भेदनमिति मन्तव्यम् ॥ ६६ ॥

तत इति । ततः तालभेदानन्तरं तेन अतिदुष्करेण कर्मणा

ततोऽगर्जद् हरिवरः सुग्रीवो हेमपिङ्गलः।

तेन नादेन महता निर्जगाम हरीश्वरः॥ ६८ ॥

अनुमान्य तदा तारां सुग्रीवेण समागतः।

निजघान च तत्रैनं शरेणैकेन राघवः॥ ६९ ॥

ततः सुग्रीववचनाद् हत्वा वालिनमाहवे।

सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्॥ ७० ॥

स च सर्वान् समानीय वानरान् वानरर्षभः।

दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजाम्॥ ७१ ॥

वालिवधे विश्वासं प्राप्तः प्रीतमनाः कपिराज्यलाभोऽचिरादेवेति सन्तुष्टमनाः किष्किन्धाख्यां गुहां रामसहितो जगाम॥ ६७ ॥

तत इति। हरिवरः कपिश्रेष्ठः अगर्जत् सिंहनादं कृतवान् हरीश्वरः वाली॥ ६८ ॥

अनु इति। तदा अङ्गदमुखादवगतसुग्रीवराममित्रत्वेन संयुगनिर्गमनं वारयन्तीं तारां स्त्रियं, मया अकृतापकारो धर्मज्ञो रामो मह्यं नापकरिष्यति इत्यादिवचनैरनुमान्य अनुमतिं प्राप्य कृतानुमतिकां कृत्वा इति यावत्। सुग्रीवेण सह वाली युद्धाय समागतोऽभवत्; तत्र संयुगे एनं वालिनम्॥ ६९ ॥

तत इति। सुग्रीववचनात् 'वालिनं जहि काकुत्स्थ! मया बद्धोऽयमञ्जलिः' इत्येवं रूपात् सुग्रीववचनात् आहवे रणे। प्रत्यपादयत् प्रतिष्ठापितवान्। सुग्रीववचनादित्यनेन अनपकारिवालिवधः अकृतेऽपि मित्रापकारित्वेन तद्वधो न्याय्य इति ध्वनितम्॥ ७० ॥

ततो गृध्रस्य वचनात् सम्पातेर्हनुमान् बली ।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम् ॥ ७२ ॥
तत्र लङ्कां समासाद्य पुरीं रावणपालिताम् ।
ददर्श सीतां ध्यायन्तीमशोकवनिकागताम् ॥ ७३ ॥
निवेदयित्वाभिज्ञानं प्रवृत्तिं विनिवेद्य च ।
समाश्वास्य च वैदेहीं मर्दयामास तोरणम् ॥ ७४ ॥
पञ्च सेनाग्रगान् हत्वा सप्त मन्त्रिसुतानपि ।
शूरमक्षञ्च निष्पिष्य ग्रहणं समुपागमत् ॥ ७५ ॥

स चेति । स सुग्रीवः दिदृक्षुः अन्वेषिषिषुः सर्वान् वानरान् समानीय सर्वा दिशः प्रस्थापयामास ॥ ७१ ॥

तत इति । गृध्रस्य संपातेर्वचनात् 'तस्यां वसति वैदेही दीना कौशेयवासिनी' इत्येवंरूपात् पुप्लुवे उल्लङ्घितवान् । इतः सुन्दरकाण्डकथासंग्रहः ॥ ७२ ॥

तत्रेति । अशोकवनिकागतां प्रमदावनस्थितां ध्यायन्तीं राममिति शेषः ॥ ७३ ॥

निवेदयित्वेति । अभिज्ञानम् अङ्गुलीयकरूपं, प्रवृत्तिं रामसुग्रीवसख्यादिसर्ववृत्तान्तं, समाश्वास्य राघवस्य सर्वोऽपि व्यापारः त्वत्प्रत्यानयनैकफलकः इत्यादितत्त्वकथनेन वैदेहीं समाश्वास्य 'गृहीत्वा प्रत्यभिज्ञानम्' इति पाठे प्रत्यभिज्ञानं सीतादत्तकथितचूडामणिरूपम् । तोरणं अशोकवनिकागतप्रासादबहिर्द्वारसन्निवेशं चकार अस्य अशोकवनस्य मर्दयामास ॥ ७४ ॥

अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद् वरात् ।
मर्षयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया ॥ ७६ ॥
ततो दग्ध्वा पुरीं लङ्काम् ऋते सीताञ्च मैथिलीम् ।
रामाय प्रियमाख्यातुं पुनरायात् महाकपिः ॥ ७७ ॥
सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम् ।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः ॥ ७८ ॥

पञ्चेति । सेनाग्रगाः सैन्यपतयः पिङ्गलनेत्रप्रभृतयः मन्त्रिसुताः जम्बुमाल्यादयः अक्षं रावणसुतं निष्पिष्य चूर्णीकृत्य ग्रहणं इन्द्रजितप्रयुक्तब्रह्मास्त्रकृतबन्धनं समुपागमत् प्राप्तः ॥ ७५ ॥

अस्त्रेणेति । मदस्त्रस्य अमोघत्वात् तेन बन्धनमात्रं चतुःपञ्चघटिकानन्तरं पुनर्मोक्षश्चेति ब्रह्मदत्तवरात् तावता कालेन ब्रह्मास्त्रोन्मुक्तमात्मानं ज्ञात्वापि यदृच्छया कार्य्यान्तरप्रसङ्गेन रावणदर्शनापेक्षया यन्त्रिणः बद्धा नेतॄन् तान् राक्षसान् प्रति वीरः हन्तुं समर्थोऽपि मर्षयन् क्षमां कुर्व्वन् रावणसमीपं प्राप्तवानिति शेषः । 'ममर्ष' इति वा पाठः ॥ ७६ ॥

तत इति । ततः रावणदर्शनादिव्यापारानन्तरं सीताम् ऋते सीतावस्थानप्रदेशं विना लङ्कां दग्ध्वा रामाय प्रियं सीतादर्शनरूपप्रियवार्त्तामाख्यातुं पुनः रामान्तिकं महाकपिः हनुमान् आयात् आगतः ॥ ७७ ॥

सोऽभिगम्येति । प्रदक्षिणं प्रदक्षिणादिमुख्यमुपचारं महात्मानं परमात्मानं अमेयात्मा अपरिच्छेद्यबलबुद्धिधैर्य्यादिवैभवः तत्त्वतः

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः ।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ॥ ७९ ॥
दर्शयामास चात्मानं समुद्रः सरितां पतिः ।
समुद्रवचनाच्चैव नलं सेतुमकारयत् ॥ ८० ॥
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे ।
रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ॥ ८१ ॥

सार्धविभक्तिकस्तसिः । दृष्टा सीता इति तत्त्वं न्यवेदयदित्यर्थः । अत्र दृष्टेति पदस्य प्रथमप्रयोगः, रामस्य सीतेति श्रवणे तद्विषयक्रियापदसंशयो माभूदित्यर्थः ॥ ७८ ॥

तत इति । ततो युद्धकाण्डकथासंग्रहः । क्षोभयामास लङ्कागमनमार्गदाने औदासीन्यात् समुद्रमापातालमाकुलीचकार इत्यर्थः ॥ ७९ ॥

दर्शयेति । समुद्रः शरक्षोभित इति शेषः । समुद्रवचनात् 'एष सेतुं महोत्साहः करोतु मयि वानरः । तमहं धारयिष्यामि' इत्येवंरूपात् नलं सेतुम् अकारयत्, नलेन सेतुं कारितवानित्यर्थः ॥ ८० ॥

तेनेति । तेन सेतुना आहवे युद्धे । अत्र क्वचित् मध्ये 'अभ्यषिञ्चत्' इत्यादि श्लोकद्वयम्—

'अभ्यषिञ्चत् स लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतेवा तेन महता देवा इन्द्रपुरोगमाः ॥ (१)
सदेवर्षिगणास्तुष्टा राघवं तेऽभ्यपूजयन् ।
तथा परमसन्तुष्टैः पूजितः सर्वदैवतैः ॥ (२)'

तामुवाच ततो रामः परुषं जनसंसदि ।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती ॥ ८२ ॥
ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम् ।
बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः ॥ ८३ ॥

लङ्कायां लङ्काराज्ये राक्षसेन्द्रं तत्त्वव्यवहारविषये भवति यथा तथाऽभ्यषिञ्चत्, तेन कर्मणा रावणहननादिरूपेण सदेवर्षिगणाः देवर्षिसहिता गणाः अर्थात् ऋषिगणाः तत्सहिताः देवा इत्यर्थः । तदिदं श्लोकद्वयं 'पूजितः सर्व्वदैवतैः' अभिषिच्य चेत्यनेन पुनरुक्तमिति प्रक्षिप्तमेव बोध्यम् । सीतां प्राप्य अनु पश्चात् परां व्रीडां रक्षोगृहे चिरोषितां पुनर्गृहीतवानिति लोकापवादशङ्कया अतिप्रथितां लज्जाम् उपागमत् ॥ ८१ ॥

तामिति । जनसंसदि वानरराक्षससभायां परुषं मर्मस्पृक् 'दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम्' इत्यादि वचनमुवाच लोकस्य नास्यां रामस्य कामादिदोषतः पुनः [illegible] इति प्रत्यायनार्थम् । अमृष्यमाणा पातिव्रत्यसंशयजनितम् उक्तवचनम् 'सतीत्यनेन पातिव्रत्यबलात् निजेच्छया अग्निप्रादुर्भावनशक्तिमत्त्वोक्तम्' इति केचित् । 'तत्क्षणप्रादुर्भाविता ज्वलनः' इत्यन्ये ॥ ८२ ॥

तत इति । अग्निवचनात्—'विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव' इत्येवंरूपात् विगतकल्मषां निष्पापां स्वयं ज्ञात्वा लोकस्य तथात्वं प्रत्याय्य सीताम् अङ्गीचकारेति शेषः । ततस्तोषेण संप्रहृष्टः सन्तोषवशात् एव सर्वदैवतैः पूजितश्च रामो बभौ । कश्चित् 'अत

कर्मणा तेन महता त्रैलोक्यं सचराचरम् ।
सदेवर्षिगणं तुष्टं राघवस्य महात्मनः ॥ ८४ ॥
अभिषिच्य च लङ्कायां राक्षसेन्द्रं विभीषणम् ।
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह ॥ ८५ ॥

क्वचिदमलां रामो लक्ष्मणाच्च गुरोस्तदा इति पठ्यते । तत्र अमलाम् इति पुनरुक्तमापद्यते ॥ ८३ ॥

तेन कर्मणा सीताप्रत्यायनान्तेन कर्मणा ऋषिदेवगणसहितं चराचरप्रजासहितं त्रैलोक्यं तुष्टं तुतोष, अत्र केचित् अचराणां वृक्षादीनां रावणकृतपीडापरिज्ञानाभावेन रावणवधजन्यसन्तोषाभावात् एवं व्याचक्षते । 'ऋषिदेवगणम्' इति पाठः ऋत्यकः इति प्रकृतिभावः । तत्र देवगणा इन्द्रादयः ऋषिगणाः विश्वामित्रादयः एतद्रूपं यत् त्रैलोक्यं सचराचरं, अत्र चरप्रजाः गतिभक्षणमात्रप्रधानाः तिर्य्यक्स्रोतसः पशुपक्ष्यादयः ऐरावतादयः ; अचरप्रजाः चरप्रजाभिन्ना ज्ञानयुक्तप्रजा अर्वाक्स्रोतसो मनुष्याः । एतच्च सकलशेषतिर्य्यगर्व्वाक्स्रोतोयुतं देवर्षिगणरूपं त्रैलोक्यं तुष्टं । रावणस्य मर्त्यापेक्षत्वात् प्राधान्येन देवर्षिग्रहणम् इत्याहुः ॥ ८४ ॥

अभिषिच्येति । राक्षसेन्द्रं भावितत्त्वव्यवहारविषयं, कृतकृत्यः प्राक्प्रतिज्ञातविभीषणाभिषेकलक्षणकृत्यस्यापि कृतत्वात् कृतकृत्यः अतएव विज्वरः विगतावश्यकर्त्तव्यविषयचिन्तातापः, प्रमुमोदेति च्छान्दसं परस्मैपदम् ॥ ८५ ॥

देवताभ्य इति । 'सुप्तोत्थितवत् उत्तिष्ठन्तु वानरा' इत्येवंरूपं वरं रावणवधजनितहर्षवशात् सदिच्छया समागताभ्यो देव-

देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।

अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः ॥ ८६ ॥

भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः ।

भरतस्यान्तिके रामो हनूमन्तं व्यसर्जयत् ॥ ८७ ॥

पुनराख्यायिकां जल्पन् सुग्रीवसहितस्तदा ।

पुष्पकं तत् समारुह्य नन्दिग्रामं ययौ तदा ॥ ८८ ॥

नन्दिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः ।

रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ॥ ८९ ॥

ताभ्यः प्राप्य सुहृद्भिः सुग्रीवविभीषणादिभिः संवृतः पुष्पकेण अयोध्यामुद्दिश्य प्रस्थितः जगाम ॥ ८६ ॥

भरद्वाजेति । 'चतुर्दशे तु सम्पूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् ।' इति भरतेन प्रतिज्ञातत्वात् भरद्वाजाश्रमे चतुर्दशसमासमाप्त्यनन्तरं मुनिवचनेन एकदिनविलम्बस्य प्राप्तत्वात् स्वागमनप्रबोधनाय हनुमद्विसर्जनं, यद्वा सहसा वानरसेनया सह अकस्मात् गमने भरतादेः शङ्का माभूदिति तद्विसर्जनम् ॥ ८७ ॥

पुनरिति । पुष्पकादवतीर्णत्वात् पुनः तत् पुष्पकं समारुह्य आख्यायिकां पूर्ववृत्तविषयां कथां भरद्वाजाश्रमारोपात् पूर्वमिव जल्पन् कथयन् । सुग्रीवेति विभीषणादेरुपलक्षणं ॥ ८८ ॥

नन्दिग्रामेति । नन्दिग्रामे भ्रातृभिः सह तस्यापि व्रतप्रयुक्तां जटां हित्वा त्यक्त्वा रामः सीतां अनुप्राप्य मुनिवेशत्यागेन सीतानुरूपं

पालयामास चैवेमाः पितृवत् मुदिताः प्रजाः ।
अयोध्याधिपतिः श्रीमान् रामो दशरथात्मजः ॥ ९० ॥
प्रहृष्टमुदितो लोकः तुष्टः पुष्टः सुधार्मिकः ।
निरामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ॥ ९१ ॥
न पुत्रमरणं केचिद् द्रक्ष्यन्ति पुरुषाः क्वचित् ।
नार्य्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ॥ ९२ ॥
न चाग्निजं भयं किञ्चित् नाप्सु मज्जन्ति जन्तवः ।
न वातजं भयं किञ्चित् नापि ज्वरकृतं तथा ॥ ९३ ॥

रूपं प्राप्य यदा मुनिवेशत्यागेन हृष्टां सीतां प्राप्य प्रागविसृष्टं राज्यं पुनरवाप्तवान् ॥ ८९ ॥

एतदन्तं चरितं भूतत्वेनोपदिश्य देवर्षिः अतःपरमुत्तरकाण्ड-विषयं भविष्यत्त्वेनोपदिशति,—प्रहृष्टेति । अनेन च रावणवधान-न्तरं रामे राज्यं प्रशासति सति वाल्मीकेर्नारदं प्रति प्रश्न इति ज्ञायते । प्रहृष्टः प्रातिस्विकपुत्रपश्वादिसम्पत्त्या मुदितः स्वामिनोऽभ्युद-यित्वेन मुदितान्तःकरणः लोकः सर्व्वप्रजाः तुष्टः वाञ्छप्रदाद् भगवतः सांसारिकपारमार्थिकार्थलाभात् तुष्टः अतएव पुष्टः दारिद्र्यकार्श्य-रहितः । आमयो मनःपीडा, रोगो देहजो व्याधिः, दुर्भिक्षचौरा-दिभयेन च रहितः भविष्यति इति शेषः । यदा रामविरहेण दुःखि-तः रामभिलनेन तुष्टः तथा तद्विरहेण कृशः तन्मिलनादेव पुष्टः ॥ ९१ ॥

नेति । सपितृषु स्वेषु च जीवत्सु इति शेषः । अविधवा भर्त्रनुगमनाद् भर्त्तुरपुनसद्भावाद् वा इति शेषः ॥ ९२ ॥

न चापि क्षुद्भयं तत्र न तस्करभयं तथा ।
नगराणि च राष्ट्राणि धनधान्ययुतानि च ॥ ९४ ॥
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ॥ ९५ ॥
गवां कोट्ययुतं दत्त्वा विद्वद्भ्यो विधिपूर्वकम् ।
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः ॥ ९६ ॥
राजवंशान् शतगुणान् स्थापयिष्यति राघवः ।
चातुर्वर्ण्यञ्च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ॥ ९७ ॥

न चाग्निजम् इति पादत्रयेण आधिदैविकदुःखनिवृत्तिरुच्यते। चतुर्थेन आध्यात्मिकनिवृत्तिः ॥ ९२ ॥

भौतिकदुःखाभावमाह,—नचापीति । क्षुद्भयं क्षुदुपशमोपायाभावजं न च नैव भविष्यति इत्यनुषङ्गः ॥ ९४ ॥

नित्यमिति । कृतयुगे स्वाभाविकाद् अधर्मासम्बन्धात् नित्यं प्रमोदः, त्रेतायां अधर्मस्य पादांशेन सम्बन्धेऽपि रामपालनवैभवात् तदनाक्रमेण नित्यप्रमोदत्वम् । अथ रामस्य भावि वृत्तान्तमाह,—अश्वेति । शतशब्दोऽनन्तवाची, इष्ट्वा, दत्त्वेत्यादिसङ्कथनं न तु तेषां रामस्य स्वलोकप्राप्तिं प्रति हेतुता इति बोध्यं यत्तु कतककृताश्वमेधाद्यनुष्ठानस्य नानुषेयाधिप्रयुक्तावर्ण्योद्यशमनद्वारा ब्रह्मलोकप्राप्तौ हेतुत्वम् इत्युक्तं, तन्न भगवदवताराणां पुण्यपापसम्बन्धस्य सर्वतन्त्रविरुद्धत्वात् । अश्वमेधाद्यनुष्ठानन्तु लोकानामार्थं लोकोपदेशाय । इत्यन्यत्र विस्तरः ॥ ९५ ॥ ९६ ॥

दशवर्षसहस्राणि दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ॥ ९८ ॥
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितं ।
यः पठेत् रामचरितं सर्वपापैः प्रमुच्यते ॥ ९९ ॥
एतदाख्यानमायुष्यं पठन् रामायणं नरः ।
सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते ॥ १०० ॥

राजवंशानिति । कामरूपकान्यकुब्जादितत्तद्राज्यपदस्थान् राजवंशान्, शतगुणान् अनेकगुणवृद्धिर्यथा भवति तथा स्थापयिष्यति शाश्वततद्राज्यप्रदानेनेति शेषः । चातुर्वर्ण्यं चत्वारो वर्णाः । स्वार्थे ष्यञ् । नियोक्ष्यति स्वस्वधर्मेष्विति शेषः ॥ ९७ ॥

अवतारत्यागकालमाह,—दशेति । उपासित्वा नित्यवदनुष्ठाय इत्यर्थः । ब्रह्मलोकं मायिकं वैकुण्ठादिलोकं अनेन निजनित्यकर्मयोगोपेतस्यैव साक्षात् परम्परया ब्रह्मलोकप्राप्तिरिति ध्वनिः ॥ ९८ ॥

अथ नारदः स्वोपदिष्टसंक्षिप्तरामायणपाठफलमुपदिशति,—इदमिति । पवित्रं चित्तशोधनं पुण्यं सकलपुण्यसाधनं वेदैः सम्मितं सकलरहस्यवेदार्थप्रतिपादकत्वात् वेदतुल्यम् ॥ ९९ ॥

सर्वपापमोक्षद्वारा मोक्षफलकत्वमुपपादितं, पुण्यस्यापि निगडात्मकत्वेन पापतुल्यतया हेयत्वात् इति मुमुक्षुफलमुक्त्वा मुमुक्षूणामपि प्रवृत्तये आह,—एतदिति । आयुष्यं आयुःकरम् । आख्यानमाख्यायिका ; रामोऽयनं प्रतिपाद्यो यस्य तत् रामायणम् । संज्ञात्वात् णत्वम् । गणो दासीदासादयः, तैः सह [illegible]

पठन् द्विजो वागृषभत्वमीयात्

स्यात् क्षत्रियो भूमिपतित्वमीयात्।

वणिग्जनः पण्यफलत्वमीयात्

जनश्च शूद्रोऽपि महत्त्वमीयात् ॥१०१॥

इत्यार्षे रामायणे वाल्मीकीये आदिकाव्ये

बालकाण्डे प्रथमः सर्गः ॥१॥

भोगान् भुक्त्वा प्रेत्य मृत्वा स्वर्गे महीयते स्वर्गिभिः सत्कृतो मोदते इत्यर्थः। पठन्निति वृत्तौ श्लोका ॥ १०० ॥

पठन्निति। द्विजः मुख्यद्विजो ब्राह्मणः पठन् वागृषभत्वं शब्दब्रह्मपारगत्वं प्राप्नुयात्। स्यादिति यद्यर्थे; यदि क्षत्रियः, तदा रामायणं पठन् भूपतित्वं प्राप्नुयात्। पण्यैः क्रयद्रव्यैः साध्यं मूलात् त्रिगुणचतुर्गुणादिरूपं यस्य तत्त्वं प्राप्नुयात्, धनसमृद्धिं प्राप्नुयात् इति फलितार्थः। शूद्रोऽपि जनः त्रैवर्णिकदासः, अत्र पठन्, इत्यध्याहारः महत्त्वं द्विजेतरसर्वप्रजाभ्यः श्रैष्ठ्यं देहान्ते स्वोपरितनवर्णप्राप्तिरूपञ्च महत्त्वं प्राप्नुयात्। अस्य गायत्र्यर्थप्रतिपादकत्वज्ञापनाय गायत्र्यादिमाक्षरेणोपक्रम्य यादिति गायत्र्यन्तिमाक्षरेण समापितत्वात् ॥ १०१ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके

श्रीमद्बालकाण्डे प्रथमः सर्गः ॥ १ ॥

द्वितीयः सर्गः ।

नारदस्य तु तद् वाक्यं श्रुत्वा वाक्यविशारदः ।
पूजयामास धर्मात्मा सहशिष्यो महामुनिम् ॥ १ ॥
यथावत् पूजितस्तेन देवर्षिर्नारदस्तथा ।
आपृच्छ्यैवाभ्यनुज्ञातः स जगाम विहायसम् ॥ २ ॥
स मुहूर्त्तं गते तस्मिन् देवलोकं मुनिस्तदा ।
जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः ॥ ३ ॥

नारदस्येति । विशारदः विशिष्टा व्याकरणसंस्कारादिविशेषवती विचित्रार्था च शारदा वाणी यस्य सः; सहशिष्य इत्यत्र वोपसर्जनस्येति वैकल्पिकत्वात् सत्वाभावः । प्रश्नानुरूपं वाक्यगुणसमूहवच उत्तरं सम्यग् दत्तमिति पूजयामास । अतिविचित्रं भगवद्वचनमित्यादिशब्दैः ॥ १ ॥

यथावदिति । आपृच्छ्यैव साधु यामि इत्युक्त्वैव अभ्यनुज्ञातः, यथासुखं विहरतामिति वाल्मीकिना अनुगमनपूर्वम् अभ्यनुज्ञातः, अनेन गुरुशिष्ययोः स्नेहभक्तिप्रकाशनं । विहायसमिति पुंलिङ्गम् ॥ २ ॥

स इति । स वाल्मीकिः तस्मिन् नारदे देवलोकं गते सति मुहूर्त्तं स्वाश्रमे स्थित्वा पश्चात् माध्याह्निकार्थं जाह्नव्या अविदूरतः समीपे वर्त्तमानं तमसातीरं जगाम । ननु मुहूर्त्तमात्रेण देवलोकं गतोऽयम्

स तु तीरं समासाद्य तमसाया मुनिस्तदा ।

शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम् ॥ ४ ॥

अकर्दममिदं तीर्थं भरद्वाज निशामय ।

रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ ५ ॥

न्यस्यतां कलशस्तात दीयतां वल्कलं मम ।

इदमेवावगाहिष्ये तमसातीर्थमुत्तमम् ॥ ६ ॥

एवमुक्तो भरद्वाजो वाल्मीकेन महात्मना ।

प्रायच्छत मुनेस्तस्य वल्कलं नियतो गुरोः ॥ ७ ॥

स शिष्यहस्तादादाय वल्कलं नियतेन्द्रियः ।

विचचार ह पश्यंस्तत्सर्वतो विपुलं वनम् ॥ ८ ॥

इति तत्र । छान्दसत्वकल्पने मानाभावात् । अव्ययत्वकल्पनस्यापि अगतिकगतिकत्वाच्च । मुहूर्त्तादिति पाठस्तु कल्पितः ॥ ३ ॥ ४ ॥

अकर्दममिति । अवतरणप्रदेशस्य पङ्करहित्यम् अनेनोच्यते, तीर्थं ऋषिजुष्टजलम् । निशामय पश्य । अतएव कर्मोदर्शन इति भित्त्यभावाद् अक्लिन्नत्वम् । रमणीयत्वे हेतुः, प्रसन्नाम्बु इति, सन्मनुष्यचित्तस्य कामादिदोषराहित्येन नित्यप्रसन्नत्वात् सादृश्यम् ॥ ५ ॥

न्यस्यतामिति । वल्कलामिति पाठे छान्दसं स्त्रीत्वम् । "वल्कलमस्त्रियाम्" इति निघण्टुः । इदमेव अत्यासन्नमपि अल्पतीर्थं मध्याह्नकालातिक्रमाद् अगत्वेति शेषः ॥ ६ ॥

एवमिति । वाल्मीकेनेति छान्दसमित्यर्थः । प्रायच्छत इति छान्दसम् । नियतः सेवापरः ॥ ७ ॥

तस्याभ्यासे तु मिथुनं चरन्तम् अनपायिनम् ।
ददर्श भगवान् तत्र क्रौञ्चयोश्चारुनिःस्वनम् ॥ ९ ॥

तस्मात् तु मिथुनादेकं पुमांसं पापनिश्चयः ।
जघान वैरनिलयो निषादस्तस्य पश्यतः ॥ १० ॥

तं शोणितपरीताङ्गं चेष्टमानं महीतले ।
भार्य्या तु निहतं दृष्ट्वा रुराव करुणां गिरम् ॥ ११ ॥

वियुक्ता पतिना तेन द्विजेन सहचारिणा ।
ताम्रशीर्षेण मत्तेन पत्रिणा सहितेन वै ॥ १२ ॥

स इति । नियतेन्द्रियः जितेन्द्रियः विचचार, अनुष्ठानयोग्यैकान्तदेशनिरीक्षणार्थेति शेषः ॥ ८ ॥

तस्येति । तस्य वनस्य अभ्यासे समीपे चरन् भगवान् तद्वनाभ्यास एव चरन्तम् अनपायिनम् आधिव्याधिरहितम् अतएव चारुनिस्वनं क्रौञ्चयोर्मिथुनं ददर्श । अनपायिनमित्यार्षम् ॥ ९ ॥

तस्मादिति । मिथुनात् विभक्तं एकं पुमांसं पापनिश्चयः तद्-हननरूपपापनिश्चयः अतएव वैरनिलयः निजानपकारिष्वपि प्राणिषु अकारणवैराश्रयः स इव निषादः तस्य पश्यतः तं पश्यन्तं अनादृत्य जघान । पश्यत इति षष्ठी च अनादरे ॥ १० ॥

तमिति । चेष्टमानं लुठन्तं निहतं दृष्ट्वा निषादेनेति शेषः । करुणां गिरं दीनं शब्दं रुराव अकरोदित्यर्थः । पाठान्तरेण 'खे परिभ्रमा' खे आकाशे परिभ्रमणं करोति सा इत्यर्थः ॥ ११ ॥

वियुक्तेति । सहचारिणा अहोरात्रमिति शेषः । ताम्रशीर्षेण

तथाविधं द्विजं दृष्ट्वा निषादेन निपातितम्।
ऋषेर्धर्मात्मनस्तस्य कारुण्यं समपद्यत ॥ १३ ॥

ततः करुणवेदित्वाद् अधर्मोऽयमिति द्विजः।
निशाम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत् ॥ १४ ॥

मा निषाद ! प्रतिष्ठां त्वम् अगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ १५ ॥

कुक्कुटादिवत् ताम्रवर्णशीर्षगतचूडायुक्तेन मत्तेन कामसम्भोगवशा-दिति शेषः। अतएव पक्षिणा सम्भोगकालत्वात् विततपक्षवता सहितेन स्वसङ्गतेन तेन अपूर्णरतित्वाद् अत्यन्तम् शोकः इत्थम्भूतेन पतिना वियुक्ता रराविति पूर्वेणान्वयः ॥ १२ ॥

तथाविधं कामभोगवशं धर्मात्मनः दयादाक्षिण्याहिंसादि-धर्मप्रवणचित्तस्य कारुण्यं दया समपद्यत समजायत ॥ १३ ॥

तत इति। करुणवेदित्वात् सञ्जातकरुणत्वात्, ण्वः छान्दसः, विदेः सत्तार्थात् लाभार्थाद् वा णिनिः। रुदतीं क्रौञ्चीं निशाम्य दृष्ट्वा अयं काममोहितः पक्षिवधरूपः अधर्म एवेति निश्चित्य क्रौञ्ची-विषयकरुणावत्त्वेन अर्थात् पापकारिणि निषादे आविर्भूतरोष-तया इदं वक्ष्यमाणवचनमब्रवीत् ॥ १४ ॥

मा निषादेति। क्रौञ्चवधरूपप्रत्यक्षदृश्यमाननिषादपापरूपोऽर्थः सु-स्पष्ट एव। किञ्च मा लक्ष्मीः निषीदत्यस्मिन् तत् सम्बोधनं मानिषाद। अद्य यस्मात् त्वं क्रौञ्चमिथुनात् मन्दोदरीरावणरूपात् एकं काम-मोहितं रावणं अवधीः हतवानसि, तस्मात् त्वं शाश्वतीः समाः

अनेकान् संवत्सरान् अद्वितीयां प्रतिष्ठां अखण्डैश्वर्यानन्दावाप्तिं अगमः प्राप्नुहि, तेनार्थतः शब्दतोऽपि मनाक् काव्यार्थसूचनम् इत्युक्तिः, श्रीरामकृतरावणवधरूपकाव्यार्थः, काव्यादौ अवश्यकर्त्तव्याशीर्वादश्च सूचित इति तीर्थः, कतककृतः प्रत्यक्षसंवृत्तं निषादशापरूपोऽर्थस्तु स्पष्ट एव। किञ्च नितरां सदेवर्षिगणं त्रैलोक्यं अवसादयति पीड़यतीति निषादस्तस्य सम्बुद्धिः। हे निषाद! रावण! यद् यस्मात् क्रौञ्चमिथुनात्। अल्पीभावार्थकुञ्चेः पचाद्यच्, क्रुञ्च, ततः स्वार्थिकोऽण् क्रौञ्चम्। राज्यच्युतवनवासादिदुःखेन अल्पल्पीभूतं परमकार्श्यं गतं यत् मिथुनं सीतारामरूपं, तस्माद् एकं सीतारूपं यस्माद् अवधीः वधाभ्यधिकपीड़ां प्रापितवानसि, तस्मात् त्वं प्रतिष्ठां, या लङ्कापुरे पुत्रपौत्रभृत्यगणवेष्टितेन ब्रह्मणा प्रतिष्ठा दत्ता, ताम् अतःपरं मागमः इति काव्यार्थसूचनं। त्रैलोक्यस्य परममङ्गलरूपश्च इदं सरस्वत्या पुरस्ताद् आविर्भावितम् इत्याहुः। अत्रेदम् अवधेयं रावणवधे जाते अयोध्याराज्यप्राप्त्यनन्तरं नारदं प्रति प्रश्न इति स्वयमेव व्याख्यातत्वात् तदुत्तरकालिकैतच्छ्लोकस्य एवंविधिघटितस्य उक्तार्थस्य कतकमते कथं सङ्गतिः? कथं वा सर्वथा सत्यसरस्वती भूतमर्थम् आशास्यत्वेन निर्दिशेत्? इति। तीर्थव्याख्यानेऽपि इदं काव्यार्थसूचनं कविना ध्यातमिति तदुक्तसम्मतिश्लोकार्थाद् गम्यते। तच्च वाल्मीकेस्तथा तात्पर्य्ये 'किमिदं व्याहृतं मया' इत्युक्तेरसङ्गतेः, न च किमिदम् इत्यस्य पद्यं गद्यं चेत्यर्थः तदग्रेम श्लोकोऽभिगीतः,—'मत्तः परिवेष्टारो भवतु तस्याव्रसन् रटे' इत्यादिवक्ष्यः श्रुतिमूलकत्वेन ईदृशाक्षरसन्निवेशस्य श्लोकत्वेन मुनेरज्ञानमित्यस्य कल्पनमनुचित-

त्वात् प्राक्तननारदऋषिसंवादस्यापि स्रोकरूपतयां तथैव सन्देह-कारत्वोपित्याच, ततप्रश्नोत्तरं सर्वं केवलं संस्कृतैरेव एतत् स्रोकोत्त-रमेव स्रोकैस्तस्यापि निबन्धनमिति कल्पना तु न युक्ता मानाभा-वात् अन्यथोपपत्तेश्च। अधर्मत्वबुद्धिपूर्वं कथितवचनस्य ईदृशे अर्थे तात्पर्य्यसम्भवस्यापि अभावाच माडो योगाभावेऽगम इत्येताव-न्मात्रेण लुङा भूतत्वस्यैव प्रतीत्या आशिषोऽप्रतीतेश्च। एतत्स्रोक-निर्गमकाले कवेः काव्यं करिष्यामीति बुद्धेरपि अभावाच ब्रह्मोपदे-शानन्तरमेव स्थिता तथा बुद्धिर्वाल्मीकेः मम तु प्रतिभाति। नारदात् रामगुणश्रवणानन्तरं मुनेः स्ववर्णनेच्छां ज्ञात्वा स्वचरितस्य च करुणरसमयत्वेन ततप्रधानकाव्ये अतिकरुणचित्तस्यैवाधिका-रात्। ऋषेः करुणचित्तत्वजिज्ञासयैव पूर्वभृगुदत्तशापस्य पुनरुत्तार-कत्वेन दार्ढ्यसम्पादनाय च मुनेः ईक्षणाय च भगवान् राम एव निषादरूपेण पश्यतो मुनेः पुरतस्तमनादृत्य क्रौञ्चं रक्षोविग्रहरूपं जघान। ततस्तदिच्छावशादन्तर्यामितया तथा प्रेरणाच महान-धर्मोऽयमनेन कृत इति कथा। पापमते निषाद! यत् त्वं काममोहितं क्रौञ्चमिथुनात् मिथुनीभूतात् क्रौञ्चयुगात् विभक्तम् एकम् अवधीः तत् त्वमपि शाश्वतीः समाः आयुःशेषभूतानि बहूनि वर्षाणि प्रतिष्ठां सस्त्रीसाहित्येन स्थितिम् इह लोके मागमः मा प्राप्नुहि। किन्तु अत्यल्पकालमेव तथा वास एकमिथुनीभावपर्य्यन्तम् इति यावत्। इति शप्तवान् मुनिः एकमवधीरित्युक्त्यैया स त्वया स्त्रीवि-रहितः कृतः, सा च नायकहीना कृता, तथा त्वमपि प्रियया स्वभार्य्यया हीनो भव, सा च त्वया हीना भवतु इति पर्य्यवसा-नम्। अगम इत्यडागमक माङ्योगेऽपि आर्षत्वात्। तस्य रक्षो-

रूपत्वं तु एतदुत्तरं ब्रह्मणः सकाशात् सकलरामवृत्तान्तज्ञानवर-लाभोत्तरकालं कृतं 'तस्मात् तु मिथुनादेकम्' इति श्लोके वैरनिलय इति विशेषणेन सूचितम्। एतत्त्वेन तस्य लोकदृष्ट्या वैर-निलयत्वप्रसिद्धेः निषादस्यापि प्राणिषु न वैरम्, किन्तु आहा-राद्यर्थमेव तद्-हननमिति प्रसिद्धेश्च। अतएवारण्यकाण्डे मृगयाव्य-सनमुपक्रम्य 'विना वैरं च रौद्रेति—

तृतीयं यदिदं रौद्रं परप्राणाभिहिंसनम्।
निर्वैरं क्रियते मोहात् तच्च ते समुपस्थितम्॥'

इति च वक्ष्यति—

'त्रीण्येव व्यसनान्यत्र कामजानि भवन्तु ते।'

इति चोपक्रमे उक्तं तन्नीदृशोऽर्थस्त्वया केन मानेन निर्णीत इति चेत् शृणु, अध्यात्मरामायणात्। तत्राग्रे स्फुटम्। तत्र सन्देहश्चेत् स्वान्तर्यामिणं पृच्छ, तदुक्तं पाद्मे शिवशिवासंवादे रामवैभवव-र्णने चतुर्विंशे अध्याये—

'ततो जानपदः कश्चित् पामरः काष्ठविक्रयी।
स्ववधूसङ्गवादारा रावणस्य गृहोषिताम्॥
गर्हयामास वैदेहीं दुर्वृत्तो लोकनिन्दकः।
तत् श्रुत्वा देवि! चारेभ्यो भीतो लोकापवादतः॥
आहूय लक्ष्मणं प्राह रामो राजीवलोचनः।
शृणु मे वचनं गुह्यं सीतासंत्यागकारणम्॥
वाल्मीकिनाथ भगुणा प्रतोऽस्मि किल लक्ष्मण।
तस्मादेनां त्यजाम्यद्य अन्यो नैवात्र कारणम्॥'

इति। तथा काशी पातालखण्डे अयोध्यामाहात्म्ये च तमसातीर्था-

अभवर्णनप्रस्तावे—

'शापोक्त्या हृदि सन्तप्तं प्राचेतसमकल्मषम् ।
प्रोवाच वचनं ब्रह्मा तत्रागत्य सुसत्कृतः ॥
न निषादः स वै रामो मृगयां चर्तुमागतः ।
तस्य संवर्णनेनैव सुश्लोक्यस्त्वं भविष्यसि ॥
इत्युक्त्वा तं जगामाशु ब्रह्मलोकं सनातनः ।
ततः संवर्णयामास राघवं ग्रन्थकोटिभिः ॥'

इति। । कोटिभिः शतकोटिभिः चरितं रघुनाथस्य शतकोटिप्रविस्तरमित्यन्यत्रोक्तेः । तच सम्पूर्णं ब्रह्मलोके इत्यैतिह्यम् इह तु कुशलवोपदिष्टा चतुर्विंशतिसहस्रीत्यलम् । योगवाशिष्ठे तु शापान्तराण्यपि उक्तानि तथाहि—

'सनत्कुमारो निष्काम अवसद् ब्रह्मसद्मनि ।
वैकुण्ठादागतो विष्णुस्त्रैलोक्याधिपतिः प्रभुः ॥
ब्रह्मणा पूजितस्तत्र सत्यलोकनिवासिभिः ।
विना कुमारं तं दृष्ट्वा ह्युवाच प्रभुरीश्वरः ॥
सनत्कुमार ! स्तब्धोऽसि निष्कामो गर्वचेष्टया ।
अतस्त्वं भव कामार्त्तः शरजन्मेति नामतः ॥
तेनापि शापितो विष्णुः सर्वज्ञत्वं तवास्ति यत् ।
किञ्चित्कालं हि तत्त्यक्त्वा त्वमज्ञानी भविष्यसि ॥'

शापितः शप्तः किञ्चित् कालमवतारान्तरे स्वल्पकालं तत् त्यक्त्वा तद्रूपं त्यक्त्वा अज्ञानी स इव । तथा—

भृगुर्भार्य्यां हतां दृष्ट्वा प्रोवाच क्रोधमूर्च्छितः ।
विष्णो ! तवापि भार्य्याया वियोगो हि भविष्यति ॥

तथा—

'वृन्दया शापितो विष्णुः छलनं यत् त्वया कृतम्।
अतस्त्वं स्त्रीवियोगं हि वचनात् मम यास्यसि॥'

आदिमः शापः : छलनं पतिवेषेण सम्भोगरूपम्। तथा—

'भार्य्या हि देवदत्तस्य पयोष्णीतीरसंस्थिता।
नृसिंहरूपधृग्विष्णुं दृष्ट्वा पञ्चत्वमागता॥
तेन शप्तो हि नृहरिः दुःखार्त्तः स्त्रीवियोगतः।
तवापि भार्य्यया सार्द्धं वियोगो हि भविष्यति॥'

इति। दुःखार्त्तः तृतीयार्थे आर्षी प्रथमा, दुःखार्त्तेन इत्यर्थः। तारशापोऽपि किष्किन्धाकाण्डे, तत्रैव वक्ष्यते इत्यलं विस्तरेण।

"प्राचेतसेन मुनिना रामो राजीवलोचनः।
तमसोपवने शप्तो वेषधृग् जानकीपतिः (१)
श्रीरामः प्राकृतां लीलां स्त्रीयां दर्शयितुं तदा।
मन्दोदरीपतिं क्रूरं क्रौञ्चवद् हतवान् प्रभुः (२)
क्रौञ्चं निहतं दृष्ट्वा मुनिः शापमथाददौ।
चिरं मा तिष्ठ मत्त्वा त्वं निषाद परहिंसक (३)
शापं श्रुत्वैव सर्वात्मा तत्रैवान्तरधीयत।
शोकाक्रान्तस्तु वाल्मीकिर्ब्रह्मणा सुबोधितः (४)

इति।

त्यक्त्वा जीर्णदुकूलवद् वसुमती बद्धोऽम्बुधिर्बिन्दुवद्
बाणाग्रेण जरत्कपोतक इव व्यापादितो रावणः।
यस्य क्वापि विभीषणाय सहसा स्रगेव लङ्काऽर्पिता।
श्रुत्वैवं रघुनायकस्य चरितं को वा नरो नश्यति (५)' १५॥

तस्येत्थं ब्रुवतश्चिन्ता बभूव हृदि वीक्षतः।
शोकार्त्तेनास्य शकुनेः किमिदं व्याहृतं मया॥ १६॥

चिन्तयन् स महाप्राज्ञश्चकार मतिमान् मतिम्।
शिष्यं चैवाब्रवीद् वाक्यमिदं स मुनिपुङ्गवः॥ १७॥

पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा॥ १८॥

तस्येति। मया मुनिना शान्तेन तपस्विना शकुनिशोकपीड़ितेन इदम् ईदृशं क्रूरं तपोनाशकरं किं व्याहृतम् इति वीक्षतोऽनर्थाभिप्रेरणया निषादे सर्वतो महत्त्वसम्भावनया दृश्यमानक्रौञ्चे तद्वैपरीत्यसम्भावनया अतिनिन्द्यम् अयशस्करं महापातकेभ्योऽपि अधिकं पापं कृतम् इति चिन्ता बभूव, यद्यपि एतत् सर्वं वाल्मीकिकृतमेव, तथापि कुश-लव-गेयतया अस्य काव्यस्य करणात् तदुक्तितया एवम् उक्तिः। अन्यथा स्वचिन्तायाः स्वापरोक्षत्वात् बभूव इति लिड्-असङ्गतिः स्यात्। यद्वा सर्गचतुष्टयमाद्यम् उपोद्घातरूपं कस्यचित् शिष्यस्य वाल्मीकीयोपोद्घातत्वाच्च वाल्मीकीयोक्तिः पारोक्ष्यमारोप्य स्वयमपि तथोक्तिरूपोद्घातत्वेनोक्ताय इत्यन्ये॥ १६॥

चिन्तयन्निति। महद् अयशस्करमिदं कर्म कृतम् इति चिन्तयन्, तत्सङ्कल्पतया इत्थं मतिं सङ्कल्पं चकार; तदभिलापकं वाक्यं शिष्यम् अब्रवीत् इति सम्बन्धः॥ १७॥

पादेति। अष्टाक्षरानुष्टुप्पादैर्बद्धः अक्षरसमः छन्दःशास्त्र-

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम् ।
प्रतिजग्राह सन्तुष्टस्तस्य तुष्टोऽभवन् मुनिः ॥ १९ ॥
सोऽभिषेकं ततः कृत्वा तीर्थे तस्मिन् यथाविधि ।
तमेव चिन्तयन्नर्थम् उपावर्त्तत वै मुनिः ॥ २० ॥
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान् गुरोः ।
कलशं पूर्णमादाय पृष्ठतोऽनुजगाम ह ॥ २१ ॥

गुरुलघ्वक्षरवैषम्यरहितः ; तथा तन्त्री वीणा, लयः तालमृदङ्गवेणुनृत्ताभिनयानां समकालं विरामस्ताभ्यां युक्तः । तन्त्रगाम् आरोप्यवाद्यैः सह गातुं योग्य इति यावत्, अतः श्लोकाख्यस्य शापरूपस्य अनौचित्येन प्रवृत्तोऽपि मे मम श्लोको यशोरूपो भवतु, अन्यथा अयशोरूपो माभूदित्यर्थः । अत्र भवत्विति पाठः बहुपुस्तकसम्मतः तीर्थसम्मतश्च, 'श्लोको यशसि पद्ये च' इति मेदिनी ॥ १८ ॥

शिष्य इति । एवं ब्रुवतस्तस्य ऋषेर्वाक्यं यशो भवतु इत्येवंरूपं हृष्टः सन्, तथैवेदं यशोरूपमेवेदम् इत्यनुमोदनेन प्रतिजग्राह अङ्गीचकार । अयशोरूपेऽपि यशस्त्वानुमोदनेन गुरुस्तस्य तुष्टोऽभवदित्यर्थः ॥ १९ ॥

स इति । अभिषेकमिति मध्याह्नकर्त्तव्यानुष्ठानोपलक्षणम् । तमेवार्थमनुशप्तः शापार्थश्लोकोत्पत्तिरूपम् । उपावर्त्तत न्यवर्त्तत ॥२०॥

श्रुतवान् बहुश्रुतः । पृष्ठतः पृष्ठभागेन प्रसारितकरः परिपूर्णं कलशमादाय अनु पश्चाद् जगाम इत्यन्वयः ॥ २१ ॥

स प्रविश्याश्रमपदं शिष्येण सह धर्मवित् ।
उपविष्टः कथाश्चान्याश्चकार ध्यानमास्थितः ॥ २२ ॥
आजगाम ततो ब्रह्मा लोककर्त्ता स्वयं प्रभुः ।
चतुर्मुखो महातेजा द्रष्टुं तं मुनिपुङ्गवम् ॥ २३ ॥
वाल्मीकिरथ तं दृष्ट्वा सहसोत्थाय वाग्यतः ।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः ॥ २४ ॥
पूजयामास तं देवं पाद्यार्घ्यासनवन्दनैः ।
प्रणम्य विधिवत् चैनं पृष्ट्वा चैनं निरामयम् ॥ २५ ॥

स इति । मुखतः अन्याः कथाश्चकार मनसा तु शापार्थकश्लोकविषयं ध्यानमास्थितः । यत्तु ध्यानम् अम्बाया गायत्र्याः चतुर्मुखवक्त्रप्राधान्येन ध्यानमास्थित इत्यर्थ इति तन्न, तदास्थितोऽन्याः कथाश्चकार इत्यस्य असङ्गतेरित्यलं ध्यानपदार्थानभिज्ञदूषणाभिनिवेशेन ॥ २२ ॥

अथ तच्चिन्तां निवर्त्तयितुं ब्रह्मागमनमाह,—आजगामेति । स्वयं प्रभुः अनन्यमुखनिरीक्षकतया सर्वलोककर्तृत्वयोगित्वानैश्वर्य्यादिशक्तिमान्, अतएव भूरादिलोकनिर्म्माता, तं शापवाक्योच्चारणवशात् अतिचिन्ताक्रान्तम् ॥ २३ ॥

वाग्यतः अतिसम्भ्रमवशात् यतवाक् । प्रयतोऽतिनम्रः ॥ २४ ॥

पूजयामासेति । वन्दनं स्तुतिः प्रणम्येति इत्यमुक्तैः एनमित्यादि उत्तरान्वयि ॥ २५ ॥

अथोपविश्य भगवान् आसने परमार्चिते ।
वाल्मीकये च ऋषये सन्दिदेशासनं ततः ॥ २६ ॥
ब्रह्मणा समनुज्ञातः सोऽप्युपाविशदासने ।
उपविष्टे तदा तस्मिन् साक्षात् लोकपितामहे ॥ २७ ॥
तद्गतेनैव मनसा वाल्मीकिर्ध्यानमास्थितः ।
पापात्मना कृतं कष्टं वैरग्रहणबुद्धिना ॥ २८ ॥
यस्तादृशं चारुरवं क्रौञ्चं हन्याद् अकारणात् ।
शोचन्नेव पुनः क्रौञ्चीम् उपश्लोकमिमं जगौ ॥ २९ ॥

एनं मुनिं ब्रह्मा अनामयम् आमयः पीडा तद्रहितं व्ययहीनम् इति यावत्, तपः इति शेषः । तत् पृष्ट्वा अनन्तरं स्वयमासने उपविश्य ऋषये आसनं सन्दिदेश आसने उपवेष्टुम् अनुमेने इत्यर्थः । 'वाल्मीकये च ऋषये' इति पाठः । एतेन, 'आश्रमं कुशलं पृच्छेत् चत्रबन्धुमनामयम्' इत्युक्तेर्ब्राह्मणं प्रत्ययं प्रश्नः स्मार्त्ताचारविरुद्धः तं देवमित्यनेनैव सिद्धे एनमित्यस्य वैयर्थ्यापत्तिश्चेत्यपास्तम् ॥ २६ ॥

लोकपितामहे उपविष्टे सति तदनुज्ञया स्वयमुपाविशत् इति सम्बन्धः ॥ २७ ॥

तद्गतेन क्रौञ्चगतेन वैरं गृह्णाति सा चासौ बुद्धिश्चेति तदता कर्त्तरि ल्युट् बाहुलकात्, निषादेनेति शेषः । कष्टं कृतं क्रौञ्चवधरूपं तपोनाशसम्भावकशापनिःसारणेन कष्टं कृतं ममेति शेषः ॥ २८ ॥

कष्टमेवाह,—य इति । हन्याद् हतवानित्यर्थे छान्दसम् । अकारणाद् दृश्यमानं कारणं विना, उप समीपे श्लोकः समीपे ॥ २९ ॥

पुनरन्तर्गतमना भूत्वा शोकपरायणः ।

तमुवाच ततो ब्रह्मा प्रहसन् मुनिपुङ्गवम् ॥ ३० ॥

श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा ।

मच्छन्दादेव * ते ब्रह्मन् प्रवृत्तेयं सरस्वती ॥ ३१ ॥

शोकपरायणः क्रौञ्चवधकृतक्रौञ्चीदुःखदर्शनजेन स्वस्य मुख-सम्रूपोद्भानिकरणापार्थकश्लोकस्य अवगतौ निःसरणजेन च शोकेन व्याप्तः । अतएव अन्तर्गतमना अन्तर्गतश्लोकार्थ एव दत्तचित्तः श्लोकं जगाविति सम्बन्धः । तं तथा शोकग्रस्तं प्रहसन् मदिच्छयावतीर्णां सरस्वतीं न जानातीति हासं कुर्वन् ॥ ३० ॥

तद्वचनमेवाह,—श्लोक एवास्त्वयमिति । अयं त्वया बद्धः श्लोको यशोरूप एवास्तु श्लोकशब्दस्य पद्यपरतया योजनेऽस्त्विति पाठस्य असङ्गत्यापत्तेः अस्तीत्युक्तेरेव ब्रह्मणा औचित्यात् । मम तु अयशो-रूपस्य यशोरूपताशीर्दानमिति नासङ्गतिः । श्लोक एव त्वयेति पाठेऽपि यशोरूप एवायं त्वया बद्धोऽत्र तव विचारः सन्देहो मास्तु मद्वचनात् त्वत्सङ्कल्पाच्च अस्य तथाभावप्राप्तेरित्याशयः । ननु भवतु त्वदाशिषा तथात्वमस्याः परन्तु शान्तस्वभावस्य ममैतादृशी वाग् अत्यन्तमनुचिता इत्यपि मा विषादं कुरु इत्याह,—मच्छन्दा-दिति । मत्सङ्कल्पादित्यर्थः । विष्णोरवतारभूतस्य रामस्य सङ्कल्पोऽपि स्वसङ्कल्पत्वेन उक्तः । 'एकमूर्त्तिस्त्रयो देवा ब्रह्मविष्णुपितामहाः'

* "स्वच्छन्दादेव" इति वा पाठः ।

रामस्य चरितं कृत्स्नं कुरु त्वम् ऋषिसत्तम ।
धर्मात्मनो गुणवतो लोके रामस्य धीमतः ॥ ३२ ॥
वृत्तं कथय रामस्य यथा ते नारदात् श्रुतम् ।
रहस्यञ्च प्रकाशञ्च यद् वृत्तं तस्य धीमतः ॥ ३३ ॥

इति हरिवंशोक्तेः । नन्वीदृशसङ्कल्पो ब्रह्मणोऽपि किमर्थः ? इति चेत् शृणु, येषां परस्य दारवियोगादिजनकं कर्म स्वस्य दारवियोगादिकं जनयितुं नालं तेषामपि ब्रह्मशापः तज्जननेऽलमिति लोके शापमाहात्म्यं सूचयितुम् । एवं राज्यादिसत्त्वेपि कामजय एव उत्तमः, न तु तद्भोगचापलमिति च स्वव्यवहारेण शिक्षयितुम् । तत् प्रायश्चित्तविधया स्वकीर्त्तिवर्णनेन मुनेर्यशोवृद्ध्यर्थं भगवद्विषयमहापापप्रायश्चित्तत्वात् । कैमुतिकन्यायेन इतरजनानां सर्वपापप्रायश्चित्तं रामायणश्रवणादीत्यर्थतत्त्वं बोधयितुञ्चेति ग्रहाण । एतदथ्यन्तरसारस्यबलेन मया योजितम् अतो निरीर्ष्यं सहृदया विचारयन्तु ॥ ३१ ॥

एवं परवशप्रवृत्तस्यापि शापस्य भगवद्विषयतया इतरसकलमन्वाद्युक्तप्रायश्चित्तानिवर्त्त्यस्य यं प्रति असौ शापः तच्चरितवर्णनरूपं प्रायश्चित्तमुपदिशति । रामस्य चरितमिति । लोके रामस्य, रमते इति रामः, बाहुलकात् कर्त्तरि घञ् । तेन लोकाधिष्ठातुर्लोकान्तर्यामिणश्च इत्यर्थः । कुरु वर्णयस्व । धर्मात्मन इत्यनेन रावणादिवधवत् क्रौञ्चवधोऽपि धर्मपालक एव लोकव्यवहारेण लोकहितत्वात् तद्रक्षकत्वाच्चेति सूचितं ॥ ३२ ॥

वृत्तमिति । अस्य नारदोक्तविशेषपरत्वाद् अपौनरुक्त्यम् ; विव-

रामस्य सहसौमित्रे-राक्षसानाञ्च सर्वशः।

वैदेह्याश्चैव यद् वृत्तं प्रकाशं यदि वा रहः॥ ३४॥

तच्चाप्यविदितं * सर्वं विदितं ते भविष्यति।

न ते वाग् अनृता काव्ये काचिद् अत्र भविष्यति॥ ३५॥

कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम्।

यावत् स्थास्यन्ति गिरयः सरितश्च महीतले॥ ३६॥

तावद् रामायणकथा लोकेषु प्रचरिष्यति।

यावद् रामस्य च कथा त्वत्कृता प्रचरिष्यति॥ ३७॥

धीरयतीति धीरः। तेन बुद्धिप्रेरकस्य इत्यर्थः, तेन गायत्र्यर्थभूतस्य इत्युक्तम्। रामलक्ष्मणयोः राक्षसानां सीतायाश्च यत् प्रकाशं तदीयानां प्रकाशं तवाविदितम्। यदि वा यदपि तदीयानामपि रहः अविदितं तव तु सुतरामविदितं तदपि सर्वं ते विदितं भविष्यति। अनेन तत्करणयोग्यता-दानम्। यथ मा निषादेतिवद् अपर्य्यालोच्यापि वाक् त्वत्तो निःसरिष्यति, सापि नान्यथा भविष्यति, तेनास्या अपि सत्यत्वं भावीति ध्वनितम्॥ ३३॥ ३४॥ ३५॥

एवं सामर्थ्यं दत्त्वा उपसंहरति,—कुर्व्विति। यावदित्यादि उत्तरान्वयि॥ ३६॥ ३७॥

---

* "तच्चाप्यवितथम्" इति वा पाठः।

तावद् ऊर्द्धम् अधश्च त्वं मल्लोकेषु निवत्स्यसि ।
इत्युक्त्वा भगवान् ब्रह्मा तत्रैवान्तरधीयत ॥ ३८ ॥
ततः सशिष्यो भगवान् मुनिर्विस्मयमाययौ ।
तस्य शिष्यास्ततः सर्वे जगुः श्लोकमिमं पुनः ।
मुहुर्मुहुः प्रीयमाणाः प्राहुश्च भृशविस्मिताः ॥ ३९ ॥
समाक्षरैश्चतुर्भिर्यः पादैर्गीतो महर्षिणा ।
सोऽनुव्याहरणाद् भूयः शोकः श्लोकत्वमागतः ॥ ४० ॥

तावदिति । यावत् त्वत्कृतकथाप्रचारः ; तावद् अधश्च त्वं दयापूर्वमपि अतिमहति क्रोधकारणात् अधोगमनयोग्योऽपि त्वम् ऊर्द्धं सर्वोर्द्धं वर्त्तमानेषु मल्लोकेषु निवासं प्राप्स्यसि, ततो मया सह मोक्ष्यसे इत्यर्थः । लोकेष्विति तदवयवाभिप्रायं बहुवचनम् ऊर्द्धमधश्च विद्यमानेषु मल्लोकेषु मन्निर्मितलोकेषु निवत्स्यसि, सर्वत्र अप्रतिहतगतिः सञ्चरिष्यसि, ततः परं मुक्तिं प्राप्स्यसीति तीर्थः । तत्र मल्लोकेष्वित्यस्य चारितार्थ्यं चिन्त्यम् । इतीति, तत्रैवान्तर्धानेन ब्रह्मापि अन्तर्यामिरूपता उक्ता ॥ ३८ ॥

तत इति । विस्मयम् आश्चर्यम् । तस्येति । प्रीयमाणाः, आश्चर्यमिदमस्मद्गुरोः पश्य, यद् ब्रह्मणापि अनुमोदितं प्राहुश्च वक्ष्यमाणम् इत्यर्थः ॥ ३९ ॥

तदेवाह,—समेति । साम्यं गुरुलघ्वक्षरराशिकृतम् । यः ऋषिणा गीतः स खलु अतिप्रथितशोकोत्पन्नमनस्तापं व्याहरणाद् भूयः

तस्य बुद्धिरियं जाता महर्षेर्भावितात्मनः ।
कृत्स्नं रामायणं काव्यम् ईदृशैः करवाण्यहम् * ॥ ४१ ॥
उदारवृत्तार्थपदैर्मनोरमै-
स्तदास्य रामस्य चकार कीर्त्तिमान् ।

शोकः विपुलः शोक एव श्लोकत्वं प्राप्त इति वयं मन्यामहे इति प्राहुरिति सम्बन्धः, उत्प्रेक्षा चेयम् । तेनास्य श्लोकस्य करुणरसमयत्वं ध्वनितम् । अत्र नष्टक्रौञ्चालम्बनकः क्रौञ्चीविरावानुद्दीपितो निषादविषयक्रोधव्यभिचारिको मा निषाद इत्यादिवाक्यानुभावकः करुणो रस इति बोध्यम् । यत्तु पूर्वश्लोके प्राहुरित्यस्य पठन्तीत्यर्थकरणं पुनः पुनः पाठेन आनन्दवन्तोऽभूवन्निति फलितार्थकथनम् । अत्र च श्लोके भूयोऽनुव्याहरणात् मुहुर्मुहुः शिष्यैः पुनः पाठात् लोके शोकः श्लोकत्वेन प्रतिबद्धोऽभवत्, श्लोकत्वं प्राप्त इति तीर्थादिव्याख्यानं तदतिनिःसारमिति स्पष्टमेव ॥ ४० ॥

तस्येति । ईदृशैः मा निषादेतिवत् करुणरसप्रधानैरित्यर्थः । अनेन अन्ये रसा अत्र गुणीभूता इति ध्वनितम् ॥ ४१ ॥

उदारेति । उदारस्य यद् वृत्तं चरितम् उदारं वा चरितं

---

* "धर्मकामार्थसम्पन्नं बहुचित्रार्थविस्तरम् ।
समुद्रमिव रत्नाढ्यं लोकश्रुतिपरायणम् ॥" ।
इत्यपि क्वचित् पुस्तकेषु दृश्यते ।

समाचारैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारदर्शनः ॥ ४२ ॥
तदुपगतसमाससन्धियोगं
सममधुरोपनतार्थवाक्यबद्धम् ।

तद्रूपार्थबोधकैः पदैः मनोरमैः श्रुतिकटुत्वादिदोषरहितैः । अस्य यशस्विनो रामस्य दाशरथे रामस्य नारदोपदिष्टस्य । श्लोकशतैरिति शतशब्दोऽनन्तवाची ॥ ४२ ॥

एवं काव्यनिर्माणमुक्त्वा तत्र श्रोतॄन् अभिमुखीकरोति,—तदिति । समासः तत्पुरुषादिः, सन्धिरेकादेशादिकः, योगः प्रकृतिप्रत्यययोः, एते उपगता यथाव्याकरणालङ्कारशास्त्रमर्य्यादं यस्मिन् काव्ये तादृशं काव्यं रघुवरचरितं तद्वर्णनरूपम् । समः पतत्प्रकर्षादिदोषरहितो मधुरः करुणरसयुक्तत्वेन माधुर्य्यगुणप्रधानः, उपनतः प्रसन्नतया उपलभ्यमानो योऽर्थः तद्बोधकवाक्यैर्निबद्धम् । उपनतत्वेन प्रसादगुणवत्ता दर्शिता । समुदायेन वैदर्भीरीतिमत्त्वं ध्वनितं रघोर्गत्यर्थात् निष्पन्नरघुवरशब्देन तस्य सर्वान्तर्य्यामित्वं ध्वनितम् । ईदृशस्यापि मिथ्यार्थकत्वे अनुपादेयत्वं स्यात् अत आह,—मुनिप्रणीतं यथानुशुश्रुवसत्यवाग्ऋषिप्रणीतम् । पुरुषार्थस्वर्गमोक्षादिसाधनत्वं तु रघुवरचरितम् इत्यनेन उक्तप्रायमेव । दशशिरसश्च वधमित्यनेन अन्तमिदं श्रोतव्यमिति सूचितं तेनैव सूचितफललाभात् उत्तरकाण्डं तस्य खिलं भारतस्य हरिवंशवत् । अतएवाग्निमसर्गे वनसञ्चरणपर्य्यन्तं कृत्स्नोपवर्णनमेव समाधिना ऋषिर्वक्ष्यतीति

रघुवरचरितं मुनिप्रणीतं
दशशिरसश्च वधं निशामयध्वम् ॥ ४३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
द्वितीयः सर्गः । २ ।

प्रायः, परे तु दशशिरसो वधं च इत्यन्वयः, तेन सीतात्यागादि-
रूपोत्तरकाण्डीयवृत्तान्तसंग्रह इत्याहुः ॥ ४३ ॥

इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे द्वितीयः सर्गः ॥ २ ॥

तृतीयः सर्गः ।

श्रुत्वा वस्तु समग्रं तद् धर्मार्थसहितं हितम् ।
व्यक्तमन्वेषते भूयो यद् वृत्तं तस्य धीमतः ॥ १ ॥
उपस्पृश्योदकं सम्यङ् मुनिः स्थित्वा कृताञ्जलिः ।
प्राचीनाग्रेषु दर्भेषु धर्मेणान्वेषते * गतिम् ॥ २ ॥

श्रुत्वेति । नारदात् काव्यविषयं रामचरितरूपं वस्तु श्रुत्वा समग्रं प्रपञ्चरहस्यसहितं कुत इति च ब्रह्ममुखात् श्रुत्वा + तस्य धीमतो रामस्य यद् वृत्तं चरितं रहःप्रकाशं तद् भूयः पुनः व्यक्तं साक्षात्कारविषयो यथा भवति तथा कर्तुं अन्वेषते उपक्रान्त इति शेषः । धर्मार्थेति त्रिवर्गोपलक्षणम् । चतुर्थेन तत्तत्सहितं हितं मोक्षफलकम् ॥ १ ॥

उक्तमेवाह,—उपेति वाक्यद्वयम् । सम्यक् उपस्पृश्याचमन-दीक्षा । दर्भाग्रेषामपि प्राग्यतत्वापेक्षानाम् प्राचीनाग्राणां प्राग्रेषु दर्भेषु स्थित्वा धर्मेण योगबलेन ध्यानधारणादिरूपेण च गतिं रामादीनां चरित्रचर्यां अन्वेषते अविकलेन पश्यति स्म ॥ २ ॥

(*) "काव्यधर्माणीषते" इति वा पाठः ।

(+) नारदमुखात् श्रुत्वेति केचित् ।

रामलक्ष्मणसीताभी-राज्ञा दशरथेन च ।
सभार्य्येण सराष्ट्रेण यत् प्राप्तं तत्र तत्त्वतः ॥ ३ ॥
हसितं भाषितं चैव गतिर्या यच्च चेष्टितम् ।
तत् सर्वं धर्मवीर्य्येण यथावत् संप्रपश्यति ॥ ४ ॥
स्त्रीतृतीयेन च तथा यत् प्राप्तं चरता वने ।
सत्यसन्धेन रामेण तत् सर्वं चान्ववेक्षत ॥ ५ ॥
ततः पश्यति धर्मात्मा तत् सर्वं योगमास्थितः ।
पुरा यत् तत्र निर्वृत्तं पाणावामलकं यथा ॥ ६ ॥

रामेत्यादि-श्लोकद्वयमेकं वाक्यम् । भार्य्याः कौशल्याद्याः तत्-सहितेन दशरथेन रामादिभिश्च यत् प्राप्तं सम्बद्धं चरितं राज्य-पालनादिरूपं हसितादिरूपञ्च तत् सर्वं तत्र समाधौ तत्त्वतः धर्म-वीर्य्येण योगजबलेन पश्यति स्म ॥ ३ ॥ ४ ॥

अयोध्यावासकालिकं वृत्तं निरीक्ष्य तदनन्तरं [illegible] निरीक्षितम् इत्याह,—स्त्रीतृतीयेनेति । स्त्रीतृतीया [illegible] चेति यस्य तदुत्तरकालिकम् [illegible] ॥ ५ ॥

नेदं दर्शनं [illegible],—तत इति । [illegible] सादित्यर्थः । योगं समाधिं तत्र समाधौ पुरा [illegible] त्यर्थः । [illegible] इति यावत् ॥ ६ ॥

[illegible]

तत् सर्वं तत्त्वतो दृष्ट्वा धर्मेण स महामतिः ।
अभिरामस्य रामस्य तत् सर्वं कर्तुमुद्यतः ॥ ७ ॥
कामार्थगुणसंयुक्तं धर्मार्थगुणविस्तरम् ।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ ८ ॥
स यथाकथितं पूर्वं नारदेन महात्मना ।
रघुवंशस्य चरितं चकार भगवान् मुनिः ॥ ९ ॥

अनागतञ्च तद्विषयं काव्यम् । अभिरामस्येत्यनेन तादृशकाव्यकरणस्य रागप्राप्तता उक्ता ॥ ७ ॥

कामेति । कामरूपो योऽर्थः पुरुषार्थस्तद्रूपेण गुणेन फलेन युक्तम् । धर्मार्थरूपपुरुषार्थफलेन विस्तरवत्, विस्तरेण तदुभयप्रतिपादकं तद्वाक्यं चेत्यर्थः । रत्नैः काव्यगुणालङ्काररसैराढ्यं पूर्णम् । सर्वश्रुतीनां मनोभूता सारभूता उपनिषदस्तासामिव तदर्थप्रतिपादकं तेन मोक्षफलकत्वम् । व्याख्यानान्तरं तु वचनमात्रादि इत्युपेक्षितम् * ॥ ८ ॥

स इति । रघुवंशस्य तद्वंश्यावतीर्णरामस्य नारदकथनक्रमेणैव चरितं तत्प्रतिपादकं काव्यं चकार इत्यर्थः ॥ ९ ॥

(*) कामश्च अर्थश्च कामार्थौ [illegible] संयुक्तं धर्मोऽर्थो धर्मार्थौ [illegible] धर्मार्थगुणविस्तरं प्राधान्येन [illegible] अर्थः स्यात् विषये [illegible]

जन्म रामस्य सुमहद् वीर्य्यं सर्व्वानुकूलताम् ।
लोकस्य प्रियतां क्षान्तिं सौम्यतां सत्यशीलताम् ॥ १० ॥
नानाचित्राः कथाश्चान्या विश्वामित्रसहायने ।
जानक्याश्च विवाहञ्च धनुषश्च विभेदनम् ॥ ११ ॥
रामरामविवादञ्च गुणान् दाशरथेस्तथा ।

विस्तरेण वर्णनीयान् अर्थान् 'इष्टं हि विदुषां लोके समासव्यासधारणम्' इत्युक्तेः समासेन संक्षेपेणाह,—जन्म इत्यादिना । वीर्य्यं स्वयमक्षतस्य पराभिभवसामर्थ्यम् । सर्व्वानुकूलतां सर्व्वेषामनुवर्त्तनरूपाम् । प्रियतां, विश्लेषासहत्वपर्य्यवसायिनी वपुःसौन्दर्य्यवत्त्वाद् विषयलाभेऽप्यनिवर्त्या विद्यमानानामपि दोषाणाम् अदर्शनकरी वसनसम्बन्धसम्पातेऽप्यनिवर्त्या या अनुपम[illegible]सङ्गिनी इच्छा प्रेमपदवाच्या तद्विषयताम् । एवं भगवति रामे मायामनुजे जातं प्रेम चित्तशुद्धिद्वारा शुद्धविषयं प्रेमात्मपात्मनिदिध्यासनद्वारा मुक्तिजनकज्ञानसम्पादकमिति बोध्यम् । क्षान्तिम् 'उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते' इत्युक्तरूपां, सौम्यताम् अक्रूरदर्शनताम् ॥ १० ॥

नानेति । विश्वामित्रसहायने विश्वामित्रेण सहगमने तदुपस्थितिकाले सभायां मार्गे गमनकाले च चित्रा नानाविधाः अन्याश्च कथा योगवासिष्ठोक्ताः ब्रह्मप्रतिपादिकाः कथा अत्र अन्ये उक्ताः गङ्गादिकथाश्चेत्यर्थः । एतेनात्र श्लोके नानेति अन्या इति च पदं निरर्थकम् । जानक्याश्चेति [illegible] ॥ ११ ॥

रामेति । द्वितीयः परशुरामः गुणान् विनयादिरूपान् ॥ १२ ॥

तथाभिषेकं रामस्य कैकेय्या दुष्टभावताम् ॥ १२ ॥
विघातञ्चाभिषेकस्य रामस्य च विवासनम् ।
राज्ञः शोकं विलापञ्च परलोकस्य चाश्रयम् ॥ १३ ॥
प्रकृतीनां विषादञ्च प्रकृतीनां * विसर्जनम् ।
निषादाधिपसंवादं सूतोपावर्त्तनं तथा ॥ १४ ॥
गङ्गायाश्चापि सन्तारं भरद्वाजस्य दर्शनम् ।
भरद्वाजाभ्यनुज्ञानात् चित्रकूटस्य दर्शनम् ॥ १५ ॥
वास्तुकर्मनिवेशञ्च भरतागमनं तथा ।
प्रसादनञ्च रामस्य पितुश्च सलिलक्रियाम् ॥ १६ ॥

विघातश्चेति । विवासनं वनं प्रति प्रस्थापनम् । परलोकस्य च आश्रयं परलोकगमनं मरणम् इति यावत् ॥ १३ ॥

प्रकृतीनामिति । प्रकृतीनां वञ्चनापूर्वकविसर्जनम् अयोध्यां प्रति परावर्त्तनम् । निषादाधिपो गुहः, सूतः सुमन्त्रः † ॥ १४ ॥

गङ्गाया इति । अभ्यनुज्ञानं सम्मतिः ॥ १५ ॥

वास्त्विति । वास्तुकर्म चित्रकूटे गृहनिर्माणं निवेशं तत्र गृहे अवस्थानं प्रसादनं भरतकर्त्तृकम् ॥ १६ ॥

(*) "तथैव च" इति वा पाठः ।

(†) यद्यपि पूर्वो[illegible], तथापि [illegible] ।

पादुकाग्र्याभिषेकञ्च नन्दिग्रामनिवासनम्।
दण्डकारण्यगमनं विराधस्य बधं तथा ॥ १७ ॥
दर्शनं शरभङ्गस्य सुतीक्ष्णेन समागमम्।
अनसूयासमाख्यां च अङ्गरागस्य चार्पणम् ॥ १८ ॥
दर्शनं चाप्यगस्त्यस्य धनुषो ग्रहणं तथा।
शूर्पणख्याश्च संवादं विरूपकरणं तथा ॥ १९ ॥
बधं खरत्रिशिरसोरुत्थानं रावणस्य च।
मारीचस्य बधं चैव वैदेह्या हरणं तथा ॥ २० ॥
राघवस्य विलापश्च गृध्रराजनिवर्हणम्।
कबन्धदर्शनं चैव पम्पायाश्चापि दर्शनम् ॥ २१ ॥
शबरीदर्शनं चैव फलमूलाशनं तथा।

पादुकेति। श्रेष्ठपादुकयोः भरतकृतम् अभिषेकं, नन्दिग्रामस्य नितराम् अतिशयेन वासनं भरते तत्र गते सर्वप्रजाः तत्रैव वासं कृतवत्य इत्यर्थः ॥ १७ ॥

दर्शनमिति। अनसूयासमाख्याम् अनसूयया सह सीतायाः समाख्या कथाकथनम्। यद्यप्येतत् विराधबधात् पूर्वमेव, तथापि क्रमे तात्पर्याभावात् व्युत्क्रमेणाभिधानम्। अङ्गरागः चन्दनादिः ॥ १८ ॥

दर्शनमिति। अगस्त्यदत्तात् धनुषो ग्रहणम् ॥ १९ ॥

बधमिति। उत्थानं जानकीहरणोद्योगम् ॥ २० ॥ २१ ॥ २२ ॥

प्रलापञ्चैव पम्पायां हनूमद्दर्शनं तथा ॥ २२ ॥
ऋष्यमूकस्य गमनं * सुग्रीवेण समागमम् ।
प्रत्ययोत्पादनं सख्यं वालिसुग्रीवविग्रहम् ॥ २३ ॥
वालिप्रमथनं चैव सुग्रीवप्रतिपादनम् ।
ताराविलापं समयं वर्षरात्रनिवासनम् ॥ २४ ॥
कोपं राघवसिंहस्य बलानामुपसंग्रहम् ।
दिशः प्रस्थापनं चैव पृथिव्याश्च निवेदनम् ॥ २५ ॥
अङ्गुलीयकदानञ्च ऋक्षस्य बिलदर्शनम् ।
प्रायोपवेशनं चैव सम्पातेश्चापि दर्शनम् ॥ २६ ॥

ऋष्येति । प्रत्ययोत्पादनं तालभेदादिभिः सुग्रीवस्य विश्वासजननम् । विग्रहं युद्धम् ॥ २३ ॥

वालीति । सुग्रीवप्रतिपादनं सुग्रीवस्य राज्ये स्थापनम् । समयं शरदि यात्रा कर्त्तव्येति रामसुग्रीवयोः सङ्केतः । वर्षेति वर्षाकालिकवासाङ्गीकरणम् ॥ २४ ॥

कोपमिति । उपसंग्रहं वानराणां मेलनं पृथिव्याश्च निवेदनं सुग्रीवेण वानरान् प्रति पृथ्वीस्थानकथनम् ॥ २५ ॥

अङ्गुलीयकदानं रामकर्त्तृकं हनुमति । प्रायोपवेशनं प्रायेण

(*) "ऋष्यमूकाभिगमनम्"
इति वा पाठः ।

पर्व्वतारोहणं चैव सागरस्यापि लङ्घनम्।
समुद्रवचनाच्चैव मैनाकस्य च दर्शनम्॥ २७॥
राक्षसीतर्जनं चैव छायाग्राहस्य दर्शनम्।
सिंहिकायाश्च निधनं लङ्कामलयदर्शनम्॥ २८॥
रात्रौ लङ्काप्रवेशश्च एकस्यापि विचिन्तनम्।
आपानभूमिगमनम् अवरोधस्य दर्शनम्॥ २९॥
दर्शनं रावणस्यापि पुष्पकस्य च दर्शनम्।
अशोकवनिकायानं सीतायाश्चापि दर्शनम्॥ ३०॥
अभिज्ञानप्रदानञ्च सीतायाश्चापि भाषणम्।
राक्षसीतर्जनं चैव त्रिजटास्वप्नदर्शनम्॥ ३१॥
मणिप्रदानं सीताया वृक्षभङ्गं तथैव च।
राक्षसीविद्रवं चैव किङ्कराणां निबर्हणम्॥ ३२॥
ग्रहणं वायुसूनोश्च लङ्कादाहाभिगर्जनम्।
प्रतिप्लवनमेवाथ मधूनां हरणं तथा॥ ३३॥

अनशनेन वानराणामनुपवेशनं [illegible]॥ २६॥
एकस्यापि विचिन्तनम् [illegible]
अवरोधोऽन्तःपुरम्॥ २९॥
यान [illegible]गमनम्॥ ३०॥
अभिज्ञानं रामदत्ताङ्गुरीयकम्॥ ३१॥ [illegible]॥

राघवाश्वासनं चैव मणिनिर्य्यातनं तथा ।
सङ्गमं च समुद्रेण नलसेतोश्च बन्धनम् ॥ ३४ ॥
प्रतारं च समुद्रस्य रात्रौ लङ्कावरोधनम् ।
विभीषणेन संसर्गं वधोपायनिवेदनम् ॥ ३५ ॥
कुम्भकर्णस्य निधनं मेघनादनिवर्हणम् ।
रावणस्य विनाशं च सीतावाप्तिमरेः पुरे ॥ ३६ ॥
विभीषणाभिषेकं च पुष्पकस्य च दर्शनम् ।
अयोध्यायाश्च गमनं भरद्वाजसमागमम् * ॥ ३७ ॥
प्रेषणं वायुपुत्रस्य भरतेन समागमम् ।

ग्रहणमिति । लङ्कायां दाहेन तत्रत्यानाम् आक्रन्दनं, लङ्कादाहे हनुमद्गर्जनम् इत्यर्थो वा । अभिमर्दनम् इति पाठे तु लङ्काया दाहेन अभितो मर्दनमित्यर्थः । प्रतिश्रवनं पुनः सागरोत्तरणम् ॥ ३३ ॥

मणिनिर्य्यातनं सीतया दत्तस्य शिरोरत्नस्य राघवे दानम् । नलसेतोः नलनिर्म्मितसेतोः ॥ ३४ ॥

प्रतारं सेनाया इति शेषः ॥ ३५ ॥

निवर्हणं मारणम् । अरेः रावणस्य ॥ ३६ ॥

अयोध्यायाश्च गमनं तदुद्देश्यकं गमनम् ॥ ३७ ॥

(*) "पुष्पकारोहणं तथा"
इति वा पाठः ।

रामाभिषेकाभ्युदयं सर्वसैन्यविसर्जनम् ।
स्वराष्ट्ररञ्जनं चैव वैदेह्याश्च विसर्जनम् ॥ ३८ ॥
अनागतञ्च यत् किञ्चिद् रामस्य वसुधातले ।
तच्चकारोत्तरे काव्ये वाल्मीकिर्भगवान् ऋषिः ॥ ३९ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
तृतीयः सर्गः । ३ ।

रामाभिषेकाभ्युदयं रामाभिषेकोत्सवम् । सर्वत्र चकारेत्यनुषज्यते ॥ ३८ ॥

अनागतञ्चेति । यत् किञ्चिदित्यनेन सीताविसर्जनात् पूर्वकालिकस्य भूयस्त्वम् अनन्तरकालस्य अल्पता द्योत्यते, तत् सर्वमुत्तरे सर्वतोऽवशिष्टे काव्ये चकार निबबन्ध इत्यर्थः ॥ ३९ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः ।



प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः ।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत् ॥ १ ॥
चतुर्विंशत्सहस्राणि श्लोकानामुक्तवान् ऋषिः ।
तथा सर्गशतान् पञ्च षट् काण्डानि तथोत्तरम् ॥ २ ॥

प्राप्तेति । अनेन रावणवधोत्तरमेतत् काव्यकरणमिति सूचितम् । वाल्मीकिः तद्विषयवासी ऋषिरित्यर्थादवगन्तव्यम् * । चरितं तत्प्रतिपादककाव्यम् । अर्थवत् ध्वन्यलङ्कारादिप्रशस्तार्थम् "आत्मवान्" इति पाठे अवस्थितान्तःकरणः प्राशस्त्ये मतुप् आत्मशब्दस्य अन्तःकरणवाची ॥ १ ॥

चतुर्विंशदिति । चतुर्विंशतिः इत्यर्थकश्छान्दसः । शतानिति पुंलिङ्गोऽप्येवम् † । तत्र पञ्चशतरूपसर्गसंख्या षट्काण्डानामेव, श्लोकसङ्ख्या तु सोत्तराणामिति आहुः । कतकस्तत्तु उक्तसंख्यापेक्षया षट्त्रिंशत्सर्गसंख्याधिक्यदर्शनात् चतुर्विंशत्सहस्रापेक्षया

* "ते वयं भवता रक्ष्या भवद्विषयवासिनः ।"
इति ऋषिभिरेव उक्तत्वात् ।

† "शतायुतप्रयुताः पुंसि च" इति लिङ्गानुशासनात् पुंलिङ्गत्वं वा ।

श्रुत्वा तु तत् महाप्राज्ञः सभविष्यं सहोत्तरम् ।
चिन्तयामास को न्वेतत् प्रयुञ्जीयादिति प्रभुः ॥ ३ ॥
तस्य चिन्तयमानस्य महर्षेर्भावितात्मनः ।
अगृह्णीतां ततः पादौ मुनिवेषौ कुशीलवौ ॥ ४ ॥
कुशीलवौ तु धर्मज्ञौ राजपुत्रौ यशस्विनौ ।
भ्रातरौ स्वरसम्पन्नौ ददर्शाश्रमवासिनौ ॥ ५ ॥
स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ ।

श्लोकसंख्याया अपि आधिक्यदर्शनात् च उत्तरकाण्डीयसर्गसंख्यानुक्तेश्च प्रक्षिप्तोऽयं श्लोकः तत्त्वार्थ इति आहुः ॥ २ ॥

श्रुत्वेति । सहशब्दः सहितपरः, भविष्येण सह सहितं विशिष्टं यदुत्तरं तेन सहितम् इदं काव्यं ब्रह्मनियोगात् तत्प्रसादाच्च श्रुत्वा, को नु प्रभुः समर्थः एतत् प्रयुञ्जीयात् सभासु पठन् श्रावयेत् सभ्यानिति तु चिन्तयामास । सहोत्तरमिति अत्र उत्तरपदार्थस्य सभविष्यमिति सविशेषणत्वेऽपि आर्षः समासः, भविष्यञ्च सीताविसर्जनमारभ्य इत्येके । तस्याः भूप्रवेशोत्तरकालिकमिति परे । प्रयुञ्जीयादिति छान्दसम् ॥ ३ ॥

तस्येति । भावितात्मनः रामचरितबन्धनेन शुद्धचित्तस्य । अगृह्णीतामिति छान्दसम् । आवां गातारौ इत्युक्त्वा पादग्रहणं कृतवन्तौ । मुनिवेषौ राजकुमारावपि आश्रमस्थितिवशात् तथाभूतौ कुशीलवौ कुशलवौ, कुशशब्दस्य कुशीभावः पृषोदरादित्वात् ॥ ४ ॥

कुशीति । ददर्श काव्यग्रहणे योग्यतया अपश्यदित्यर्थः ॥ ५ ॥

वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ ६ ॥
काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत् ।
पौलस्त्यवधमित्येवं चकार चरितव्रतः ॥ ७ ॥
पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम् ।
जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम् ॥ ८ ॥

स त्विति । धीः धारणावती मेधा । परिनिष्ठितौ जातवेदाध्ययनौ । उपबृंहणं वेदस्य तत्तदर्थे तात्पर्य्यग्राहणं तद्रूपाय अर्थाय प्रयोजनाय । अनेन श्रुतितात्पर्य्यविषयीभूतार्थप्रतिपादकतया प्रामाण्यमस्योपादेयत्वं च सूचितम् ॥ ६ ॥

काव्यमिति । रामस्यायनं चरितं तत्प्रतिपादकत्व महत् काव्यम् । पौलस्त्यवधम् इत्येवं नामकं चकार । तत्तावत् अग्राहयतेति पूर्वेण सम्बन्धः । यथा कृष्णचरितवर्णनरूपमाघकाव्यस्य शिशुपालवधम् इति नाम ॥७॥

पाठ्ये इति । इतः श्लोकचतुष्टयमेकान्वयं पाठ्यगेययोःभावे ण्यत्-यतौ, तेन पाठे गाने च इत्यर्थः । गानं तन्त्रीनाडीसमुत्थश्रुतिभेदेन्वितम् । उभयत्रापि मधुरं श्रोतृसुखजनकं प्रमाणानि द्रुतमध्य-

---

† अस्य वेदोपबृंहणत्वेऽपि कान्तासम्मितत्वात् काव्यत्वव्यपदेशः । तथाहि त्रिविधः सन्दर्भः,—शब्दप्रधानो वेदः प्रभुसम्मितः, अर्थप्रधान इतिहासादिः सुहृत्सम्मितः, व्यङ्ग्यप्रधानं काव्यं कान्तासम्मितम् । महदिति काव्यविशेषणं, "सर्गबन्धो महाकाव्यम्" इत्युक्तेः । इति तीर्थः ।

रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः।
वीरादिभी-रसैर्युक्तं काव्यमेतदगायताम्॥ ९॥
तौ तु गान्धर्वतत्त्वज्ञौ स्थान-मूर्च्छन-कोविदौ।
भ्रातरौ स्वरसम्पन्नौ गन्धर्वाविव रूपिणौ॥१०॥

विलम्बितानि, सप्तजातयः षड्जादयः सप्तस्वराः सप्तस्वरविशिष्ट-गानानुरोधीति यावत्॥ ८॥

रसैरिति। वीरादीत्यादिना बीभत्साद्भुतशान्तसंग्रहः, शृङ्गारादिरसैश्च युक्तं। नवरसयोगीति यावत्; ईदृशं काव्यं तौ अगायताम् *॥ ९॥

तौ विशेषयति,--तौ त्विति। गान्धर्वस्य सामगानाख्यस्य तत्त्वज्ञौ स्थानञ्च मूर्च्छना च तयोः समाहारः स्थानमूर्च्छनं तत्र कोविदौ तत्तत्त्वज्ञौ।

---

* शृङ्गारो द्विविधः, संयोगो विप्रलम्भश्च; तत्र रामस्य सीतया सार्द्धमित्यादि-विहारवृत्तान्तेन संयोगो दर्शितः। तत्परेण विप्रलम्भः, हास्यश्च शूर्पणखादिवृत्तान्तेन, करुणश्च दशरथादिवृत्तान्तेन, वीरो हनुमदादिवृत्तान्तेन, रौद्रो रावणादिवृत्तान्तेन, बीभत्सो विराधकबन्धादिवृत्तान्तेन, अद्भुतः श्रीरामरावणयुद्धादिषु, शान्तश्च श्रवणादिषु बोध्यः। अथ केचित् शोकः श्लोकत्वमागत इत्युक्त्या अस्मिन् प्रबन्धे करुणरसः प्रधान इत्याहुः। अन्ये वीर एव प्रधानः पौलस्त्यवधम् इति नामकरणात्। वयं तु शृङ्गार एव प्रधानः सीतायाश्चरितं महदित्युक्तेः। इति नागोजीभट्टेन व्याख्यातम्।

रूपलक्षणसम्पन्नौ मधुरस्वरभाषिणौ ।
बिम्बादिवोत्थितौ बिम्बौ रामदेहात् तथा परौ* ॥११॥
तौ राजपुत्रौ कार्त्स्न्येन धर्म्यमाख्यानमुत्तमम् ।
वाच्यो विधेयं तत् सर्वं कृत्वा काव्यमनिन्दितौ ॥ १२ ॥

"यदूर्द्ध्वं हृदयग्रन्थेः कपालफलकादधः ।
प्राणसञ्चारणस्थानं स्थानमित्यभिधीयते ।
उरः कण्ठः शिरश्चेति तत् पुनस्त्रिविधं भवेत् ॥
मन्द्रं मध्यञ्च तारञ्च"

इति शाण्डिल्यः । तथा,—

"यत्रैव स्युः स्वराः पूर्णा मूर्च्छना सेत्युदाहृता ।"

इति च, यत्र गीतविशेषे इत्यर्थः । रूपिणौ प्रशस्तरूपवन्तौ ॥ १० ॥

रूपेति । अत्र रूपम् अवयवसंस्थानम्+ उक्तस्य स्वरसम्पन्नौ इत्यस्यैव विवरणं मधुरस्वरेति । बिम्बात् सूर्यादेरुत्थितौ बिम्बौ इव प्रतिबिम्बाविव तथा रामदेहात् उत्थितौ परौ रामदेहावित्यर्थः ॥ ११ ॥

ताविति । धर्म्यं धर्मादनपेतं, वाच्यो विधेयं विनापि पुस्तकं पाठयोग्यम् ॥ १२ ॥

---

* "रूपानुरूपौ रामस्य बिम्बाद् बिम्बमिवोद्धृतौ ।" इति वा पाठः ।

† रूपलक्षणसम्पन्नौ नाटकलक्षणौ । "रूपं स्वभावे शृङ्गारे सौन्दर्य्ये नाटके पशौ" इति कोषः ।

ऋषीणाञ्च द्विजातीनां साधूनाञ्च समागमे।
यथोपदेशं तत्त्वज्ञौ जगतुस्तौ समाहितौ ॥ १३ ॥
महात्मानौ महाभागौ सर्वलक्षणलक्षितौ।
तौ कदाचित् समेतानाम् ऋषीणां भावितात्मनाम् ॥ १४ ॥
मध्येसभं समीपस्थौ इदं काव्यमगायताम्।
तत् श्रुत्वा मुनयः सर्वे बाष्पपर्य्याकुलेक्षणाः ॥ १५ ॥
साधु साध्विति तावूचुः परं विस्मयमागताः।
ते प्रीतमनसः सर्वे मुनयो धर्मवत्सलाः ॥ १६ ॥

ऋषीणां द्विजातीनामिति गोबलीवर्दन्यायेन। साधूनां द्विजेतराणामपि, यथोपदेशं जगतुः। तत्त्वज्ञौ काव्यस्य गानादेश्च तत्त्वज्ञौ। सुसमाहितौ सुतरां स्थिरचित्तौ ॥ १३ ॥

लक्ष्यलक्षणेति पाठे सामुद्रिकविद्भिर्लक्ष्यं परीक्ष्यं लक्षणं सुलक्षणं तेन लक्षितौ युक्तौ अत एव महात्मानौ। महाभागौ च भागो भाग्यमत्र।

"गीयतामिदमाख्यानं भवद्भ्यामृषिसंसदि।
राजर्षीणां पुण्यकृतां साधूनाञ्च समागमे।
गुरुणैवमनुज्ञातौ प्रकृत्या मधुरस्वरौ॥"

इति क्वचित् पठ्यते, तदनन्वयीति स्पष्टमेव। भावितात्मनां शुद्धचित्तानां ॥ १४ ॥

मध्येसभम् इत्यव्ययीभावः। समीपस्थौ सन्निहिताविल्यर्थः। तत् गानम् ॥ १५ ॥ १६ ॥

प्रशशंसुः प्रशस्तव्यौ गायमानौ कुशीलवौ ।
अहो गीतस्य माधुर्यं श्लोकानाञ्च विशेषतः ॥ १७ ॥
चिरनिर्वृत्तमप्येतत् प्रत्यक्षमिव दर्शितम् ।
प्रविश्य तावुभौ सुष्ठु तथाभावमगायताम् ॥ १८ ॥
सहितौ मधुरं रक्तं सम्पन्नं स्वरसम्पदा ।
एवं प्रशस्यमानौ तौ तपःश्लाघ्यैर्महर्षिभिः ॥ १९ ॥
संरक्ततरमत्यर्थं मधुरं तावगायताम् ।
प्रीतः कश्चिन्-मुनिस्ताभ्यां संस्थितः कलशं ददौ ॥ २० ॥
प्रसन्नो वल्कलं कश्चिद् ददौ ताभ्यां महायशाः ।

प्रशस्तव्याविति इडभाव-नलोपौ छान्दसौ । अहो आश्चर्यम् ॥१७॥
चिरेति । एतत् रावणवधान्तचरितम् । एवम् ऋषिप्रशंसानन्तरं पुनस्तयोर्गानमाह,—भावं काव्याभिप्रायं, तत्तद्रसरूपं प्रविश्य तन्मयीभूय सुष्ठु यथा श्रोतॄणां रसाविर्भावो भवति तथा अगायतामित्यर्थः ॥१८॥

सहिताविति । मधुरं पाठतो गानतश्च रक्तम् उच्चैः स्वरसम्पदा षड्जादिस्वरसम्पदा सम्पन्नं यथा भवति तथा अगायताम् इति पूर्वेण सम्बन्धः । एवम् अहो गीतस्य इत्याद्युक्तरीत्या ॥१९॥

संरक्ततरम् अत्युच्चतरं तथापि अत्यर्थं मधुरं ततो रामायण-गानश्रवणानन्दपरवशानां मुनीनां चेष्टाम् आह,—प्रीत इति । संस्थितः सभायामिति शेषः ॥ २० ॥ २१ ॥

अन्यः कृष्णाजिनमदाद् यज्ञसूत्रं तथापरः ॥ २१ ॥
कश्चित् कमण्डलुं प्रादान्मौञ्जीमन्यो महामुनिः।
बृषीमन्यस्तदा प्रादात् कौपीनमपरो मुनिः ॥ २२ ॥
ताभ्यां ददौ तदा हृष्टः कुठारमपरो मुनिः।
काषायमपरो वस्त्रं चीरमन्यो ददौ मुनिः ॥ २३ ॥
जटाबन्धनमन्यस्तु काष्ठरज्जुं मुदान्वितः।
यज्ञभाण्डमृषिः कश्चित् काष्ठभारं तथापरः ॥ २४ ॥
औदुम्बरीं बृषीमन्यः स्वस्ति केचित् तदावदन्।
आयुष्यमपरे प्राहुर्मुदा तत्र महर्षयः ॥ २५ ॥
ददुश्चैवं वरान् सर्वे मुनयः सत्यवादिनः।
आश्चर्य्यमिदमाख्यानं मुनिना सम्प्रकीर्त्तितम् ॥ २६ ॥
परं कवीनामाधारं समाप्तञ्च यथाक्रमम्।

बृषीम् व्रतिनामासनम् * ॥ २२ ॥ २३ ॥ २४ ॥
स्वस्तीत्याद्याशीः ॥ २५ ॥
आश्चर्य्यमित्यादि सनोच्चरमित्यन्तम् एकवाक्यम् ॥ २६ ॥
परमिति। कवीनामाधारं वर्णनीयार्थस्य प्रकारभेदलाभद्वारा।
हे सर्व्वगीतेषु कोविदौ कुशीलवौ! इदं गीतं गानयोग्यं वस्तु

* "व्रतिनामासनं बृषी" इति हलायुधः।

अभिगीतमिदं गीतं सर्वगीतेषु कोविदौ ॥ २७ ॥
आयुष्यं पुष्टिजननं सर्वश्रुतिमनोहरम् ।
प्रशस्यमानौ सर्वत्र कदाचित् तत्र गायकौ ॥ २८ ॥
रथ्यासु राजमार्गेषु ददर्श भरताग्रजः ।
स्व-वेश्म चानीय ततो भ्रातरौ स कुशीलवौ ॥ २९ ॥
पूजयामास पूजार्हौ रामः शत्रुनिवर्हणः ।
आसीनः काञ्चने दिव्ये स च सिंहासने प्रभुः ॥३० ॥
उपोपविष्टैः सचिवैर्भ्रातृभिश्च समन्वितः ।
दृष्ट्वा तु रूपसम्पन्नौ विनीतौ भ्रातरावुभौ ॥ ३१ ॥

अभिगीतं सुष्ठु गीतम् । यथाक्रमं समाप्तं समापितं च अवगीतमिति पाठे क्रमवद्यं यथा तथा गीतमित्यर्थः ॥ २७ ॥

आयुष्यम् आयुर्जनकं पुष्टिरभ्युदयः सर्व्वश्रुतिमनोहरं सर्वश्रुतीनां मनांसि उपनिषदः, तदर्थहरमित्यनेन मोक्षदं गीतमित्येवं सर्व्वत्र प्रशस्यमानौ तत्र अयोध्यायां रथ्यासु स्वल्पवीथिषु राजमार्गेषु च गायमानौ तौ कदाचित् भरताग्रजो रामो ददर्श इत्यन्वयः ॥ २८ ॥ २९ ॥ ३० ॥

"उपोपविष्टसचिवः" इति पाठे उप समीपे उपविष्टाः सचिवा यस्येत्यर्थः । "उपोपविष्टैः सचिवैः" इति पाठे समीपस्थैर्मन्त्रिभिर्भ्रातृभिश्च समन्वित इत्यर्थः । "आत्मानुरूपसम्पन्नौ" इति पाठे आत्मसदृशावित्यर्थः । 'दृष्ट्वा तु रूपसम्पन्नौ' इति प्रचुरः पाठः ॥३१॥

उवाच लक्ष्मणं रामः शत्रुघ्नं भरतं तथा।

श्रूयतामेतदाख्यानम् अनयोर्देववर्चसोः॥ ३२॥

विचित्रार्थपदं सम्यक् गायकौ समचोदयत्।

तौ चापि मधुरं रक्तं स्वचित्तायतनिस्वनम्॥ ३३॥

तन्त्रीलयवदत्यर्थं विश्रुतार्थमगायताम्।

ह्लादयत् सर्वगात्राणि मनांसि हृदयानि च।

श्रोत्राश्रयसुखं गेयं तद् बभौ जनसंसदि॥ ३४॥

इमौ मुनी पार्थिवलक्षणान्वितौ

कुशीलवौ चैव महातपस्विनौ।

अनयोः सकाशाद् एतदाख्यानं श्रूयतामिति लक्ष्मणादीन् उवाच॥ ३२॥

विचित्रार्थपदमिति पूर्वान्वयि। ततो गायकौ गातुं प्रेरयत्। स्वचित्तायतनिस्वनं स्वस्य श्रोतृचित्तस्य च अनुरूप आयतः तारः निस्वनो नादो यत्र तथा स्वबलानुरूपं श्रोतृचित्ताह्लादकञ्च यथा भवति तावदुच्चस्वरमिति फलितम्॥ ३३॥

तन्त्रीलयवत् तन्त्रीशब्दसदृशम्। विश्रुतार्थं विशेषतः श्रुत-मात्रेण अर्थबोधजनकं यथा भवति, तथा अतिशयेन अगाय-ताम् इत्यन्वयः। सर्वगात्राणि श्रोतॄणां सर्व्वगात्राणि ह्लादयन् रोमाञ्चादिप्रादुर्भावेन आनन्दानुप्रादुर्भावनसमर्थानि कुर्व्वन् मनसा

ममापि तद् भूतिकरं प्रचक्षते
महानुभावं चरितं निबोधत ॥ ३५ ॥

आह्लादो नाम निद्रायामिव विस्मृतान्यव्यापारता । हृदयानि हृदयमिति हृदयम् इत्युपनिषन्निर्वचनात् हृदयं प्रत्यगात्मा उपाधिभेदात् बहुवचनं तस्य ह्लादनं नाम तत्सुखभोगः श्रोत्रं कर्णशष्कुली तदाश्रयं श्रोत्रेन्द्रियं तस्य सुखम् ॥ ३४ ॥

अथ आख्यानस्य श्रवणे प्रयोजनमुपदिशन् पुनरपि लक्ष्मणादीनत्यादरेण श्रवणार्थं प्रेरयति,—इमाविति । तत् तस्मात् महातपस्विनो आश्रमवासात् तपोयुक्तौ स्वरूपतस्तु आजानुबाहुत्वादिपार्थिवलक्षणान्वितौ मुनिस्निग्धत्वाच्च मुनी इमौ प्रबन्धस्य गायकौ । चरितं गेयं काव्यञ्च महानुभावं शब्दार्थ-अलङ्कार-ललितसन्दर्भत्वादिवैभवेन सार्वभौमविषयत्वेन च महावैभवं अतः निबोधत आदरेण शृणुत । किञ्च यतः तत् काव्यं तच्छ्रवणञ्च ममापि भूतिकरम् इह अमुत्र अभ्युदयकरं प्रचक्षते अनेककल्पजीविनो वृद्धाः । पूर्वपूर्वरामायणस्य तैस्तत्फलत्वोक्त्या अस्यापि तत्फलकत्वमिति भाव इति प्राञ्चः । वस्तुतो मम चरितं मत्सम्बन्धि तच्चरितं मच्चरितार्थप्रतिपादकं तत् लोकोत्तरं काव्यं निबोधत यतस्तत् श्रोतॄणां भूतिकरमपि भुक्तिमुक्तिदमपि प्रचक्षते । पूर्ववत् श्रवणमात्रेण सर्वगणाह्लादाद्यपिशब्दग्राह्यम् । अतएव महानुभावं महाप्रभावम् अस्य श्लोकस्य लक्ष्मणादीनाम् एतत्श्रवणप्रवर्त्तकार्थकत्वेनैवम् एवास्य व्याख्या उचिता इति द्रष्टव्यम् ॥ ३५ ॥

ततस्तु तौ रामवचःप्रचोदितौ
अगायतां मार्गविधानसम्पदा
स चापि रामः परिषद्गतः शनैः
बुभूषया सक्तमना बभूव ह ॥ ३६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
चतुर्थः सर्गः ॥ ४ ॥

तत इति। अगायतामिति अगायेतामित्यर्थः। रामवचःप्रेरितौ तौ मार्गविधानसम्पदा, गानं द्विविधं मार्गो देशी चेति। तत्र प्राकृतावलम्बि गानं देशी, संस्कृतावलम्बि तु गानं मार्गः, तयोर्मध्ये मार्गाख्यगानमार्गावलम्बनसामग्र्या अगायताम्। परिषद्गतः सभागतः स रामोऽपि बुभूषया स्वचरितस्य चिरकालं स्थितीच्छया प्रबन्धस्य गीतश्रवणे आसक्तमना बभूव। शनैः पदेन उत्तमपुरुषत्वात् स्वप्रसंशार्थके अत्र कार्ये शनैः प्रवृत्तिरिति व्यज्यते। स्वयं श्रवणे च उत्तरोत्तरं लोकानामुपादेयत्वबुद्ध्या श्रवणे प्रवृत्तौ तस्य चिरत्वं भवतीति तदाशयः स्वप्रवर्त्तितकवित्वत्वात् च एवमिच्छा भगवत इति बोध्यम् इहामुत्र स्वाभ्युदयेच्छयेति व्याख्यानं त्वयुक्तं भगवतः स्वाभ्युदयेच्छाया बाधात्। एतेन राज्ञां कविकृतस्वकाव्यश्रवणम् आवश्यकमिति सूचितम् ॥ ३६ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चतुर्थः सर्गः ॥ ४ ॥

पञ्चमः सर्गः ।

सर्वापूर्वमियं येषाम् आसीत् कृत्स्ना वसुन्धरा ।
प्रजापतिमुपादाय नृपाणां जयशालिनाम् ॥ १ ॥
येषां स सगरो नाम सागरो येन खानितः ।
षष्टिपुत्रसहस्राणि यं यान्तं पर्य्यवारयन् ॥ २ ॥

एवं सर्गचतुष्टयेन उपोद्घातं कृत्वा वस्तु निर्दिशति,—सर्वेति । कृत्स्ना इयं वसुन्धरा प्रजापतिं वैवस्वतं मनुम् उपादाय उपक्रम्य जयशालिनां जयेन शोभावतां नृपाणां सर्वापूर्वं ऐहिकामुष्मिक-सर्वापूर्वसाधनं यथा भवति तथा आसीत् सर्वापूर्वशब्दो हि उपादेयपरो नियतनपुंसकलिङ्ग इति केचित् * ॥ १ ॥

किञ्च येषां वंशे स सगरो नाम अभूत् । सागर इत्यादिना समुद्रे सागर-शब्द-प्रवृत्तिः तदधीनेति सूचितम् । षष्टिगुणितानि पुत्रसहस्राणि षष्टिसहस्राणि क्वचित्तु षष्टिरिति पृथक्पदपाठः अनेन तदुद्धारार्थं तद्वंश्येन जगत्पवित्रीकरणसमर्था गङ्गा यद्वंशेऽवतारिता इति व्यज्यते । तेन च अतिशायितं तद्वंशमाहात्म्यं सूचितं तद्वंशस्य गङ्गापरनामकभगवदवतारयोग्यता च तेन सूचिता ॥ २ ॥

---

* न विद्यमानः पूर्व्वो यस्मात् अपूर्व्वः सर्व्वेषां राज्ञाम् अपूर्व्वं प्रथमम् अनन्यसाधारणमिति यावत् इति क्रियाविशेषणतया बोध्यम् ।

इक्ष्वाकूणामिदं तेषां राज्ञां वंशे महात्मनाम्।
महदुत्पन्नमाख्यानं रामायणमिति श्रुतम् ॥ ३ ॥
तदिदं वर्त्तयिष्यावः सर्वं निखिलमादितः।
धर्मकामार्थसहितं श्रोतव्यमनसूयता ॥ ४ ॥
कोसलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान् ॥ ५ ॥

तेषाम् इक्ष्वाकूणां वंशे रामायणमिति नाम्ना प्रसिद्धं महत् आख्यानम् उत्पन्नमिति योजना। इक्ष्वाक्वपत्येषु इक्ष्वाकुत्वारोपात् इक्ष्वाकूणामित्युक्तिः ॥ ३ ॥

तदिति। तदिदं बुद्धिस्थम् आदितः आदिमारभ्य निखिलं उत्तरकाण्डान्तं सर्वशब्दोऽवयवकार्त्स्न्ये सर्व्वावयवकं वर्णपदच्युतिरहितमिति यावत्। धर्मकामार्थाः सहिता यस्मात् तत्सहिता इत्यत्र केनेत्याकाङ्क्षायां मोक्षेणेति गम्यते। तेन पुरुषार्थचतुष्टयसाधनमिति फलितम्। वर्त्तयिष्यावः गास्यावः। तत्तु अनसूयता असूयाम् अकुर्व्वता श्रोतव्यम् अनेन असूयाराहित्यमेव एतच्छ्रवणाधिकारि विशेषणम् इत्युक्तम्। सर्व्वपुरुषार्थसाधनत्वाच्च श्रवणे अत्यादरः सूचितः ॥ ४ ॥

कोसल इति। मुदितः राजभिर्धर्मतः परिपालनात्। स्फीतः उत्तरोत्तरं वृद्धिं प्राप्तः सरयूतीरे तदुपलक्षितदेशे निविष्टः स्थितः। जनपदोऽस्तीति शेषः ॥ ५ ॥

अयोध्या नाम नगरी तत्रासीत् लोकविश्रुता ।
मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम् ॥ ६ ॥
आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ ७ ॥
राजमार्गेण महता सुविभक्तेन शोभिता ।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ ८ ॥
तां तु राजा दशरथो महाराष्ट्रविवर्द्धनः ।
पुरीमावासयामास दिवि देवपतिर्यथा ॥ ९ ॥

अयोध्येति । तत्र कोसलजनपदे अयोध्या नाम लोकविश्रुता नगरी अस्ति, या मानवेन्द्रेण मनुना स्वयं निर्मिता आसीत् । पुरी सप्तपुर्य्यन्तर्गता ॥ ६ ॥

आयतेति । सरयूतीरोपश्लेषेण द्वादश-योजन-दीर्घा, त्रीणि योजनानीति शेषः । विस्तीर्णा तिर्य्यग् विस्तारवती । महापथो वहिर्मार्गः ॥ ७ ॥

राजेति । राजमार्गः सर्व्वापणशोभितो राजद्वारात् पुरप्रदेशः । मुक्तपुष्पाणि विकसितपुष्पाणि ॥ ८ ॥

तां त्विति । दिवि देवपतिरिन्द्रः पुरीम् अमरावतीं यथा आवासयामास, एवं राजा दशरथस्तां पुरीम् आवासयामास । पूर्वाधिकलोकवसतिमतीं चकार, धर्मन्यायबलेन पोषणात् महतो राष्ट्रस्य विशेषेण वर्द्धनकर्त्ता ॥ ९ ॥

कपाटतोरणवतीं सुविभक्तान्तरापणाम्।
सर्वयन्त्रायुधवतीम् उषितां सर्वशिल्पिभिः॥ १०॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभाम्।
उच्चाट्टालध्वजवतीं शतघ्नीशतसङ्कुलाम्॥ ११॥
वधूनाटकसङ्घैश्च संयुक्तां सर्वतः पुरीं।
उद्यानाम्रवनोपेतां महतीं शालमेखलाम्॥ १२॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदाम्।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा *॥ १३॥

कपाटेति। तोरणं वहिर्द्वारालङ्कारदारुबन्धः। सुविभक्तम् अन्तरं येषां तादृशा आपणा यस्यां सा। सर्व्वयन्त्रायुधवतीं प्राकारोपरीति शेषः। उषितां कृतवासाम्॥ १०॥

सूतेति। सूताः स्तुतिपाठकाः। मागधाः वंशावलीकथकाः। अट्टालाः उपरिगृहाः। शतघ्नी नाम प्राकारसंरक्षणार्थम् लौह-भारनिर्मिताः प्राकारोपरि स्थापिताः आयुधविशेषाः॥ ११॥

वध्विति। वधूनां नाटकशालासमुदायैः सर्व्वतो युक्ताम्। उद्यानानि क्रीडार्थपुष्पवाटिकाः। शालः प्राकारः * शालवनं वा॥१२॥

दुर्गेति। जलदुर्गेण गम्भीरा अगाधा परिखा यस्यां ताम्

---

* "नाना-यान-समाकुलाम्"
इति वा पाठः।

* "प्राकारो वरणः शालः" इत्यमरः।

सामन्तराजसङ्घैश्च बलिकर्मभिरावृताम् ।
नानादेशनिवासैश्च वणिग्भिरुपशोभिताम् ॥ १४ ॥
प्रासादै रत्नविकृतैः पर्वतैरिव शोभिताम् ।
कूटागारैश्च सम्पूर्णाम् इन्द्रस्येवामरावतीम् ॥ १५ ॥
चित्रामष्टापदाकारां वरनारीगणायुताम् ।
सर्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥ १६ ॥
गृहगाढामविच्छिद्रां समभूमौ निवेशिताम् ।
शालितण्डुलसंपूर्णाम् इक्षुकाण्डरसोदकाम् ॥ १७ ॥

अतएव दुर्गां मित्रैरपि दुःखगम्याम् अन्यैः शत्रुभिः दुरासदाम् अशक्यसमीपगमनामपि । वारणा गजाः ॥ १३ ॥

सामन्तेति । समन्तात् भवैः राजसमूहैः बलिः करः तद्दानरूपं कर्म येषां तादृशैः ॥ १४ ॥

रत्नविकृतैः रत्ननिर्मितैः पर्व्वतसदृशैः प्रासादैः शोभिताम् । कूटाख्यैः अगारैः गृहैः स्त्रीणां क्रीडागृहैः इति यावत् । कूटाः शालाः अगारं गृहम् इत्यन्ये ॥ १५ ॥

चित्रमिति । अष्टापदं सुवर्णं तज्जलेन कृतः आकारः अलङ्कारो यस्याः इत्येके । द्यूतफलकाकाराम् इत्यन्ये । विमानगृहं सप्तभूमिगृहम् । 'विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि' इति निघण्टुः ॥ १६ ॥

गृहेति । गृहैः पौरकुटुम्बिगृहैः । गाढां निबिडाम् अतएव अविच्छिद्राम् । इक्षुकाण्डरससमानस्वादूदकवतीम् ॥ १७ ॥

दुन्दुभीभिर्मृदङ्गैश्च वीणाभिः पणवैस्तथा।
नादितां भृशमत्यर्थं पृथिव्यां तामनुत्तमाम्॥ १८॥
विमानमिव सिद्धानां तपसाधिगतं दिवि।
सुनिवेशितवेश्मान्तां नरोत्तमसमावृताम्॥ १९॥
ये च बाणैर्न विध्यन्ति विविक्तमपरापरम्।
शब्दवेध्यञ्च विततं लघुहस्ता विशारदाः॥ २०॥
सिंहव्याघ्रवराहाणां मत्तानां नदतां वने।
हन्तारो निशितैः शस्त्रैर्बलाद् बाहुबलैरपि॥ २१॥

भृशं नादितां पृथिव्याम् अत्यर्थम् अत्यन्तम् अनुत्तमाम् इति बहुव्रीहिः॥ १८॥

तपसा प्राप्तं दिवि सिद्धानां विमानमिव पृथिव्याम् अनुत्तमामिति सम्बन्धः। सुष्ठु निवेशितः वेश्म अन्तर्बाह्यप्रदेशो यस्यां ताम्॥ १९॥

ये चेति। विविक्तं स्वसमूहाद् भ्रष्टं सहायरहितम् अपरापरं परे पित्रादयः अपरे पुत्रादयः तैर्हीनं वंशस्य एकतन्तुमित्येके। परकीयस्वकीयभिन्नं केवलप्रेक्षकम् इत्यन्ये। तथा शब्दमात्रानुमित-सत्तया वेधयोग्यं प्रच्छन्नमिति यावत्। तथा विततञ्च विबध्य युद्धं कृत्वा पश्चात् ततं पलायितम् ईदृशान् शब्दवेधानपि ये बाणैर्न विध्यन्ति, ये च लघुहस्ताः शीघ्रवेधिनः, विशारदाः अस्त्रशस्त्रप्रयोग-समर्थाः तेषां सहस्रैः पूर्णामित्युत्तरेण सम्बन्धः॥ २०॥

सिंहेति। बाहुबलैरपि मल्लयुद्धैरपि॥ २१॥

तादृशानां सहस्रैस्ताम् अभिपूर्णां महारथैः ।
पुरीमावासयामास राजा दशरथस्तदा ॥ २२ ॥

तामग्निमद्भिर्गुणवद्भिरावृतां
द्विजोत्तमैर्वेदषडङ्गपारगैः ।
सहस्रदैः सत्यरतैर्महात्मभि-
र्महर्षिकल्पैर्ऋषिभिश्च केवलैः । २३ ।

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
पञ्चमः सर्गः ॥ ५ ॥

महारथैः "आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः । स महारथसंज्ञः स्यात्" एको दशसहस्रैः योद्धा च । आवासयामास तेषाम् आवासेन तैः पूर्णां चकार इत्यर्थः ॥ २२ ॥

तामिति । अग्निमद्भिः आहिताग्निभिः गुणाः शमदमादयः । वेदानां षडङ्गानां च पारगैः । महर्षिकल्पैः महर्षिसदृशैः केवलैः मुख्यैः ऋषिभिर्ब्रह्मर्षिभिश्च आवृतां व्याप्ताम् ॥ २३ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः ।



तस्यां पुर्य्यामयोध्यायां वेदवित् सर्वसंग्रहः ।
दीर्घदर्शी महातेजाः पौरजानपदप्रियः ॥ १ ॥
इक्ष्वाकूणामतिरथो यज्वा धर्मपरो वशी ।
महर्षिकल्पो राजर्षिस्त्रिषु लोकेषु विश्रुतः । २ ।
बलवान् निहतामित्रो मित्रवान् विजितेन्द्रियः ।
धनैश्च सञ्चयैश्चान्यैः शक्रवैश्रवणोपमः ॥ ३ ॥
यथा मनुर्महातेजा लोकस्य परिरक्षिता ।
तथा दशरथो राजा लोकस्य परिरक्षिता ॥ ४ ॥

तस्यामिति । वेदवित् त्रैवर्णिकमात्रस्य आद्योऽयं गुणः । सर्वसंग्रहः सर्वेषाम् अपरिमितचतुरङ्गबलराष्ट्रदुर्गादीनां संग्राहकः । एवं सामादिप्रयोगे एवं फलं भविष्यतीत्यादि दीर्घदर्शनशीलः । तेजः प्रतापः ॥ १ ॥

अतिरथः दशसहस्रमहारथैर्योद्धा । वशी स्वाधीनः ॥ २ ॥

धनं हिरण्यादि. अन्यैः सञ्चयैः धान्यादिसञ्चयैः ॥ ३ ॥ ४ ॥

तेन सत्याभिसन्धेन त्रिवर्गमनुतिष्ठता।
पालिता सा पुरी श्रेष्ठा इन्द्रेणेवामरावती॥ ५॥
तस्मिन् पुरवरे हृष्टा धर्मात्मानो बहुश्रुताः।
नरास्तुष्टा धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः॥ ६॥
नाल्पसन्निचयः कश्चिद् आसीत्तस्मिन् पुरोत्तमे।
कुटुम्बी यो ह्यसिद्धार्थो गवाश्वधनधान्यवान्॥ ७॥
कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित्।
द्रष्टुं शक्यमयोध्यायां नाविद्वान् न च नास्तिकः॥ ८॥

तेनेति। सत्याभिसन्धः सत्यप्रतिज्ञः। धर्मकामार्थाः त्रिवर्गः तत्सम्पादककर्मानुष्ठानप्राधान्येन पालिता अभवदिति योजना॥ ५॥

धर्मात्मानः धर्मवासनावत्चित्ताः। बहुश्रुता इति बहुव्रीहिः॥ ६॥

नाल्पेति। सताम् उत्कृष्टवस्तूनां निचयः सन्निचयः, अल्पः सन्निचयो यस्य, स नास्ति। अभावमुखेन सर्वेषां बहुधनवत्ता सूच्यते। योऽपि अगवादिमान् अर्थाभावेऽव्ययीभावे नञ्तत्पुरुषे वा ततो मतुप्। अतएवासिद्धार्थः असिद्धैहिकामुष्मिकप्रयोजनः ईदृशः कुटुम्बी न कश्चिदासीत् इति योजना एवमग्रेऽपि॥ ७॥

कामी कामैकतत्परः। कदर्यः 'आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीडयेत्। लोभाद्यः पितरौ भातॄन् स कदर्य्य इति स्मृतः'। 'नृशंसो

सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः ।
मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ ९ ॥
नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो न नलिप्ताङ्गो नासुगन्धश्च विद्यते ॥ १० ॥
नामृष्टभोजी नादाता नाप्यनङ्गदनिष्कधृक् ।
नाहस्ताभरणो वापि दृश्यते नाप्यनात्मवान् ॥ ११ ॥
नानाहिताग्निर्नायज्वा न क्षुद्रो वा न तस्करः ।
कश्चिदासीदयोध्यायां न चावृत्तो न सङ्करः ॥ १२ ॥

घातुकः क्रूरः । अक्षममिति सामान्ये नपुंसकम् । अत्र नञ् आरूढ्याकाम्यादिषु सम्बध्यते तेनैकगुणवतां समुदितगुणवतां च तत्र सत्ता निषिध्यते ॥ ८ ॥

सर्वे इति । सुसंयताः सुष्ठु निरुद्धेन्द्रियाः ॥ ९ ॥

भोगो धर्माविरुद्धः कामभोगः । अमृष्टोऽनिर्मलः 'न नलिप्ताङ्गः' इति पाठः । न नलिप्ताङ्ग इति सुप्सुपेति समासः । लेपः चन्दनादिना, तदाह नासुगन्ध इति ॥ १० ॥

निष्कः उरोभूषणम् । अनात्मवान् अजितान्तःकरणः ॥ ११ ॥

अयज्वा सोमयागरहितः । क्षुद्रः अल्पवित्तैश्वर्यादिमान् । अवृत्तः सदाचाररहितः । न सङ्करः कुण्डगोलकादि 'न च निर्वृत्तसङ्करः' इति पाठे निर्वृत्तम् अनुष्ठितं साङ्कर्यं परस्त्रीषु बीजावापादिरूपं येन स इत्यर्थः । सङ्करशब्दो भावप्रधानः ॥ १२ ॥

स्वकर्मनिरता नित्यं ब्राह्मणा विजितेन्द्रियाः ।
दानाध्ययनशीलाश्च संयताश्च प्रतिग्रहे ॥ १३ ॥
नास्तिको नानृती वापि न कश्चिदबहुश्रुतः ।
नासूयको न चाशक्तो नाविद्वान् विद्यते क्वचित् ॥ १४ ॥
नाषडङ्गविदत्रास्ति नाव्रतो न सहस्रदः ।
न दीनः क्षिप्तचित्तो वा व्यथितो वापि कश्चन ॥ १५ ॥
कश्चिन्नरो वा नारी वा नाश्रीमान्नाप्यरूपवान् ।
द्रष्टुं शक्यमयोध्यायां नापि राजन्यभक्तिमान् ॥ १६ ॥

स्वेति । दानं नित्यप्रायं यथाशक्ति । निषिद्धात् परद्रव्यस्य स्वीकारः प्रतिग्रहः, तत्र संयताः संकुचिताः निषिद्धप्रतिग्रहरहिता इत्यर्थः ॥ १३ ॥

नास्तिकइति । नास्ति परलोक इति बुद्धिमान् । अनृती असत्यवचनः । 'अनृतः' इति पाठेऽपि स एवार्थः । अशक्तः स्वीयैहिकामुष्मिकार्थसाधनासमर्थः ॥ १४ ॥

नेति । व्रतम् एकादश्यादिव्रतम् । क्षिप्तचित्त इति उन्मादादिना इति शेषः । व्यथितः आधिव्याधिपीडितः ॥ १५ ॥

कश्चिदिति । नार्य्यां नाश्रीमतीत्याद्यूह्यम् । श्रीः शोभा । कान्तिः रूपं गौरवर्णत्वादि । राजा दशरथः तस्मिन् भक्तिः स्नेहः तदभाववान् नाभूत् ॥ १६ ॥

वर्णेष्वग्र्यचतुर्थेषु देवतातिथिपूजकाः ।
कृतज्ञाश्च वदान्याश्च शूरा विक्रमसंयुताः ॥ १७ ॥
दीर्घायुषो नराः सर्वे धर्मं सत्यं च संश्रिताः ।
सहिताः पुत्रपौत्रैश्च नित्यं स्त्रीभिः पुरोत्तमे ॥ १८ ॥
क्षत्रं ब्रह्ममुखं चासीद्-वैश्याः क्षत्रमनुव्रताः ।
शूद्राः स्वकर्मनिरतास्त्रीन् वर्णानुपचारिणः ॥ १९ ॥
सा तेनेक्ष्वाकुनाथेन पुरी सुपरिरक्षिता ।
यथा पुरस्तान्-मनुना मानवेन्द्रेण धीमता ॥ २० ॥
योधानामग्निकल्पानां पेशलानाममर्षिणाम् ।
सम्पूर्णा कृतविद्यानां गुहा केसरिणामिव ॥ २१ ॥

प्रथमं राजानं स्तुत्वा 'तस्मिन् पुरवरे' इत्यादिभिर्ब्राह्मणप्रशंसा कृता, इदानीं क्षत्रियादिसाधारण्येन वर्णाः प्रशस्यन्ते वर्णेष्विति त्रिभिः,—अग्र्यचतुर्थेषु अग्र्यो ब्राह्मणः, स चतुर्थो येषां तेषु. 'वदान्यो दानशौण्डः स्यात्' इति विश्वः । सर्वे वर्णा इति शेषः । सर्वेश्चासन् इति शेषः ॥ १७ ॥ १८ ॥

ब्रह्ममुखं ब्राह्मणप्रधानं तदाज्ञावर्त्तीत्यर्थः । शूद्राणां स्वकर्म आह,—त्रीनिति । उपचारः सेवा ॥ १९ ॥ २० ॥

योधानामिति । शौर्य्यातिशयात् अग्नितुल्यानां पेशलानां अकुटिलानाम् अमर्षिणां कृताभिभवासहिष्णूनां कृतविद्यानाम् अभ्यस्तास्त्रादिविद्यानां योधानां सङ्घैः सम्पूर्णेति योजना ॥ २१ ॥

काम्बोजविषये जातैर्बाल्हीकैश्च हयोत्तमैः ।
वनायुजैर्नदीजैश्च पूर्णा हरिहयोत्तमैः ॥ २२ ॥
विन्ध्यपर्वतजैर्मत्तैः पूर्णा हैमवतैरपि ।
मदान्वितैरतिबलैर्मातङ्गैः पर्वतोपमैः ॥ २३ ॥
ऐरावतकुलीनैश्च महापद्मकुलैस्तथा ।
अञ्जनादपि निष्क्रान्तैर्वामनादपि च द्विपैः ॥ २४ ॥
भद्रैर्मन्द्रैर्मृगैश्चैव भद्रमन्द्रमृगैस्तथा ।
भद्रमन्द्रैर्भद्रमृगैर्मृगमन्द्रैश्च सा पुरी ॥ २५ ॥

काम्बोजविषये काम्बोजदेशे । बाल्हीकैः तद्देशजैः । 'बाल्हीजैः' इति क्वचित् पाठः । वनायुर्देशविशेषः । हरिरिन्द्रः तस्य हयः उच्चैःश्रवाः तद्वदुत्तमैः नदीजैः सिन्धुनदसमीपोद्भवैः ॥ २२ ॥

हैमवतैः हिमवत्पर्वतजातैः मातङ्गैर्गजैः ॥ २३ ॥

ऐरावतादयो दिग्गजाः ॥ २४ ॥

भद्रैरिति । 'भद्रा मन्द्रा मृगाश्चेति विज्ञेयास्त्रिविधा गजाः । क्रमेण हिमवद्-विन्ध्य-सह्यजाः ।' भद्रमन्द्रमृगाः त्रिस्वभावाः सङ्कीर्णा गजाः भद्रमन्द्रादयो द्विस्वभावाः * ॥ २५ ॥

---

* भद्रमन्द्रादीनां लक्षणश्चोदाहृतं नागोजीभट्टेन, यथा—'अङ्गप्रत्यङ्गभद्रत्वं संश्लिष्टं भद्रलक्षणम् । पृथुत्वश्लथतास्थौल्यं संश्लिष्टं मन्द्रलक्षणम् । तनुप्रत्यङ्गदीर्घत्वप्रायो मृगगुणो मतः ।' इति वैजयन्ती ।

नित्यमत्तैः सदा पूर्णा नागैरचलसन्निभैः।

सा योजने द्वे च भूयः सत्यनामा प्रकाशते ॥ २६ ॥

तां पुरीं स महातेजा राजा दशरथो महान्।

शशास शमितामित्रो नक्षत्राणीव चन्द्रमाः ॥ २७ ॥

तां सत्यनामां दृढतोरणार्गलां गृहैर्विचित्रैरुपशोभितां शिवाम्।

पुरीमयोध्यां नृसहस्रसंकुलां शशास वै शक्रसमो महीपतिः ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

षष्ठः सर्गः ॥ ६ ॥

नित्येति। द्वे योजने द्वयोर्योजनयोः अत्यन्तसंयोगे द्वितीया। भूयः अभ्यधिकं सत्यनामा योद्धुमशक्येत्यन्वर्थनामा राज्ञो मूलग्राम एतावत् † ॥ २६ ॥

तामिति। शमिता नाशिता अमित्रा येन। नक्षत्राणि नक्षत्रलोकान् ॥ २७ ॥

तामिति। अर्गलं नाम कपाटावष्टम्भक-तिर्य्यक्स्थापितदारुविशेषः ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे षष्ठः सर्गः ॥ ६ ॥

---

† क्वचिच्च व्याख्यातं,—योजनत्रयविस्तारवत्यां तस्यां योजनद्वयम् अत्यन्तं योद्धुमशक्यमित्यर्थः।

सप्तमः सर्गः ।



तस्यामात्या गुणैरासन्निक्ष्वाकोः सुमहात्मनः ।
मन्त्रज्ञाश्चेङ्गितज्ञाश्च नित्यं प्रियहिते रताः ॥ १ ॥

अष्टौ बभूवुर्वीरस्य तस्यामात्या यशस्विनः ।
शुचयश्चानुरक्ताश्च राजकृत्येषु नित्यशः ॥ २ ॥

धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्द्धनः ।
अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् ॥ ३ ॥

ऋत्विजौ द्वावभिमतौ तस्यास्तामृषिसत्तमौ ।
वसिष्ठो वामदेवश्च मन्त्रिणश्च तथापरे ॥ ४ ॥

अथ तस्य मन्त्रिसंपदं वर्णयति,—तस्येति । गुणैः अमात्यैरिति गुणैर्युक्ताः, इक्ष्वाकोः तद्वंशजस्य दशरथस्य गुणानाह,—मन्त्रज्ञाः मन्त्रः कार्यविचारः, इङ्गितं पराभिप्रायम् । प्रियस्य राज्ञः हिततत्पराः ॥ १ ॥

अष्टाविति । शुचयः असत्यस्वामिद्रोहादिरूपवाङ्मनसाऽशुचित्वरहिताः । नित्यशः आत्मप्रयोजनसमयेऽपि राजकृत्येषु तदनुष्ठानेषु अनुरक्तास्तत्पराः ॥ २ ॥

नामामतः आह,—धृष्टिरित्यादि ॥ ३ ॥

अभिमतौ ऋत्विजौ मुख्यर्त्विजौ, अपरे उक्ताष्टप्रधानमन्त्रिव्यति-

सुयज्ञोऽप्यथ जाबालिः काश्यपोऽप्यथ गौतमः।
मार्कण्डेयस्तु दीर्घायुस्तथा कात्यायनो द्विजः ॥ ५ ॥
एतैर्ब्रह्मर्षिभिर्नित्यमृत्विजस्तस्य पौर्वकाः।
विद्याविनीता ह्रीमन्तः कुशला नियतेन्द्रियाः ॥ ६ ॥
श्रीमन्तश्च महात्मानः शस्त्रज्ञा दृढविक्रमाः।
कीर्त्तिमन्तः प्रणिहिता यथावचनकारिणः ॥ ७ ॥

रिक्ता इत्येके। परे मन्त्रिण इत्युक्त्या वसिष्ठवामदेवयोर्मन्त्रित्वमपि सूच्यत इति तीर्थः, तन्न। मन्त्रिणश्च तथेति पाठे परेषामृत्विक्त्व-लाभेऽपि वसिष्ठवामदेवयोर्मन्त्रित्वस्य शब्दमर्य्यादया व्यंग्यमर्य्यादया चालाभात्। वस्तुतस्तथापरे इत्यस्य ऋत्विज इत्यर्थः। मन्त्रिणश्चेत्यस्य वसिष्ठाद्या इति शेषः। अमात्याः देशादिकार्य्यनिर्व्वाहकाः मन्त्रिणो व्यवहारद्रष्टार इति भेदः ॥ ४ ॥

परानेवाह,—सुयज्ञ इत्यादि। सुयज्ञ ऋषिविशेषः ॥ ५ ॥

एतैर्ब्रह्मर्षिभिर्नित्यं सहितास्तस्य ऋत्विज इत्यनेन सर्वथा कर्म-साद्गुण्यं दर्शितम्। पौर्वकाः परम्परागता इत्यर्थकम् अमात्य-र्त्विजो विशेषणम्। विद्येति। विद्यया सह विनीताः विद्याविनयो-भयसम्पन्ना इत्यर्थः। यथायोगं वक्ष्यमाणानि विशेषणानि अमात्येषु मन्त्रिषु च योजनीयानि ॥ ६ ॥

शस्त्रज्ञाः शस्त्रप्रतिपादकधनुर्वेदविदः। प्रणिहिताः सर्वराज-कार्य्येषु सावधानाः। यथावचनकारिणः राज्ञ इति शेषः ॥ ७ ॥

तेजःक्षमायशःप्राप्ताः स्मितपूर्वाभिभाषिणः ।
क्रोधात् कामार्थहेतोर्वा न ब्रूयुरनृतं वचः ॥ ८ ॥
तेषामविदितं किञ्चित् स्वेषु नास्ति परेषु वा ।
क्रियमाणं कृतं वापि चारेणापि चिकीर्षितम् ॥ ९ ॥
कुशला व्यवहारेषु सौहृदेषु परीक्षिताः ।
प्राप्तकालं यथादण्डं धारयेयुः सुतेष्वपि ॥ १० ॥
कोशसंग्रहणे युक्ता बलस्य च परिग्रहे ।
अहितं चापि पुरुषं न हिंस्युरविदूषकम् ॥ ११ ॥

कामादर्थहेतोरिति द्वन्द्वगर्भः कर्मधारयः ॥ ८ ॥

स्वेषु मित्रेषु परेषु शत्रुषु चारेण चारकेन कृतं क्रियमाणमपि वा अपि चिकीर्षितञ्च तेषां न किञ्चित् अविदितमभूदिति शेषः ॥ ९ ॥

सौहृदं स्निग्धविश्वासघातदोषात् दोषत्वेनारक्षन् चित्तवृत्तिविशेषस्तत्र परीक्षिताः राज्ञेति शेषः * । प्राप्तः सापराधत्वलक्षणः कालो यस्य तं धारयेयुः कुर्युरित्यर्थः ॥ १० ॥

कोशसंग्रहणे चतुरङ्गबलपरिग्रहे च हेतुः । अहितं स्वहिताचरणरहितं शत्रुमपि अविदूषकम् अनपराधिनं न हिंस्युः ॥ ११ ॥

---

* अथवा सौहृदेषु स्नेहेषु परीक्षिताः ।

वीराश्च नियतोत्साहा राजशास्त्रमनुष्ठिताः ।
शुचीनां रक्षितारश्च नित्यं विषयवासिनाम् ॥ १२ ॥
ब्रह्मक्षत्रमहिंसन्तस्ते कोशं समपूरयन् ।
सुतीक्ष्णदण्डाः संप्रेक्ष्य पुरुषस्य बलाबलम् ॥ १३ ॥
शुचीनामेकबुद्धीनां सर्वेषां सम्प्रजानताम् ।
नासीत् पुरे वा राष्ट्रे वा मृषावादी नरः क्वचित् ॥ १४ ॥
कश्चिन्न दुष्टस्तत्रासीत् परदाररतिर्नरः ।
प्रशान्तं सर्वमेवासीद्राष्ट्रं पुरवरञ्च तत् ॥ १५ ॥

राजशास्त्रं नीतिशास्त्रम् । अनुष्ठिताः अनुसारिणः । शुचीनामिति स्तेयान्तररहिताः शुचयः विषयो देशः ॥ १२ ॥

ब्रह्मेति । 'अभिपूरयन्' इति पाठे अडभाव आर्षः । सुतीक्ष्णेति बलाबलम् अपराधतारतम्यम् । पुरुषस्येत्युपलक्षणं देशादीनां च बलाबलं संप्रेक्ष्येत्यर्थः । 'देशकालवयःशक्तीः सञ्चिन्त्य दण्डकर्मणि' इति वचनात् । अयं कोशपूरणहेतुः ॥ १३ ॥

एकबुद्धीनां परस्परमेकबुद्धीनाम् । संप्रजानतां पुरराष्ट्रवृत्तान्तं विचारयताम् । तेषां विचारविषये पुरादौ मृषावादित्वगुणविशिष्टः कोऽपि नासीत् ॥ १४॥

पूर्ति । मन्त्रिणां नीत्या सर्वं प्रशान्तं निर्बाधमासीद् इत्यर्थः ॥ १५ ॥

सुवाससः सुवेषाश्च ते च सर्वे शुचिव्रताः ।
हितार्थाश्च नरेन्द्रस्य जाग्रतो नयचक्षुषा ॥ १६ ॥
गुरोर्गुणगृहीताश्च प्रख्याताश्च पराक्रमैः ।
विदेशेष्वपि विज्ञाताः सर्वतो बुद्धिनिश्चयाः ॥ १७ ॥
अभितो गुणवन्तश्च न चासन् गुणवर्जिताः ।
सन्धिविग्रहतत्त्वज्ञाः प्रकृत्या सम्पदान्विताः ॥ १८ ॥
मन्त्रसंवरणे शक्ताः शक्ताः सूक्ष्मासु बुद्धिषु ।

नरेन्द्रस्य हितार्थाः हितप्रयोजनाः सर्वथासन्निति शेषः ॥ १६ ॥

गुरोः सम्बन्धसामान्ये षष्ठी गुरुणा स्वस्याचार्य्येण राज्ञा च अर्थात् उपजन्तु गुणशब्देन गुणवत्तया गृहीता इत्यर्थः । तेन गुर्व्वनुग्रहप्राप्त-सर्वैश्वर्य्यत्वं च सूचितम् । गुणागुणगृहीता इति पाठे गुणदोष-गृहीतार इत्यर्थः । बहुव्रीहिः वाहिताग्न्यादित्वात् परनिपातो निष्ठा-न्तस्य । विदेशेष्वपि सर्व्वतो विज्ञातत्वे हेतुः । बुद्धिनिश्चयाः बुद्धि-दृश्यमाः ॥ १७ ॥

अभितो गुणवन्तः सर्वदेशे सर्वकाले च गुणवन्तः । सन्धीति । सन्ध्यादिविषयकशास्त्रतत्त्वज्ञाः । प्रकृत्या त्रिगुणया सम्पदा अन्विताः तत्र सात्त्विक्या सम्पदा शिष्टपालने, तामस्या सम्पदा दुष्टनिग्रह-काले, भोगकाले राजस्या सम्पदा धनधान्यदासीदासशिबिकाश्व-गजादिरूपया ॥ १८ ॥

नीतिशास्त्रविशेषज्ञाः सततं प्रियवादिनः ॥ १८ ॥

ईदृशैस्तैरमात्यैश्च राजा दशरथोऽनघः ।

उपपन्नो गुणोपेतैरन्वशासद् वसुन्धराम् ॥ २० ॥

अवेक्ष्यमाणश्चारेण प्रजा धर्मेण रञ्जयन् ।

प्रजानां पालनं कुर्वन् न धर्मं परिवर्जयन् ॥ २१ ॥

विश्रुतस्त्रिषु लोकेषु वदान्यः सत्यसङ्गरः ।

स तत्र पुरुषव्याघ्रः शशास पृथिवीमिमाम् ॥ २२ ॥

नाध्यगच्छद् विशिष्टं वा तुल्यं वा शत्रुमात्मनः ।

मित्रवान् नतसामन्तः प्रतापहतकण्टकः ।

स शशास जगद् राजा दिवि देवपतिर्यथा ॥ २३ ॥

अन्तरङ्गं रहस्यम् । बुद्धिषु विचारेषु ॥ १९ ॥

ईदृशैः प्रागुक्तरूपैः अमात्यैश्च चात् ऋत्विङ्मन्त्रिभिः अतएव गुणोपेतैः उपपन्न इति योजना ॥ २० ॥

चारेण स्वपरदेशवृत्तान्तम् । प्रजा धर्मेण युक्ता यथा भवति तथा सुखैः रञ्जयन् । सर्वत्र हेतौ शता ॥ २१ ॥

अतो हेतोर्विश्रुतः सत्यसङ्गरः सत्ये सत्यप्रतिज्ञः तत्र अयोध्यायाम् ॥ २२ ॥

अधिगमः प्राप्तिः । नताः सामन्ता यस्य । कण्टकाः प्रजापीडकाश्च ॥ २३ ॥

तैर्मन्त्रिभिर्मन्त्रहिते निविष्टै-
र्वृत्तोऽनुरक्तैः * कुशलैः समर्थैः ।
स पार्थिवो दीप्तिमवाप युक्त-
स्तेजोमयैर्गोभिरिवोदितोऽर्कः ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
सप्तमः सर्गः । ७ ।

तैरिति । मन्त्रो विचारस्तत्साध्यं हितं उभयत्र निविष्टैः कुशलैः सूक्ष्मार्थदर्शननिपुणैः समर्थैः तत्साधनशक्तैः तेजोमयैः प्रचुरतेजोवद्भिः तेजःपराभिभवसामर्थ्यं तद्वद्भिः गोभिः किरणैर्युक्तः उदितोऽर्क इव गवामपि तेजोमयैरित्यत्यन्तस्वार्थिकमयडन्तं विशेषणमित्येके तदपुष्टम् ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे सप्तमः सर्गः ॥ ७ ॥

---

* 'विद्वद्भिराप्तैः ।'
इति वङ्गीयाः ।

अष्टमः सर्गः ।



तस्य चैवंप्रभावस्य धर्मज्ञस्य महात्मनः ।
सुतार्थं तप्यमानस्य नासीद् वंशकरः सुतः ॥ १ ॥
चिन्तयानस्य तस्यैवं बुद्धिरासीन् महात्मनः ।
सुतार्थं वाजिमेधेन किमर्थं न यजाम्यहम् ॥ २ ॥
स निश्चितां मतिं कृत्वा यष्टव्यमिति बुद्धिमान् ।
मन्त्रिभिः सह धर्मात्मा सर्वैरपि कृतात्मभिः ॥ ३ ॥
ततोऽब्रवीन् महातेजाः सुमन्त्रं मन्त्रिसत्तमम् ।
शीघ्रमानय मे सर्वान् गुरूंस्तान् सपुरोहितान् ॥ ४ ॥
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ।

एवं समग्रगुणस्यापि अपुत्रत्वेन अजितपितृलोकत्वात् पुत्रार्थम् अश्वमेधप्रस्तावः, तस्येति । तप्यमानस्य तपः कुर्वतः ॥ १ ॥

चिन्तयानस्य मुगभावः छान्दसः तपसाप्यसाध्यपुत्रोत्पत्त्युपायं मार्गमाणस्य एवं वक्ष्यमाणा ॥ २ ॥

स इति । यष्टव्यमिति मन्त्रिभिः सह निश्चितां मतिं कृत्वेत्यन्वयः । सुमन्त्रम् आनयामासेति शेषः ॥ ३ ॥ ४ ॥

समानयत् स तान् सर्वान् समस्तान् वेदपारगान् ॥ ५ ॥
सुयज्ञं वामदेवञ्च जावालिमथ काश्यपम् ।
पुरोहितं वसिष्ठञ्च ये चान्ये द्विजसत्तमाः ॥ ६ ॥
तान् पूजयित्वा धर्मात्मा राजा दशरथस्तदा ।
इदं धर्मार्थसहितं श्लक्ष्णं वचनमब्रवीत् ॥ ७ ॥
मम लालप्यमानस्य सुतार्थं नास्ति वै सुखम् ।
तदर्थं हयमेधेन यक्ष्यामीति मतिर्मम ॥ ८ ॥
तदहं यष्टुमिच्छामि शास्त्रदृष्टेन कर्मणा ।

तत इति । विक्रमो गमनम् । सर्व्वान् तान् गुरून् समस्तान् वेदपारगान् ऋगुरूंश्च ॥ ५ ॥

सुयज्ञादयो विद्यागुरवः वसिष्ठस्यैव पुरोहितत्वेन उपनेतृतया उपनेतुरेव अध्यापकतया गुरुत्वेऽपि स्वसमभिव्याहारे स्व-तपो-व्याक्षेप-भिया तेनैव अध्यापने नियोगात् तेषामपि विद्यागुरुत्वमुक्तम् । अन्ये अश्वमेधार्त्विज्याद्युपयुक्ताः ॥ ६ ॥

धर्मेणार्थेन च सहितं, श्लक्ष्णं मधुरम् ॥ ७ ॥

ममेति । सुतार्थं सुतमुद्दिश्य लालप्यमानस्य पुनः पुनः अप्राप्यवस्थापतो राज्यादिनापि सुखं न भवति । 'तातप्यमानस्य' इति पाठे पुनः पुनरत्यर्थं तपः कुर्वत इत्यर्थः । अयमेव पाठो युक्तः पूर्वं सुतार्थं तप्यमानस्येत्युक्तेः । अतस्तदर्थं पुत्रार्थम् । मतिः अध्यवसायः ॥ ८ ॥

कथं प्राप्स्याम्यहं कामं बुद्धिरत्र विचिन्त्यताम् ॥ ९ ॥
ततः साध्विति तद् वाक्यं ब्राह्मणाः प्रत्यपूजयन् ।
वसिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखेरितम् ॥ १० ॥
ऊचुश्च परमप्रीताः सर्वे दशरथं वचः ।
सम्भाराः सम्भ्रियन्तां ते तुरगश्च विमुच्यताम् ॥ ११ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ।
सर्वथा प्राप्स्यसे पुत्रानभिप्रेतांश्च पार्थिव ॥ १२ ॥
यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ।
ततस्तुष्टोऽभवद् राजा श्रुत्वैतद् द्विजभाषितम् ॥ १३ ॥

तदिति । शास्त्रप्रोक्तेन कर्मणा विधिना केन प्रकारेण आचरणेन अहं कामं पुत्ररूपं प्राप्स्यामीत्यत्र बुद्धिरुपायविषया विचार्यतां क्रियताम् ॥ ९ ॥

तत इति । प्रतिपूजा स्तुतिः पार्थिवस्य मुखेरितं साक्षाद् राज्ञा स्वयमेवोक्तम् ॥ १० ॥

सम्भाराः अश्वमेधप्रसिद्धाः एकविंशतियूपादिरूपाः सम्भ्रियन्ताः संपाद्यन्ताम् ॥ ११ ॥

सर्वेति । पुत्रार्थं अभिप्रेतान् मनोऽभिप्रेतगुणयुक्तान् ॥ १२ ॥

धार्मिकी धर्मप्रयोजना सर्वथा प्राप्स्यसे इति प्रतिज्ञानात् सन्तोषः ॥ १३ ॥

अमात्यानब्रवीद् राजा हर्षव्याकुललोचनः ।
सम्भाराः सम्भ्रियन्तां मे गुरूणां वचनादिह ॥ १४ ॥
समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् ।
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ १५ ॥
शान्तयश्चापि वर्द्धन्तां यथाकल्पं यथाविधि ।
शक्यः प्राप्तुमयं यज्ञः सर्वेणापि महीक्षिता ? ॥ १६ ॥
नापराधो भवेत् कष्टो यद्यस्मिन् क्रतुसत्तमे ।
छिद्रं हि मृगयन्ते स्म विद्वांसो ब्रह्मराक्षसाः ॥ १७ ॥

हर्षजनितानन्दाश्रुपारिप्लवनेत्रः ॥ १४ ॥

समर्थेति । 'चतुःशता रक्षन्ति' इति श्रुतेः रक्षणसमर्थैश्चतुःशतराजपुत्रैरक्षितः । सोपाध्याय उपाध्यायपदेन प्रधानर्त्विजः । अश्वमेधस्य पदे पदे जुहोतीत्युक्तहोमानर्वाच्छाय तत्साक्षित्यम् ॥ १५ ॥

शान्तयः विघ्ननिवारककर्माणि । वर्धन्तां छान्दसो णिलोपः । यथाकल्पं यथाक्रमम् । 'क्रमस्तु कथ्यते कल्पे' इति भागुरिः । यथाविधि शास्त्रोक्तविध्यनतिक्रमेण, शक्य इति काकुः । सर्वेण वैगुण्ययुक्तेनापि राज्ञा अयं यज्ञः प्राप्तुं शक्योऽपि तु न शक्यः ॥ १६ ॥

तदेवाह,—नेति । यद्यत्र यज्ञे कष्टो महाप्रायश्चित्तनाश्योऽपराधो विध्यपराधः क्रियालोपादिरूपो न स्यात् स्यादपि अन्यः प्राप्यः

विधिहीनस्य यज्ञस्य सद्यः कर्त्ता विनश्यति।
तद् यथा विधिपूर्वं मे क्रतुरेष समाप्यते॥ १८॥
तथा विधानं क्रियतां समर्थाः करणेष्विति *।
तथेति चाब्रुवन् सर्वे मन्त्रिणः प्रतिपूजिताः॥ १९॥
पार्थिवेन्द्रस्य तद् वाक्यं यथा पूर्व्वं निशम्यते।

स तु अत्यन्तियत्नसाध्यः अतो न सर्वसुलभः, हि यतः यज्ञादिषु मन्त्रक्रियालोपादिना राक्षसत्वं प्राप्ता ब्राह्मणा ब्रह्मराक्षसा विद्वांसो यज्ञतत्त्वज्ञाः छिद्रम् अपचारं मृगयन्ते ते च ईषदपचारं दृष्ट्वा स्वयं तेषु प्रविश्य अपचारधारं सम्पादयन्ते अतो न सर्वप्राप्यः॥ १७॥

किञ्च विधिहीनस्य यज्ञस्य कर्त्ता यजमान ऋत्विक्संघश्च सद्यो विनश्यति तत् ततो हेतोर्यथा मे एष यज्ञः विधिपूर्वं शास्त्रोक्तप्रकारेण न तु तदपचारेण यथा समाप्यते, तथा विधानं यत्नः क्रियताम्। नन्वेवं चेत् अशक्यमेतत्, तत्राह,—यूयं तथाकरणेषु समर्थाः शक्ता इति इत्येवं प्रकारोत्साहनानि राजा चक्रे इत्यर्थः। ते प्रतिपूजिताः मन्त्रिणस्तथेत्यवदन्। 'प्रत्यपूजयन्' इति पाठे च इति शेषः॥ १८॥ १९॥

* "साधनेष्विति।"
इति वा पाठः।

तथा द्विजास्ते धर्मज्ञा वर्द्धयन्तो नृपोत्तमम् ॥ २० ॥
अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ।
विसर्जयित्वा तान् विप्रान् सचिवानिदमब्रवीत् ॥ २१ ॥
ऋत्विग्भिरुपसन्दिष्टो यथावत् क्रतुराप्यताम् ।
इत्युक्त्वा नृपशार्दूलः सचिवान् समुपस्थितान् ॥ २२ ॥
विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ।
ततः स गत्वा ताः पत्नीर्नरेन्द्रो हृदयङ्गमाः ॥ २३ ॥
उवाच दीक्षां विशत यक्ष्येऽहं सुतकारणात् ।
तासां तेनातिकान्तेन वचनेन सुवर्चसाम् ॥ २४ ॥

पार्थिवेश्वरं पूर्वान्वयि, वर्द्धयन्त इत्यस्य आशीर्भिरिति शेषः ॥ २० ॥ २१ ॥

उपसन्दिष्ट इति त्रिपदम् । समित्यस्य आप्यतामित्यनेनान्वयः *। व्यवहितप्रयोग आर्षः ॥ २२ ॥

ताः पत्नीः यथार्हाः ॥ २३ ॥

दीक्षां दीक्षाविषयदृढनिश्चयं विशत कुरुत । वर्चः कान्तिः ॥ २४ ॥

---

* क्रतुः सम्भारः आप्यतां सम्पाद्यताम् ।

मुखपद्मान्यशोभन्त पद्मानीव हिमात्यये ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
अष्टमः सर्गः ॥ ८ ॥

मुखपद्मानीति रूपकं, वसन्तकालावच्छिन्नपद्मोपमा च ॥२५॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे अष्टमः सर्गः ॥ ८ ॥

नवमः सर्गः ।



एतत् श्रुत्वा रहः सूतो राजानमिदमब्रवीत् ।
श्रूयतां तत् पुरावृत्तं पुराणे च मया श्रुतम् ॥ १ ॥
ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः ।
सनत्कुमारो भगवान् पूर्वं कथितवान् कथाम् ॥ २ ॥
ऋषीणां सन्निधौ राजंस्तव पुत्रागमं प्रति ।
काश्यपस्य च पुत्रोऽस्ति विभाण्डक इति श्रुतः ॥ ३ ॥
ऋष्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति ।
स वने नित्यसंवृद्धो मुनिर्वनचरः सदा ॥ ४ ॥

एतदिति । हयमेधं सुतार्थं करिष्यामि इति राजवाक्यम् । सूतः सुमन्त्रः ; स हि राज्ञ उभयधर्मा, सूतो मन्त्री च । पुरावृत्तम् इतिहासः ; य इतिहासः पुराणे च, येन ऋषिकथ्यमानकथासंग्रहः मया श्रुतः श्रूयताम् ॥ १ ॥

ऋत्विग्भिरिति । ऋत्विग्भिरयम् अश्वमेधकल्पः पुत्रोपाय उपदिष्टः । मया तु इतिहासविषयः किञ्चिद्विशेषविशिष्टः श्रुत इत्यर्थः । तमाह सनद्-इत्यादिना,—कथां सर्वश्रुत्वाद् भविष्यद्विषयाम् ॥ २ ॥ ३ ॥

ख्यातो भविष्यतीति ऋष्यशृङ्ग इति ख्याप्यमानः । भ्रातृसम्बन्धे

नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्त्तनात् * ।
द्वैविध्यं ब्रह्मचर्य्यस्य भविष्यति महात्मनः ॥ ५ ॥
लोकेषु प्रथितं राजन् विप्रैश्च कथितं सदा ।
तस्यैव वर्त्तमानस्य कालः समभिवर्त्तत ॥ ६ ॥
अग्निं शुश्रूषमाणस्य पितरं च यशस्विनम् ।

इति साधुत्वम्। नित्यसंवृद्धः पित्रा वने नित्यं वर्द्धित इत्यर्थः। सर्वथा पौरादिव्यवहारानभिज्ञत्वं नित्यपदेन सूचितम्, अतएव पितुः-'न क्वापि त्वया गन्तव्यम्'-इत्याज्ञानुवर्त्तनाद् वनचरत्वम् ॥४॥

नान्यमिति। जानातीति भविष्यति वर्त्तमानसामीप्यात्। पित्रनुवर्त्तनात् पित्रा सह वासात्। ब्रह्मचर्य्यस्य द्वैविध्यं, मेखला-जिनादिधारणरूपं मुख्यं ब्रह्मचर्य्यम्। दारेषु ऋतुगमनरूपं परं गौणम्। तत् प्रकारद्वयमपि अस्य भविष्यति †। द्विविधशब्दाद् बहुव्रीहेः ष्यञ् ॥ ५ ॥

---

* 'नान्यं प्रज्ञास्यते किञ्चिन्मानवं पितृवर्जितम्।' इति वा पाठः।

† तदाह याज्ञवल्क्यः—
'षोडशर्त्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्।
ब्रह्मचार्य्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेदिति ॥'

एतस्मिन्नेव काले तु रोमपादः * प्रतापवान् ॥ ७ ॥
अङ्गेषु प्रथितो राजा भविष्यति महाबलः ।
तस्य व्यतिक्रमाद् राज्ञो भविष्यति सुदारुणा ॥ ८ ॥
अनावृष्टिः सुघोरा वै सर्वलोकभयावहा ।
अनावृष्ट्यान्तु वृत्तायां राजा दुःखसमन्वितः ॥ ९ ॥
ब्राह्मणान् श्रुतसंवृद्धान् समानीय प्रवक्ष्यति ।
भवन्तः श्रुतकर्माणो लोकचारित्रवेदिनः ॥ १० ॥
समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत् ।
इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः ॥ ११ ॥

लोकेषु-इत्यर्द्धं पूर्वान्वयि । एवं पिष्टभ्यादिसेवया सम्भिवर्त्तेति भविष्यति लड्भावस्त्वार्षः ॥ ६ ॥ ७ ॥

व्यतिक्रमात् राजोचितधर्मविलोपनात् । दारुणत्वं बहुकालव्यापित्वात् ॥ ८ ॥

घोरत्वं सर्वराष्ट्रव्यापनात् । वृत्तायां जातायाम् ॥ ९ ॥

श्रुतेन वेदाध्ययनेन संवृद्धान् । श्रुतकर्माणः अनावृष्टिकरश्रुतसत्कर्माणः । यतो भवन्तो लोकव्यवहारज्ञाः ॥१० ॥

समेति । तस्य सत्पापस्य प्रायश्चित्तं यथा भवति तथा नियमम् अनुष्ठेयांशं समादिशन्तु इत्यन्वयः । उक्ताः पृष्टाः ॥ ११ ॥

---

* 'लोमपादः ।'
इति वा पाठः

वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः।
विभाण्डकसुतं राजन्! सर्वोपायैरिहानय ॥ १२ ॥
आनाय्य तु महीपाल ऋष्यशृङ्गं सुसत्कृतम्।
विभाण्डकसुतं राजन्! ब्राह्मणं वेदपारगम् ॥ १३ ॥
प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः।
तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते ॥ १४ ॥
केनोपायेन वै शक्यमिहानेतुं स वीर्य्यवान् ॥ १५ ॥
ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान्।
पुरोहितममात्यांश्च प्रेषयिष्यति सत्कृतान् ॥ १६ ॥
ते तु राज्ञो वचः श्रुत्वा व्यथिता वनताननाः।
न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपम् ॥ १७ ॥

ते च शुद्धब्रह्मचारिणे कन्यादानं प्रायश्चित्तमूचुरित्याह,—वक्ष्यन्तीति ॥ १२ ॥

आनाय्य त्विति पाठः। महीपाल! ऋष्येति प्रकृतिभावः ॥ १३ ॥ १४ ॥

राज्ञश्चिन्ताम् अभिनयति,—केनेति। वीर्य्यं जितेन्द्रियत्वं विद्याऽऽश्रमतपोवीर्य्यञ्च ॥ १५ ॥ १६ ॥

ते त्विति। व्यथिता अशक्यार्थनियोगतः खिन्नाः। वनताननाः नम्रमुखाः अवस्रादेर्लोपः। ऋषेः विभाण्डकात् भीताः-'न ग-

वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तान् क्षमान् ।
आनेष्यामो वयं विप्रं न च दोषो भविष्यति ॥ १८ ॥
एवमङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः ।
आनीतोऽवर्षयद्देवः शान्ता चास्मै प्रदीयते ॥ १९ ॥
ऋष्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति ।
सनत्कुमारकथितमेतावद् व्याहृतं मया ॥ २० ॥

क्षेम इत्युक्त्वा अशक्यार्थत्वाद् एतन्नियोगकरणं क्षन्तव्यम्'-इत्यनुनेष्यन्ति ॥ १७ ॥

एवमनुनीय अथ क्षमान् उचितान् गणिकाप्रेषणादिरूपान् उपायान् विचार्य्य राजानं वक्ष्यन्ति,—यदि अस्मदुक्तं श्रोष्यसि, तदा तमानेष्यामः । दोषोऽस्माकं शापादिरूपः तस्य तपोवैकल्यादिरूपो वा सर्वथा न भविष्यति ॥ १८ ॥

एवम् अमात्यपुरोहितवचनात् गणिकाभिः तद्द्वारा ऋषिसुत आनीतः । देव इन्द्रः पर्य्यन्यमवर्षयत् तद्देशे । शान्ता चास्मै प्रदीयते प्रदत्ता । वर्त्तमानसामीप्ये लट् । यद्यपि सनत्कुमारोक्त्यनुवादेन भविष्यन्निर्द्देश उचितस्तथापि राज्ञः सन्तोषाधिक्याय स्वप्रोच्यमानकाले वृत्तमेव तदिति बोधयितुं भूतनिर्द्देशः ॥ १९ ॥

ऋष्यशृङ्गेति । अङ्गराजमित्रत्वस्य राज्ञि वक्ष्यमाणत्वेन मित्रजामाता तस्यापि जामाता एव इत्यतो जामातेत्युक्तिः । बीजाकारमपि अग्रे वक्ष्यते एतदुक्तेः, एवं सनत्कुमारकथितं पुरो-

अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत ।
यथर्ष्यशृङ्गस्त्वानीतो येनोपायेन सोच्यताम् ॥ २१ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

नवमः सर्गः ॥ ९ ॥

त्वभ्युपायस्तथं वस्तु मया तुभ्यं व्याहृतम्, अग्रे देवः प्रमाणमिति शेषः ॥ २० ॥

अथेति । हृष्टः नियतपुत्रप्राप्त्युपायलाभात् तस्य सन्निहितत्व-मवगाह्य तुष्टः । ये तु पूर्वोत्तरश्लोके आनयनादि सर्वं भविष्यत्वेनैव व्याचक्षते, तेषां कथमानीत इति राजप्रश्नानुपपत्तिरित्याहुः । सोऽश्यतां स उच्यताम् इत्यर्थः; सन्धिरार्षः । यद्वा तद्विषया कथा उच्यतामित्यर्थः ॥ २१ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे नवमः सर्गः ॥ ९ ॥

दशमः सर्गः ।



सुमन्त्रश्चोदितो राज्ञा प्रोवाचेदं वचस्तदा ।
यथर्ष्यशृङ्गस्त्वानीतो येनोपायेन मन्त्रिभिः ।
तन्मे निगदितं सर्वं शृणु मे मन्त्रिभिः सह ॥ १ ॥
रोमपादमुवाचेदं सहामात्यः पुरोहितः ।
उपायो निरपायोऽयमस्माभिरभिचिन्तितः ॥ २ ॥
ऋष्यशृङ्गो वनचरस्तपःस्वाध्यायसंयुतः ।
अनभिज्ञस्तु नारीणां विषयाणां सुखस्य च ॥ ३ ॥

सुमन्त्र इति । चोदितः राज्ञा तपस्विनो गणिकाभिरानयनम् अत्याश्चर्य्यमिति विस्तरेण कथनाय प्रेरितः, मन्त्रिभिः सह संमन्त्र्य रोमपादेन यथा ऋष्यशृङ्ग आनीतः, येन च उपायेनानीतः तत् मया निगदितं सर्वं प्रकारं मे मत्तः मन्त्रिभिः सह शृणु इति योजना ॥ १ ॥

रोमेति । सहामात्यः पुरोहितः तमुवाच । निरपायोऽव्यभिचारिफलः ॥ २ ॥

नारीणां नारीसम्बन्धिविषयाणां शब्दादीनां तत्सम्बन्धिसुखस्य च इत्यर्थः ॥ ३ ॥

इन्द्रियार्थैरभिमतैर्नरचित्तप्रमाथिभिः।
पुरमानाययिष्यामः क्षिप्रञ्चाध्यवसीयताम् ॥ ४ ॥
गणिकास्तत्र गच्छन्तु रूपवत्यः स्वलङ्कृताः * ।
प्रलोभ्य विविधोपायैरानेष्यन्तीह सत्कृताः ॥ ५ ॥
श्रुत्वा तथेति राजा च प्रत्युवाच पुरोहितम्।
पुरोहितो मन्त्रिणश्च तदा चक्रुश्च ते तथा ॥ ६ ॥

अभिमतैः प्राणिमात्रस्येति शेषः। इन्द्रियार्थैस्तद्विषयैर्दिव्यगीत्यादिभिः अध्यवसीयताम् अस्मदुक्तकरणाय यत्यताम् ॥ ४ ॥

तदाह,—गणिका इति। सत्कृताः विचित्राम्बराभरणान्नपानादिभिः ॥ ५ ॥

श्रुत्वेति। राजा पुरोहितं तथेति त्वयैव तथा कर्त्तव्यमिति प्रत्युवाच। अत्यल्पविषयत्वाद् राज्ञः एवं वादः। अथ तत्पुरोहितस्य विप्रत्वात् गणिकाभिः संवादोऽनुचित इति सोऽपि मन्त्रिणः प्रत्युवाच। मन्त्रिणश्च ते तथा चक्रुः साक्षाद् गणिकाः प्रैरयन् ॥६॥

---

* मुनिवेषप्रतिच्छन्नास्तत्र गच्छन्तु योषितः।
उपायज्ञाः कलाज्ञाश्च वैशिके परिनिष्ठिताः † ॥

इति वङ्गीयाः।

† वैशिकं वेश्याकृत्यं वेश्याव्यवहारो वा अतएव कामशास्त्रे 'कला मायाविशेषः' इति विमलबोधः।—लोकनाथचक्रवर्तिना व्याख्यातम्।

* वारमुख्यास्तु तत् श्रुत्वा वनं प्रविविशुर्महत् ।
आश्रमस्याविदूरेऽस्मिन् यत्नं कुर्वन्ति दर्शने † ॥ ७ ॥

वारेति । तत् मन्त्रिवचः । अस्मिन् वने युष्मज्जनपदप्रान्तवर्त्तिनि शृङ्गवेरपुरवने आश्रमस्य विभाण्डकाश्रमस्य अविदूरे निकटे स्थित्वा ऋषिपुत्रस्य धीरत्वादिगुणविशिष्टस्य दर्शने यत्नं कुर्वन्ति स्म चक्रुः ॥७॥

---

* फलवन्तस्तु ये वृक्षाः समूलविटपास्तथा ।
रोपयित्वा वृक्षतोषु सुरभीणि स पार्थिवः ॥
पानानि च सुगन्धीनि फलान्यास्वादवन्ति च ।
सुसम्भृतास्तथा नौभिः प्रयाता यत्र वै मुनिः ॥
† विभाण्डकभयोद्विग्ना वनगुल्मलतावृताः ।
चारयित्वा ‡ तु तमृषिमाश्रमादभिनिर्गतम् ॥
ततः सन्दर्शने तस्थुः ऋषिपुत्रान्तिके पुनः ।
चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैस्तथा ॥
कन्दुकैश्चापि गायन्त्यः क्रीडन्त्यः स्रुतवल्गितैः ¶ ।
मदविह्वलिताः काश्चित् प्रपतन्त्युत्पतन्ति च ॥
इति वङ्गीयाः ।

‡ चारयित्वा चारैरभिनिर्गतमवधार्य्य यद्वा चारयित्वा ज्ञात्वा ।—
¶ स्रुतवल्गितैः स्रुतगतिभिः मन्दगतिभिरित्यर्थः ।—चक्रवर्त्तिना इत्थं व्याख्यातम् ।

* ऋषेः पुत्रस्य धीरस्य नित्यमाश्रमवासिनः ।
पितुः स नित्यसन्तुष्टो नातिचक्राम चाश्रमात् ॥ ८ ॥

पितुरुपलालनादिभिः नित्यसन्तुष्टः स आश्रमात् नातिचक्राम आश्रमात् दूरं न निरगात् ॥ ८ ॥

---

* नयनभ्रूविकारैश्च हस्तैरम्बुजसन्निभैः ।
संज्ञाश्च † ताः प्रकुर्वन्त्यः पुंसां हर्षविवर्द्धनाः ॥
नूपुरैर्झिञ्जितरवैः ‡ कोकिलाभिरुतेन च ।
गन्धर्वनगरप्रख्यं प्रगीतमिव ¶ तद् वनम् ॥
धूयमानैश्च § वासोभिः स्वर्णैरङ्गदभूषणैः ।
परस्परं विनिघ्नन्त्यः शोभन्ते ललितेन ** च ॥
सौगन्धिकेन माल्येन चूर्णैश्च सुसुगन्धिभिः ।
कामसंजननार्थाय ऋषिपुत्रस्य धीमतः ॥
सर्वतः प्रकिरन्ति स्म ललमाना †† वराङ्गनाः ।
अभूतपूर्वं तद् दृष्ट्वा विस्मितः साध्वसं गतः ‡‡ ॥
दृष्ट्वैव चारुसर्वाङ्गीस्तास्तदा तनुमध्यमाः ।
निश्चक्रामाश्रमात् तूर्णमृष्यशृङ्ग ऋषेः सुतः ॥ वङ्गीयाः ।

†संज्ञा हस्ताद्यैः कामरूपार्थसूचना । "संज्ञा नाम्नि रवेः पत्न्यां हस्ताद्यैश्चार्थसूचने" इति भूरिः ।—‡"स्वनिते वस्त्रपर्णानां भूषणानाञ्च शिञ्जितम्" इत्यमरः ।—¶प्रगीतं गायतीव प्रगातुमारब्धं इति वा ।—§धूयमानैः वायुना कम्प्यमानैः ।—** ललितेन विलासेन साम्भेदेन वा । "ललितं साम्भेदेऽन्यलिङ्गो विलसिते त्रयोः" इति भूरिः ।—†† ललमानाः मनोहराः ।—‡‡ साध्वसं गतः उत्पातशङ्कया ।—वङ्गवासिव्याख्यानम् ।

न तेन जन्म प्रभृति दृष्टपूर्वं तपस्विना ।
स्त्री वा पुमान् वा यच्चान्यत् सत्त्वं नगरराष्ट्रजम् ॥ ९ ॥
ततः कदाचित् तं देशमाजगाम यदृच्छया * ।
विभाण्डकसुतस्तत्र ताश्चापश्यद् वराङ्गनाः ॥ १० ॥
तास्चित्रवेषाः प्रमदा गायन्त्यो मधुरस्वरम् ।
ऋषिपुत्रमुपागम्य सर्वा वचनमब्रुवन् ॥ ११ ॥
कस्त्वं ? किं वर्त्तसे ? ब्रह्मन् ! ज्ञातुमिच्छामहे वयम् ।
एकस्त्वं विजने दूरे वने चरसि ? शंस नः ॥ १२ ॥

नेति । स्त्र्यादिकं जन्म प्रभृति दृष्टपूर्वं न भवति यथा तथा व्यवक्रियत इति शेषः । नगरजं सत्त्वं अश्वगजादि । राष्ट्रजं सूकरकुक्कुटादि ॥ ९ ॥

तत इति । तं देशं वारस्त्रीसञ्चारदेशं यदृच्छया दैववशात् ॥ १० ॥ ११ ॥

क इति । कस्त्वं, किंजातिः कस्य पुत्रः ? इति च किन्नामा

---

* स तं देशमुपागम्य जातकौतूहलस्तदा ।
विभाण्डकसुतो राजंस्तस्थौ परमविस्मितः ॥
तास्च तं विस्मितं दृष्ट्वा जगुः कलपदाक्षरम् ।
गीतं मधुरभाषिण्यो जहसुश्चायतेक्षणाः ॥
अग्रमुग्वञ्चैनमभ्याशमागत्य मदविह्वलाः । इति वङ्गीयाः ।

अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः।
हार्दात् तस्य मतिर्जाता आख्यातुं पितरं स्वकम् ॥ १३ ॥

पिता विभाण्डकोऽस्माकं तस्याहं सुत औरसः।
ऋष्यशृङ्ग इति ख्यातं नाम कर्म च मे भुवि ॥ १४ ॥

इहाश्रमपदोऽस्माकं समीपे शुभदर्शनाः!।
करिष्ये वोऽत्र पूजां वै सर्वेषां विधिपूर्वकम् ॥ १५ ॥

च किं वर्त्तसे किंकर्मासि? अपि च एकः सन् त्वं विजने दूरे जनवासरूपग्रामादिभ्यो दूरे वने किमर्थं चरसि? इति प्रश्नत्रयम् ॥ १२ ॥

अदृष्टेति। स्त्रिय इत्यस्य दृष्ट्वा इति शेषः। अनेन हार्दमूलभूता 'चलस्य चेतसो या स्यादुदासीनेषु वस्तुषु। अवारणीया वृत्तिः सा दृष्टिशब्देन कथ्यते' इत्युक्तलक्षणा दृष्टिरुक्ता, ततः सर्वांशेऽनुपेक्षात्मकज्ञानरूपः परिचयोऽपि मध्ये ज्ञेयः। अतस्तासु हार्दात् दर्शनजस्नेहात्। 'दोषानालोकिनी प्रीत्याख्या चित्तवृत्तिर्हार्दम्' इत्युक्तेः। स्वकं स्वीयम्। अदृष्टरूपाः प्रागदृष्टैवंरूपाः। काम्यरूपाः कमनीयरूपाः एतत् द्वयं च स्नेहकारणम् ॥ १३ ॥

पितेति। नामेत्यन्तमाद्यप्रश्नोत्तरं, द्वितीयप्रश्नोत्तरमाह,—कर्म च मदीयं भुवि प्रसिद्धं तपोरूपमित्यर्थः ॥ १४ ॥

तृतीयप्रश्नोत्तरमाह,—इहेति। इह वने, आश्रमपदः आर्षं पुंस्त्वं वर्त्तत इति शेषः। सर्वेषामिति निर्देशो वक्ष्यमाणाभिप्रायेण अनेन स्त्रीस्वरूपापरिज्ञानं सूचितम् ॥ १५ ॥

ऋषिपुत्रवचः श्रुत्वा सर्वासां मतिरास वै ।
तदाश्रमपदं द्रष्टुं जग्मुः सर्वास्ततोऽङ्गनाः ॥ १६ ॥
गतानां तु ततः पूजाम् ऋषिपुत्रश्चकार ह ।
इदमर्घ्यमिदं पाद्यमिदं मूलं फलञ्च नः ॥ १७ ॥
प्रतिगृह्य तु तां पूजां सर्वा एव समुत्सुकाः । *

ऋषीति । आसेत्यार्षं बभूव इत्यर्थः । तत् द्रष्टुं मतिर्बभूव । इत्यन्वयः ॥ १६ ॥

नोऽस्माकं भक्ष्यमिति शेषः ॥ १७ ॥

प्रतीति । समुत्सुकाः ऋष्यशृङ्गस्य तदाश्रमतो नयने । ऋषेः विभाण्डकात् ॥ १८ ॥

---

*————————————सर्वास्ताः परिशङ्किताः ।
ऋषेः शापभयोद्विग्नाः ——————————
ऊचुश्चैनं सुमधुरं ता इसन्त्य इदं वचः ॥
अस्माकमप्यृषेः पुत्र ! स्वादूनीमानि भक्षय ।
फलान्याश्रमजातानि यदि ते रोचतेऽनघ ! ॥
अथास्मै प्रददुः स्वादून् मोदकान् फलसन्निभान् ।
अन्यांश्च विविधान् भक्ष्यान् मधूनि मधुराणि च ॥
तीर्थोदकमिदं तावत् पीयतामिति सुव्रत ! ।
परिषस्वजिरे चैनं इसन्त्यो मदविह्वलाः ॥
इति वङ्गीयाः ।

* ऋषेर्भीताश्च शीघ्रं तु गमनाय मतिं दधुः ॥ १८ ॥

अस्माकमपि मुख्यानि फलानीमानि हे द्विज ।
गृहाण विप्र ! भद्रं ते भक्षयस्व च मा चिरम् ॥ १९ ॥
ततस्तास्तं समालिङ्ग्य सर्वा हर्षसमन्विताः ।
मोदकान् प्रददुस्तस्मै भक्ष्यांश्च विविधान् शुभान् ॥ २० ॥

मुख्यानि प्रशस्तास्वादवन्ति प्रतारणार्थं मोदका एव मुख्यत्वे प्रतिग्रहाणीति । भद्रं कल्याणम् । भक्षयस्व च फलानीति शेषः । मा चिरं ऋषेरागमनात् पूर्वमेव भक्षणीयमित्याशयः ॥ १९ ॥

तत इति । समालिङ्ग्य स्पर्शेनापि वशीकर्त्तुमालिङ्गनम् । हर्ष-समन्विताः बालब्रह्मचारिणो गाढतरालिङ्गनप्राप्त्या स्वकार्य्यानुकूलस्पर्शप्राप्त्या च ॥ २० ॥

---

* परिपस्पर्शिरे चैनं पीनैरुरमिजैर्मुहुः ।
श्रोत्रमूले चोपजेपुर्वदनैर्मधुगन्धिभिः ॥
सोऽमन्यत फलानीति मोदकांश्च सुवर्णितान् ।
भक्ष्यांश्चास्वाद्य विविधान् फलाकारान् सुयोजितान् ॥
अनास्वादितपूर्वाणि फलान्यास्वाद्य तानि सः ।
मधूनि च सुगन्धीनि पीत्वा प्रमुदितोऽभवत् ॥
सुकुमारैश्च तैरङ्गैस्ताभिः स्पृष्टो व्यमुह्यत ।
स्पृहयामास तासां च स्पर्शस्य ललितस्य च ॥
इति वङ्गीयाः ।

तानि चास्मै तेजस्वी फलानीति स्म मन्यते ।

अनास्वादितपूर्वाणि वने नित्यनिवासिनाम् ॥ २१ ॥

आपृच्छ्य च तदा विप्रं व्रतचर्य्यां निवेद्य च ।

गच्छन्ति स्मापदेशात् ता भीतास्तस्य पितुः स्त्रियः ॥ २२ ॥

गतासु तासु सर्वासु काश्यपस्यात्मजो द्विजः ।

अस्वस्थहृदयश्चासीत् दुःखाच्च परिवर्त्तते ॥ २३ ॥

तानीति । तानि प्रोच्य रत्नानि । तेजस्वी वारवनितासंसर्गेऽप्यदूषितत्वात् ब्रह्मचर्य्येण अहीनतेजाः । मन्यते यो मन्यते स एव व्यवहरतीत्यर्थः । पूर्व्वमनास्वादितानि अनास्वादितपूर्वाणि । नित्यनिवासिनामिति कर्म्मणि शेषे षष्ठी ॥ २१ ॥

व्रतचर्य्यां निवेद्य किञ्चित् व्रतमनुष्ठेयम् अस्माकमिति निवेद्य ज्ञापयित्वा तस्मादपदेशात् व्याजात् तस्य पितुः विभाण्डकात् भीताः स्त्रियः गच्छन्ति तत्स्थानात् ॥ २२ ॥

अस्वस्थहृदयः अप्रसन्नचित्तः आसीत् दुःखात् तासामपाङ्गभङ्गादिविषयसुखविच्छेदजात् परिवर्त्तनम् एकदेशानवस्थितिः ॥ २३ ॥

---

* अथाजगाम भगवान् काश्यपः स्वनिवेशनम् ।
ध्यायमानञ्च तं दृष्ट्वा ऋष्यशृङ्गं समुत्सुकम् ॥
पप्रच्छ काश्यपः पुत्रं कस्मात्त्वं नाभिनन्दसि ?
चिन्तासागरमध्यस्थमद्य त्वां तात ! लक्षये ॥ वङ्गीयाः ।

* ततोऽपरेद्युस्तं देशमाजगाम स वीर्य्यवान् ।
विभाण्डकसुतः श्रीमान् मनसा चिन्तयन् मुहुः ॥ २४ ॥
मनोज्ञा यत्र ता दृष्टा वारमुख्याः स्वलङ्कृताः ।
दृष्ट्वैव च ततो विप्रमायान्तं हृष्टमानसाः ॥ २५ ॥

तत इति । उक्तात् हेतोः मनसा चिन्तयन् तासां दर्शनस्पर्शन-गमनादिप्रकारान् स्मरन्नित्यर्थः । तत्र गमनमेतद्वारकमवश्यं भावीति चिन्तयन् इत्यर्थश्च ॥ २४ ॥

---

* नहीदृशं तापसानां रूपं भवति कर्हिचित् ।
शीघ्रमाचक्ष्व मे पुत्र ! किमिदं वैकृतं कृतम् ॥
एवमुक्तः काश्यपेन प्रोवाच पितरं तदा ।
भगवन्निह मे दृष्टास्तापसाः शुभलोचनाः ॥
सुकुमारैरुरसिजैः पीनैरत्यद्भुतोपमैः ।
परिपस्पृशिरे मां च गाढ़मालिङ्ग्य सर्वशः ॥
गात्राणि सुकुमाराणि मनोज्ञानि मुहुर्मुहुः ।
क्रीड़न्ति चाद्भुताकारैर्नयनभ्रूविचेष्टितैः ॥
अब्रवीद् भगवान् श्रुत्वा ऋष्यशृङ्गं वचस्तदा ।
रक्षांसि तेन रूपेण तपसो नाशनाय वै ॥
विश्रम्भस्ते न कर्त्तव्यस्तेषु पुत्र ! कथञ्चन ।
एवमुक्त्वा ऋष्यशृङ्गं समाश्वास्य च काश्यपः ॥
उषित्वा रजनीमेकामरण्यं स जगाम ह । वङ्गीयाः ।

उपसृत्य ततः सर्वास्तास्तमूचुरिदं वचः ।
एषाश्रमपदं सौम्य ! अस्माकमिति चाब्रुवन् ॥ २६ ॥
चित्राण्यत्र बहूनि स्युर्मूलानि च फलानि च ।
तत्राप्येष विशेषेण विधिर्हि भविता ध्रुवम् ॥ २७ ॥
श्रुत्वा तु वचनं तासां सर्वासां हृदयङ्गमम् ।
गमनाय मतिं चक्रे तञ्च निन्युस्तथा स्त्रियः ॥ २८ ॥
तत्र चानीयमाने तु विप्रे तस्मिन् महात्मनि ।
ववर्ष सहसा देवो जगत् प्रह्लादयंस्तदा * ॥ २९ ॥

तं कं तत्राह,—मनोज्ञा इति ॥ २५ ॥
उपसृत्य प्रत्युद्गम्य ॥ २६ ॥
चित्राणीति । यदि अत्रैव चित्राणि मूलानि फलानि च भवेयुः सम्भावनायां लिङ् । अतः तत्र गमनं व्यर्थमिति चेत् ? तत्रापि एष विधिः विचित्रमूलफलभक्षणविधिः विशेषेण हेतोऽप्याधिक्येन भविष्यति ॥ २७ ॥
श्रुत्वा स्विति । गङ्गायां पूर्वस्थापितां नावमारोप्य प्रवाहेणैव अङ्गदेशं निन्युरिति महाभारते ॥ २८ ॥
तत्रेति । अङ्गदेशे ॥ २९ ॥

---

* विभाण्डकस्तु विप्रर्षिराजगाम स्वमाश्रयम् ॥
वन्यं मूलफलं प्राप्य भारांश्चिन्तयन् तदा । गङ्गीयाः ।

* वर्षेणैवागतं क्षिप्रं तापसं स नराधिपः ।
प्रत्युद्गम्य मुनिं प्रह्वः शिरसा च महीं गतः ॥ १० ॥

वर्षेणेति । वर्षेण सहैव विप्रर्षं स्वदेशं आगतं क्षिप्रं प्रत्युद्गम्य

---

* शून्यमावसथं दृष्ट्वा पुत्रदर्शनलालसः ॥
परिश्रान्तस्तथैवासावकृत्वा पादधावनम् ।
चुक्रोश ऋष्यशृङ्गेति सर्वतः प्रविलोकयन् ॥
नचापश्यत् सुतं तत्र काश्यपो भगवानृषिः ।
निष्क्रम्य च वनात् तस्माद् ग्रामं ददर्श काश्यपः ॥
ग्रामांश्च परिपप्रच्छ गोकुलानि समन्ततः ।
कस्यैष विषयः सौम्या ग्रामाश्च बहुगोकुलाः ॥
ऋषेर्वचनमाज्ञाय सर्वे ते गोषु जीविनः ।
कृताञ्जलिपुटा भूत्वा विनयेनाचचक्षिरे ॥
अङ्गेषु प्रथितो राजा लोमपाद इति श्रुतः ।
तेनाभिसृष्टा ब्रह्मर्षे ! ग्रामा ह्येते सगोकुलाः ॥
पूजार्थमृष्यशृङ्गस्य विभाण्डकसुतस्य वै ।
एवमुक्तस्तु स ऋषिर्दृष्ट्वा वै ध्यानचक्षुषा ॥
भविष्यमेवं तज्ज्ञात्वा प्रीतात्मा स न्यवर्त्तत ।
ऋषिपुत्रोऽपि धर्मात्मा मेघा[illegible] ॥
मेघनादेन महता कृत्वा [illegible] ।
महाजलौघवर्षेण राजधानीमुपागमत् ॥ — [illegible]

अर्घ्यञ्च प्रददौ तस्मै न्यायतः सुसमाहितः ।
वव्रे प्रसादं विप्रेन्द्रात् मा विप्रं मन्युराविशेत् ॥ ३१ ॥
अन्तःपुरं प्रवेश्यास्मै कन्यां दत्त्वा यथाविधि ।
शान्तां शान्तेन मनसा राजा हर्षमवाप सः ॥ ३२ ॥
एवं स न्यवसत् तत्र सर्वकामैः सुपूजितः ।

प्रह्वः सन् । प्रह्वः अञ्जल्यादिपूर्वं नम्रो जात इति शेषः । शिरसा महीं गतश्च साष्टाङ्गनमस्कारञ्च कृतवानित्यर्थः ॥ ३० ॥

अर्घ्यञ्चेति । अर्घ्यादिपूजितात् विप्रेन्द्रात् ऋष्यशृङ्गात् । प्रसादं मयि सापराधेऽपि भवान् नित्यं प्रसन्नोऽस्तु इत्येवं सौमुख्यं वव्रे किमर्थम् इत्यत आह,—मेति । अतिजुगुप्सितं गणिकाभिः स्वानयनं व्यवहारकाले ज्ञात्वा तं विप्रं ऋष्यशृङ्गं तत्पितरं विभाण्डकञ्च मन्युः क्रोधः आविशेत् समाप्रविशतु इत्यर्थमिति भावः ॥ ३१ ॥

अन्तरिति । प्रसन्नत्वादेव तदनुज्ञया अन्तःपुरं प्रवेश्य हर्षं हृष्टिम् ऋषिसम्बन्धजञ्च ॥ ३२ ॥

एवमिति । ननु गणिकास्पर्शतः तत्पक्वफलभक्षणादिभिरस्य तपोहानौ कथं तद्गमनमात्रेण वृष्टिः ? न च स्त्रीत्वाद्यज्ञानात् न तथा तपोहानिः इयद्दोषस्तु तपसैव दग्ध इति वाच्यम् । निर्मल-ब्रह्मचर्येण विदितनिखिलवेदशास्त्रतत्त्वस्य शास्त्रतः स्त्रीस्वरूपज्ञानस्य ब्रह्मचर्ये तत्परिहारज्ञानस्य दुर्निवारत्वात्, वने वनचरस्त्रीणा-मनुभवाच्च, सर्वथा यद्यत्वे अनुग्रहभावमापन्नेति चेन्न ।

ऋष्यशृङ्गो महातेजाः शान्तया सह भार्य्यया ॥ ३३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

दशमः सर्गः ॥ १० ॥

निर्म्मलब्रह्मचर्य्येण ब्रह्मज्ञतया सर्व्वत्र ब्रह्मदृष्ट्या च दोषलेशस्यापि अस्पर्शात्। प्रारब्धवशात् क्षत्रियस्त्रीसम्बन्धं भाविनं तद्वारकं जानन्नेव गणिकाभिस्तथा व्यवजह्रे। तासां भयानुत्पत्तये अतएव न तेनेति नवमश्लोके तथा व्यवह्रियते इति शेषः पूरितोऽस्माभिः प्राक्। एतत् सर्वं जानन् पितापि तमनुयाय न शप्तवान् राजानमित्येवात्र तत्त्वम्। अनेन तत्त्वज्ञस्य सर्व्वदोषासम्बन्धो ध्वनितः। ब्रह्मर्षे दानसङ्कल्पमात्रेण फलसिद्धिरित्यादि च सूचितम्। यत्तु कश्चित् विभाण्डकस्य पुत्रान्वेषणं क्रोधेन वनो मार्गे ऋष्यशृङ्गाय शान्तादानादिवृत्तान्तलाभेन पुनराश्रमं प्रति परावृत्यागमनवर्णनं तदपि तत्त्वज्ञस्य एवोपपद्यते, अन्यथा स्वपुत्रस्य गणिकाद्वारकब्रह्मचर्य्यविलोपजनितरोषोऽमुष्य तस्य केनाप्युपायेन वारयितुम् अशक्य इत्यलम् ॥ ३३ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे दशमः सर्गः ॥ १० ॥

एकादशः सर्गः ।



भूय एवाह राजेन्द्र ! शृणु मे वचनं हितम् ।
यथा स देवप्रवरः कथयामास बुद्धिमान् ॥ १ ॥
इक्ष्वाकूणां कुले जातो भविष्यति सुधार्मिकः ।
नाम्ना दशरथो राजा श्रीमान् सत्यप्रतिश्रवाः ॥ २ ॥
अङ्गराजेन सख्यञ्च तस्य राज्ञो भविष्यति ।
कन्या चास्य महाभागा शान्ता नाम भविष्यति ॥ ३ ॥
पुत्रस्त्वङ्गस्य राज्ञस्तु रोमपाद इति श्रुतः ।
तं स राजा दशरथो गमिष्यति महायशाः ॥ ४ ॥

एवं सनत्कुमारोक्तकथां तत्प्रसङ्गेन ऋष्यशृङ्गानयनकथाञ्च सांप्रतिकीमुक्त्वा तदानयनार्थं महाराजेनैव गन्तव्यमिति बोधयितुम् अनेकयुगद्रष्टा सुमन्त्रः पुनरपि तदर्थगर्भां सनत्कुमारोक्तां कथामाह,—भूय एवेति । देवप्रवरः सनत्कुमारः यथेति यदित्यर्थः ॥ १ ॥

सत्यप्रतिश्रवाः सत्यप्रतिज्ञः ॥ २ ॥

अङ्गेति । अङ्गराजो रोमपादः तस्य दशरथस्य अस्य रोमपादस्य ॥ ३ ॥

कोऽसौ अङ्गराज इत्यत आह,—पुत्र इति । अङ्गस्य अङ्गनामकस्य तं रोमपादं गमिष्यति ऋष्यशृङ्गानयनार्थमिति शेषः ॥ ४ ॥

अनपत्योऽस्मि धर्मात्मन् ! शान्ताभर्त्ता मम क्रतुम् ।
आहरेत त्वयाज्ञप्तः सन्तानार्थं कुलस्य च ॥ ५ ॥
श्रुत्वा राज्ञोऽथ तद् वाक्यं मनसा च विचिन्त्य च ।
प्रदास्यते पुत्त्रवन्तं शान्ताभर्त्तारमात्मवान् ॥ ६ ॥
प्रतिगृह्य च तं विप्रं स राजा विगतज्वरः ।
आहरिष्यति तं यज्ञं प्रहृष्टेनान्तरात्मना ॥ ७ ॥
तञ्च राजा दशरथो यशस्कामः कृताञ्जलिः ।
ऋष्यशृङ्गं द्विजश्रेष्ठं वरयिष्यति धर्मवित् ॥ ८ ॥
यज्ञार्थं प्रसवार्थञ्च स्वर्गार्थञ्च नरेश्वरः ।

गमनप्रयोजनमाह,—अनपत्य इति । आहरेत निर्वहेत् चकारेण धर्माद्यर्थं च ॥ ५ ॥

श्रुत्वेति । अस्य राज्ञो दशरथस्य एतद् वाक्यं श्रुत्वा मनसा च तस्य अवश्यकर्त्तव्यतां विचिन्त्य च पुत्त्रवन्तं शान्ताभर्त्तारं प्रदास्यते इत्यन्वयः । पुत्त्रवन्तमित्यनेन—"जातपुत्त्रः कृष्णकेशः अग्नीनादधीत" इति विध्युक्तमग्न्याधानाधिकारित्वं सूचितम् । तेन आहिताग्नित्वेन आर्त्विज्याधिकारस्तस्य उक्तः । शान्तासहितभर्त्तारम् इत्यर्थकेन शान्तासाहित्यमपि सूचितम् ॥ ६ ॥

तं यज्ञं पुत्त्रकामेष्टिरूपम् ॥ ७ ॥

वरयिष्यति । वरणं करिष्यति तत् करोतीति णिच् ॥ ८ ॥

वरणविषयमाह,—यज्ञेति, यज्ञः प्रसवकारणं प्रसवः सन्तान

लभते च स तं कामं द्विजमुख्याद् विशाम्पतिः ॥ ९ ॥

पुत्राश्चास्य भविष्यन्ति चत्वारोऽमितविक्रमाः ।

वंशप्रतिष्ठानकराः सर्वभूतेषु विश्रुताः ॥ १० ॥

एवं स देवप्रवरः पूर्वं कथितवान् कथाम् ।

सनत्कुमारो भगवान् पुरा देवयुगे प्रभुः ॥ ११ ॥

स त्वं पुरुषशार्दूल ! समानय सुसत्कृतम् ।

स्वयमेव महाराज ! गत्वा सबलवाहनः ॥ १२ ॥

सुमन्त्रस्य वचः श्रुत्वा हृष्टो दशरथोऽभवत् ।

अनुमान्य वसिष्ठञ्च सूतवाक्यं निशाम्य च ॥ १३ ॥

कारयाम् इति बोध्यम् । लभते लप्स्यते तं कामं प्रार्थितं काम्यम् ॥ ९ ॥

पुत्रा इति । वंशप्रतिष्ठानं वंशाविच्छेदस्तत्कराः ॥ १० ॥

एवमिति । पूर्वं पूर्वस्मिन् काले । कस्मिन् पूर्वकाले तत्राह,—पुरा देवयुगे एतत् चतुर्युगीप्राक्काले चतुर्युगाद्ये सत्ये युगे इत्यर्थः ॥ ११ ॥

एतत्कथाकथनस्य विवक्षितमर्थमाह,—स इति । स्वयमेवेति न तु पुरोहितादिद्वारा ॥ १२ ॥

अनुमान्य कृतानुमतिं कृत्वा, अन्यथा मयि पुरोहिते स्थिते यज्ञार्थं कथमन्यानयनम् इति तस्य क्रोधः स्यात्-अनुमतौ हेतुः । सूतवाक्यं निशाम्येति श्रावयित्वेत्यर्थः ॥ १३ ॥

सान्तःपुरः सहामात्यः प्रययौ यत्र स द्विजः ।
वनानि सरितश्चैव व्यतिक्रम्य शनैः शनैः ॥ १४ ॥
अभिचक्राम तं देशं यत्र वै मुनिपुङ्गवः ।
आसाद्य तं द्विजश्रेष्ठं रोमपादसमीपगम् ॥ १५ ॥
ऋषिपुत्रं ददर्शाथ दीप्यमानमिवानलम् ।
ततो राजा यथान्यायं पूजां चक्रे विशेषतः ॥ १६ ॥
सखित्वात् तस्य वै राज्ञः प्रहृष्टेनान्तरात्मना ।
रोमपादेन चाख्यातम् ऋषिपुत्राय धीमते ॥ १७ ॥
सख्यं सम्बन्धकञ्चैव तदा तं प्रत्यपूजयत् ।
एवं सुसत्कृतस्तेन सहोषित्वा नरर्षभः ॥ १८ ॥
सप्ताष्ट दिवसान् राजा राजानमिदमब्रवीत् ।
शान्ता तव सुता राजन् ! सह भर्त्रा विशाम्पते ! ॥ १९ ॥

यत्र रोमपादराष्ट्रे ॥ १४ ॥

अभिचक्राम जगाम तं देशं आसाद्य प्राप्य अथो अनन्तरं रोमपादसमीपे द्विजश्रेष्ठम् ऋषिपुत्रं ददर्श । ततः तदागमनानन्दं राजा रोमपादः तस्य राज्ञो दशरथस्य यथान्यायं यथाविधि विशेषतः अत्यादरेण पूजां चक्रे इत्यन्वयः । आदरे हेतुः सखित्वम् ॥ १५ ॥ १६ ॥ १७ ॥

सख्यमिति । सख्यं मैत्रीसम्बन्धकम् । ऋषिपुत्राय रोमपादेन

मदीयं नगरं यातु कार्य्यं हि महदुद्यतम्।
तथेति राजा संश्रुत्य गमनं तस्य धीमतः ॥ २० ॥
उवाच वचनं विप्रं गच्छ त्वं सह भार्य्यया।
ऋषिपुत्रः प्रतिश्रुत्य तथेत्याह नृपं तदा ॥ २१ ॥
स नृपेणाभ्यनुज्ञातः प्रययौ सह भार्य्यया।
तावन्योन्याञ्जलिं कृत्वा स्नेहात् संश्लिष्य चोरसा ॥ २२ ॥

आख्यातं कथितम्। तदा तत्श्रवणानन्तरकाले तं दशरथं प्रत्यपूजयत् ऋष्यशृङ्ग इति शेषः। तेन सह रोमपादेन सह सम्बन्धश्चायं तादृशः येन दशरथस्यापि जामातृत्वव्यवहारयोग्यः ऋष्यशृङ्गः। एतदेव अभिप्रेत्य उक्तं प्राक्-तव जामातेति। क्वचित् च एवं पठ्यतेऽपि,—

"अनेन मेऽनपत्याय, दत्तेयं वरवर्णिनी।
याचते पुत्रतुल्यैषा शान्ता प्रियतरात्मजा।
सोऽयं ते श्वशुरो ब्रह्मन् ! यथैवाहं तथा नृपः ॥"

इति। अत्र याचते इति चतुर्थ्यन्तम्। अतएव प्राक् सान्तःपुरस्य अङ्कदेशे गमनमुक्तं कन्यात्वेऽपि तासां गमनमिति भाति ॥ १८ ॥ १९ ॥

उद्यतम् उपक्रान्तम्। संश्रुत्य प्रतिज्ञाय ॥ २० ॥

प्रतिश्रुत्य आकर्ण्य ॥ २१ ॥

सः ऋष्यशृङ्गः तौ रोमपाद-दशरथौ ॥ २२ ॥

ननन्दतुर्दशरथो रोमपादश्च वीर्य्यवान्।
ततः सुहृदमापृच्छ्य प्रस्थितो रघुनन्दनः ॥ २३ ॥
पौरेषु प्रेषयामास दूतान् वै शीघ्रगामिनः।
क्रियतां नगरं सर्वं क्षिप्रमेव स्वलङ्कृतम् ॥ २४ ॥
धूपितं सिक्तसंमृष्टं पताकाभिरलङ्कृतम्।
ततः प्रहृष्टाः पौरास्ते श्रुत्वा राजानमागतम् ॥ २५ ॥
तथा चक्रुश्च तत् सर्वं राज्ञा यत् प्रेषितं तदा।
ततः स्वलङ्कृतं राजा नगरं प्रविवेश ह ॥ २६ ॥
शङ्खदुन्दुभिनिर्ह्रादैः पुरस्कृत्य द्विजर्षभम्।
ततः प्रमुदिताः सर्वे दृष्ट्वा वै नागरा द्विजम् ॥ २७ ॥
प्रवेश्यमानं सत्कृत्य नरेन्द्रेणेन्द्रकर्म्मणा।
यथा दिवि सुरेन्द्रेण सहस्राक्षेण काश्यपम् ॥ २८ ॥

सुहृदं रोमपादम् ॥ २३ ॥ २४ ॥

स्वलङ्कृतत्वप्रकारमाह,—धूपितमित्यादि। आदौ सिक्तं तोयैः, पश्चात् संमृष्टम् ॥ २५ ॥

प्रेषितमित्यस्य उक्तेत्यादिः ॥ २६ ॥

द्विजम् ऋष्यशृङ्गम् ॥ २७ ॥

इन्द्रकर्मणा इन्द्रसहायार्थं कर्म यस्य तादृशेन राज्ञा सत्कृत्य प्रवेश्यमानं द्विजं दृष्ट्वा देवेन्द्रेण स्वनगरं प्रवेश्यमानं काश्यपं वामनं

अन्तःपुरं प्रवेश्यैनं पूजां कृत्वा च शास्त्रतः ।
कृतकृत्यं तदात्मानं मेने तस्योपवाहनात् ॥ २९ ॥
अन्तःपुराणि सर्वाणि शान्तां दृष्ट्वा तथागताम् ।
सह भर्त्रा विशालाक्षीं प्रीत्यानन्दमुपागमन् ॥ ३० ॥
पूज्यमाना तु ताभिः सा राज्ञा चैव विशेषतः ।
उवास तत्र सुखिता कञ्चित् कालं सह द्विजा ॥ ३१ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
एकादशः सर्गः ॥ ११ ॥

दृष्टा यथा स्वर्गवासिनो मुदिताः, तथात्र नागरा मुदिता इति पूर्वेणान्वयः । इन्द्रकर्मणेत्यनेन राज्ञः समयो महिमातिशयो ध्वनितः ॥ २८ ॥

उपवाहनात् स्वसमीपानयनात् ॥ २९ ॥

तथागमनमेव व्याचष्टे,—सह भर्त्रेति । प्रीत्या शान्तायां प्रीत्या बहुकालविश्लेषोत्तरं मिलिताआनन्दामिरन्तःपुरस्य ॥ ३० ॥

सह द्विजा सपुत्रभर्तृकेति यावत् ॥ ३१ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकादशः सर्गः ॥ ११ ॥

द्वादशः सर्गः ।

ततः काले बहुतिथे कस्मिंश्चित् सुमनोहरे ।
वसन्ते समनुप्राप्ते राज्ञो यष्टुं मनोऽभवत् ॥ १ ॥
ततः प्रणम्य शिरसा तं विप्रं देववर्णिनम् ।
यज्ञाय वरयामास सन्तानार्थं कुलस्य च ॥ २ ॥
तथेति च स राजानमुवाच वसुधाधिपम् ।
सम्भाराः सम्भ्रियन्तां ते तुरगश्च विमुच्यताम् ॥ ३ ।
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ।
ततोऽब्रवीन्-नृपो वाक्यं ब्राह्मणान् वेदपारगान् ॥ ४ ॥
सुमन्त्रावाहय क्षिप्रम् ऋत्विजो ब्रह्मवादिनः ।

एवं निश्चितमवगतं पुत्रदात्वं यस्य तादृशे अश्वमेधे आनीते सकलपापक्षयकारितया पूर्वसङ्कल्पितत्वेन च अश्वमेधं प्रयोक्ष्यति,— तत इति । बहुतिथे अनल्पे काले गते सति शेषः । सुमनोहरे शास्त्रोक्तदोषरहिते मनः अभवत् प्रावर्तत ॥ १ ॥

तत इति । देववर्णिनं देववर्चसं कुलस्य सन्तानार्थं कुलावि-च्छेदरूपप्रयोजनमुद्दिश्यतेन-अश्वमेधेन यज्ञाय यष्टुं विप्रम् ऋश्य-शृङ्गम् ॥ २ ॥ ४ ॥

सुयज्ञं वामदेवञ्च जावालिमथ काश्यपम् ॥ ५ ॥
पुरोहितं वशिष्ठञ्च ये चान्ये द्विजसत्तमाः ।
ततः सुमन्त्रस्त्वरितं गत्वा त्वरितविक्रमः ॥ ६ ॥
समानयत् स तान् सर्वान् समस्तान् वेदपारगान् ।
तान् पूजयित्वा धर्मात्मा राजा दशरथस्तदा ॥ ७ ॥
धर्मार्थसहितं युक्तं श्लक्ष्णं वचनमब्रवीत् ।
मम तातप्यमानस्य पुत्रार्थं नास्ति वै सुखम् ॥ ८ ॥
पुत्रार्थं हयमेधेन यक्ष्यामीति मतिर्मम ।
तदहं यष्टुमिच्छामि हयमेधेन कर्मणा ॥ ९ ॥
ऋषिपुत्रप्रभावेण कामान् प्राप्स्यामि चाप्यहम् ।
ततः साध्विति तद् वाक्यं ब्राह्मणाः प्रत्यपूजयन् ॥ १० ॥
वशिष्ठप्रमुखाः सर्वे पार्थिवस्य मुखाच्युतम् ।
ऋष्यशृङ्गपुरोगाश्च प्रत्यूचुर्नृपतिं तदा ॥ ११ ॥
सम्भाराः सम्भ्रियन्तां ते तुरगश्च विमुच्यताम् ।

जाबालिश्च सत्यमीयं प्रापय ॥ ५ ॥
तत इत्यादि व्याख्यातप्रायम् ॥ ६ ॥ ७ ॥ ८ ॥
पुत्रार्थं हयमेधेन कर्मणा तदाख्येन कर्मणा ॥ ९ ॥
अनुष्ठानारम्भाय च पुनरपत्यार्थः, ऋषिपुत्रो ऋष्यशृङ्गः ॥ १० ॥
११ ॥ १२ ॥

सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ॥ १२ ॥
सर्वथा प्राप्स्यसे पुत्रांश्चतुरोऽमितविक्रमान् ।
यस्य ते धार्मिकी बुद्धिरियं पुत्रार्थमागता ॥ १३ ॥
ततः प्रीतोऽभवद्राजा श्रुत्वा तु द्विजभाषितम् ।
अमात्यानब्रवीद्राजा हर्षेणेदं शुभाक्षरम् ॥ १४ ॥
गुरूणां वचनाच्छीघ्रं सम्भाराः सम्भ्रियन्तु मे ।
समर्थाधिष्ठितश्चाश्वः सोपाध्यायो विमुच्यताम् ॥ १५ ॥
सरय्वाश्चोत्तरे तीरे यज्ञभूमिर्विधीयताम् ।
शान्तयश्चाभिवर्धन्तां यथाकल्पं यथाविधि ॥ १६ ॥
शक्यः कर्तुमयं यज्ञः सर्वेणापि महीक्षिता ।
नापराधो भवेत् कष्टो यद्यस्मिन् क्रतुसत्तमे ॥ १७ ॥
छिद्रं हि मृगयन्त्येते विद्वांसो ब्रह्मराक्षसाः ।
विधिहीनस्य यज्ञस्य सद्यः कर्ता विनश्यति ॥ १८ ॥
तद् यथा विधिपूर्वं मे क्रतुरेष समाप्यते ।
तथाविधानं क्रियतां समर्थाः करणेष्विह ॥ १९ ॥

धार्मिकी प्रजासंरक्षणरूपधर्मप्रयोजना ॥ १३ ॥ १४ ।
सम्भ्रियन्तु सम्पाद्यन्तां गुरूनामित्यादयो व्याख्यातप्रायाः ॥ १५ ॥
१६ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

तथेति च ततः सर्वे मन्त्रिणः प्रत्यपूजयन् ।
पार्थिवेन्द्रस्य तद् वाक्यं यथाज्ञप्तमकुर्वत ॥ २० ॥
ततो द्विजास्ते धर्मज्ञमस्तुवन् पार्थिवर्षभम् ।
अनुज्ञातास्ततः सर्वे पुनर्जग्मुर्यथागतम् ॥ २१ ॥
गतानां तेषु विप्रेषु मन्त्रिणस्तान् नराधिपः ।
विसर्जयित्वा स्वं वेश्म प्रविवेश महामतिः ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
द्वादशः सर्गः ॥ १२ ॥

गतानामिति । गतेषु द्विजादिषु इत्यर्थः सप्तम्यर्थे षष्ठी । विसर्जयित्वा संवत्सरान्ते यागार्थम् इति शेषः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे द्वादशः सर्गः ॥ १२ ॥

त्रयोदशः सर्गः ।



पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ।
प्रसवार्थं गतो * यष्टुं हयमेधेन वीर्यवान् ॥ १ ॥
अभिवाद्य वसिष्ठञ्च न्यायतः प्रतिपूज्य च ।
अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम् ॥ २ ॥
यज्ञो मे क्रियतां ब्रह्मन् ! यथोक्तं मुनिपुङ्गव ! ।
यथा न विघ्नाः क्रियन्ते यज्ञाङ्गेषु विधीयताम् ॥ ३ ॥

अथ संवत्सरान्ते दीक्षितेति सूचनात् पूर्ववसन्तादिवसन्तान्तस्य पुनः संवत्सरान्ते वसन्ते प्राप्ते दीक्षा[illegible]—पुनरिति । प्रसव-कृतयत्नं हयमेधेन अश्वमेधेन यष्टुं गतो वसिष्ठ[illegible]मिति शेषः ॥ १ ॥

वसिष्ठं प्राह [illegible] प्रश्रितं विनययुक्तम् ॥ २ ॥

यथोक्तं शास्त्रोक्तप्रकारानतिक्रमेण यज्ञाङ्गेषु [illegible] यथा ब्रह्मराक्षसादिभिर्विघ्ना न क्रियन्ते तथा विधीयतां क्रियताम् इ-त्यर्थः ॥ ३ ॥

---

* "सुतः" इति वा पाठः ।

भवान् स्निग्धः सुहृन्मह्यं गुरुश्च परमो महान्।
वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः॥ ४ ॥
तथेति च स राजानमब्रवीत् द्विजसत्तमः।
करिष्ये सर्वमेवैतद् भवता यत् समर्थितम् ॥ ५ ॥
ततोऽब्रवीत् द्विजान् वृद्धान् यज्ञकर्मसु निष्ठितान्।
स्थापत्ये निष्ठितांश्चैव वृद्धान् परमधार्म्मिकान्॥ ६ ॥
कर्म्मान्तिकान् शिल्पकरान् वर्द्धकीन् खनकानपि।
गणकान् शिल्पिनश्चैव तथैव नटनर्त्तकान्॥ ७ ॥

भवानिति। सुहृदः स्निग्धत्वाव्यभिचाराद् अतिशयप्रतिपत्तये पुनः स्निग्धेति विशेषणं, मह्यमिति षष्ठ्यर्थे, परमो महानित्यपि स्निग्धशब्दवत्। विशेषः पुनःप्राधान्यकत्वाद् उद्यतः आरब्धो यज्ञसम्बन्ध्यनुष्ठानरूपो भारः भवतैव सर्ववेदपारगेण वोढव्यः वोढुमर्हः ॥ ४ ॥

समर्थितं सम्यक् प्रार्थितम् ॥ ५ ॥

अब्रवीदिति। वसिष्ठोऽत्र कर्ता। स्थापत्यं स्थपते-रथकारस्य कर्म तत्र निष्ठितान् प्रवीणान् ॥ ६ ॥

कर्मान्तिकान् आसमाप्तिकर्मनिर्वाहकान् भृत्यान् शिल्पकरान् शिल्पं चित्रादि, वर्धकीन् तक्ष्णः, खनकाः कूपवापीनिर्मातारः, गणकान् ज्योतिर्विदः, शिल्पिनश्चर्मकारादयः, नटाः सूत्रधाराः, नर्त्तकाः नृत्यकारिणः ॥ ७ ॥

तथा ऋषीन् शास्त्रविदः पुरुषान् सुबहुश्रुतान् ।
यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ॥ ८ ॥
इष्टका बहुसाहस्री शीघ्रमानीयतामिति ।
औपकार्य्याः क्रियन्तां च राज्ञां बहुगुणान्विताः ॥ ९ ॥
ब्राह्मणावसथाश्चैव कर्त्तव्याः शतशः शुभाः ।
भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ॥ १० ॥
पौरजानपदश्चापि कर्त्तव्याश्च सुविस्तराः ।
आगतानां सुदूराच्च पार्थिवानां पृथक् पृथक् ॥ ११ ॥
वाजिवारणशालाश्च तथा शय्यागृहाणि च ।
भटानां महदावासा वैदेशिकनिवासिनाम् ॥ १२ ॥

समीहन्तां कर्म कुर्वन्त्वित्यब्रवीदिति पूर्वेणान्वयः । यज्ञकर्मेत्यस्य निवर्त्तयितुमिति शेषः ॥ ८ ॥

इष्टका इति । बहुसाहस्री बहुसहस्रसंख्येत्यर्थः । जातावेकवचनम् । राज्ञां योग्याः औपकार्य्याः राजसद्मानि । शुभा अन्नपानाद्युपकरणानि सर्वेण अब्रवीदित्यनुकर्षः ॥ ९ ॥

सुनिष्ठिताः महावर्षवातादिनिवारणक्षमाः ॥ १० ॥

कर्त्तव्या इत्यस्य आवासा इति शेषः । पार्थिवानाम् [illegible]माण्डलिकानाम् ॥ ११ ॥

वैदेशिकनिवासिनां वैदेशिकानां स्वदेशवासिनां चेत्यर्थः । महदावासा इत्यत्र रुत्वाभाव आर्षः ॥ १२ ॥

आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः ।
तथा पौरजनस्यापि जनस्य बहुशोभनम् ॥ १३ ॥
दातव्यमन्नं विधिवत् सत्कृत्य न तु लीलया * ।
सर्वे वर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥ १४ ॥
न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ।
यज्ञकर्मसु ये व्यग्राः पुरुषाः शिल्पिनस्तथा ॥ १५ ॥
तेषामपि विशेषेण पूजा कार्य्या यथाक्रमम् ।
ये स्युः सम्पूजिताः सर्वे वसुभिर्भोजनेन च ॥ १६ ॥

सर्वकामैरुपस्थिताः काम्यमानैः सर्वपदार्थैर्युक्ताः । जनस्य इतर-क्षुद्रजनस्यापि बहुशोभनं यथा भवति तथा आवासाः कार्य्या इत्यर्थः ॥ १३ ॥

दातव्यमिति । सत्कृत्य परलोकप्रयोजनबुद्ध्या श्रद्धायुक्तसत्कार-पूर्वकं देयम् इत्यर्थः । न तु लीलया उत्सवमात्रबुद्ध्या अनादरेण यथा पूजां प्राप्नुवन्ति पूजां प्राप्तां मन्यन्ते तथा सुसत्कृताः कार्य्या इत्यर्थः ॥ १४ ॥ १५ ॥

तेषामपीति । अपिरन्वर्थे यथाक्रमं ज्येष्ठानुक्रमेण । तत्र उप-पत्तिमाह,—ये वसुभिर्धनैः भोजनादिभिश्च पूजिताः सेवकाः, तेषां सर्वकार्य्यं सुविहितं भवति किञ्चिदपि कार्य्यं न परिहीयते न हीनं

---

* "लीलया"

इति बङ्गीयाः ।

यथा सर्वं सुविहितं न किञ्चित् परिहीयते ।
तथा भवन्तः कुर्वन्तु प्रीतियुक्तेन चेतसा ॥ १७ ॥
(ते च स्युः सुहृदः सर्वे वसुभिर्भोजनेन च)
ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ।
यथेष्टं तत् सुविहितं न किञ्चित् परिहीयते ॥ १८ ॥
यथोक्तं तद् करिष्यामो न किञ्चित् परिहास्यते ।
ततः सुमन्त्रमाहूय वसिष्ठो वाक्यमब्रवीत् ॥ १९ ॥
निमन्त्रयस्व नृपतीन् पृथिव्यां ये च धार्मिकाः ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्चैव सहस्रशः ॥ २० ॥
समानयस्व सत्कृत्य सर्वदेशेषु मानवान् ।
मिथिलाधिपतिं शूरं जनकं सत्यवादिनम् ॥ २१ ॥

भवन्ति । तस्मात् मयि प्रीतियुक्तेन चित्तेन भवन्तः यथा कुर्वन्तु तथा सर्वे सुहृदः ते च [illegible] ॥ १६ ॥ १७ ॥ १८ ॥

यथोक्तमिति । [illegible] सुविहितं न किञ्चित् [illegible] । [illegible] वचनं यथा [illegible], [illegible] । [illegible] किञ्चित् हीनं भविष्यति । [illegible] ॥ १९ ॥ २० ॥

मानवान् चतुर्वर्णादि[illegible] ॥ [illegible]

तमानय महाभागं स्वयमेव सुसत्कृतम् ।
पूर्वसम्बन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते ॥ २२ ॥
तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् ।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व च ॥ २३ ॥
तथा केकयराजानं वृद्धं परमधार्म्मिकम् ।
श्वशुरं राजसिंहस्य सपुत्रं तमिहानय ॥ २४ ॥
तथा कोशलराजानं भानुमन्तं सुसत्कृतम् ।
अङ्गेश्वरं महेष्वासं रोमपादं सुसत्कृतम् ।
वयस्यं राजसिंहस्य समानय यशस्विनम् ॥ २५ ॥
मगधाधिपतिं शूरं सर्वशास्त्रविशारदम् ॥ २६ ॥

तमिति । मिथिलाधिपं स्वयमेव आनयेति सम्बन्धः । न तु दूतमात्रप्रेषणेन । कुत एवं विशेषः ? कुतश्च तदानयनस्य प्रथममुपदेशः ? तत्राह,—पूर्वसम्बन्धिनं पूर्वस्मिन्नेव काले भाविनं सम्बन्धिनं * समर्थपाठे मयूरव्यंसकादित्वात् समासः तं योगबलेन ज्ञात्वा । ततो हेतोः भाविसम्बन्धिज्ञानहेतोः सर्वेभ्यः पूर्वं पूर्वकाले तदानयनं ब्रवीमीत्यर्थः ॥ २२ ॥ २३ ॥

केकयराजानमिति । [illegible] ॥ २४ ॥ २५ ॥ २६ ॥

---

* सिद्धान्तवचनम् इति नागोजीभट्टः ।

प्राप्तिज्ञं परमोदारं सत्कृतं पुरुषर्षभम्।
राज्ञः शासनमादाय चोदयस्व नृपर्षभान्॥ २७॥
प्राचीनान् सिन्धुसौवीरान् सौराष्ट्रेयांश्च पार्थिवान्।
दाक्षिणात्यान् नरेन्द्रांश्च समस्तानानयस्व ह॥ १८॥
सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले॥ २८॥
तानानय यथा क्षिप्रं सानुगान् सहबान्धवान्।
एतान् दूतैर्महाभागैरानयस्व नृपाज्ञया॥ ३०॥
वसिष्ठवाक्यं तत् श्रुत्वा सुमन्त्रस्त्वरितं तदा।
व्यादिशत् पुरुषांस्तत्र राज्ञामानयने शुभान्॥ ३१॥
स्वयमेव हि धर्मात्मा प्रययौ मुनिशासनात्।
सुमन्त्रस्त्वरितो भूत्वा समानेतुं महीक्षितः॥ ३२॥
ते च कर्मान्तिकाः सर्वे वसिष्ठाय च धीमते।
सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितम्॥ ३३॥

सत्कृतं यथा भवति तथा आनयस्व इति शेषः॥ २७॥
प्राचीनान् प्राग्देशवर्तिनः सुराष्ट्रे भवा सौराष्ट्रेयाः ढगादेः॥ २८॥२९॥
यथा यथायोग्यदूतप्रेषणेन॥ ३०॥ ३१॥
स्वयमेवेति। वसिष्ठेन नियुक्तोऽत्राऽऽगमिति शेषः॥ ३२॥
ते चेति। पूर्वनियुक्ताः सर्वे वसिष्ठाय न्यवेदयन् इति वा
शाकः॥ ३३॥

ततः प्रीतो द्विजश्रेष्ठस्तान् सर्वान् मुनिरब्रवीत् ।
अवज्ञया न दातव्यं कस्यचित् लीलयापि वा ॥ १४ ॥
अवज्ञया कृतं हन्यात् दातारं नात्र संशयः * ।
ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ॥ १५ ॥
बहूनि रत्नान्यादाय राज्ञो दशरथस्य च ।
ततो वशिष्ठः सुप्रीतो राजानमिदमब्रवीत् ॥ १६ ॥
उपयाता नरव्याघ्र ! राजानस्तव शासनात् ।
मयापि सत्कृताः सर्वे यथार्हं राजसत्तमाः ॥ १७ ॥
यज्ञीयञ्च कृतं सर्वं पुरुषैः सुसमाहितैः ।
निर्यातु च भवान् यष्टुं यज्ञायतनमन्तिकात् ॥ १८ ॥

अवज्ञया अनादरेण लीलया अश्रद्धया । आवश्यकत्वात् एतत् पुनः शिक्षितम् ॥ १४ ॥

तदेवाह,—अवज्ञयेति ॥ १५ ॥

रत्नानि उत्तमवस्तूनि † ॥ १६ ॥ १७ ॥

यज्ञीयं यज्ञोपयोगि स्रुक्स्रुवादिसम्भाररूपम् अन्तिकात् समीपे वर्त्तमानमित्यर्थः ॥ १८ ॥

---

* "अवज्ञया च यद्दत्तं दातुस्तद्दोषमावहेत् ।"
इति स्मृतिः ।

† जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते ।

सर्वकामैरुपचितैरुपेतं वै समन्ततः ।
द्रष्टुमर्हसि राजेन्द्र ! मनसेव विनिर्मितम् ॥ ३९ ॥
तथा वसिष्ठवचनादृष्यशृङ्गस्य चोभयोः ।
दिवसे शुभनक्षत्रे निर्यातो जगतीपतिः ॥ ४० ॥
ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः ।
ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥ ४१ ॥
यज्ञवाटं गताः सर्वे यथाशास्त्रं यथाविधि ।
श्रीमांश्च सह पत्नीभीराजा दीक्षामुपाविशत् ॥ ४२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
त्रयोदशः सर्गः ॥ १३ ॥

मनसेवेति । विप्रसिद्धसोपकरणसौष्ठवमापमाय उत्प्रेक्षेयम् ॥३९॥
वसिष्ठवचनादित्यत्र वसिष्ठेति लुप्तविभक्तिकं पृथक् पदम् । वसि-
ष्ठस्य ऋष्यशृङ्गस्य च प्रत्येकम् उभयोश्च मिलितयोर्वचनात् ॥ ४० ॥
आरभन्निति छान्दसम् ॥ ४१ ॥
यज्ञवाटमित्यर्द्धं पूर्वान्वयि । शास्त्रं कल्पसूत्रादि । विधिस्तदुक्त-
प्रकारः ॥ ४२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः ।



अथ संवत्सरे पूर्णे तस्मिन् प्राप्ते तुरङ्गमे ।
सरय्वाश्चोत्तरे तीरे राज्ञो यज्ञोऽभ्यवर्तत ॥ १ ॥
ऋष्यशृङ्गं पुरस्कृत्य कर्म चक्रुर्द्विजर्षभाः ।
अश्वमेधे महायज्ञे राज्ञोऽस्य सुमहात्मनः ॥ २ ॥
कर्म कुर्वन्ति विधिवत् याजका वेदपारगाः ।
यथाविधि यथान्यायं परिक्रामन्ति शास्त्रतः ॥ ३ ॥

अथेति । अथ एतत्सर्गानन्तरं वर्षे पूर्णे तस्मिन् अश्वे सदः प्राप्ते सति कर्म प्रावर्त्तत इत्यर्थः । [illegible] त्रिंशद्दिनात्मकसावनमासपरिच्छिन्नो वत्सरः ॥ १ ॥

ऋष्यशृङ्गमिति । 'अनेन प्रधानार्त्विज्यं प्रधानत्वं तस्य गम्यते' इति कतकः । अत्र "पुत्रेष्टाविष्टिं तेऽहं करिष्यामि" इति ऋष्यशृङ्गोक्तेः "गुह्यावामौ च तेजस्वी" इति ऋष्यशृङ्गं प्रक्रम्य वाल्मीक्युक्तेश्चाध्वर्यवम् अस्येति युक्तम् ॥ २ ॥

कर्मेति । वेदपारगाः अधीतवेदस्य पारं [illegible] गच्छन्ति प्राप्नुवन्ति ते याजकाः ऋत्विजो यथाविधि [illegible] [illegible]मेव । न्यायोऽत्र तन्निर्णायिका पूर्वमीमांसा तं च अनति-

प्रवर्ग्यं शास्त्रतः कृत्वा तथैवोपसदं द्विजाः।
चक्रुश्च विधिवत् सर्वमधिकं कर्म शास्त्रतः॥ ४॥
अभिपूज्य तदा हृष्टाः सर्वे चक्रुर्यथाविधि।
प्रातःसवनपूर्वाणि कर्माणि मुनिपुङ्गवाः॥ ५॥
ऐन्द्रश्च विधिवद्दत्तो राजा चाभिषुतो*ऽनघः।
मध्यन्दिनञ्च सवनं प्रावर्तत यथाक्रमम्॥ ६॥

अन्य परिक्रामन्ति शास्त्रोक्तक्रियाक्रमकाक्षम् अविस्मृत्य प्रवर्त्तन्ति॥ ३॥

प्रवर्ग्यम् † आरादुपकारकं कर्मविशेषम् उपसदम् इष्टिविशेषम् अधिकं प्रकृत्युपदिष्टात्कृतिदेशात् तत्तद्विकृत्यपेक्षितो विशेषोऽधिकं कर्म ‡॥ ४॥

अभिपूज्येति। तत्तत्कर्मपूज्यां देवतामिति शेषः। यथाविधि प्रातःसवनादिकर्मविशेषः॥ ५॥

ऐन्द्र इन्द्रदेवताको हविर्भागः दत्तः। राजा सोमलता च अभिषुतः ग्रावभिः संस्तुय निःसारितसारः ¶॥ ६॥

---

* "अभिष्टुतः" इति वा पाठः।

† प्रवर्ग्यं शास्त्रोक्तकर्मविशेषमिति नामोर्गीभङ्गः।

‡ उपदेशशास्त्रादधिकम् अतिदेशतः प्राप्तं सर्वं कर्म चक्रुः इति फलितार्थः।

¶ अभिष्टुत इति पाठे सोमशाखैः स्तुतः इति तीर्थः।

तृतीयसवनञ्चैव राज्ञोऽस्य सुमहात्मनः ।
चक्रुस्ते शास्त्रतो दृष्ट्वा यथा ब्राह्मणपुङ्गवाः ॥ ७ ॥
आह्वयाञ्चक्रिरे तत्र शक्रादीन् विबुधोत्तमान् ।
ऋष्यशृङ्गादयो मन्त्रैः शिक्षाक्षरसमन्वितैः ॥ ८ ॥
गीतिभिर्मधुरैः स्निग्धैर्मन्त्राह्वानैर्यथार्हतः ।
होतारो ददुरावाह्य हविर्भागान् दिवौकसाम् ॥ ९ ॥
न चाहुतमभूत् तत्र स्खलितं वा न किञ्चन ।
दृश्यते ब्रह्मवत् सर्वं क्षेमयुक्तं हि चक्रिरे ॥ १० ॥
न तेष्वहःसु श्रान्तो वा क्षुधितो वा न दृश्यते ।
नाविद्वान् ब्राह्मणः कश्चिन्-नाशतानुचरस्तथा ॥ ११ ॥

तृतीयेति । यथेत्यस्य यथा[illegible]मीत्यर्थः ॥ ७ ॥

शिक्षाक्षरसमन्वितैः शिक्षा अभ्यासकालः तत्र गृहीतानि अक्षराणि शिक्षाक्षराणि तत्-समन्वितैः स्वरतो वर्णतश्च अहीनै-रिति यावत् । ऋष्यशृङ्गादय इत्यत्रादिशब्दः प्रधानवाची गौणा-दिव [illegible] इतिवत् ॥ ८ ॥

गीतिभिः सामभिः ॥ ९ ॥

न चेति । अहुतम् अन्यथा हुतं स्खलितम् [illegible] न किञ्चि-दपि कर्म[illegible] ब्रह्मवत् अभवत् । क्षेमयुक्तं क्षेमं [illegible] हितं यथा तथा विघ्नराहित्यम् ॥ १० ॥

ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते।
तापसा भुञ्जते चापि श्रमणाश्चैव भुञ्जते॥ १२॥
वृद्धाश्च व्याधिताश्चैव स्त्रीबालाश्च तथैव च।
अनिशं भुञ्जमानानां न तृप्तिरुपलभ्यते॥ १३॥
दीयतां दीयतामन्नं वासांसि विविधानि च।
इति सञ्चोदितास्तत्र तथा चक्रुरनेकशः॥ १४॥

नेति। * श्रान्तः खस्वार्त्विज्याशक्तः। अ-सृतानुचरः सृत-सेवकरहितः †॥ ११॥

ब्राह्मणा इति। त्रैवर्णिकोपलक्षणं द्विजत्वात्। नाथवन्तः दासाः शूद्रा इति यावत् ‡। तापसा अदासाः शैवादिमार्गम् आश्रिताः शूद्राः श्रमणा बौद्धसंन्यासिनः। यद्वा श्रमणपदं संन्यासिउपलक्षणम्॥ १२॥

न तृप्तिरुपलभ्यते। भोज्यवैशिष्ट्यात् उदरपूर्त्तावपि रसातिशयलोभेन मानसी तृप्तिर्नोपलभ्यते इत्यर्थः। यद्वा अनिशं भुञ्जानेऽपि जनेषु यजमानस्य तृप्तिरलंबुद्धिर्नासीत् इत्यर्थः॥ १३॥ १४॥

---

* यद्यपि क्रीते सोमे यजमानान्नं न भोक्तव्यं तथापि सर्वदक्षिणत्वात् कृतत्वात् न दोषः। इति नागोजीभट्टः।

† सृतशिष्यवर्जित इति तीर्थः।

‡ शास्त्राणां शूद्रश्चोपाधिः नागानामभावात् नाथवत्त्वेनैव शूद्र एवोपगम्यते।

अन्नकूटाश्च दृश्यन्ते बहवः पर्वतोपमाः ।
दिवसे दिवसे तत्र सिद्धस्य विधिवत् तदा ॥ १५ ॥
नानादेशादनुप्राप्ताः पुरुषाः स्त्रीगणास्तथा ।
अन्नपानैः सुविहितास्तस्मिन् यज्ञे महात्मनः ॥ १६ ॥
अन्नं हि विधिवत् स्वादु प्रशंसन्ति द्विजर्षभाः ।
अहो तृप्ताः स्म भद्रं ते इति शुश्राव राघवः ॥ १७ ॥
स्वलङ्कृताश्च पुरुषा ब्राह्मणान् पर्य्यवेषयन् ।
उपासन्ते च तानन्ये सुमृष्टमणिकुण्डलाः ॥ १८ ॥

अन्नेति । लुप्तषष्ठीकं पृथक्पदम् । तस्य सिद्धस्येति पक्वस्येत्यर्थं विशेषणम् । विधिवत् सूदशास्त्रोक्तप्रकारेण सिद्धस्येत्यन्वयः ॥ १५ ॥

सुविहिताः सुविहिततृप्तिकाः ॥ १६ ॥

अन्नमिति । स्वाद्वन्नं भुक्त्वेति शेषः । प्रशंसाकारमाह,—'अहो तृप्ताः स्म भद्रं ते' इति प्रशंसां राघवः शुश्रावेत्यन्वयः । यद्वा विधिवत् स्वादु इत्यपि प्रशंसाकारः * ॥ १७ ॥

स्वलंकृता इति । अनेन राजकृतो यज्ञपरिचारकसत्कारो ध्वनितः । तान् परिवेषयितॄन् । अन्ये तत्सहायभूताः भोक्तृवाञ्छज्ञेन परिवेषकस्य अस्वास्थ्यत्वात् पाकशालातोऽन्नप्रापकास्तद्वशायाः । एतदेव तस्य सुसाध्यत्वात् पुनरकर्तव्यम् ॥ १८ ॥

* विधिवत् उपचारवत् इति नागोजीभट्टः ।

कर्मान्तरे तदा विप्रा हेतुवादान् बहूनपि ।
प्राज्ञः सुवाग्मिनो धीराः परस्परजिगीषया ॥ १९ ॥
दिवसे दिवसे तत्र संस्तरे कुशला द्विजाः ।
सर्वकर्माणि चक्रुस्ते यथाशास्त्रं प्रचोदिताः ॥ २० ॥
नाषडङ्गविदत्रासीन्नाव्रती नाबहुश्रुतः ।
सदस्यस्तस्य वै राज्ञो नावादकुशला द्विजाः ॥ २१ ॥
प्राप्ते यूपोच्छ्रये तस्मिन् षड्बैल्वाः खादिरास्तथा ।
तावन्तो बिल्वसहिताः पर्णिनश्च तथापरे ॥ २२ ॥

कर्मान्तरे इति । एकसवनं समाप्य पुनः सवनान्तरारम्भकालागमात् पूर्वस्मिन् अन्तरालकाले हेतुवादान् हेतूपन्यासपूर्वकान् वादान् चक्रुः ॥ १९ ॥

संस्तरे यज्ञे प्रचोदिताः शास्त्रीयैः ब्रूहि प्रेष्यादिशब्दैः प्रेरिता इत्यर्थः ॥ २० ॥

सदस्याः विधिदर्शिनः ॥ २१ ॥

यूपोच्छ्रये यूपोत्क्षेपणप्रेषकाले * । तथा खादिरास्तावन्तः षट्संख्यकाः बिल्वसहिताः । एकैकबिल्वयूपसमीपे स्थिताः । अपरे अन्ये पर्णिनः पालाशाः यूपास्तेऽपि षडिति तथा शब्दार्थः ॥ २२ ॥

---

* यूपानां उच्छ्रयः यूपोच्छ्रयः उच्छ्रय उद्धृत्य स्थापनं तत्काले यूपाय उच्छ्रीयमाणायानुब्रूहीति यूपोत्क्षेपण प्रेषकाले प्राप्ते इति गोविन्दराजः ।

श्लेष्मातकमयो दिष्टो देवदारुमयस्तथा ।

द्वावेव तत्र विहितौ बाहुव्यस्तपरिग्रहौ ॥ २३ ॥

कारिताः सर्व एवैते शास्त्रज्ञैर्यज्ञकोविदैः ।

शोभार्थं तस्य यज्ञस्य काञ्चनालङ्कृताभवन् ॥ २४ ॥

एकविंशतियूपास्ते एकविंशत्यरत्नयः ।

वासोभिरेकविंशद्भिरेकैकं समलङ्कृताः ॥ २५ ॥

विन्यस्ता विधिवत् सर्वे शिल्पिभिः सुदृढाः कृताः ।

श्लेष्मातको रज्जुदालकस्तन्मयो एको यूपः अश्वमेधे दिष्टः उपदिष्ट इत्यर्थः । 'श्लेष्मातकमयोऽभिष्ठः' इति पाठे अभिष्ठः अग्रमभिमुखः तथा देवदारुमयोऽप्यस्ति यूपः स च नैको नापि षट् किन्तु द्वौ तौ च व्यस्तबाहुभ्यां प्रसारितभुजाभ्यां तावदायामेन परिग्रहः स्वीकारो ययोस्तौ । एवमेकविंशतिरश्वमेधे यूपा इत्युक्तम् । ते च तत्सूत्रग्रन्थोः प्रसिद्धा इत्यन्यत्र विस्तरः ॥ २३ ॥

काञ्चनालङ्कृताभवन् इत्यत्र अडभावश्छान्दसः । शास्त्रज्ञैः शास्त्रं शिल्पशास्त्रं शुल्वशास्त्रं च ॥ २४ ॥

'सप्तोच्छ्रायपरीणाहो रूपोऽन्यः सर्वकाञ्चनः ।
यूपो समभवत् तत्र शोभार्थमुपकल्पितः ॥'

इति क्वचित् पाठः । एकेति । अरत्निर्नाम चतुर्विंशत्यङ्गुलयः ॥ २५ ॥

[illegible] अग्निः कोशः तत्तद्विशेषेणैव [illegible] येव कृताः ॥ २६ ॥

अष्टाश्रयः सर्वे एव श्लक्ष्णरूपसमन्विताः ॥ २६ ॥
आच्छादितास्ते वासोभिः पुष्पैर्गन्धैश्च पूजिताः ।
सप्तर्षयो दीप्तिमन्तो विराजन्ते यथा दिवि ॥ २७ ॥
इष्टकाश्च यथान्यायं कारिताश्च प्रमाणतः ।
चितोऽग्निर्ब्राह्मणैस्तत्र कुशलैः शिल्पकर्मणि ॥ २८ ॥
स चित्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ।
गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥ २९ ॥

यथा सप्तर्षयो विराजन्ते तथा यूपा विराजन्तेत्यर्थः ॥ २७ ॥

इष्टका इति । यथान्यायं यथासूत्रम् । अर्धेष्टका मध्यमेष्टकादयश्च कारिताः शुल्बविद्भिरिति शेषः । अग्निः अग्न्याधारभूतो देशः स ब्राह्मणैः इष्टकाभिश्चितो बद्ध इत्यर्थः । शुल्बकर्मणीति पाठे शुल्बसूत्रोक्तकर्मणीत्यर्थः । केचित्तु तत्र इष्टकाबद्धे देशे अग्निः चितः स्थापित इत्यर्थं इत्याहुः ॥ २८ ॥

स चित्यः अग्निः सञ्चितः स्थापितः, कथं सञ्चितः? इत्यत्राह,—गरुडसंस्थानः । रुक्मपक्षः 'स हवं हिरण्मयपक्षैः प्रतिदिशमस्ति प्रोक्षति' इति सूत्रात् रुक्मपक्षत्वमिति केचित् । अत्र वयं त्रिगुणोऽष्टादशात्मक इत्यस्य अनामप्रत्वं मत्वा विवदे [illegible]मानि । [illegible]भिः मयनिर्माणात् [illegible]मित्यन्ये । त्रिगुणः प्रकारः, तदेवाह,—अष्टादशात्मक इति । [illegible] भवन्तीति प्रकृतौ उक्तेरिति भावः ॥ २९ ॥

नियुक्तास्तत्र पशवस्तत्तदुद्दिश्य दैवतम् ।
उरगाः पक्षिणश्चैव यथाशास्त्रं प्रचोदिताः ॥ ३० ॥
शामित्रे तु हयस्तत्र तथा जलचराश्च ये ।
ऋत्विग्भिः सर्वमेवैतत् नियुक्तं शास्त्रतस्तदा ॥ ३१ ॥
पशूनां त्रिशतं तत्र यूपेषु नियतं तदा ।
अश्वरत्नोत्तमं तत्र राज्ञो दशरथस्य ह ॥ ३२ ॥
कौशल्या तं हयं तत्र परिचर्य्य समन्ततः ।
कृपाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ ३३ ॥
पतत्रिणा तदा सार्द्धं सुस्थितेन च चेतसा ।
अवसद् रजनीमेकां कौशल्या धर्मकाम्यया ॥ ३४ ॥

यथाशास्त्रम् 'इन्द्राय राज्ञे' इत्याद्यनुवाकैः प्रतिपादिताः ॥३०॥

शामित्रे मारणविशसनादिकर्मणि ॥ ३१ ॥

नियतं बद्धम् । अश्वरत्नेषु उत्तमं श्रेष्ठं नियतमित्यनुकर्षः ॥३२॥

कौशल्येति । परिचर्य्य प्रोक्षणादिना संस्कृत्य त्रिभिः कृपाणैः ऋत्विग्भिः समम् अश्वं विशशास, अस्य विशसनं कृतवती 'महिष्यश्वासिना कल्पयन्ति' इति सूत्रात् ॥ ३३ ॥

पतत्रिणेति । पुरा अश्वानां पक्षाः सन्तीति प्रसिद्ध्या एवं वादः । पतत्रिणा गरुड़वेगेनेत्यर्थं इत्यन्ये । सुस्थितेन स्थिरेण चेतसा उपलक्षिता सती कौशल्या धर्मेच्छया एकां रजनीम् अश्वेन सह अवसत् ॥ ३४ ॥

होताध्वर्युस्तथोद्गाता हयेन समयोजयन् ।
महिष्या परिवृत्त्याथ वावातामपरां तथा ॥ ३५ ॥
पतत्त्रिणस्तस्य वपामुद्धृत्य नियतेन्द्रियः ।
ऋत्विक् परमसम्पन्नः श्रपयामास शास्त्रतः ॥ ३६ ॥
धूमगन्धं वपायास्तु जिघ्रति स्म नराधिपः ।
यथाकालं यथान्यायं निर्णुदन् पापमात्मनः ॥ ३७ ॥

अथ होत्रादयः। महिष्या कृताभिषेकया परिवृत्त्या राज्ञो भोगाद् बहिष्कृतया दास्या च सह वावातां राज्ञो वल्लभां भुजिष्याम् अश्वेन समयोजयन् इति सम्बन्ध इति केचित्। अपरे तु वावाताशब्दो राज्ञः मध्यमजातीयद्वितीयभार्यावाची। तदुक्तम् ऐतरेयब्राह्मणभाष्ये, तृतीय-पञ्चिकाया-द्वाविंशतिखण्डवावातेति प्रतीकव्याख्यानावसरे,—'राज्ञां हि त्रिविधा स्त्रियः, उत्तममध्यमाधमजातीयाः; तासां मध्ये उत्तमजातेः क्षत्रियाया महिषीति नाम, मध्यमजातेर्वैश्याया वावातेति, अधमजातेः शूद्रायाः परिवृत्तिः' इति। अतएव आश्वलायनसूत्रे दशमाध्यायेऽष्टमखण्डवावातेति प्रतीकं गृहीत्वा द्वितीया भार्या इति व्याख्यातं नारायणवृत्तिकृता ॥ ३५ ॥

वपां मज्जाख्यं मेदः। 'पक्षी नाम मेदोऽस्ति तदुद्धरति नास्य वपा विद्यते' इति सूत्रात्। धर्मेण श्रौतप्रयोगचातुर्येण सम्पन्नो युक्तः ॥ ३६ ॥

नराधिपो दशरथः ॥ ३७ ॥

हयस्य यानि चाङ्गानि तानि सर्वाणि ब्राह्मणाः ।
अग्नौ प्रास्यन्ति विधिवत् समस्ताः षोडशर्त्विजः ॥ ३८ ॥
प्लक्षशाखासु यज्ञानामन्येषां क्रियते हविः ।
अश्वमेधस्य यज्ञस्य वैतसो भाग इष्यते ॥ ३९ ॥
त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः ।
चतुष्टोममहस्तस्य प्रथमं परिकल्पितम् ॥ ४० ॥
उक्थ्यं द्वितीयं संख्यातमतिरात्रं तथोत्तरम् ।
कारितास्तत्र बहवो विहिताः शास्त्रदर्शनात् ॥ ४१ ॥
ज्योतिष्टोमायुषी चैवमतिरात्रौ च निर्मितौ ।

हयस्येति । सर्वाणि ब्राह्मणा इत्यत्र गुरोरपि लघूच्चारणतया लघुकार्यकरत्वस्य छन्दःशास्त्रे उक्तत्वात् न छन्दोभङ्गः ॥ ३८ ॥

प्लक्षेति । अन्येषाम् अश्वमेधातिरिक्तयज्ञानां पाशुकं हविः प्लक्षशाखासु निधाय अवदीयते । अश्वमेधे प्रधानस्य पशोरश्वस्य हविर्भागः वैतसे कटे निधाय अवदातव्य इष्यते ॥ ३९ ॥

त्र्यह इति । अश्वमेधस्य त्रीणि सवनीयानि अहानि इति कल्पसूत्रेण तन्मूलशास्त्रैश्च अश्वमेधः त्र्यहःसंख्यातः उक्तः सवनीयानां प्राधान्यात् । तानि त्र्यहोरात्राणि गणयति चतुष्टोमशब्देन अग्निष्टोमः ॥ ४० ॥

उत्तरं तृतीयशास्त्रदर्शनाद् विहिताः बहवः प्रधानाः क्रतवः तत्र कारिताः ॥ ४१ ॥

अभिजिद्विश्वजिच्चैवमाप्तोर्यामौ महाक्रतुः॥ ४२ ॥
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्द्धनः।
अध्वर्य्यवे प्रतीचीन्तु ब्रह्मणे दक्षिणां दिशम्॥४३ ॥
उद्गात्रे तु तथोदीचीं दक्षिणैषा विनिर्मिता।
अश्वमेधे महायज्ञे स्वयम्भूविहिते पुरा॥ ४४ ॥
क्रतुं समाप्य तु तदा न्यायतः पुरुषर्षभः।
ऋत्विग्भ्यो हि ददौ राजा धरां तां कुलवर्द्धनः॥ ४५ ॥
एवं दत्त्वा प्रहृष्टोऽभूत् श्रीमान् इक्ष्वाकुनन्दनः।
ऋत्विजस्त्वब्रुवन् सर्वे राजानं गतकिल्बिषम्॥ ४६ ॥
भवानेव महीं कृत्स्नामेको रक्षितुमर्हति।
न भूम्या कार्य्यमस्माकं नहि शक्ताः स्म पालने॥ ४७ ॥

तानाह,—ज्योतिरित्यादि। आयुरायुष्टोमः अतिरात्राविति द्विवचनात् अतिरात्रस्य द्विप्रयोगः। तथा आप्तोर्य्यामाविति। महाक्रतुरिति जात्येकवचनम् एते महाक्रतव इत्यर्थः॥ ४२॥

प्राचीमिति॥ ४३॥

विनिर्मिता कल्पेषु विहिता स्वयम्भूविहिते 'प्रजापतिरश्वमेधमसृजत' इति श्रुतेः॥ ४४॥

क्रतुमिति। धरां चतुर्दिगवच्छिन्नाम्॥ ४५॥ ४६॥

भवानिति। भोगैकप्रयोजनत्वाद् भूमेः। यथास्माकं न किञ्चित् प्रयोजनं नापि चौरादिभ्यो रक्षणे वयं शक्ताः॥ ४७॥

रताः स्वाध्यायकरणे वयं नित्यं हि भूमिप ! ।
निष्क्रयं किञ्चिदेवेह प्रयच्छतु भवानिति ॥ ४८ ॥
मणिरत्नं सुवर्णं वा गावो यद्वा समुद्यतम् ।
तत् प्रयच्छ नृपश्रेष्ठ ! धरण्या न प्रयोजनम् ॥ ४९ ॥
एवमुक्तो नरपतिर्ब्राह्मणैर्वेदपारगैः ।
गवां शतसहस्राणि दश तेभ्यो ददौ नृपः ।
दशकोटिं सुवर्णस्य रजतस्य चतुर्गुणम् ॥ ५० ॥
ऋत्विजस्तु ततः सर्वे प्रददुः सहिता वसु ।

तत्र हेतुमाह,—रता इति । स्वाध्यायो वेदाध्ययनं तेन दरिद्राणां अस्माकमधिकारोऽपि न इति ध्वनितम् । भूमिपेत्यनेन तवैवेषा योग्या इति त्वमेव निष्क्रयेण पुनरिमां गृहाणेति सूचितम् । तदाह,—निष्क्रयमिति मूल्यमित्यर्थः । ननु भुवो मूल्यं दातुमशक्यम् अतः किञ्चिदेवेति ॥ ४८ ॥

किञ्चित् पदार्थानाह,—मणिरत्नम् अनर्घरत्नं तस्यापि राजार्हत्वाद् आह,—सुवर्णमिति । यद्वा समुद्यतं उपस्थितं यत् किञ्चिदेव प्रयच्छत्वित्यर्थः ॥ ४९ ॥

शतसहस्राणि दशलक्षमिति यावत् ॥ ५० ॥

सुवर्णं षोडशमाषकम् । चतुर्गुणं चत्वारिंशत् कोटिम् । ततः सर्वे ऋत्विजः सहिताः दक्षिणाप्राप्तं सर्वं तद्धनम् एकीकृत्य विभागाय [illegible] प्रददुः ततो मुनेः [illegible] ॥ ५१ ॥

ऋष्यशृङ्गाय मुनये वशिष्ठाय च धीमते ॥ ५१ ॥

ततस्ते न्यायतः कृत्वा प्रविभागं द्विजोत्तमाः ॥ ५२ ॥

सुप्रीतमनसः सर्वे प्रत्यूचुर्मुदिता भृशम्।

ततः प्रसर्पकेभ्यस्तु हिरण्यं सुसमाहितः ॥ ५३ ॥

जाम्बूनदं कोटिसंख्यं ब्राह्मणेभ्यो ददौ तदा।

दरिद्राय द्विजायाथ हस्ताभरणमुत्तमम्।

कस्मैचिद् याचमानाय ददौ राघवनन्दनः ॥ ५४ ॥

ततः प्रीतेषु विधिवत् द्विजेषु द्विजवत्सलः।

प्रणाममकरोत्तेषां हर्षव्याकुलितेन्द्रियः ॥ ५५ ॥

तस्याशिषोऽथ विविधा ब्राह्मणैः समुदाहृताः।

तदाह,—ऋष्येति। प्रविभागं कृत्वा वशिष्ठादिद्वारा विभज्य गृहीतेत्यर्थः ॥ ५२ ॥

सुप्रीतेति। सन्तुष्टाः सन्तः अत्यन्तं मुदिताः सन्तः प्रत्यूचुः राजानमिति शेषः। प्रसर्पकेभ्यः अभ्यागतेभ्यः ॥ ५३ ॥

जाम्बूनदं जम्बूप्रभवं सुवर्णं कोटिसंख्योऽमन्तव्यो। अथ सर्वदक्षिणादानानन्तरं याचमानाय दरिद्राय कस्मैचित् ब्राह्मणाय वस्त्वन्तराभावात् हस्ताभरणमेव ददौ ॥ ५४ ॥

तत्तेन हस्ताभरणदानेनेत्यर्थः ॥ ५५ ॥

विविधा आशिषः 'आयुष्मान् भव' इत्याद्याः ॥ ५६ ॥ ५७ ॥

उदारस्य नृवीरस्य धरण्यां पतितस्य च ।
ततः प्रीतमना राजा प्राप्य यज्ञमनुत्तमम् ॥ ५६ ॥ ५७ ॥
पापापहं स्वर्नयनं दुस्तरं पार्थिवर्षभैः ।
ततोऽब्रवीदृष्यशृङ्गं राजा दशरथस्तदा ॥ ५८ ॥
कुलस्य वर्द्धनं तत्तु कर्त्तुमर्हसि सुव्रत ।
तथेति च स राजानमुवाच द्विजसत्तमः ॥ ५९ ॥
भविष्यन्ति सुता राजन् चत्वारस्ते कुलोद्वहाः ॥ ६० ॥
स तस्य वाक्यं मधुरं निशम्य प्रणम्य तस्मै प्रयतो नृपेन्द्रः ।
जगाम हर्षं परमं महात्मा तमृष्यशृङ्गं पुनरप्युवाच ॥ ६१ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
चतुर्दशः सर्गः ॥ १४ ॥

स्वर्नयनं स्वर्गप्रापकं दुस्तरं प्राकृतै राजभिरप्राप्तसमाप्तिकम् ॥५८॥
कुलस्य वर्धनं तादृशं कर्म ॥ ५९ ॥ ६० ॥
पुनरप्युवाच पुत्रजननकर्मणि पुनरपि प्रेरयामास इत्यर्थः यद्यपि पुत्रकामेष्ट्यैव पुत्रावाप्तिः सम्भवति, तथापि तपोरतस्य वैश्यस्य श्रमणस्य वधेन तद्वियोगातुरतपोरततन्मातापितृमरणेन च ब्रह्मवधसमपापोत्पत्त्या तत्प्रायश्चित्तत्वेनाश्वमेधानुष्ठानम्बोध्यम् ॥ ६१ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चतुर्दशः सर्गः ॥ १४ ॥

पञ्चदशः सर्गः ।



मेधावी तु ततो ध्यात्वा स किञ्चिदिदमुत्तरम् ।
लब्धसंज्ञस्ततस्तं तु वेदज्ञो नृपमब्रवीत् ॥ १ ॥
इष्टिं तेऽहं करिष्यामि पुत्त्रीयां पुत्त्रकारणात् ।
अथर्वशिरसि प्रोक्तैर्मन्त्रैः सिद्धां विधानतः ॥ २ ॥
ततः प्राक्रमदिष्टिं तां पुत्त्रीयां पुत्त्रकारणात् ।
जुहावाग्नौ च तेजस्वी मन्त्रदृष्टेन कर्मणा ॥ ३ ॥

मेधावीति । मेधावी अशेषवेदशाखाधारणयोग्यबुद्धिमान् वेदज्ञः स्वकल्पतोऽर्थतश्च वेदतत्त्ववित् स ऋष्यशृङ्गः प्रतिश्रुतार्थनिर्वाहाय किंकर्तव्यमिति निश्चेतुं कञ्चित् कालं ध्यात्वा समाधिं कृत्वा इद-मुत्तरं इदमिह उत्तरानुष्ठेयकृत्यमिति निश्चित्य पश्चात् लब्धसंज्ञः समाध्युत्थितः तं नृपमब्रवीत् ॥ १ ॥

किमब्रवीत् तदाह,—इष्टिमिति । पुत्त्रीयां पुत्त्रप्राप्तिकारणभूतां पुत्त्रकारणात् पुत्त्रप्राप्तिहेतोः अथर्ववेदप्रोक्तैर्मन्त्रैः विधानतः कल्प-सूत्रतः सिद्धां नियतफलत्वेन प्रसिद्धाम् इष्टिं करिष्यामि इत्यब्रवीत् इति शेषः ॥ २ ॥

तत इति । मन्त्रदृष्टेन मन्त्रपूर्वकतया कल्पसूत्रे दृष्टेन ॥ ३ ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
भावप्रतिग्रहार्थं वै समवेता यथाविधि ॥ ४ ॥
ताः समेत्य यथान्यायं तस्मिन् सदसि देवताः ।
अब्रुवन् लोककर्त्तारं ब्रह्माणं वचनं ततः ॥ ५ ॥
भगवंस्त्वत्प्रसादेन रावणो नाम राक्षसः ।
सर्वान् नो बाधते वीर्य्यात् शासितुं तं न शक्नुमः ॥ ६ ॥
त्वया तस्मै वरो दत्तः प्रीतेन भगवन् सदा ।
मानयन्तश्च तं नित्यं सर्वं तस्य क्षमामहे ॥ ७ ॥
उद्वेजयति लोकांस्त्रीनुच्छ्रितान् द्वेष्टि दुर्मतिः ।
शक्रं त्रिदशराजानं प्रधर्षयितुमिच्छति ॥ ८ ॥
ऋषीन् यक्षान् सगन्धर्वान् ब्राह्मणानसुरांस्तथा ।

तत इति तथेत्यर्थः ॥ ४ ॥

ता इति । समेत्य अन्तर्धानशक्त्या इतरानवलोकमिति शेषः ॥ ५ ॥ ६ ॥

कुतस्तस्य युष्मद्बाधनक्षमवीर्य्यलाभः ? इत्यत आह,—त्वयेति । मानयन्तः सर्वदेवताऽवध्यत्वरूपत्वद्दत्तवरं परिपालयन्त इत्यर्थः ॥ ७ ॥

उच्छ्रितान् सम्पत्त्यादिभिरधिकान् । त्रिदशराजानमिति समासान्तोऽनित्यत्वाश्रयतः प्रधर्षयितुमिच्छतीत्युक्तेरेतद्गुरुकालमिन्द्रजित्कृत इन्द्रबन्ध इति ज्ञायते ॥ ८ ॥

अतिक्रामति दुर्धर्षो वरदानेन मोहितः ॥ ९ ॥
नैनं सूर्य्यः प्रतपति पार्श्वे वाति न मारुतः।
चलोर्म्मिमाली तं दृष्ट्वा समुद्रोऽपि न कम्पते ॥ १० ॥
तन्महन्नो भयं तस्मात् राक्षसाद् घोरदर्शनात्।
बधार्थं तस्य भगवन्! उपायं कर्त्तुमर्हसि ॥ ११ ॥
एवमुक्तः सुरैः सर्वैश्चिन्तयित्वा ततोऽब्रवीत्।
हन्तायं विदितस्तस्य बधोपायो दुरात्मनः ॥ १२ ॥
तेन गन्धर्वयक्षाणां देवतानाञ्च रक्षसाम्।
अवध्योऽस्मीति वागुक्ता तथेत्युक्तञ्च तन्मया ॥ १३ ॥
नाकीर्तयदवज्ञानात् तद्रक्षो मानुषांस्तदा।
तस्मात् स मानुषाद् बध्यो मृत्युर्नान्योऽस्य विद्यते ॥ १४ ॥

असुरान् शक्रप्रमुखान् ॥ ९ ॥

प्रतपति प्रतापयतीत्यर्थः। श्रौर्थ्यातिशयद्योतकम् एतज्जातीयं न वाति नाधिकं वाति चलोर्म्मिमालास्वभावोऽपि न कम्पते इति विरोधालङ्कारः ॥ १० ॥

तत् तस्मात् कारणात् तस्माद् रक्षोगुणविशिष्टात् ॥ ११ ॥

एवमिति। भगवान् ब्रह्मेति शेषः। हन्तेत्यनुकम्पायाम् ॥ १२ ॥

तेनेति। तत् तथा अस्तु इत्युक्तमिति योजना ॥ १३ ॥

नेति। तदा वरग्रहसमये मृत्युर्मृत्युजनकाः ॥ १४ ॥ १५ ॥

एतत् श्रुत्वा प्रियं वाक्यं ब्रह्मणा समुदाहृतम् ।
देवा महर्षयः सर्वे प्रहृष्टास्तेऽभवंस्तदा ॥ १५ ॥
एतस्मिन्नन्तरे विष्णुरुपायातो महाद्युतिः ।
शंखचक्रगदापाणिः पीतवासा जगत्पतिः ॥ १६ ॥
वैनतेयं समारुह्य भास्करस्तोयदं यथा ।
तप्तहाटककेयूरो वन्द्यमानः सुरोत्तमैः ॥ १७ ॥
ब्रह्मणा च समागत्य तत्र तस्थौ समाहितः ।
तमब्रुवन् सुराः सर्वे तमभिष्टूय सन्नताः ॥ १८ ॥
त्वां नियोक्ष्यामहे विष्णो लोकानां हितकाम्यया ।
राज्ञो दशरथस्य त्वम् अयोध्याधिपतेर्विभो ॥ १९ ॥
धर्मज्ञस्य वदान्यस्य महर्षिसमतेजसः ।

एतस्मिन्नन्तरे सर्वदेवतासन्तोषकाले विष्णुः सदा भूभारोद्धारादिकर्त्ता ॥ १६ ॥

वैनतेयो गरुड़ः । केयूरं बाहुभूषणम् ॥ १७ ॥

ब्रह्मणा चेति । वन्द्यमान इत्यनुकृष्यते । समागम्येति सब्रह्मभिर्देवैर्मिलित्वा समाहितः देवकार्य्यतत्परः समभिष्टूय सम्यक् स्तुत्वा सन्नताः प्रणताः ॥ १८ ॥

त्वामिति । अस्मद्दुःखहरणस्य त्वदेकसाध्यत्वात् भवन्तं नियोक्ष्यामहे तदेवाह,—राज्ञः इत्यादिना ॥ १९ ॥

अस्य भार्य्यासु तिसृषु ह्री-श्री-कीर्त्युपमासु च ॥ २० ॥
विष्णो! पुत्रत्वमागच्छ कृत्वात्मानं चतुर्विधम्।
तत्र त्वं मानुषो भूत्वा प्रवृद्धं लोककण्टकम् ॥ २१ ॥
अवध्यं दैवतैर्विष्णो! समरे जहि रावणम् ॥ २२ ॥
स हि देवान् सगन्धर्वान् सिद्धांश्च ऋषिसत्तमान्।
राक्षसो रावणो मूर्खो वीर्य्योद्रेकेण बाधते ॥ २३ ॥
ऋषयश्च ततस्तेन गन्धर्वाप्सरसस्तथा।
क्रीड़न्तो नन्दनवने रौद्रेण विनिपातिताः ॥ २४ ॥

धर्मज्ञस्येत्यादि राजविशेषणं, ह्रीः श्रीरित्यादि राजपत्नीविशेषणञ्च अवतारयोग्यताध्वननाय ॥ २० ॥

आत्मानं सोपकरणमात्मानम्।

'अन्येद्युः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत्।
तदन्येद्युः सुमित्रायामनन्तात्मा च लक्ष्मणः।
सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत् प्रिये॥'

इति पाद्मोक्तेः। आत्मानम् इत्युक्त्या शङ्खचक्रानन्तानामपि भगवद्रूपता सूचिता अङ्गारेण भगवानिव पाञ्चजन्यः शब्दमात्रेण सकलभुवनक्षोभकत्वाद् विष्णुतुल्य एवेति बोध्यं चतुर्विधमिति चातुर्विध्यविधानं रावणेन्द्रजित्लवणगन्धर्ववधादीनां प्रत्येकं देवकार्य्यरूपाणां सद्भावात् ॥ २१ ॥

कुतो ममैव नियोगः? तत्राह,—अवध्यमिति ॥ २२ ॥ २३ ॥

वधार्थं वयमायातास्तस्य वै मुनिभिः सह ।
सिद्धगन्धर्वयक्षाश्च ततस्त्वां शरणं गताः ।
त्वं गतिः परमा देव ! सर्वेषां नः परं तपः ॥ २५ ॥
वधाय देवशत्रूणां नृणां लोके मनः कुरु ।
एवं स्तुतस्तु देवेशो विष्णुस्त्रिदशपुङ्गवः ॥ २६ ॥
पितामहपुरोगांस्तान् सर्वलोकनमस्कृतः ।
अब्रवीत् त्रिदशान् सर्वान् समेतान् धर्मसंहितान् ॥ २७ ॥
भयं त्यजत भद्रं वो हितार्थं युधि रावणम् ।
सपुत्रपौत्रं सामात्यं समन्त्रिज्ञातिबान्धवम् ॥ २८ ॥
हत्वा क्रूरं दुराधर्षं देवर्षीणां भयावहम् ।
दशवर्षसहस्राणि दशवर्षशतानि च ॥ २९ ॥
वत्स्यामि मानुषे लोके पालयन् पृथिवीमिमाम् ।
एवं दत्त्वा वरं देवो देवानां विष्णुरात्मवान् ॥ ३० ॥

टीका॰ सत्यासत्यविचारशून्येन वधार्थं वधप्रार्थनार्थम् ॥२४॥२५॥
वधायेति । नृणां लोके इत्यस्य अवतरितुमिति शेषः ॥ २६ ॥
धर्मसंहितान् धर्मसहितानित्यर्थः । 'धर्मसंहितम्' इति वा पाठः ॥ २७ ॥ २८ ॥
हत्वेति । हत्वा वत्स्यामीति योजना ॥ २९ ॥ ३० ॥

मानुष्ये चिन्तयामास जन्मभूमिमथात्मनः।
ततः पद्मपलाशाक्षः कृत्वात्मानं चतुर्विधम् ॥ ११ ॥
पितरं रोचयामास तदा दशरथं नृपम्।
ततो देवर्षिगन्धर्वाः सरुद्राः साप्सरोगणाः।
स्तुतिभिर्दिव्यरूपाभिस्तुष्टुवुर्मधुसूदनम् ॥ १२ ॥

तमुद्धतं रावणमुग्रतेजसं
प्रवृद्धदर्पं त्रिदशेश्वरद्विषम्।
विरावणं साधुतपस्विकण्टकं
तपस्विनामुद्धर तं भयावहम् ॥ १३ ॥
तमेव हत्वा सबलं सबान्धवं
विरावणं रावणमुग्रपौरुषम्।

मानुष्ये इति। मनुष्यलोके यथा देवैराज्ञप्तं तथा आत्मनः जन्मभूमिं चिन्तयामास योग्यत्वेन विचारयामास। ततः विचारानन्तरम् ॥ ११ ॥

रोचयामास ऐच्छत्। स्तुतिभिस्तुष्टुवुः ॥ १२ ॥

स्तुत्वा च यदूचुस्तदाह,—तमिति। रावणम् उद्धर समूलमुन्मूलय। विरावणं विश्वेषां त्रिलोकीक्रन्दनम्। तपस्विनां भयावहमित्यन्वयः। रावणत्रासेनातिभीतचित्तानां देवानामुक्तौ तमित्यस्य पुनरुक्तिर्न दोषाय। अत इन्द्रादिदेवानां सपितामहानां नियोज्यकार्यविशेषे नियोज्यत्वं न दोषः, कौशलात् इत्यन्यत्र विस्तरः ॥ १३ ॥

स्वर्लोकमागच्छ गतज्वरश्चिरं
सुरेन्द्र! गुप्तं गतदोषकल्मषम् ॥ ३४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
पञ्चदशः सर्गः ॥ १५ ॥

तमिति। तं हत्वैव इत्यन्वयः। सबान्धवमित्यनेन लवणादिवध-सूचनम्। हे सुरेन्द्र! उपेन्द्र-गुप्तम् अर्थात् त्वयेति शेषः। गतदोष-कल्मषं दोषा रागादयः तद्रूपकल्मषहीनं स्वर्लोकं वैकुण्ठाख्यं गत-ज्वरः स्वभावतो निवृत्ताशेषतापः ॥ ३४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

षोडशः सर्गः ।



ततो नारायणो विष्णुर्नियुक्तः सुरसत्तमैः ।
जानन्नपि सुरानेवं श्लक्ष्णं वचनमब्रवीत् ॥ १ ॥
उपायः को वधे तस्य राक्षसाधिपतेः सुराः ।
यमहं तं समास्थाय निहन्यामृषिकण्टकम् ॥ २ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्विष्णुमव्ययम् ।
मानुषं रूपमास्थाय रावणं जहि संयुगे ॥ ३ ॥
स हि तेपे तपस्तीव्रं दीर्घकालमरिन्दम ।

तत इति । नियुक्तः प्रार्थितः यद्वा आज्ञप्त इत्यर्थः । अतएव जानन्नपि वधोपायम् अज्ञ इव तेषामविनीतत्वज्ञापरिहाराय तान् पप्रच्छेत्यर्थः । जानन् वधोपायमिति शेषः * ॥ १ ॥

उपाय इति । यम् उपायम् आस्थाय तमहं निहन्यां, स तस्य वधे उपायः क इत्यन्वयः ॥ २ ॥ ३ ॥

स हीति । लोकपूर्वजः सर्वलोकसमष्टित्वात् 'हिरण्यगर्भः

---

* अत्र नराणां समूहो नारं, नारम् अयनं वासस्थानम् अस्य इति नारायणः सर्वान्तर्यामी इति व्युत्पत्त्या नारायण-पद-प्रयोगेन विष्णोः सर्वज्ञत्वं ध्वनितम् ।

येन तुष्टोऽभवद् ब्रह्मा लोककृल्लोकपूर्व्वजः ॥ ४ ॥
सन्तुष्टः प्रददौ तस्मै राक्षसाय वरं प्रभुः ।
नानाविधेभ्यो भूतेभ्यो भयं नान्यत्र मानुषात् ॥ ५ ॥
अवज्ञाताः पुरा तेन वरदाने हि मानवाः ।
एवं पितामहात् तस्माद् वरदानेन गर्वितः ॥ ६ ॥
उत्सादयति लोकांस्त्रीन् स्त्रियश्चाप्यपकर्षति ।
तस्मात् तस्य बधो दृष्टो मानुषेभ्यः परन्तप ! ॥ ७ ॥
इत्येतद् वचनं श्रुत्वा सुराणां विष्णुरात्मवान् ।
पितरं रोचयामास तदा दशरथं नृपम् ॥ ८ ॥
स चाप्यपुत्रो नृपतिस्तस्मिन् काले महाद्युतिः ।
अयजत् पुत्रियामिष्टिं पुत्रेप्सुररिसूदनः ॥ ९ ॥

समवर्त्तताग्रे' इति श्रुतेश्च । यद्वा ब्रह्मा चतुर्मुखः लोकपूर्व्वजत्वं च हिरण्यगर्भतादात्म्याध्यासेन * ॥ ४ ॥

सन्तुष्ट इति । मानुषभिन्नेभ्यः प्राणिमात्रेभ्यो भयं न भवेदिति वरं ददौ इत्यन्वयः ॥ ५ ॥ ६ ॥

स्पष्टः निखिलः ॥ ७ ॥ ८ ॥

स चापीति दशरथोऽपीत्यर्थः । तस्मिन् काले ममवदवतितीर्षा-काले । पुत्रियामिति छन्दः छान्दसः ॥ ९ ॥

* लोककृत्त्वे हेतुर्लोकपूर्व्वज इति नागोजीभट्टः ।

स कृत्वा निश्चयं विष्णुरामन्त्र्य च पितामहम्।
अन्तर्धानं गतो देवैः पूज्यमानो महर्षिभिः॥ १०॥
ततो वै यजमानस्य पावकाद् अतुलप्रभम्।
प्रादुर्भूतं महद्भूतं महावीर्य्यं महाबलम्॥ ११॥
कृष्णं रक्ताम्बरधरं रक्तास्यं दुन्दुभिस्वनम्।
स्निग्ध-हर्य्यक्ष-तनुज-श्मश्रु-प्रवरमूर्द्धजम्॥ १२॥
शुभलक्षणसम्पन्नं दिव्याभरणभूषितम्।
शैलशृङ्गसमुत्सेधं दृप्तशार्दूलविक्रमम्॥ १३॥

स इति। निश्चयम् अवतारविषयम्, आमन्त्र साधयामि इत्युक्त्वा इत्यर्थः अन्तर्धानं गत इति तस्मात् देवसमाजादिति शेषः॥ १०॥

तत इति। अन्तर्धानानन्तरमित्यर्थः। अन्तर्धाय भगवानेव स्वतेजः-संभृत-पायसमादाय ऋत्विग्भिः सकाशात् प्रादुर्भवति स्म; न ह्यन्यस्य भगवत्-तेजोधारणे शक्तिरस्ति—तदेवाह, महद्भूतमिति 'एको विष्णुर्महद्भूतम्' इत्युक्तेः अतुलप्रभं विद्युदादिवत् दृष्टि-प्रति-विघातक-तेजोविशेषवत्। भूतं प्राणी॥ ११॥

कृष्णं कृष्णवर्णं स्निग्धाः चिक्कणाः हर्य्यक्षस्य सिंहस्येव तनुजा लोमानि श्मश्रुप्रवराः मूर्द्धजाः केशाश्च यस्य तत्। मुखस्थरोमाणि श्मश्रुप्रवरो मुख्यं श्मश्रुरोम॥ १२॥

समुत्सेध उच्छ्रायः दृप्तशार्दूलस्येव विक्रमः पादविन्यासो यस्य तत्॥ १३॥

दिवाकरसमाकारं दीप्तानलशिखोपमम् ।
तप्तजाम्बूनदमयीं राजतान्तपरिच्छदाम् ॥ १४ ॥
दिव्यपायससम्पूर्णां पात्रीं पत्नीमिव प्रियाम् ।
प्रगृह्य विपुलां दोर्भ्यां स्वयं मायामयीमिव * ॥ १५ ॥

दिवाकरेति । तद्वत् प्रभामण्डलव्याप्तम् । तैक्ष्ण्ये दृष्टान्तो दीप्तानलेत्यादि । तप्तेति राजतो रजतविकारः अन्तपरिच्छदः पिधानपात्रं यस्यास्ताम् ॥ १४ ॥

पात्रीति लिङ्गसामान्याद् उत्प्रेक्षते पत्नीमिवेति । प्रगृह्येति स्वयं दोर्भ्यां प्रगृह्य प्रादुर्भूतमित्यन्वयः मायामयीमिव इवशब्द एवार्थे । भगवतो मायैवेत्यर्थः † ॥ १५ ॥

---

* तमृष्यशृङ्गं प्रोवाच भूतमुत्पन्नमद्भुतम् ।
प्राजापत्यं विद्धि मां त्वं भूतमभ्यागतं द्विज ! ॥
इमां पात्रीं मया दत्तां प्राप्य राज्ञे प्रयच्छ ह ।
तमुवाच ततो धीमान् ऋष्यशृङ्गो द्विजर्षभः ।
प्रयच्छ राज्ञे पात्रीं त्वं स्वयमेवाद्भुतामिह ।
ऋष्यशृङ्गवचः श्रुत्वा प्राजापत्यो महाद्युतिः ॥
प्रोवाचेक्ष्वाकुदायादं

वङ्गीयाः ।

† विचित्रकार्य्यकरीमिव इति तीर्थः ।

समवेक्ष्याब्रवीद् वाक्यमिदं दशरथं नृपम् ।
प्राजापत्यं नरं विद्धि मामिहाभ्यागतं नृप ! ॥ १६ ॥
ततः परं तदा राजा प्रत्युवाच कृताञ्जलिः ।
भगवन् ! स्वागतं तेऽस्तु किमहं करवाणि ते ॥ १७ ॥
अथो पुनरिदं वाक्यं प्राजापत्यो नरोऽब्रवीत् ।
राजन्नर्चयता देवान् अद्य प्राप्तमिदं त्वया ॥ १८ ॥
इदं तु नृपशार्दूल ! पायसं देवनिर्मितम् ।
प्रजाकरं गृहाण त्वं धनमारोग्यवर्द्धनम् ॥ १९ ॥
भार्य्याणामनुरूपाणाम् अश्नीतेति प्रयच्छ वै ।
तासु त्वं लप्स्यसे पुत्रान् यदर्थं यजसे नृप ! ॥ २० ॥
तथेति नृपतिः प्रीतः शिरसा प्रतिगृह्य ताम् ।

दशरथं समवेक्ष्येत्यन्वयः । प्राजापत्यं प्रजापतिना प्रेषितम् । प्रजापतेः प्रजापालकाद् विष्णोः सम्भूतं तद्रूपमित्यर्थः ॥ १६ ॥

ततः परं प्राजापत्यं मां विद्धीति तद्वचनान्तरं पूर्वमाकृत्या एव भीतः एतद्वचनश्रवणोत्तरं निर्भय उवाचेत्यर्थः ॥ १७ ॥

देवानर्चयता स्वयमध्वरेणेति शेषः ॥ १८ ॥

देवनिर्मितं देवेन प्रजापतिना निर्मितं धर्म्यं पायसम् ॥ १९ ॥

भार्य्यायां सम्बन्धसामान्ये षष्ठी भार्य्याभ्य इत्यर्थः । आनुरूप्यं महिषीत्वयशःशीलगुणादिना ॥ २० ॥

पात्रीं देवान्नसम्पूर्णां देवदत्तां हिरण्मयीम् ॥ २१ ॥
अभिवाद्य च तद् भूतम् अद्भुतं प्रियदर्शनम् ।
मुदा परमया युक्तश्चकाराभिप्रदक्षिणम् ॥ २२ ॥
ततो दशरथः प्राप्य पायसं देवनिर्मितम् ।
बभूव परमप्रीतः प्राप्य वित्तमिवाधनः ॥ २३ ॥
ततस्तदद्भुतप्रख्यं भूतं परमभास्वरम् ।
संवर्त्तयित्वा तत् कर्म तत्रैवान्तरधीयत ॥ २४ ॥
हर्षरश्मिभिरुद्योतं तस्यान्तःपुरमाबभौ ।
शारदस्याभिरामस्य चन्द्रस्येव नभोऽंशुभिः ॥ २५ ॥
सोऽन्तःपुरं प्रविश्यैव कौसल्यामिदमब्रवीत् ।
पायसं प्रतिगृह्णीष्व पुत्रीयन्त्विदमात्मनः ॥ २६ ॥

हिरण्मयीं हिरण्यविकाराम् ॥ २१ ॥
मुदेति । अभिप्रदक्षिणं पुनः पुनः प्रदक्षिणम् ॥ २२ ॥
वित्तं धनम् ॥ २३ ॥
अद्भुतप्रख्यम् अद्भुताकारं संवर्त्तयित्वा समाप्य कर्म पायसदानरूपं तत्रैव अभिकुण्ड एव ॥ २४ ॥
हर्षरश्मिभिः हर्षोद्भूतमुखकान्तिभिः उद्योतं द्योतमानम् । अन्तःपुरं तद्दर्त्तिस्त्रीजातम् । शारदचन्द्रस्य अंशुभिर्नभ इवेत्यन्वयः ॥ २५ ॥ २६ ॥

कौसल्यायै नरपतिः पायसार्धं ददौ तदा।
अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः॥ २७॥
कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात्।
प्रददौ चावशिष्टार्धं पायसस्यामृतोपमम्॥ २८॥
अनुचिन्त्य सुमित्रायै पुनरेव महामतिः।

कौसल्यायै इति। अर्द्धशब्दोऽत्र समविभागवाची अर्धादर्धं तुरीयांशम् इत्यर्थः॥ २७॥

अवशिष्टार्द्धम् अवशिष्टस्य चतुर्थांशस्य अर्द्धम् अष्टमांश इत्यर्थः। पुनरवशिष्टार्द्धम् अष्टमांशम्॥ २८॥

अनुचिन्त्येति। कैकेय्यपेक्षया ज्येष्ठत्वं कौसल्यापेक्षया कनिष्ठत्वं च सुमित्राया विचार्य्य पादोनांशार्द्धदानम्। तस्यै कनिष्ठत्वाच कैकेय्यै अष्टमांशदानम्। वल्लभायां सम्भोगकर्मणि पक्षपातः, न धर्मविभागकर्मणि। एवञ्च भरतशत्रुघ्नौ पादस्यार्द्धमर्द्धभित्याङ्गः। अपरे तु रामभरतौ प्रत्येकं यंशौ लक्ष्मणशत्रुघ्नौ च अष्टमांशौ। तथाहि, कौसल्यायै दत्तार्धस्य अर्धादर्धं चतुर्थांशरूपं सुमित्रायै दत्तवान्। कौसल्यया दापितवानित्यर्थः। एवं कैकेय्यै कौसल्यादत्तार्धावशिष्टमर्धं ददौ। ततः कौसल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्धं तदर्धं विचार्य्य पुनरपि सुमित्रायै ददौ, ताभ्यां दापयामासेत्यर्थः। अत्रार्धपदावृत्तिर्बोध्या। तदुक्तं कालिदासेन,—

'स तेजो वैष्णवं पत्न्योर्विभेजे चरुसंज्ञितम्।
द्यावापृथिव्योः प्रत्ययम् अहर्पतिरिवातपम्॥

एवं तासां ददौ राजा भार्य्याणां पायसं पृथक् ॥ २९ ॥
तास्त्वेवं पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः ।
सम्मानं मेनिरे सर्वाः प्रहर्षोदितचेतसः ॥ ३० ॥

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा ।
अतः सम्भाविता ताभ्यां सुमित्रामैच्छदीश्वरः ॥
ते बहुज्ञस्य चित्तज्ञे पत्न्यौ पत्युर्महीक्षितः ।
शरीरार्द्धार्द्धभागाभ्यां तामयोजयतामुभे ॥
सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि ।'

इति अर्द्धार्द्धभागाभ्यामित्यस्य स्वस्वभागसम्बन्ध्यर्द्धार्द्धभागाभ्यामित्यर्थः। पृथगिति विभज्येति शेषः। कतकस्यापि एवं रीतिरेव सम्मता इत्याहुः। कश्चित् तु—

"इत्युक्त्वा प्रददौ तस्यै हविषोऽर्द्धं नराधिपः ।
स्वयमेव समं कृत्वा भागं भागवतां वरः ॥
अर्द्धादर्द्धं ददौ चापि कैकेय्यै स नराधिपः ।
चतुर्भागं द्विधा कृत्वा सुमित्रायै ददौ तदा ॥"

इति दृश्यमानपाठः स तु असाम्प्रदायिक एव तत्तद्भागजन्यसन्ततुमैकवाक्यतौचित्येन। अपरे तु व्याख्यैवात्र ज्यायसी पाठान्तरव्याख्यान्तरे च लक्ष्मणरामयोरेव भरतशत्रुघ्नयोरेवैकवाक्यतायां बीजमाहुः। उक्तं च पाद्मे,—

"युग्मं बभूवतुस्तत्र सखिनौ रामलक्ष्मणौ ।
तथा भरतशत्रुघ्नौ पायसांशवशात् सतः ॥"

इति दिक् ॥ २९ ॥

ततस्तु ताः प्राश्य तदुत्तमाः स्त्रियो महीपतेरुत्तमपायसं पृथक्।
हुताशनादित्यसमानतेजसोऽचिरेण गर्भान् प्रतिपेदिरे तदा॥३१॥
ततस्तु राजा प्रतिवीक्ष्य ताः स्त्रियः प्ररूढगर्भाः प्रतिलब्धमानसः।
बभूव हृष्टस्त्रिदिवे यथा हरिः सुरेन्द्रसिद्धर्षिगणाभिपूजितः॥३२॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
षोडशः सर्गः॥१६॥

ताश्चेति। प्राप्य प्रहर्षेण उदितं विकसितं चेतो यासां ताः स्त्रियः नरेन्द्रस्य सम्मानम् अपक्षपातेन यथोचितव्यवहारं मेनिरे इत्यन्वयः॥३०॥

तत इति। महीपतेः स्त्रिय इत्यन्वयः। उत्तमपायसम् उत्तमत्वञ्च तस्य विष्णुतेजःसंभृतत्वात् हुताशनादित्यसमानतेजस इति गर्भाणां स्त्रीणां च तच्चेत्र विशेषणम्॥३१॥

तत इति। प्रतिलब्धमानसः प्रतिलब्धशब्दः स्वास्थ्यपरः तादृशं मानसं यस्येत्यर्थः। यद्वा पूर्णमनोरथ इत्यर्थः। यथा शक्रस्त्रिदिवे हरिरिन्द्रश्च हृष्ट इत्यर्थः। सुरेन्द्रेत्यादिना राजविशेषणं भगवद्गर्भसम्भवेन तैः पूजितो मनसा स्तुतः॥३२॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे षोडशः सर्गः॥१६॥

सप्तदशः सर्गः ।



पुत्रत्वन्तु गते विष्णौ राज्ञस्तस्य महात्मनः ।
उवाच देवताः सर्वाः स्वयम्भूर्भगवानिदम् ॥ १ ॥
सत्यसन्धस्य वीरस्य सर्वेषां नो हितैषिणः ।
विष्णोः सहायान् बलिनः सृजध्वं कामरूपिणः ॥ २ ॥
मायाविदश्च शूरांश्च वायुवेगसमान् जवे ।
नयज्ञान् बुद्धिसम्पन्नान् विष्णुतुल्यपराक्रमान् ॥ ३ ॥
असंहार्य्यानुपायज्ञान् दिव्यसंहननान्वितान् ।
सर्वास्त्रगुणसम्पन्नान् अमृतप्राशनानिव ॥ ४ ॥

पुत्रत्वमिति । गते गन्तुमुपक्रान्ते ॥ १ ॥

सहायान् सहायकरणसमर्थान् । ननु कदाचिदपि भगवान् प्रतिमायामपि नावतरेद् अत उक्तं सत्यसन्धस्येति सत्यप्रतिज्ञस्ये-त्यर्थः ॥२॥

मायाविदः असुरादि-माया-संहार-समर्थ-दैवमाया-अभिज्ञान् । जवे वेगविषये ॥ ३ ॥

असंहार्य्यानिति परैरिति शेषः । संहननं शरीरम् । सर्वा-

अप्सरःसु च मुख्यासु गन्धर्वीणां तनूषु च।

यक्षपन्नगकन्यासु ऋक्षविद्याधरीषु च॥ ५॥

किन्नरीणां च गात्रेषु वानरीणां तनूषु च।

सृजध्वं हरिरूपेण पुत्रांस्तुल्यपराक्रमान्॥ ६॥

पूर्वमेव मया सृष्टो जाम्बवान् ऋक्षपुङ्गवः।

जृम्भमाणस्य सहसा मम वक्त्रादजायत॥ ७॥

स्वगुणसम्पन्नान् [illegible] सामर्थ्य [illegible]। यद्वा प्रयो-गोपसंहारात् [illegible]। अमृतप्राशना देवाः * ॥ ४॥

गन्धर्व्यो गन्धर्वपत्न्यः ॥ ५॥

वानरीणां तनूषु [illegible] अप्सरःप्रभृतिषु इत्यर्थः। हरिरूपेणेति [illegible]

[illegible]

[illegible] तुल्यपराक्रमान् इत्यर्थः † ॥ ६॥

ननु त्वयापि [illegible] इति [illegible], पूर्वमेवेति

* [illegible] अमृतं प्राश्नन्तीत्यमृतप्राशनाः पीतामृता [illegible] इति नागोजीभट्टः।

† अत्र पार्वतीशापेन स्वस्त्रीषु पुत्रोत्पादनासम्भवात् अप्सरःप्रभृतयः [illegible]। [illegible] इति नागोजीभट्टः।

ते तथोक्ता भगवता तत् प्रतिश्रुत्य शासनम् ।
जनयामासुरेवं ते पुत्रान् वानररूपिणः ॥ ८ ॥
ऋषयश्च महात्मानः सिद्धविद्याधरोरगाः ।
चारणाश्च सुतान् वीरान् ससृजुर्वनचारिणः ॥ ९ ॥
वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥ १० ॥
बृहस्पतिस्त्वजनयत् तारं नाम महाकपिम् ।
सर्ववानरमुख्यानां बुद्धिमन्तमनुत्तमम् ॥ ११ ॥
धनदस्य सुतः श्रीमान् वानरो गन्धमादनः ।
विश्वकर्मा त्वजनयत् नलं नाम महाकपिम् ॥ १२ ॥
पावकस्य सुतः श्रीमान् नीलोऽग्निसदृशप्रभः ।

पूर्वयुगे इत्यर्थः । तदुत्पत्तिप्रकारमाह, जृम्भमाणस्येति सहसा तस्येति ॥ ७ ॥

एवं वक्ष्यमाणप्रकारेण ॥ ८ ॥ ९ ॥

वानरेन्द्रमिति । ननु राघवसहायार्थं तत्तत्स्वावतारकरणप्रेरणात् वालिनोऽवतारस्य तदसहायत्वात् किमर्थोऽयमवतारः, इति चेत्? दुन्दुभ्यादिवधार्थं तदवतारस्यावश्यकत्वात् पुत्रद्वारा तस्यापि राघवसहायत्वाच्च दुन्दुभ्यादिवधेनापि तत्सहायकरत्वाच्च अस्यापि भगवदवतारात् पूर्वमुत्पत्तिर्न वा । तपनः सूर्यः ॥ १० ॥ ११ ॥ १२ ॥

तेजसा यशसा वीर्य्यादत्यरिच्यत वीर्य्यवान् ॥ १३ ॥
रूपद्रविणसम्पन्नावश्विनौ रूपसम्मतौ ।
मैन्दञ्च द्विविदञ्चैव जनयामासतुः स्वयम् ॥ १४ ॥
वरुणो जनयामास सुषेणं नाम वानरम् ।
शरभं जनयामास पर्जन्यस्तु महाबलः ॥ १५ ॥
मारुतस्यौरसः श्रीमान् हनूमान् नाम वानरः ।
वज्रसंहननोपेतो वैनतेयसमो जवे ॥ १६ ॥
सर्व्ववानरमुख्येषु बुद्धिमान् बलवानपि ।
ते सृष्टा बहुसाहस्रा दशग्रीववधोद्यताः ॥ १७ ॥
अप्रमेयबला वीरा विक्रान्ताः कामरूपिणः ।

पावकस्य अग्नेः अत्यरिच्यत ततोऽधिकोऽभवद् इत्यर्थः ॥ १३ ॥

रूपेति । रूपलक्षणेन द्रविणेन युक्तौ रूपसम्मतौ रूपवत्त्वेन सर्व्वलोकसम्मतावित्यर्थः * ॥ १४ ॥

पर्ज्जन्यस्तदभिमानिनी देवता । धर्म्मपुत्रोऽयं सुषेण इति युद्धकाण्डे वक्ष्यति । अत्र तु वरुणपुत्र उक्तः ॥ १५ ॥

वज्रसंहननं वज्रवदभेद्यं शरीरं तेन उपेतो युक्तः ॥ १६ ॥

दशग्रीववधोद्यता इत्यस्य ये भविष्यन्तीति शेषः ॥ १७ ॥

---

* स्वयम् इत्यनेन मानससृष्टिर्बोध्यते इति नागोजीभट्टः ।

ते गजाचलसङ्काशा वपुष्मन्तो महाबलाः ॥ १८ ॥
ऋक्ष-वानर-गोपुच्छाः क्षिप्रमेवाभिजज्ञिरे ।
यस्य देवस्य यद् रूपं वेषो यश्च पराक्रमः ॥ १९ ॥
अजायत समं तेन तस्य तस्य पृथक् पृथक् ।
गोलाङ्गूलेषु चोत्पन्नाः किञ्चिदुन्नतविक्रमाः ॥ २० ॥
ऋक्षीषु च तथा जाता वानराः किन्नरीषु च ।
देवा महर्षिगन्धर्वास्तार्क्ष्या यक्षा यशस्विनः ॥ २१ ॥
नागाः किंपुरुषाश्चैव सिद्धविद्याधरोरगाः ।
बहवो जनयामासुर्हृष्टास्तत्र सहस्रशः ॥ २२ ॥
चारणाश्च सुतान् वीरान् ससृजुर्वनचारिणः ।

गजाचलसङ्काशाः गजसदृशाः पर्वतसदृशाश्च इत्यर्थः ॥ १८ ॥

गोपुच्छा वानरविशेषाः । क्षिप्रमेव तत्तद्-योनौ देवानां रत्यव्यवहितोत्तरकालमेव रूपं वर्णः वेषः संस्थानविशेषः * ॥ १९ ॥

तस्य तत्पुत्रस्य तेन तदीयरूपवेषादिकं पृथक् पृथक् यथायथं अजायत किञ्चिदुन्नतविक्रमाः देवावस्थातोऽपि किञ्चिदधिकपराक्रमा इत्यर्थः ॥ २० ॥

ऋक्षीषु ऋक्षशरीरासु चश्च किन्नरीषु इत्यर्थः । एवमग्रेऽपि । तार्क्ष्याः तार्क्ष्यवंश्याः ॥ २१ ॥

नागाः सर्पाः ॥ २२ ॥

---

* क्षिप्रमित्यनेन मानससृष्टिरुच्यते इति नागोजीभट्टः ।

वानरान् सुमहाकायान् सर्वान् वै वनचारिणः ॥ २३ ॥

अप्सरःसु च मुख्यासु तथा विद्याधरीषु च।

नागकन्यासु च तदा गन्धर्वीणां तनूषु च।

कामरूपबलोपेता यथाकामविचारिणः ॥ २४ ॥

सिंहशार्दूलसदृशा दर्पेण च बलेन च।

शिलाप्रहरणाः सर्वे सर्वे पर्वतयोधिनः ॥ २५ ॥

नखदंष्ट्रायुधाः सर्वे सर्वे सर्वास्त्रकोविदाः।

विचालयेयुः शैलेन्द्रान् भेदयेयुः स्थिरान् द्रुमान् ॥ २५ ॥

क्षोभयेयुश्च वेगेन समुद्रं सरितां पतिम्।

दारयेयुः क्षितिं पद्भ्याम् आप्लवेयुर्महार्णवान् ॥ २७ ॥

नभस्तलं विशेयुश्च गृह्णीयुरपि तोयदान्।

गृह्णीयुरपि मातङ्गान् मत्तान् प्रव्रजतो वने ॥ २८ ॥

चारणा देववन्दिनः। वनचारिणः वनवासिन इत्येकम् परम् वनस्थफलभक्षकान् इत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥

सर्वास्त्रकोविदा इति। स्वयं-प्रतिभात-सर्वास्त्रप्रतिसंहारोपाया इत्यर्थः। शिलाप्रहरणा इत्याद्युक्तेः तेषाम् अस्त्रप्रयोगावश्यकताभावात्। विचालयेयुरित्यादौ सर्वत्र णिच् विचालनसमर्था इत्यर्थः ॥ २६ ॥

आप्लवेयुः सन्तरेयुः ॥ २७ ॥

प्रव्रजतः सञ्चरमाणान् ॥ २८ ॥

नर्दमानांश्च नादेन पातयेयुर्विहङ्गमान् ।
ईदृशानां प्रसूतानि हरीणां कामरूपिणाम् ॥ २९ ॥
शतं शतसहस्राणि यूथपानां महात्मनाम् ।
ते प्रधानेषु यूथेषु हरीणां हरियूथपाः ॥ ३० ॥
बभूवुर्यूथपश्रेष्ठान् वीरांश्चाजनयन् हरीन् ।
अन्ये ऋक्षवतः प्रस्थानुपतस्थुः सहस्रशः ॥ ३१ ॥
अन्ये नानाविधान् शैलान् काननानि च भेजिरे ।
सूर्य्यपुत्रञ्च सुग्रीवं शक्रपुत्रञ्च वालिनम् ॥ ३२ ॥
भ्रातरावुपतस्थुस्ते सर्वे च हरियूथपाः ।
नलं नीलं हनूमन्तम् अन्यांश्च हरियूथपान् ॥ ३३ ॥
ते तार्क्ष्यबलसम्पन्नाः सर्वे युद्धविशारदाः ।

नादेनेत्यस्य पातयेयुरित्यनेनान्वयः ॥ २९ ॥

शतं शतसहस्राणि कोटिरित्यर्थः ॥ ३० ॥

ते प्रागुक्ताः हरीणां प्रधानेषु यूथेषु मध्ये हरियूथपा बभूवुः । यूथपश्रेष्ठान् वीरांश्च हरीन् अजनयन्नित्यर्थः । ऋक्षवतः पर्वतविशेषस्य प्रस्थान् सानून् उपतस्थुः आसेवन्ते स्म ॥ ३१ ॥ ३२ ॥

भ्रातरौ सुग्रीववालिनौ । सर्वे च सर्वेऽपि उपतस्थुः । केचित् साक्षात् केचित् नलादिद्वारेणाच, नलनिलादि ॥ ३३ ॥

विचरन्तोऽर्दयन् सर्वान् सिंहव्याघ्रमहोरगान् ॥ २४ ॥
महाबलो महाबाहुर्वाली विपुलविक्रमः।
जुगोप भुजवीर्येण ऋक्षगोपुच्छवानरान् ॥ २५ ॥
तैरियं पृथिवी शूरैः सपर्वतवनार्णवा।
कीर्णा विविधसंस्थानैर्नानाव्यञ्जनलक्षणैः ॥ २६ ॥
तैर्मेघवृन्दाचलकूटसन्निभै-
र्महाबलैर्वानरयूथपाधिपैः।
बभूव भूर्भीमशरीररूपैः
समावृता रामसहायहेतोः ॥ २७ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अर्दयन् आर्दयन् इत्यर्थः। अडभाव आर्षः ॥ २४ ॥
वाली जुगोपेत्यन्वयः। देवराजावतारत्वात् इति भावः ॥ २५ ॥
विविधसंस्थानैः नानाप्रकारसन्निवेशैः। नानाव्यञ्जनलक्षणैः परस्परभेदव्यञ्जकलक्षणयुतैः ॥ २६ ॥
अचलकूटः पर्वतशृङ्गं यूथपाधिपैः यूथपालकैरित्यर्थः। भीमशरीररूपैः भयजनकशरीराकृतिभिः ॥ २७ ॥
इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अष्टादशः सर्गः ।

निर्वृत्ते तु क्रतौ तस्मिन् हयमेधे महात्मनः ।
प्रतिगृह्यामरा भागान् प्रतिजग्मुर्यथागतम् ॥ १ ॥
समाप्तदीक्षानियमः पत्नीगणसमन्वितः ।
प्रविवेश पुरीं राजा सभृत्यबलवाहनः ॥ २ ॥
यथार्हं पूजितास्तेन राज्ञा च पृथिवीश्वराः ।
मुदिताः प्रययुर्देशान् प्रणम्य मुनिपुङ्गवम् ॥ ३ ॥
श्रीमतां गच्छतां तेषां स्वगृहाणि पुरात्ततः ।
बलानि राज्ञां शुभ्राणि प्रहृष्टानि चकाशिरे ॥ ४ ॥

[illegible] प्रधानावतारं उपक्रमते,—निर्वृ-त्ते इति । निर्वृत्ते समाप्ते । [illegible] ॥ १ ॥

[illegible] बभूव ॥ २ ॥

मुनिपुङ्गवं वसिष्ठम् [illegible] ॥ ३ ॥

[illegible] ॥ ४ ॥

गतेषु पृथिवीशेषु राजा दशरथः पुनः ।
प्रविवेश पुरीं श्रीमान् पुरस्कृत्य द्विजोत्तमान् ॥ ५ ॥
शान्तया प्रययौ सार्द्धम् ऋष्यशृङ्गः सुपूजितः ।
अनुगम्यमानो राज्ञा च सानुयात्रेण धीमता ॥ ६ ॥
एवं विसृज्य तान् सर्वान् राजा सम्पूर्णमानसः ।
उवास सुखितस्तत्र पुत्रोत्पत्तिं विचिन्तयन् ॥ ७ ॥
ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ ॥ ८ ॥
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु ।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह ॥ ९ ॥
प्रोद्यमाने जगन्नाथं सर्वलोकनमस्कृतम् ।

द्विजोत्तमान् वसिष्ठादीन् ॥ ५ ॥
सानुयात्रेण सभृत्येन राज्ञा दशरथेन अनुगम्यमानः [illegible]
प्रययौ स्वस्थानम् इति शेषः ॥ ६ ॥
सर्वान् वसिष्ठादीनपि स्वे पुरे ॥ ७ ॥
ऋतूनामिति । प्रथमार्द्धं स्पष्टम् । [illegible] । नावमिके
नवम्यां तिथौ स्वार्थे ठक् ॥ ८ ॥
अदितिदैवत्ये पुनर्वसौ नक्षत्रे [illegible]

* चैत्रमासादारभ्य द्वादश संख्यापूरके [illegible]

कौसल्याऽजनयद्रामं दिव्यलक्षणसंयुतम् ॥ १० ॥
विष्णोरर्द्धं महाभागं पुत्रमैक्ष्वाकुनन्दनम् ।
लोहिताक्षं महाबाहुं रक्तोष्ठं दुन्दुभिस्वनम् ॥ ११ ॥
कौसल्या शुशुभे तेन पुत्रेणामिततेजसा ।
यथा वरेण देवानाम् अदितिर्वज्रपाणिना ॥ १२ ॥
भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षाद्विष्णोश्चतुर्भागः सर्वैः समुदितो गुणैः ॥ १३ ॥

स्थेषु मेष-मकर-तुला-कर्कट-मीनस्थेषु सचन्द्रगुरौ कर्कटे लग्ने स्थिते सति ॥ ९ ॥

प्रोच्यमाने तत्र यमे उदयं गच्छति सतीत्यर्थः । सर्वलोकनमस्कृतम् यस्य सर्वलोकस्यैव यतो नमस्कृतः तमित्यर्थः । देवादेः प्रादुर्भावसमये माता विराड्रूपस्य दर्शनं जातं तत्तद्रूपदर्शनभियात् तया नमस्कृतः सन् मायया बालभावं दधौ इति सूचितम् * ॥ १० ॥

विष्णोः [illegible] । अर्द्धं [illegible]मित्यर्थः । [illegible] ॥ ११ ॥

[illegible] ॥ १२ ॥

[illegible]

* [illegible]

अथ लक्ष्मणशत्रुघ्नौ सुमित्राऽजनयत्सुतौ ।
वीरौ सर्वास्त्रकुशलौ विष्णोरर्द्धसमन्वितौ ॥ १४ ॥

भागः अतएव साक्षात् विष्णोः सर्वगुणैः समुदितः पुत्रः अस्य पाञ्चजन्यावतारतया स्वधारकस्य विष्णोः साक्षाद्विष्णुत्वमुक्तम् अनेन पाञ्चजन्यस्यापि विष्णुत्वमेवेति सूचितं तदीयसंकल्पवत्तासूचनेनास्यापि रामतुल्यत्वं रामपायसांशसमपायसांशजन्यत्वं च सूचितम् ॥ ११ ॥

विष्णोरर्द्धेति । विष्णोः रामस्य अर्द्धशब्दो भागवाची न समांशवाची तेन पायसाद्धमांशौ लक्ष्मणशत्रुघ्नाविति बोध्यम् * ॥ १४ ॥

---

* अथ भरतजन्मानन्तरं विष्णोरर्द्धं चक्रमनन्तश्च ताभ्यां समन्वितौ तदात्मकाविति यावत् लक्ष्मणशत्रुघ्नौ सुतौ सुमित्रा अजनयदिति सम्बन्धः । तदुक्तं पद्मपुराणे,—
"अन्येद्युः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत् ।
तदन्येद्युः सुमित्रायामनन्तात्मा च लक्ष्मणः ।
सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत् प्रिये ।"
इति ।

औपनिषदास्त्वेवं व्याचक्षते,—
"प्रणवं चोत्तरं विद्यात् सुबंध हृदये स्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥
इत्यादि सत्यकामपरं चापरं ब्रह्म यदोङ्कारः ।
प्रणवेश्वरपरं ब्रह्म प्रणवः परं ब्रह्म ।
अपूर्वोऽनन्तरो बाह्योऽनपरः प्रणवोऽव्ययः ।
श्रीरामस्यैकमक्षरम् ओमित्येतावदं ब्रह्म [illegible]

पुष्ये जातस्तु भरतो मीनलग्ने प्रसन्नधीः ।
सार्पे जातौ तु सौमित्री कुलीरेऽभ्युदिते रवौ ॥ १५ ॥

सार्पः अश्लेषा । कुलीरः कर्कटः अभ्युदिते इत्यस्य उच्चस्थे इत्यर्थः । सौमित्रीति द्विवचनेन तयोर्यमजत्वं सूच्यते ॥ १५ ॥

सप्तरेभ्यो विष्णुशब्देनात्र प्रणवो विवक्षितः तस्यार्द्धमर्द्धमात्रात्मकं तुरीयं परं ब्रह्म रामाख्यं कौसल्या ब्रह्माभिव्यक्तिशक्तिरजनयद् आविर्भावितवतीत्यर्थः । साक्षात् सर्वैरनुभूयमानस्य विष्णोः प्रणवस्य ये चत्वारो भागाः चतुःशब्दस्य प्रकारत्वाद् भागरूपसंख्येयपरत्वं तेषु यो भागो मकारात्मकः प्राज्ञ ईश्वरः स सर्वैर्दिव्यगुणैः समुदितो भरतो नाम कैकेय्यां जज्ञे इति सम्बन्धः । चतुर्भाग इत्यत्र सापेक्षत्वेऽपि नित्यसम्बन्धिकत्वात् समासः । अथ भरतजन्मानन्तरं विष्णोरोंकारस्य अर्द्धौ अंशौ अकारोकारौ विश्वतैजसौ विराट्-हिरण्यगर्भौ ताभ्यां समन्वितौ तदात्मकाविति यावत् । सर्वास्त्रकुशलौ अध्यात्मज्ञौ सुतौ सुमित्रा अजनयदित्यन्वयः । उक्तं च अथर्ववेदे श्रीरामोत्तरतापनीये प्रणवव्याख्यायां तथैते योगा भवन्ति,—

"अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः ।
उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः ॥
प्राज्ञात्मकस्तु भरतो मकाराक्षरसम्भवः ।
अर्द्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः ॥"

इति ।

[illegible] पायसं तु [illegible]
[illegible] ।
[illegible] विभाजानि [illegible]
[illegible] तु वा [illegible] ॥

राज्ञः पुत्रा महात्मानश्चत्वारो जज्ञिरे पृथक् ।
गुणवन्तः सुरूपाश्च रुच्या प्रोष्ठपदोपमाः ॥ १६ ॥
जगुः कलञ्च गन्धर्वा ननृतुश्चाप्सरोगणाः ।
देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खात्पतत् ॥ १७ ॥
उत्सवश्च महानासीद् अयोध्यायां जनाकुलः ।
रथ्याश्च जनसम्बाधा नटनर्त्तकसंकुलाः ॥ १८ ॥
गायनैश्च विराविण्यो वादनैश्च तथापरैः ।
विरेजुर्विपुलास्तत्र सर्वरत्नसमन्विताः ॥ १९ ॥
प्रदेयांश्च ददौ राजा सूतमागधवन्दिनाम् ।
ब्राह्मणेभ्यो ददौ वित्तं गोधनानि सहस्रशः ॥ २० ॥

राज्ञ इति । पृथक् प्रत्येकम् गुणवन्तः [illegible]-वन्तः अनुरूपाः [illegible] । रुच्या कान्त्या प्रोष्ठपदा इति पूर्वभाद्रपदोत्तरभाद्रपदयोर्नाम, तयोश्च [illegible] द्वे द्वे तारे इति ज्योतिःशास्त्रप्रसिद्धम् । तैत्तिरीयश्रुतिरपि [illegible] एकमभि-कर्मदेवाः प्रोष्ठपदा स इति [illegible] ॥ १६ ॥

जगुरिति । [illegible] पद-भावश्छान्दसः ॥ १७ ॥ १८ ॥

गायनैर्गायकैः वादनैर्वादकैः [illegible] । रथ्या इति विशेष्यम् । सर्वरत्नसमन्विताः [illegible] ॥ १९ ॥

प्रदेयान् पारितोषिकान् सूतः [illegible]-

अतीत्यैकादशाहं तु नामकर्म तथाऽकरोत् ।
ज्येष्ठं रामं महात्मानं भरतं कैकयीसुतम् ॥ २१ ॥
सौमित्रिं लक्ष्मणमिति शत्रुघ्नमपरं तथा ।
वसिष्ठः परमप्रीतो नामानि कुरुते तदा ॥ २२ ॥

[illegible]कीर्त्तकाः वन्दिनः स्तुतिपाठकाः सम्बन्धसामान्ये षष्ठी । सूतादि-सम्बन्धि यद्देयं पारितोषिकं तत् तेभ्यो ददौ इत्यन्वयः ॥ २० ॥

अतीत्येति । एकादशाहशब्दः सूतकाशौचपरकम् अन्यथा क्षत्रियस्य द्वादशाहं सूतकमिति श्रुतिविरोधः स्यात् * यथा च रामजन्मतः त्रयोदशे दिने नामकरणमकरोदित्यर्थः । अस्य निष्पत्तिः पूर्वं दर्शिता ।

"[illegible] रमन्तेऽस्मिन् [illegible] ।
[illegible] श्रीराम इत्यस्य नाम [illegible] ॥
[illegible] ।"

इति [illegible] ॥ २१ ॥

नामानि कुरुते नामकरणमकरोदित्यर्थः । [illegible] [illegible] । [illegible] [illegible] ॥ २२ ॥

* [illegible]
[illegible] ।

ब्राह्मणान् भोजयामास पौरजानपदानपि ।
अददद् ब्राह्मणानां च रत्नौघममलं * बहु ॥ २३ ॥
तेषां जन्मक्रियादीनि सर्वकर्माण्यकारयत् ।
तेषां केतुरिव ज्येष्ठो रामो रतिकरः पितुः ॥ २४ ॥
बभूव भूयो भूतानां स्वयम्भूरिव सम्मतः ।
सर्वे वेदविदः शूराः सर्वे लोकहिते रताः ॥ २५ ॥
सर्वे ज्ञानोपसम्पन्नाः सर्वे समुदिता गुणैः ।
तेषामपि महातेजा रामः सत्यपराक्रमः ॥ २६ ॥

ब्राह्मणान् भोजयामासेति राजा [illegible] शेषः। बहु बहुमानपूर्वकमित्यर्थः † ॥ २३ ॥

जन्मक्रियादीनि [illegible]। अकारयत् वसिष्ठो राजेति शेषः। केतुर्विजयध्वजः स यथा [illegible] ख्यापयति एवम् इक्ष्वाकुकुलवैभवप्रकाशकः। इति केचित् ॥ २४ ॥

स्वयम्भूर्हिरण्यगर्भः स इव सर्वभूतानामपि सम्मतः ॥ २५ ॥

ज्ञानोपसम्पन्नाः तत्त्वज्ञानयुक्ता इति केचित्। [illegible] [illegible]। [illegible]। सर्वसद्गुणसम्पन्न इति शेषः ॥ २६ ॥

---

* "अमितं" इति वा पाठः।
† बहु बहुप्रकारम् इति वा।

इष्टः सर्वस्य लोकस्य शशाङ्क इव निर्मलः ।
गजस्कन्धेऽश्वपृष्ठे च रथचर्यासु सम्मतः ॥ २७ ॥
धनुर्वेदे च निरतः पितुः शुश्रूषणे रतः ।
बाल्यात् प्रभृति सुस्निग्धो लक्ष्मणो लक्ष्मिवर्द्धनः ॥ २८ ॥
रामस्य लोकरामस्य भ्रातुर्ज्येष्ठस्य नित्यशः ।
सर्वप्रियकरस्तस्य रामस्यापि शरीरतः ॥ २९ ॥
लक्ष्मणो लक्ष्मिसम्पन्नो बहिःप्राण इवापरः ।
न च तेन विना निद्रां लभते पुरुषोत्तमः ॥ ३० ॥
मृष्टमन्नमुपानीतमश्नाति न हि तं विना ।
यदा हि हयमारूढो मृगयां याति राघवः ॥ ३१ ॥
अथैनं पृष्ठतोऽभ्येति सधनुः परिपालयन् ।

इष्टः सर्वस्येत्यादि । [illegible] । रथचर्यासु [illegible] । २७ ।

लक्ष्मिवर्द्धन इति ह्रस्व आर्षः । २८ ।

रामस्य [illegible] इति [illegible] । [illegible] । २९ ।

[illegible] इति [illegible] । ३० ।

[illegible] । ३१ ।

भरतस्यापि शत्रुघ्नो लक्ष्मणावरजो हि सः ॥ २२ ॥

प्राणैः प्रियतरो नित्यं तस्य चासीत् तथा प्रियः ।

स चतुर्भिर्महाभागैः पुत्रैर्दशरथः प्रियैः ॥ २३ ॥

बभूव परमप्रीतो देवैरिव पितामहः ।

ते यदा ज्ञानसम्पन्नाः सर्वे समुदिता गुणैः ॥ २४ ॥

ह्रीमन्तः कीर्तिमन्तश्च सर्वज्ञा दीर्घदर्शिनः ।

तेषामेवंप्रभावाणां सर्वेषां दीप्ततेजसाम् ॥ २५ ॥

पिता दशरथो हृष्टो ब्रह्मा लोकाधिपो यथा ।

ते चापि मनुजव्याघ्रा वैदिकाध्ययने रताः ॥ २६ ॥

परिपालकम् रामप्रीतिरमिति शेषः । अनेन लक्ष्मणस्य भरताविप्रय उक्तः । हि यतः शत्रुघ्नो लक्ष्मणावरजः अतो रामादरत्वेन भरतस्य प्रिय इति शेषः । रामलक्ष्मणाविव भरतशत्रुघ्नौ परस्पर-प्रियाविति भावः ॥ २२ ॥

तस्य शत्रुघ्नस्य च भरत इति शेषः । [illegible] शत्रुघ्नः प्रिय आसीत् ॥ २३ ॥

देवैः चतुर्भिः दिक्पालैः [illegible] सर्वे रामादयः । गुणैः समुदिता युक्ता आसन्निति शेषः ॥ २४ ॥

एवंप्रभावाणां [illegible] आसीदिति शेषः । पिता [illegible] ॥ २५ ॥

वैदिकाध्ययने [illegible] । [illegible]

पितृशुश्रूषणरता धनुर्वेदे च निष्ठिताः ।
अथ राजा दशरथस्तेषां दारक्रियां प्रति ॥ २७ ॥
चिन्तयामास धर्मात्मा सोपाध्यायः सबान्धवः ।
तस्य चिन्तयमानस्य मन्त्रिमध्ये महात्मनः ॥ २८ ॥
अभ्यागच्छन्महातेजा विश्वामित्रो महामुनिः ।
स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ॥ २९ ॥
शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतम् ।
तच्छ्रुत्वा वचनं तस्य राज्ञो वेश्म प्रदुद्रुवुः ॥ ३० ॥
सम्भ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः ।

दारक्रिया विवाहः

“कुमारस्य विवाहार्थं मातुला मुखमाहरे ।
कनीयसतरां [illegible] ॥”

[illegible] जातानां मुख-
[illegible] चिन्तयामासेति [illegible]-
[illegible] ॥ २७ ॥

[illegible] द्वाराध्यक्षाः [illegible] ॥ २८ । २९ ॥

कौशिकं [illegible] । [illegible]
[illegible] त्वरया प्रतिष्ठिताः [illegible]
[illegible] ॥ ३० ॥

ते गत्वा राजभवनं विश्वामित्रमृषिं तदा ॥ ४१ ॥
प्राप्तमावेदयामासुर्नृपायेक्ष्वाकवे तदा ।
तेषां तद् वचनं श्रुत्वा सपुरोधाः समाहितः ॥ ४२ ॥
प्रत्युज्जगाम संहृष्टो ब्रह्माणमिव वासवः ।
स दृष्ट्वा ज्वलितं दीप्त्या तापसं संशितव्रतम् ॥ ४३ ॥
प्रहृष्टवदनो राजा ततोऽर्घ्यमुपहारयत् ।
स राज्ञः प्रतिगृह्यार्घ्यं शास्त्रदृष्टेन कर्मणा ॥ ४४ ॥
कुशलं चाव्ययं चैव पर्य्यपृच्छन्नराधिपम् ।
पुरे कोशे जनपदे बान्धवेषु सुहृत्सु च ॥ ४५ ॥
कुशलं कौशिको राज्ञः पर्य्यपृच्छत् सुधार्मिकः ।

सम्भ्रान्तमनसः क्षुभितचित्ताः । तेन तदीयेन विश्वामित्रसम्बन्धिना ॥ ४१ ॥

इक्ष्वाकवे तद्वंशजाताय । श्रुत्वा समाहितः एकाग्रचित्तः ॥ ४२ ॥

ब्रह्माणं बृहस्पतिं बृहस्पतिर्देवानां ब्रह्मेति श्रुतेः । संशितव्रतं तीक्ष्णनियमम् ॥ ४२ ॥

उपहारयदिति वसिष्ठेनेति शेषः । अतएव चार्घ्यः राज्ञोऽर्घ्यं राजप्रेरणया वसिष्ठानीतम् ॥ ४४ ॥

कुशलपदम् अनामयोपलक्षणं 'ब्राह्मणं कुशलमनामयं' इति श्रुतेः । अ-व्ययं वृद्धिम् ॥ ४५ ॥

अपि ते सन्नताः सर्वे सामन्ता रिपवो जिताः ॥ ४६ ॥
दैवञ्च मानुषं चैव कर्म ते साध्वनुष्ठितम् ।
वसिष्ठञ्च समागम्य कुशलं मुनिपुङ्गवः ॥ ४७ ॥
ऋषींश्च तान् यथान्यायं महाभाग उवाच ह ।
ते सर्वे हृष्टमनसस्तस्य राज्ञो निवेशनम् ॥ ४८ ॥

पुनर्विशिष्य पृच्छति कुशलमिति विशेषप्रकारमाह, अपि ते इति । अपि प्रश्ने एवमग्रेऽपि सामन्ताः सन्नताः नम्राः अपि रिपवो जिताः ॥ ४६ ॥

अपि दैवं कर्म होमदेवतार्चनादिकं मानुषं कर्म सामभेदादिकं राजप्रेरितार्थ्यदाहत्वेन प्रथमतो राज्ञोऽनामयादि पृष्ट्वा ततो वसिष्ठेन समागम्याविङ्गनादि कृत्वा कुशलमित्यस्य पप्रच्छेति शेषः । अनेन राजपुरोहितत्वशतः पूर्वं स्पर्द्धया दंशदपमानो वसिष्ठस्य विश्वामित्रकृतः सूचितः—

"वसिष्ठञ्च समागम्य प्रहसन् मुनिपुङ्गवः ।
यथार्हं पूजयित्वेनं पप्रच्छ कुशलं तदा ॥"

इति क्वचित् पाठः तत्र पूर्वं मां स्पर्द्धमानोऽपि ममाश्रयमिषो जात इतिहासः ॥ ४७ ॥

ऋषीन् वामदेवादीन् यथान्यायं यथायोग्यं कुशलं पीडाह तत्र वामदेवादिभिः कथावशेषैः समागम्य कथार्थमिलितं तस्य राज्ञो निवेशनं ते सर्वे च राजभवनं विविशुरित्यन्वयः ॥ ४८ ॥

विविशुः पूजितास्तेन निषेदुश्च यथार्हतः ।
अथ हृष्टमना राजा विश्वामित्रं महामुनिम् ॥ ४९ ॥
उवाच परमोदारो हृष्टस्तमभिपूजयन् ।
यथाऽमृतस्य संप्राप्तिर्यथा वर्षमनूदके ॥ ५० ॥
यथा सदृशदारेषु पुत्रजन्माप्रजस्य वै ।
प्रनष्टस्य यथा लाभो यथा हर्षो महोदयः * ॥ ५१ ॥
तथैवागमनं मन्ये स्वागतं ते महामुने ! ।
कञ्च ते परमं कामं करोमि किमु हर्षितः ॥ ५२ ॥

पूजिता इत्यस्य राज्ञेति शेषः ॥ ४९ ॥

परमोदारः परमदाता हृष्टः पुलकितः अनूदके इत्यार्षं दीर्घत्वम् ॥ ५० ॥

सदृशदारेषु जातिवयोरूपगुणतुल्येषु । प्रनष्टस्य निधारेरिति शेषः । महः पुत्रजन्माद्युत्सवः तस्मादुदयो यस्य स हर्षः * ॥ ५१ ॥

यथा तथा ते आगमनं मन्ये अत्र [illegible] उक्त्या तवागमनजहर्षस्यामितात्वं कथ्यते । स्वागतं ते इति भिन्नं

---

* "महोदये" इति वा पाठः ।

* महः पुत्रविवाहाद्युत्सवः तस्य उदये प्राप्ते हर्षः इति पाठान्तर व्याख्या ।

पात्रभूतोऽसि मे ब्रह्मन् ! दिष्ट्या प्राप्तोऽसि मानद ! ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥ ५३ ॥
यस्माद् विप्रेन्द्रमद्राक्षं सुप्रभाता निशा मम ।
पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ॥ ५४ ॥
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि बहुधा मया ।
तदद्भुतमभूद् * विप्र ! पवित्रं परमं मम ॥ ५५ ॥
शुभक्षेत्रगतश्चाहं तव सन्दर्शनात् प्रभो ! ।

वाक्यञ्च । परं कं कामं किमु केन प्रकारेण करोमि कुर्य्यामित्यर्थः । वर्त्तमानसामीप्ये लट् ॥ ५२ ॥

पात्रभूतः सर्वसेवायोग्यः दिष्ट्या शुभादृष्टेन सुजीवितम् सफलं तत् [illegible]लाभादिति भावः ॥ ५३ ॥

पूर्वमिति । राजर्षिशब्दवाचकेन तपसा पूर्वम् द्योतित[illegible]-कान्तिमान् ॥ ५४ ॥

अनु पश्चात् ब्रह्मर्षिवाचकेन तपसा ब्रह्मर्षित्वं प्राप्तः अतो मया बहुधा बहुप्रकारेण राजर्षिब्रह्मर्षिप्रकारेण पूज्योऽसीत्यर्थः । तदिति परमं पवित्रमिदं तवागमनं यत् मम पुरोऽभूत् तदद्भुतम् आश्चर्य्यमित्यर्थः ॥ ५५ ॥

---

* "[illegible]म्" इति वा पाठः ।

ब्रूहि यत् प्रार्थितं तुभ्यं कार्य्यमागमनं प्रति ॥ ५६ ॥
इच्छाम्यनुगृहीतोऽहं त्वदर्थपरिवृद्धये।
कार्य्यस्य न विमर्शञ्च गन्तुमर्हसि सुव्रत ! ॥ ५७ ॥
कर्त्ता चाहमशेषेण दैवतं हि भवान् मम।
मम चायमनुप्राप्तो महानभ्युदयो द्विज ! ।
तवागमनजः कृत्स्नो धर्मश्चानुत्तमो द्विज ! ॥ ५८ ॥
इति हृदयसुखं निशम्य वाक्यं
श्रुतिसुखमात्मवता विनीतमुक्तम् ।

हे प्रभो ! तव सन्दर्शनात् शुभक्षणं सकलपापाभावविशिष्टं सकलशुभसाधनपुण्यवत् देवं गतः प्राप्तवान् तेन सफलजन्मता निष्पापता च जनिता। 'इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते' इति भगवद्गीतोक्तेः। ब्रूहीति तुभ्यमिति षष्ठ्यर्थे चतुर्थी। ते यत् कार्य्यं प्रति यत्कार्य्यार्थमागमनं, तन्मया प्रार्थितं सत् ब्रूहि कथय ॥ ५६ ॥

स्वाभिमतकार्य्ययोगेन अनुगृहीतोऽहं भवदीयकार्यविषये नि-ष्पत्तिं कर्त्तुमिच्छामि विमर्शं कारिष्यति न वेति सन्देहम् ॥ ५७ ॥

तत्र हेतुमाह,—दैवतं हीति। इतश्च न सन्देह इत्याह,—मम चेति तवागमनजः कृत्स्नो धर्मः मम महानभ्युदयः प्राप्तः हर्षाति-शयात् द्विजेति पुनरुक्तिर्न दोषाय ॥ ५८ ॥

इतीति। यतो हृदयङ्गमम् [illegible]

प्रथितगुणयशा गुणैर्विशिष्टः
परम ऋषिः परमं जगाम हर्षम् ॥ ५९ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
अष्टादशः सर्गः ॥ १८ ॥

स्वाधीनेन विनीतं विनययुक्तं प्रथितैर्गुणैः शिष्टसर्गारोहणादिभिः यशो यस्य । गुणैः शमदमादिभिः परम ऋषिः ऋत्यक इति प्रकृतिभावः ॥ ५९ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे अष्टादशः सर्गः ॥ १८ ॥

ऊनविंशः सर्गः ।



तत् श्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ।
हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सदृशं राजशार्दूल ! तवैतत् भुवि नान्यतः ।
महावंशप्रसूतस्य वसिष्ठव्यपदेशिनः ॥ २ ॥
यत्तु मे हृद्गतं वाक्यं तस्य कार्य्यस्य निश्चयम् ।
कुरुष्व राजशार्दूल ! भव सत्यप्रतिश्रवः ॥ ३ ॥
अहं नियममातिष्ठे सिद्ध्यर्थं पुरुषर्षभ ! ।
तस्य विघ्नकरौ द्वौ तु राक्षसौ कामरूपिणौ ॥ ४ ॥
व्रते तु बहुशश्चीर्णे समाप्त्यां राक्षसाविमौ ।

तदिति । अद्भुतविस्तरं 'दैवतं हि भवान् मम' इत्याद्युक्तिरूपमाश्चर्य्यप्रपञ्चम् ॥ १ ॥

एतत् तवैव सदृशं, नान्यतः नान्यस्य, तत्र हेतुगर्भं विशेषणं महावंशेत्यादि वसिष्ठव्यपदेशिनः वसिष्ठनियोगवर्त्तिनः ॥ २ ॥

यत्त्विति । तस्य तत्प्रतिपाद्यस्य कार्य्यस्य निश्चयं सर्व्वथा करिष्यामीति अङ्गीकारं कुरुष्व तथा च सत्यप्रतिश्रवः सत्यप्रतिज्ञो भव ॥ ३ ॥

अहमिति । सिद्ध्यर्थं यागार्थं नियमं दीक्षाम् आतिष्ठे आश्रितोऽस्मि तस्य यज्ञस्य ॥ ४ ॥

मारीचश्च सुबाहुश्च वीर्य्यवन्तौ सुशिक्षितौ ॥ ५ ॥
तौ मांसरुधिरौघेण वेदिं तामभ्यवर्षताम् ।
अवधूते तथाभूते तस्मिन् नियमनिश्चये ॥ ६ ॥
कृतश्रमो निरुत्साहस्तस्माद् देशादपाक्रमे ।
न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ! ॥ ७ ॥
तथाभूता हि सा चर्य्या न शापस्तत्र मुच्यते ।
स्वपुत्रं राजशार्दूल ! रामं सत्यपराक्रमम् ॥ ८ ॥
काकपक्षधरं वीरं ज्येष्ठं मे दातुमर्हसि ।
शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ॥ ९ ॥

व्रते त्विति । बहुशस्वीर्य्ये समाप्तिकल्पे समाप्त्यां समाप्तिसमये ॥ ५ ॥

नियमनिश्चये व्रतसङ्कल्पे अवधूते नाशिते तस्मिन् तत्सङ्कल्पविषये यज्ञे च तथाभूते नाशिते सति ॥ ६ ॥

कृतश्रमः कृततथाप्रयासः अतएव निरुत्साहः तस्माद् देशाद् अपाक्रमे निर्गतोऽस्मि । ननु भवद्भिः शापेनैव कुतस्तौ न नाशितौ तत्राह, न चेति क्रोधमुत्स्रष्टुं शप्तुम् ॥ ७ ॥

तत्र हेतुमाह,—तथाभूतेति । शापादिप्रदानवर्ज्जितचर्य्यः । अतः स्वपुत्रमित्यादि ॥ ८ ॥

बालानां कपोलसमीपशिखा काकपक्षः । ननु बालेन बालेन किं करिष्यसीत्यत्राह,—शक्त इत्यादि । मया शिक्षणाद्रक्षितेति शेषः । दिव्यं तेजो वैभवं तेन गुप्त इति शेषः ॥ ९ ॥

राक्षसा ये विकर्त्तारस्तेषामपि विनाशने।

श्रेयश्चास्मै प्रदास्यामि बहुरूपं न संशयः॥ १०॥

विकर्त्तारः विघ्नकर्त्तारः तेषां विनाशनेऽपि शक्तः किं पुनर्मम यज्ञरक्षणे। मारीचसुबाहुसेनाभिप्रायेण तेषामिति बहुवचनम्। राज्ञो दानप्ररोचनायाह,—श्रेयश्चेति। बहुरूपम् अस्त्रदानविवाहादिरूपं सुखपाद्गुण्यादिनिवर्त्तकम्। किञ्च बहुरूपं विपुलतरं परमार्थरूपञ्च श्रेय आत्मस्वरूपं प्रदास्यामि वसिष्ठद्वारा दापयिष्यामि बोधयिष्यामीत्यर्थः। रामस्य शुद्धमुक्तस्वभावत्वेऽपि लोकानां तत्त्वबोधनमेव रामबोधनस्य फलं सनत्कुमारशापवशात् तिरोहितस्य ज्ञानस्य प्रादुर्भूतिश्च फलमिति बोध्यम्। तदुक्तमादित्यपुराणे—

"विज्ञानमेतद् अखिलं विश्वाकारमबुद्धयः।

पश्यन्ति ज्ञानिनस्त्वेकम् आत्मरूपमिदं जगत्॥

दुर्विज्ञेयं वसिष्ठेन रामाय कथितं पुरा।"

इति स्कन्दं प्रति शिवोक्तेः। योगवासिष्ठे च स्फुटतरमेतत्; तदेवाह,—जयाब्जमित्यादि। मुख्यं श्रेयश्च विष्णुपुराणे द्वितीयांशे।—

"तन्मह्यं प्रणताय त्वं यत् श्रेयः परमं द्विज!।

तद्वदाखिलविज्ञानजलवीच्युदधिर्भवान्॥"

इति राजप्रश्ने पुत्रस्वर्गादीनामापेक्षिकश्रेयस्त्वेऽपि न परमार्थरूपं श्रेयस्त्वमित्युक्त्वा

"एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः।

जन्मवृद्ध्यादिरहित आत्मा सर्वगतोऽव्ययः॥

परं ज्ञानमयः सद्भिर्नामजात्यादिभिर्विभुः।

त्रयाणामपि लोकानां येन ख्यातिं गमिष्यति ।
न च तौ राममासाद्य शक्तौ स्थातुं कथञ्चन ॥ ११ ॥
न च तौ राघवादन्यो हन्तुमुत्सहते पुमान् ।
वीर्य्योत्सिक्तौ हि तौ पापौ कालपाशवशं गतौ ॥ १२ ॥

न योगवान् न युक्तोऽभून्नैव पार्थिव ! योक्ष्यते ॥
तस्यात्मपरदेहेषु सतोऽप्येकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ"—

इति जडभरतोक्त्यात्मस्वरूपमेव परमार्थश्रेयस्त्वेन दर्शितम् । तथैव

"आत्मा ध्येयः सदा भूप ! योगयुक्तैस्तथापरम् ।
श्रेयस्तस्यैव संयोगः श्रेयो यः परमात्मनः ॥"

इति उक्तं प्रघट्टकान्तरे । तथा जीवपरमात्मनोर्यः संयोग उपाधिनिर्गमरूपः स परं श्रेय इति तदर्थः ।

"विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥"

इति प्रघट्टकान्तरोक्तेः 'परमात्मात्मनोर्योगः परमार्थ इतीष्यते' तेनैवोक्तत्वाच्चेत्यलम् ॥ १० ॥

त्रयाणां निश्चित्यर्थः । येन मद्वाक्यादिना, आसाद्य युद्धे प्रत्येकः ॥ ११ ॥

न चेति । तत्र हेतुमाह; वीर्य्येत्यादि रामकर्तृकं वधं वक्ष्यामित्याह—कालेति * ॥ १२ ॥

---

* कालो यमः स एव पाशः तद्वशं गतौ ।

रामस्य राजशार्दूल ! न पर्य्याप्तौ महात्मनः।

न च पुत्त्रगतं * स्नेहं कर्त्तुमर्हसि पार्थिव ! ॥ १३ ॥

दशरात्रन्तु यज्ञस्य तस्मिन् रामेण राक्षसौ।

हन्तव्यौ विघ्नकर्त्तारौ मम यज्ञस्य वैरिणौ ॥ १४ ॥

अहं ते प्रतिजानामि हतौ तौ विद्धि राक्षसौ।

अहं वेद्मि महात्मानं रामं सत्यपराक्रमम् ॥ १५ ॥

वशिष्ठोऽपि महातेजा ये चेमे तपसि स्थिताः।

यदि ते धर्मलाभन्तु यशस्य परमं भुवि ॥ १६ ॥

स्थिरमिच्छसि राजेन्द्र ! रामं मे दातुमर्हसि।

रामस्य रामवीर्य्यस्य, पुत्त्रगतं पुत्त्रविषयं रामे इति शेषः। मा॰ तव पुत्त्रः, किं तर्हि ? दिव्यं एतत् तेज इति तात्पर्य्यम् ॥१३॥१४॥

तत्र हेतुमाह,—अहमिति। हताविति भूतप्रत्ययेन वध॰ सुकरत्वं व्यज्यते। रामं निरतिशयवैभवं विष्णुतेजोऽवतार॰ रूपम् ॥ १५ ॥

स्वज्ञाने संवादमाह,—वशिष्ठोऽपीत्यादि। तेऽपि एवं विदु॰ शेषः। ते इति त्वमित्यर्थः धर्मलाभं परमं यशश्च यदि स्थिरमिच्छ॰ सीत्यन्वयः। तेन रामदानं तवोपि पावदमित्याशयः ॥ १६ ॥

---

* "पुत्त्रकृतम्" इति वा पाठः।

यद्यभ्यनुज्ञां काकुत्स्थ ! ददते तव मन्त्रिणः ॥ १६ ॥
वसिष्ठप्रमुखाः सर्वे ततो रामं विसर्जय ।
अभिप्रेतमसंसक्तमात्मजं दातुमर्हसि ॥ १७ ॥
दशरात्रं हि यज्ञस्य रामं राजीवलोचनम् ।
नात्येति कालो यज्ञस्य यथायं मम राघव ! ॥ १८ ॥

मे मह्यं किञ्च मन्त्रिणां सम्मतेऽपि दातुमर्हसीत्याह,—यदीत्यादि । अभ्यनुज्ञां रामदानविषयकानुमतिम् * ॥ १६ ॥

ततः तदा अभिप्रेतं ममेष्टं तव च असंसक्तम् अतीतबाल्यत्वात् मातापितृसन्निरहितम् ईश्वरत्वात् क्वाप्यनासक्तमिति वक्ष्यम् ॥ १७ ॥

नापि अतिचिरविप्रयोगस्ते पुत्रेणेत्याह,—दशेति । यज्ञसम्बन्धि दशरात्रात्मकः काल एव राममपेक्षत-इति शेषः । हे राघव ! मम अयं यज्ञस्य कालः यथा यथोक्तं कालं नात्येति नातिक्रामति ततोऽधिको विलम्बो न भवतीत्यर्थः ॥ १८ ॥

---

* अहं वेद्मीत्यादिना रामस्य परत्वमेव विवृणोति,—महात्मानम् अप्राकृतदिव्यमङ्गलविग्रहं रामं नित्यावाप्तसमस्तकामतया आत्मन्येव परमानन्दरूपे रममाणं, यद्वा रमते चराचरेषु सर्वेषु भूतेष्वन्तर्यामितयेति रामम् । सत्यपराक्रमं सदैकरूपपराक्रमं, कालेऽपि निरवधिकपराक्रममिति यावत् । अहं प्रबलतरोपासनेन वश्यात्मा वेद्मि वेदाहमेतं पुरुषं पुराणमिति श्रुतिवादादभिजानामि महा-

तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः ।
इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ॥ १९ ॥
विरराम महातेजा विश्वामित्रो महामतिः ।
स तं निशम्य राजेन्द्रो विश्वामित्रवचः शुभम् ॥ २० ॥
शोकेन महताविष्टश्चचाल च मुमोह च ।
लब्धसंज्ञस्ततोत्थाय व्यषीदत भयान्वितः ॥ २१ ॥

इति हृदयमनोविदारणं
मुनिवचनं तदतीव शुश्रुवान् ।

तथेति । तथापि पूर्वश्लोकाभ्यामर्द्धम् आवृत्त्या सम्बध्यते यथा च हे राघव ! ममायं यज्ञस्य कालो नात्येति नातिपतेत् तथा कुरुष्व इत्यन्वयः । धर्मार्थसहितम्, अर्थो रामस्य यज्ञादिलाभरूपः ॥१९॥२०॥

चचाल कम्पः । ततोत्थायेति छान्दसं व्यषीदतेत्यप्येवम् । भयान्वितः दुःखनिमित्त-पुत्रवियोग-भयान्वितः ॥ २१ ॥

इतीति । अतीव अत्यर्थं हृदयस्य पुण्डरीकस्यान्तर्मनसः मनसोऽन्तःकरणस्य च विदारणं पीड़ाजनकं शुश्रुवान् शुश्राव, महान् नरपतिः सार्वभौम इति यावत् । महात्मा महाबुद्धिः व्यथितमना

तेजाः सरस्वतीवल्लभनन्दन श्रीत्यागिकवेरप्याननिविर्वसितोऽपि के वे येमे रामरहस्यवेदिनोऽगस्त्यपुत्रादयो ये येमे वसति विता वाग्वैभवभाण्डागारयः परमैकान्तिनोऽपि भागवीत्यत्र ।

नरपतिरभवत् महान् महात्मा
व्यथितमनाः प्रचचाल चासनात् ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
ऊनविंशः सर्गः ॥ १९ ॥

मूर्च्छितचित्तः अभवत् अवस्थातुमशक्तः आसनात् प्रचचाल च निः-
संज्ञः पपातेत्यर्थः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे ऊनविंशः सर्गः ॥ १८ ॥

विंशः सर्गः ।



तत् श्रुत्वा राजशार्दूलो विश्वामित्रस्य भाषितम् ।
मुहूर्त्तमिव निःसंज्ञः संज्ञावानिदमब्रवीत् ॥ १ ॥
ऊनषोडशवर्षो मे रामो राजीवलोचनः ।
न युद्धयोग्यतामस्य पश्यामि सह राक्षसैः ॥ २ ॥
इयमक्षौहिणी सेना यस्याहं पतिरीश्वरः ।

तदिति । निःसंज्ञ इव निष्प्राण इव रामे प्राकृतत्वबुद्ध्या राक्षसेभ्यो भयसम्भावनया दानप्रतिज्ञया च व्याकुलत्वात् मूर्च्छित इत्यर्थः । ततः संज्ञावान् गतमूर्च्छ इदं वक्ष्यमाणमब्रवीत् ॥ १ ॥

ऊनेति । किञ्चिदूनानि षोडशवर्षाणि यस्य स इदञ्च युद्धायोग्यत्वं प्रतिपादितं 'षोडशवर्षः क्षत्रियकुमार एव कवचधरो युद्धार्हः' इति शास्त्रात् । इति कतकमतम् । अन्ये तु 'ऊनषोडशवर्षशब्दस्य द्वादशवर्षः इत्यर्थः—कौशिकयागरक्षार्थमागतस्य रामस्य वयोविशेषमुद्दिश्य—'ऊनो द्वादशवर्षोऽयमकृतास्त्रश्च राघवः' इत्यारण्यकाण्डे रावणं प्रति मारीचोक्तेः—इत्याहुः । वास्तवे— 'बालो षोडशवर्षोऽयम्' इत्येव पाठः । रावणस्य भयातिशयार्थं वा मारीचस्यात्युक्तिः सा इति कतकाशयः ॥ २ ॥

अनया सहितो गत्वा योद्धाहं तैर्निशाचरैः ॥ ३ ॥
इमे शूराश्च विक्रान्ता भृत्या मेऽस्त्रविशारदाः ।
योग्या रक्षोगणैर्योद्धुं न रामं नेतुमर्हसि ॥ ४ ॥
अहमेव धनुष्पाणिर्गोप्ता समरमूर्द्धनि ।
यावत् प्राणान् धरिष्यामि तावत् योत्स्ये निशाचरैः ॥५॥
निर्विघ्ना व्रतचर्य्या सा भविष्यति सुरक्षिता ।
अहं तत्र गमिष्यामि न रामं नेतुमर्हसि ॥ ६ ॥

इयमिति ।

"एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥
पत्तिं तु त्रिगुणामेकां विदुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विपश्चिद्भिः ॥
चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥"

इति । अक्षौहिणीति सन्धिरार्षः । पतिः पालकः ईश्वरः स्वामी यो-द्धेत्यस्य चास्तीति शेषः ॥ ३ ॥ ४ ॥

गोप्ता रक्षकश्चेति शेषः । प्राणान् धरिष्यामि जीविष्यामी-त्यर्थः ॥ ५ ॥ ६ ॥

बालो ह्यकृतविद्यश्च न च वेत्ति बलाबलम् ।
न चास्त्रबलसंयुक्तो न च युद्धविशारदः ॥ ७ ॥
न चासौ रक्षसां योग्यः कूटयुद्धा हि राक्षसाः ।
विप्रयुक्तो हि रामेण मुहूर्त्तमपि नोत्सहे ॥ ८ ॥
जीवितुं मुनिशार्दूल ! न रामं नेतुमर्हसि ।
यदि वा राघवं ब्रह्मन् ! नेतुमिच्छसि सुव्रत ! ॥ ९ ॥
चतुरङ्गसमायुक्तं मया सह च तं नय ।
षष्टिवर्षसहस्राणि * जातस्य मम कौशिक ! ॥ १० ॥

रामगमने अनुपपत्तिमाह,—बाल इत्यादि । ऊनषोडशवर्षत्वादेव बालत्वव्यवहारः । स्नेहातिशयेन च तेनैव अकृतविद्यत्वव्यवहारः । अन्यथा 'सर्ववेदविदः शूराः—सर्वे ज्ञानोपसम्पन्नाः' इति पूर्वोक्त्या विरोधः स्यात् ॥ ७ ॥

न चेति । रक्षसामित्यस्य रणे इति शेषः । कूटं कपटं रामनयने बाधकमप्याह—विप्रेत्यादि ॥ ८ ॥

उक्तानुपपत्तिपरिहारायाह,—यदि वेति ॥ ९ ॥

इतोऽपि रामनयनमयुक्तमित्याह,—षष्टिरिति । अतीतानीति शेषः ॥ १० ॥

---

* 'नववर्षसहस्राणि'

कृच्छ्रेणोत्पादितस्त्वाहं न रामं नेतुमर्हसि ।
चतुर्णामात्मजानां हि प्रीतिः परमिका मम * ॥ ११ ॥
ज्येष्ठे धर्मप्रधाने च न रामं नेतुमर्हसि ।
किंवीर्य्या राक्षसास्ते च कस्य पुत्राश्च के च ते ॥ १२ ॥

कृच्छ्रेण दुःखेन क्वचित् 'दुःखेन' इत्येव पाठः । यज्ञदीक्षादि-लक्षणेन परमिका अतिशयिता, स्वार्थे कः । चतुर्णामिति निर्द्धारणे षष्ठी । तेषां मध्ये अस्मिन् मम प्रीतिरधिकेत्यर्थः ॥ ११ ॥

प्रीत्याधिक्ये कारणमाह,—ज्येष्ठेति । अनेन राज्ययोग्यता ध्वनिता । धर्मप्रधाने त्रिपुरुषार्थेषु धर्माधीनप्रवृत्तिके राक्षसैर्युद्धे हि प्राणिकनाशसम्भावनया राज्यविच्छेद एव भवेत् । कीदृशा

---

* 'प्राणैः प्रियतरा ब्रह्मन् ! ममैते देवरूपिणः ।
एभिर्विना न जीवेयम् इति मे निश्चिता मतिः ॥
त्यक्त्वा चान्यान् सुतान् रामे प्राणाः सम्प्रति मे स्थिताः ।
गुणाभिरामे लोकस्य सोमवत् प्रियदर्शने ॥
उदारगुणसम्पन्नं मनोहृदयनन्दनम् ।
प्राणैः प्रियतरं पुत्रं न मे त्वं नेतुमर्हसि ॥
प्रणिपत्याभियाचे त्वां कृपणः पुत्रलालसः ।
ज्येष्ठं पुत्रं न मे रामं भगवन् ! नेतुमर्हसि ॥'

कथंप्रमाणाः के चैतान् रक्षन्ति मुनिपुङ्गव!।
कथञ्च प्रतिकर्त्तव्यं तेषां रामेण रक्षसाम् ॥ १३ ॥
मामकैर्वा बलैर्ब्रह्मन्! मया वा कूटयोधिनाम्।
सर्वं मे शंस भगवन्! कथं तेषां मया रणे ॥ १४ ॥
स्थातव्यं दुष्टभावानां वीर्य्योत्सिक्ता हि राक्षसाः।
तस्य तद् वचनं श्रुत्वा विश्वामित्रोऽभ्यभाषत ॥ १५ ॥
पौलस्त्यवंशप्रभवो रावणो नाम राक्षसः।
स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् ॥ १६ ॥
महाबलो महावीर्य्यो राक्षसैर्बहुभिर्वृतः।
श्रूयते च महाराज! रावणो राक्षसाधिपः ॥ १७ ॥

प्रजापालनस्य नान्यतो निर्वहेत्। अतो रामो नेतुमयोग्यः। अथ रामनयनस्य सर्वथा अयोग्यत्वं प्रतिपादयितुं रक्षकस्वरूपं पृच्छति,—किंवीर्य्या इति। के च ते किंनामानः? ॥ १२ ॥

कथंप्रमाणाः कीदृक्शरीरप्रमाणाः? रक्षन्ति यज्ञमिति शेषः। प्रतिकर्त्तव्यं प्रतिविधेयं, संहारः कथं कर्त्तव्य इत्यर्थः ॥ १३ ॥

मया रणे इत्यत्र प्रतिकर्त्तव्यमित्यनुषङ्गः ॥ १४ ॥

स्थातव्यमिति। दुष्टभावानां तेषां सम्बन्धिनि रणे मया कथं स्थातव्यमिति च शंस इति सम्बन्धः। तत्र हेतुः वीर्य्योत्कटा इत्यादि ॥ १५ ॥

प्रसिद्धत्वार्थं रावण इत्याद्य,—श्रूयते इत्यादि ॥ १७ ॥

साक्षाद् वैश्रवणभ्राता पुत्रो विश्रवसो मुनेः ।
यदा न खलु यज्ञस्य विघ्नकर्त्ता महाबलः ॥ १८ ॥
तेन सञ्चोदितौ तौ तु राक्षसौ च महाबलौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥ १९ ॥
इत्युक्तो मुनिना तेन राजोवाच मुनिं तदा ।
न हि शक्तोऽस्मि संग्रामे स्थातुं तस्य दुरात्मनः ॥ २० ॥
स त्वं प्रसादं धर्मज्ञ ! कुरुष्व मम पुत्रके ।
मम चैवाल्पभाग्यस्य दैवतं हि भवान् गुरुः ॥ २१ ॥
देवदानवगन्धर्वा यक्षाः पतगपन्नगाः ।
न शक्ता रावणं सोढुं किं पुनर्मानवा युधि ॥ २२ ॥
स तु वीर्य्यवतां वीर्य्यमादत्ते युधि रावणः ।

यतो महाबलः, ततो यदा अनादरात् स्वयं यज्ञस्य विघ्नकर्त्ता न खलु, अनादरात्तु स्वयं विघ्नाय नागच्छति, तदा—॥ १८ ॥

तेन रावणेन प्रेरितौ मारीचसुबाहू यज्ञविघ्नं करिष्यत इति सम्बन्धः ॥ १९ ॥

अथ रावणनाम श्रुत्वा स्वयमेव निःप्रतीकारमवधार्य्य राजा आह,—इत्युक्त इति ॥ २० ॥

अल्पभाग्यस्य ममाभीष्टसिद्धिमाकरवाद्दिति शेषः । प्रसादमेवाह,—दैवतमित्यादि ॥ २१ ॥ २२ ॥

तेन चाहं न शक्तोऽस्मि संयोद्धुं तस्य वा बलैः ॥ २३ ॥
सबलो वा मुनिश्रेष्ठ ! सहितो वा ममात्मजैः ।
कथमप्यमरप्रख्यं संग्रामाणामकोविदम् ॥ २४ ॥
बालं मे तनयं ब्रह्मन् ! नैव दास्यामि पुत्रकम् ।
अथ कालोपमौ युद्धे सुतौ सुन्दोपसुन्दयोः ॥ २५ ॥
यज्ञविघ्नकरौ तौ ते नैव दास्यामि पुत्रकम् ।
मारीचस्य सुबाहुश्च वीर्य्यवन्तौ सुशिक्षितौ ॥ २६ ॥

स त्विति । वीर्य्यमादत्ते नाशयतीत्यर्थः । अतस्तत्संग्रामाद् वैमुख्यमपि न दोषायेति भावः । तस्य बलैः मारीचादिभिः ॥ २३ ॥

हे मुनिश्रेष्ठ ! सबलः ससैन्यः, मम पुत्रैः सहितो वा भवामपि तेन योद्धुं न शक्त इत्यनुषङ्गः । अस्तु वा कथञ्चिद् भवतस्तथा सामर्थ्यं, पुत्रन्तु सर्वथा न दास्यामीत्याह,—कथमपीत्यादि । अमरप्रख्यम् अमरतुल्यरूपमेव नत्वमरमिति तात्पर्य्यं न वै दास्यामीत्यन्वयः ॥ २४ ॥

अतिदुःखितोक्तित्वात् तस्य पुत्रकशब्दयोः पौनरुक्त्यं न दोषः । पुत्रकमित्यनुकम्पायां कन् अदाने हेत्वन्तरमप्याह,—अथेत्यादि । यतः सुन्दोपसुन्दपुत्रौ कालोपमौ यमतुल्यौ मारीचसुबाहू दैत्यकुलजसुन्दोपसुन्दाभ्यां यक्षकन्यायां जातत्वेन अगस्त्यशापेन च अतिक्रूरतमौ राक्षसत्वं प्राप्तौ यतस्तौ यज्ञविघ्नकरौ, अतः सुतं नैव दास्यामीत्यन्वयः ॥ २५ ॥ २६ ॥

तयोरन्यतरं योद्धुं यास्यामि ससुहृद्गणः ।
अन्यथा त्वनुनेष्यामि भवन्तं ससुहृद्गणः ॥ २७ ॥

इति नरपतिजल्पनात् द्विजेन्द्रं
कुशिकसुतं सुमहान् विवेश मन्युः ।
सुहुत इव मखेऽग्निराज्यसिक्तः
समभवदुज्ज्वलितो महर्षिवह्निः ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
विंशः सर्गः ॥ २ ॥

अन्यथा भवता ममानयने । अनुनेष्यामि रामाममनायेति शेषः ॥ २७ ॥

इतीति । सुहुतः प्रथमं सुष्ठुसमिद्भिः हुतः पश्चादाज्यसिक्तो ऽग्निरिवेति योजना । उज्ज्वलितः रोषज्वालाज्वलितबर्हिर्युक्तः ॥२८॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे विंशः सर्गः ॥ २० ॥

एकविंशः सर्गः ।

तत् श्रुत्वा वचनं तस्य स्नेहपर्य्याकुलाक्षरम् ।
समन्युः कौशिको वाक्यं प्रत्युवाच महीपतिम् ॥ १ ॥

पूर्वमर्थं प्रतिश्रुत्य प्रतिज्ञां हातुमिच्छसि ।
राघवाणाम् अयुक्तोऽयं कुलस्यास्य विपर्य्ययः ॥ २ ॥

यदीदं ते क्षमं राजन् ! गमिष्यामि यथागतम् ।
मिथ्याप्रतिज्ञः काकुत्स्थ ! सुखी भव सुहृद्वृतः ॥ ३ ॥

तस्य रोषपरीतस्य विश्वामित्रस्य धीमतः ।
चचाल वसुधा कृत्स्ना देवानाञ्च भयं महत् ॥ ४ ॥

तदिति । स्नेहेन पर्य्याकुलानि गद्गदानि अक्षराणि यस्मिन् तत् तस्य वचनं श्रुत्वेत्यन्वयः ॥ १ ॥

अयं विपर्य्ययः प्रतिज्ञाहानिरूपः राघवाणामयुक्तः, यतोऽयम् अस्य कुलस्य विपर्य्ययो नाशः । विपर्य्ययपदार्थविवक्षा ॥ २ ॥

यदि इदं प्रतिज्ञाहानिरूपं क्षमं युक्तम्, इदं तव वचनं यदि क्षमं सत्यं, तदा यथागतं गमिष्यामि । मिथ्यावादी त्वं सुहृद्वृतः सुखी भव इति विपरीतलक्षणया उक्तिः ॥ ३ ॥

धीमत इत्यत्र रोषं दृष्ट्वेति शेषः । जगदन्यथाकरणसमर्थोऽयम् अद्य क्रुद्धः किं करिष्यति ? इति देवानां भयम् ॥ ४ ॥

महद्रूपं तु विज्ञाय जगत् सर्वं महान् ऋषिः ।
नृपतिं सुव्रतो धीरो वसिष्ठो वाक्यमब्रवीत् ॥ ५ ॥
इक्ष्वाकूणां कुले जातः साक्षात् धर्म इवापरः ।
धृतिमान् सुव्रतः श्रीमान् न धर्मं हातुमर्हसि ॥ ६ ॥
त्रिषु लोकेषु विख्यातो धर्मात्मा इति राघवः ।
स्वधर्मं प्रतिपद्यस्व नाधर्मं वोढुमर्हसि ॥ ७ ॥
प्रतिश्रुत्य करिष्येति उक्तं वाक्यमकुर्वतः ।
इष्टापूर्त्तवधो भूयात् तस्मात् रामं विसर्जय ॥ ८ ॥
कृतास्त्रमकृतास्त्रं वा नैनं शक्ष्यन्ति राक्षसाः ।
गुप्तं कुशिकपुत्रेण ज्वलनेनामृतं यथा ॥ ९ ॥

महद्रूपम् अतिशयेन महत् । जगत् त्रैलोक्यम् ॥ ५ ॥

साक्षात् धर्म इव । इव-शब्द एवार्थे । दृढारोपं रूपकमिदम् ॥ ६ ॥

स्वधर्मं सत्यप्रतिज्ञत्वम् ॥ ७ ॥

इष्टम् अश्वमेधादियागः । आपूर्तं वापीकूपादिनिर्माणं, तद्-वधः तत्-अवनाशः भूयात् भवेत् भविष्यतीति यावत् । करिष्ये इति प्रतिश्रुत्य प्रतिज्ञाय, सन्धिरार्षः । उक्तं वाक्यम् अकुर्वतः अननुतिष्ठतः ॥ ८ ॥

कृतास्त्रं शिक्षितास्त्रम् । शक्ष्यन्ति सहिष्यन्ते । [illegible]

एष विग्रहवान् धर्म एष वीर्य्यवतां वरः ।
एष विद्याधिको लोके तपसश्च परायणम् ॥ १० ॥
एषोऽस्त्रान् विविधान् वेत्ति त्रैलोक्ये सचराचरे ।
नैनमन्यः पुमान् वेत्ति न च वेत्स्यन्ति केचन ॥ ११ ॥
न देवा नर्षयः केचित् नामरा न च राक्षसाः ।
गन्धर्वयक्षप्रवराः स-किन्नर-महोरगाः ॥ १२ ॥
सर्वास्त्राणि कृशाश्वस्य पुत्राः परमधार्मिकाः ।
कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति ॥ १३ ॥

शेषो वा । अग्निना रक्षितममृतमिवेत्युपमा । अनेन पुत्रविपत्ति-भीत्यपनयः ॥ ९ ॥

न केवलं विश्वामित्रकृतसंरक्षणेनैव रामस्य दुर्धर्षत्वं, किन्तु स्वतोऽपीत्याह,—रामविश्वामित्रयोः श्लिष्टवर्णनेन । एषः रामः विश्वामित्रश्च, रामपक्षे विद्याधिकः सहजज्ञानशक्तिः ; तपसः मननादेः परायणं प्राप्य । विश्वामित्रपक्षे तपस आश्रयः ॥ १० ॥

रामपक्षे अन्यः पुमान् अविद्यावृतः पुमानित्यर्थः । विश्वा-मित्रपक्षे एनम् अस्त्रगणम् ॥ ११ ॥ १२ ॥

न तु देवाद्यनवगत-सर्वास्त्रप्राप्तिः कवेः कथम् ? इत्यत आह,—सर्वास्त्राणीति । कृशाश्वः प्रजापतिषु एकः । 'परमधार्मिका' इति पाठे परमधार्मिकप्रतिष्ठावन्त इत्यर्थः । एतेनापि दुर्लभत्वं ज्ञापितम् । दत्ताः शिवेनेति शेषः । प्रशासति प्रशासितुम् इत्यर्थः । आर्षम् ॥१३॥

तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुता-सुताः ।
नैकरूपा महावीर्य्या दीप्तिमन्तो जयावहाः ॥ १४ ॥
जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे ।
ते सुतेऽस्त्राणि शस्त्राणि शतं परमभास्वरम् ॥ १५ ॥
पञ्चाशतं सुतान् लेभे जया लब्धवरा वरान् ।
बधायासुरसैन्यानाम् अप्रमेयानरूपिणः ॥ १६ ॥
सुप्रभाऽजनयच्चापि पुत्रान् पञ्चशतं पुनः ।
संहारान् नाम दुर्धर्षान् दुराक्रामान् बलीयसः ॥ १७ ॥
तानि चास्त्राणि वेत्त्येष यथावत् कुशिकात्मजः ।
अपूर्वाणाञ्च जनने शक्तो भूयश्च धर्मवित् ॥ १८ ॥
तेनास्य मुनिमुख्यस्य धर्मज्ञस्य महात्मनः ।

अस्त्राणां मातृप्राशस्त्यमप्याह,—तेऽपीति । प्रजापतिसुते दक्ष-कन्ये, तयोः सुता नैकरूपा अनेकरूपाः ॥ १४ ॥

ते सुते सुवाते इत्यर्थः । शस्त्राणि परविशसनकर्तॄणि ॥१५॥

वरान् श्रेष्ठान् अप्रमेयान् गुणैयत्तया अपरिच्छेद्यान् । अरूपिणः अदृश्यमानरूपान् ॥ १६ ॥

संहारान् अन्वर्थसंहारनामकान् । दुर्धर्षान् परैः सोढु-मशक्यान् । दुराक्रामान् दीर्घ आर्षः । दुराक्रामान् अमोघान् ॥ १७ ॥

अपूर्वाणाम् अस्त्रविद्यानिशेषणामिति शेषः ॥१८॥१९॥२०॥

न किञ्चिदस्त्यविदितं भूतं भव्यञ्च राघव ! ॥ १९ ॥
एवंवीर्य्यो महातेजाः विश्वामित्रो महायशाः ।
न रामगमने राजन् ! संशयं गन्तुमर्हसि ॥ २० ॥
तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः ।
तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ॥ २१ ॥
इति मुनिवचनात् प्रसन्नचित्तो
रघुवृषभस्तु मुमोद पार्थिवः ।
गमनमभिरुरोच राघवस्य
प्रतिथयशाः कुशिकात्मजाय बुद्ध्या ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे एकविंशः सर्गः ॥ २१ ॥

वस्तुतो रक्षोनिग्रहे शक्तोऽपि विश्वामित्रः त्वत्पुत्रानुग्रहायैव त्वां याचते इत्याह,—तेषामिति। हितम् अतिरहस्यास्त्रदुर्लभानेकविद्याप्रदानादिरूपम् ॥ २१ ॥

मुमोदेति। परस्मैपदम् आर्षम् । चकारार्थः। प्रसन्नचित्त इत्युत्तरं योज्यः। राघवस्य रामस्य कुशिकात्मजाय रामं दातुं बुद्ध्या अचिन्तयदिति शेषः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे एकविंशः सर्गः ॥ २१ ॥

द्वाविंशः सर्गः ।



तथा वसिष्ठे ब्रुवति राजा दशरथः स्वयम् ।
प्रहृष्टवदनो राममाजुहाव सलक्ष्मणम् ॥ १ ॥
कृतस्वस्त्ययनं मात्रा पित्रा दशरथेन च ।
पुरोधसा वसिष्ठेन मङ्गलैरभिमन्त्रितम् ॥ २ ॥
स पुत्रं मूर्ध्न्युपाघ्राय राजा दशरथस्तदा ।
ददौ कुशिकपुत्राय सुप्रीतेनान्तरात्मना ॥ ३ ॥
ततो वायुः सुखस्पर्शो नीरजस्को ववौ तदा ।
विश्वामित्रगतं रामं दृष्ट्वा राजीवलोचनम् ॥ ४ ॥

तथेति । सलक्ष्मणं रामम् आजुहाव, तयोरविनाभावत्वा-दिति भावः ॥ १ ॥

कृतस्वस्त्ययनं [illegible] मङ्गलैः मङ्गलसूचकैर्मन्त्रैः [illegible] [illegible] अभिमन्त्रितं बोधितम् इत्यर्थः । तदे-[illegible] पठितम् ॥ २ ॥

राजापि [illegible] सुप्रीतमनाः सन् रामं ददौ ॥ ३ ॥

प्रयाणे मङ्गलमाह,—ततः इति । ववौ इत्यस्य [illegible] इति शेषः । विश्वामित्रगतं तत्सन्निकृष्टं, राजीवं पद्मम् ॥ ४ ॥

पुष्पवृष्टिर्महत्यासीत् देवदुन्दुभिनिस्वनैः ।
शङ्खदुन्दुभिनिर्घोषः प्रयाते तु महात्मनि ॥ ५ ॥
विश्वामित्रो ययावग्रे ततो रामो महायशाः ।
काकपक्षधरो धन्वी तञ्च सौमित्रिरन्वगात् ॥ ६ ॥
कलापिनौ धनुष्पाणी शोभयानौ दिशो दश ।
विश्वामित्रं महात्मानं त्रिशीर्षाविव पन्नगौ ॥ ७ ॥
अनुजग्मतुरक्षुद्रौ पितामहमिवाश्विनौ ।

प्रयाते प्रयाणोन्मुखे स्वप्रयोजनोपक्रमात् देवानां दुन्दुभिस्वन-सहिता पुष्पवृष्टिः, शङ्खादिघोषस्तु स्वनगरजः ॥ ५ ॥

धन्वी धनुर्विद्याकृतश्रमः ॥ ६ ॥

कलापिनौ सतूणीरौ * शोभयानौ प्रकाशयन्तौ स्वतेजसा शुभभाव आर्षः । त्रिशीर्षाविव पन्नगौ स्कन्धस्थितधनुषा पृष्ठबद्ध-तूणीरेण मस्तकेन च त्रिशीर्षत्वं यद्वा पक्षिणं तूणीरद्वयधारणात् त्रिशीर्षत्वं धनुषः पार्श्वयुक्तत्वात् । अथेदं तूणीरादि देवेन गरुडेन दत्तं रामाय ताड़कासुबाहुवधाय मारीचस्य धनुषि पातनाय च नहि प्राकृतशस्त्रसाध्यमेतत्, तदुक्तं पाद्मे,—

"धन्वी तार्क्ष्यः समागम्य चीरि चापादि [illegible] ।
सर्वभूतैरदृश्यः सन् दत्त्वा ताभ्यां पुनर्ययौ ॥"

इति अस्त्राणि शस्त्राणि स्वच्छचर्मतूणीरद्वयादीनि ॥ ७ ॥

---

* कलापो भूषणे बर्हे तूणीरे संहतावपि [illegible]

अनुयातौ श्रिया दीप्तौ शोभयन्तावनिन्दितौ * ॥ ८ ॥

तदा कुशिकपुत्रन्तु धनुष्पाणी स्वलङ्कृतौ ।
बद्धगोधाङ्गुलित्राणौ खड्गवन्तौ महाद्युती ॥ ९ ॥

कुमारौ चारुवपुषौ भ्रातरौ रामलक्ष्मणौ ।
अनुयातौ श्रिया दीप्तौ शोभयेतामनिन्दितौ ॥ १० ॥

स्थाणुं देवमिवाचिन्त्यं कुमाराविव पावकी ।
अध्यर्द्धयोजनं गत्वा सरय्वा दक्षिणे तटे ॥ ११ ॥

रामेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत ।
गृहाण वत्स ! सलिलं मा भूत्कालस्य पर्य्ययः ॥ १२ ॥

अनुगतौ अनल्परूपवीर्य्यादिमन्तौ शोभयन्तौ विश्वामित्रमिति शेषः ॥ ८ ॥

बद्धं गोधचर्मनिर्मितम् अङ्गुलित्राणं ययोस्तौ गोधाङ्गुलित्राणमिति क्वचित् अङ्गुलित्राणस्य पौनरुक्त्यापत्तेश्चिन्त्यम् ॥ ९ ॥

शोभयेतामित्यत्रभावः स्पष्टः ॥ १० ॥

स्थाणुं रुद्रं पावकी स्कन्दविशाखौ अध्यर्द्धयोजनम् सार्द्धैकयोजनं षट् क्रोशमिति यावत् ॥ ११ ॥

यावत् दूरगमनेन बालकयोः क्षुत् तृट् पीडाप्रादुर्भावस्यावश्यकत्वात् महर्षिर्विनाप्यर्थं परमहत्तये दिव्ये विद्ये प्रादि

---

* पुस्तकान्तरे अपरिदृष्टमिदं श्लोकार्द्धम् ।

मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा ।

न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः ॥ १३ ॥

न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः ।

न बाह्वोः सदृशो वीर्य्ये पृथिव्यामस्ति कश्चन ॥ १४ ॥

त्रिषु लोकेषु वा राम ! न भवेत् सदृशस्तव ।

बलामतिबलाञ्चैव पठतस्तात ! राघव ! ॥ १५ ॥

न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये ।

वत्स रामेत्यादि । सलिलं गृहाण गृहाचमनं कुरु कालस्य अन्न-भोजनकालस्य पर्य्ययोऽतिक्रमः ॥ १२ ॥

मन्त्रग्रामं बलाविद्यासंघकं मन्त्रसमूहं बला अतिबलाश्च-रूप। अन्ये तु प्रागुक्तदिव्यास्त्रजातरूपं मन्त्रसमूहं, तथा प्रकृतोप-योगिन्यौ बला अतिबलाख्ये च विद्ये इत्यर्थः । यत्तु [illegible] बलाति-बलयोरेव दानम् अन्येषां तु दानम् अग्रे भविष्यतीत्यर्थः । [illegible] न्निष्ठुरवचनं [illegible], [illegible] अ-न्योऽपि दर्शनात् [illegible] । [illegible], [illegible]-ज्वरोऽपि न, विपर्य्ययः [illegible] [illegible] इति शेषः ॥ १३ ॥

प्रमत्तम् [illegible] सामीप्ये भविष्यति यद् । [illegible] ॥ १४ ॥

न [illegible] पृथिव्यामित्यत्र [illegible] ॥ १५ ॥

नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ ! ॥ १६ ॥
एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव ।
बला चातिबला चैव सर्वज्ञानस्य मातरौ ॥ १७ ॥
क्षुत्पिपासे न ते राम ! भविष्येते नरोत्तम ! ।
बलामतिबलाञ्चैव पठतः पथि राघव ! * ॥ १८ ॥
विद्याद्वयमधीयाने यशश्चाथ भवेद्भुवि ।
पितामहसुते ह्येते विद्ये तेजःसमन्विते ॥ १९ ॥
प्रदातुं † तव काकुत्स्थ ! सदृशस्त्वं हि पार्थिव ! ।

ज्ञानं शास्त्रज्ञानं, बुद्धिनिश्चयः ऐहिकविषयकः, [illegible] प्रति-वक्तव्ये उत्तरे समर्थः ॥ १६ ॥

तव सदृशो न भविता भुवीति शेषः । सर्वज्ञानस्य मातराविति [illegible] सर्वज्ञान[illegible] ॥ १७ ॥ १८ ॥

विद्याद्वयमधीयाने त्वयीति शेषः । यशश्चाप्यतुलं भुवीति [illegible] भविष्यतीत्यपि शेषः । [illegible] [illegible] विद्ये [illegible] । नतु [illegible] ॥ १९ ॥

---

* "[illegible] सर्वलोकेषु [illegible] रघुनन्दन ।" इति पुस्तकान्तरस्थितः पाठः ।

† "प्रदाने" इति वा पाठः ।

कामं बहुगुणाः सर्वे त्वय्येते नात्र संशयः ॥ २० ॥
तपसा संभृते चैते बहुरूपे भविष्यतः ।
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः ॥ २१ ॥
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः ।
विद्यासमुदितो रामः शुशुभे भीमविक्रमः * ॥ २२ ॥
सहस्ररश्मिर्भगवान् शरदीव दिवाकरः ।
गुरुकार्याणि सर्वाणि नियुज्य कुशिकात्मजे ।
ऊषुस्तां रजनीं तत्र सरय्वां सुसुखं त्रयः ॥ २३ ॥

प्रदातुं मम बुद्धिरिति शेषः । सदृशः तद्दानयोग्य इत्यर्थः । एते एतद्विद्याप्रदानयोग्याः बह्विति लुप्तविभक्तिकं बहव इत्यर्थः विपुला इति यावत् ॥ २० ॥

तपसा मदीयेन संभृते पूर्णे बहुरूपे शाखोपशाखत्वात् अधिकफलप्रदे । यद्वा तपसा सर्वतपःप्राप्यत्वेन तपोरूपेण भवता संभृते एते इत्यर्थः । जलं स्पृष्ट्वा आचम्य ॥ २१ ॥

विद्यासमुदितः विद्यासम्बद्धः स्वतो विक्रमवानपि विद्यासम्बन्धात् अधिकविक्रम इत्यर्थः ॥ २२ ॥

सहस्रेत्यादि पूर्वान्वयि । कुशिकात्मजे विश्वामित्रे गुरुकार्याणि

---

* "भूरिविक्रमः" इति वा पाठः ।

दशरथतनयलक्ष्मणाभ्यां
तृणशयनेऽनुचिते तदोषिताभ्याम्।
कुशिकसुतवचोऽनुलालिताभ्यां
सुखमिव सा विबभौ विभावरी॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
द्वाविंशः सर्गः ॥ २२ ॥

गुरुविषयाणि कार्य्याणि पूर्वाध्यायी पश्चात् सन्निवेशीन्यादीनि तानि सर्वाणि नियुज्य उपदिश्येत्यर्थः। समस्तपाठे गुरुकार्य्याणि पादोपसंग्रहणादीनि कुशिकात्मजे नियुज्य कृत्वेत्यर्थः। सरय्वां तत्तीरे ॥ २३ ॥

दशरथेत्यादि श्लोकः चतुर्थी। तृणाद्यनुचितशयनोषितयोरपि रामयोः सुखसुप्तत्वे हेतुः कुशिकसुतवचोनुलालितत्वं विबभौ व्युष्टेति यावत् * ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

---

* श्लोकोऽयं नास्त्याकरे।

त्रयोविंशः सर्गः।



प्रभातायां तु शर्वर्य्यां विश्वामित्रो महामुनिः।
अभ्यभाषत काकुत्स्थं शयानं पर्णसंस्तरे ॥ १ ॥
कौसल्यासुप्रजा राम ! * पूर्वा सन्ध्या प्रवर्त्तते।
उत्तिष्ठ नरशार्दूल ! कर्त्तव्यं दैवमाह्निकम् ॥ २ ॥
तस्यर्षेः परमोदारं वचः श्रुत्वा नरोत्तमौ।
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् ॥ ३ ॥

प्रभातायामिति। पर्णसंस्तरे मृदुपर्णादिपरिकल्पिते शयनीये पूर्वश्लोके तु शयन इत्युपलक्षणं बोध्यम् ॥ १ ॥

कौसल्येति। हे राम ! त्वया पुत्रेण कौसल्या सुपुत्रा शोभनपुत्रवती अतस्तादृशस्य सुपुत्रस्य तव अस्मिन् समये निद्रा अनुचिता यतः पूर्वा सन्ध्या प्रातःसन्ध्या प्रवर्त्तते अत उत्तिष्ठ। दैवतं देवताध्यानम् आह्निकं शौचादि क्रिया ॥ २ ॥

स्नात्वा कृतोदकौ कृतार्घ्यदानौ इदं तावत्सर्वान्तकर्त्तव्यक्रियामात्रोपलक्षणं, परमं जपं सावित्रीम् ॥ ३ ॥

---

* "कौसल्यामातरुत्तिष्ठ" इति वा पाठः।

कृताञ्जलिकौ महावीर्य्यौ विश्वामित्रं तपोधनम् ।
अभिवाद्याभिसंहृष्टौ गमनायोपतस्थतुः ॥ ४ ॥
तौ प्रयातौ महावीर्य्यौ दिव्यां त्रिपथगां नदीम् ।
ददृशाते ततस्तत्र सरय्वाः सङ्गमे शुभे ॥ ५ ॥
तत्राश्रमपदं पुण्यमृषीणां भावितात्मनाम् ।
बहुवर्षसहस्राणि तप्यतां परमं तपः ॥ ६ ॥
तं दृष्ट्वा परमप्रीतौ राघवौ पुण्यमाश्रमम् ।
ऊचतुस्तं महात्मानं विश्वामित्रमिदं वचः ॥ ७ ॥
कस्यायमाश्रमः पुण्यः कोऽस्मिन् वसते पुमान् ।
भगवन् ! श्रोतुमिच्छावः परं कौतूहलं हि नौ ॥ ८ ॥
तयोस्तद् वचनं श्रुत्वा प्रहस्य मुनिपुङ्गवः ।
अब्रवीत् श्रूयतां राम ! यस्यायं पूर्व आश्रमः ॥ ९ ॥

उपतस्थतुः सम्मुखस्थितावित्यर्थः ॥ ४ ॥

प्रयातौ गच्छन्तौ ॥ ५ ॥

तत्र गङ्गासरयूसङ्गमप्रदेशे तप्यतां तपतां, यः छान्दसः । ऋषीणाम् आश्रमपदं ददृशाते इत्यनुकर्षः ॥ ६ ॥

तं परमरमणीयम् ॥ ७ ॥

वसते वसति तङ् छान्दसः ॥ ८ ॥

प्रहस्य बालकवचनश्रवणजसन्तोषात् हासः, सर्वेषोऽप्येवं बाल-

कन्दर्पो मूर्त्तिमानासीत् काम इत्युच्यते बुधैः ।
तपस्यन्तमिह स्थाणुं नियमेन समाहितम् ॥ १० ॥
कृतोद्वाहन्तु देवेशं गच्छन्तं समरुद्गणम् ।
धर्षयामास दुर्मेधा हुङ्कृतश्च महात्मना ॥ ११ ॥
अवध्यातश्च रुद्रेण चक्षुषा रघुनन्दन ! ।
व्यशीर्य्यन्त शरीरात्स्वात् सर्वगात्राणि दुर्मतेः ॥ १२ ॥
तत्र गात्रं हतं तस्य * निर्दग्धस्य महात्मना ।
अशरीरः कृतः कामः क्रोधात् देवेश्वरेण ह ॥ १३ ॥

यतीति वा । यस्य पूर्वः यस्य पूर्वकालाधिष्ठेयः अभूत स श्रूयतामित्यन्वयः ॥ ९ ॥

मूर्त्तिमान् शरीरधरः समाहितं समाहितचित्तं स्थाणुं वत्स ॥१०॥

कृतोद्वाहं समाधेः कृतव्युत्थानं कालोचितविलासदेशं गच्छन्तं देवेशं दुर्मेधाः कामः धर्षयामास चित्तविकारोत्पादनेन अभिभूतवान् ततो महात्मना वत्स्येण ख्यातपराक्रमेन हुङ्कृतः चक्षुषा अवध्यातो दग्धश्चेत्युत्तरेणान्वयः ॥ ११ ॥

व्यशीर्य्यन्त विशीर्णानि सर्वगात्राणि सर्वावयवाः ॥ १२ ॥

तत्र प्रसिद्धतरेऽस्मिन् आश्रमे हतं नष्टं ह शब्दः प्रसिद्धौ ॥१३॥

---

* "तस्याङ्गान्यपतन् राम !"
इति वा पाठः ।

अनङ्ग इति विख्यातस्तदाप्रभृति राघव ।
स चाङ्गविषयः श्रीमान् यत्राङ्गं स मुमोच ह ॥ १४ ॥
तस्यायमाश्रमः पुण्यस्तस्येमे मुनयः पुरा ।
शिष्या धर्मपरा वीर तेषां पापं न विद्यते ॥ १५ ॥
इहाद्य रजनीं राम वसेम शुभदर्शन ।
पुण्ययोः सरितोर्मध्ये श्वस्तरिष्यामहे वयम् ॥ १६ ॥
अभिगच्छामहे सर्वे शुचयः पुण्यमाश्रमम् ।
इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम् ॥ १७ ॥
स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम ।
तेषां संवदतां तत्र तपोदीर्घेण चक्षुषा ॥ १८ ॥

ततो भयात् पलायमानः यत्र देशे स कामः अङ्गं मुमोच सोऽङ्गविषयः अङ्गदेश इति विख्यात इति शेषः ॥ १४ ॥

तस्य कामस्य इमे मुनयः इदानीमिह तपस्यन्तः तस्य रुद्रस्य पुरा पूर्वकालसन्तानपरम्परया शिष्याः, अतएव धर्मपराः, अतएव तेषां पापं न विद्यते ॥ १५ ॥

सरितोः गङ्गासरय्वोः ॥ १६ ॥

स्नानादिना शुचयो भूत्वा पुण्यमाश्रमम् अभिगच्छामहे श्वोऽप्यगाह । श्व इति पृथक् पदं वा । परः युक्ततरः ॥ १७ ॥

स्नाता इत्यादीनि तदाश्रमवासिमुनिविशेषणानि । तेषां संवदतां

विश्वाय परमप्रीता मुनयो हर्षमागमन् ।
अर्घ्यं पाद्यं तथातिथ्यं निवेद्य कुशिकात्मजे ॥ १९ ॥
रामलक्ष्मणयोः पश्चाद् अकुर्वन्नतिथिक्रियाम् ।
सत्कारं समनुप्राप्य कथाभिरभिरञ्जयन् ॥ २० ॥
यथार्हमजपन् सन्ध्याम् ऋषयस्ते समाहिताः ।
तत्रवासिभिरानीता मुनिभिः सुव्रतैः सह ॥ २१ ॥

तेषु संवदत्सु तान् ऋषीनपि तपोमहिमज्ञातदीर्घत्वदता अतएव विप्रकृष्टार्थग्राहिता चक्षुषा रामाद्यागमनं विज्ञायेति उत्तरेणा-न्वयः ॥ १८ ॥

आतिथ्यमतिथ्यर्हं भोजनादि ॥ १९ ॥

पश्चात्, भगवतोऽपि मनुष्यरूपधारित्वेन विश्वामित्रे गुरुत्वमा-दरेण च आदौ विश्वामित्रे अर्घ्यादि दत्त्वा पश्चाद्रामे ददुः । अभि-रञ्जयन् अडभाव आर्षः । तदाश्रमवासिनीनिति शेषः । यद्वा सत्कारं समनुप्राप्य तं प्रापय्य विश्वामित्रादीन् तदाश्रमस्था ऋषयोऽ-भ्यरञ्जयन्नित्यर्थः * ॥ २० ॥

अजपन्नदीतीरे ते विश्वामित्राद्याः ऋषयश्च । तदाश्रम-वासि-भिर्मुनिभिः सहवासित्वेन आनीताः संवेशनाय आश्रमं प्रा-पिताः ॥ २१ ॥

---

* सत्कारं कुशलप्रश्नादिकं विश्वामित्रात् समनुप्राप्य आश्रमस्था ऋषयोऽतिथिभूतानां मधुरालापैः सन्तोषमुत्पादयामासुः इति कता ।

न्यवसन् सुसुखं तत्र कामाश्रमपदे तदा ।
कथाभिरभिरामाभिरभिरामौ नृपात्मजौ ॥ २२ ॥
रमयामास धर्मात्मा कौशिको मुनिपुङ्गवः ॥ २३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
त्रयोविंशः सर्गः ॥ २३ ॥

कामाश्रमपदे सर्वकामपरिपूरके भर्गाश्रमे ॥ २२ ॥ २३ ॥
इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

चतुर्विंशः सर्गः ।



ततः प्रभाते विमले कृताह्निकमरिन्दमौ ।
विश्वामित्रं पुरस्कृत्य नद्यास्तीरमुपागतौ ॥ १ ॥
ते च सर्वे महात्मानो मुनयः संशितव्रताः ।
उपस्थाप्य शुभां नावं विश्वामित्रमथाब्रुवन् ॥ २ ॥
आरोहतु भवान् नावं राजपुत्रपुरस्कृतः ।
अरिष्टं गच्छ पन्थानं माभूत्कालस्य पर्य्ययः ॥ ३ ॥
विश्वामित्रस्तथेत्युक्त्वा तानृषीन् प्रतिपूज्य च ।
ततार सहितस्ताभ्यां सरितं सागरंगमाम् ॥ ४ ॥

तत इति । नद्याः गङ्गायाः ॥ १ ॥

उपस्थाप्य आनाय्य ॥ २ ॥

राजपुत्रपुरस्कृत इति तृतीयातत्पुरुषः । अरिष्टं शुभं यथा भवति तथा रिषेर्हिंसार्थत्वात् ॥ ३ ॥

ततार तर्तुमुपक्रान्तः सरितं गङ्गां सागरं गच्छति अप्राप्तपूर्वत्व-स्वरूपं प्रापयति ताम् अन्तर्भावितण्यर्थः । अगस्तिपीतस्य समुद्रस्य गङ्गया पूरणं कृतमिति प्रसिद्धेः ॥ ४ ॥

ततः शुश्राव वै * शब्दं तोयसंरम्भवर्द्धितम्।
मध्यमागम्य तोयस्य तस्य शब्दस्य निश्चयम्॥ ५॥
ज्ञातुकामो महातेजाः सह रामः कनीयसा।
अथ रामः सरिन्मध्ये पप्रच्छ मुनिपुङ्गवम्॥ ६॥
वारिणो भिद्यमानस्य किमयं तुमुलो ध्वनिः।
राघवस्य वचः श्रुत्वा कौतूहलसमन्वितम्॥ ७॥
कथयामास धर्मात्मा तस्य शब्दस्य निश्चयम्।
कैलासपर्वते राम। मनसा निर्मितं परम् †॥ ८॥
ब्रह्मणा नरशार्दूल! तेनेदं मानसं सरः।
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते॥ ९॥

तोयसंरम्भेण परस्परं तरङ्गसङ्घट्टक्षोभेण वर्धितम् अतिप्रवृद्धं निश्चयं सहज औपाधिको वा इत्येतदन्यतरनिश्चयम्॥ ५॥
ज्ञातुकाम इत्यस्य जात इति शेषः॥ ६॥
भिद्यमानस्य परस्परसङ्घट्टमानस्य॥ ७॥
निश्चयं निश्चयजनकहेतुम्॥ ८॥

---

* "ततः शुश्रुवतुः शब्दम्"
इति वा पाठः।
† "सरः"
इति वा पाठः।

सरःप्रवृत्ता सरयूः पुण्या ब्रह्मसरश्च्युता।
तस्यायमतुलः शब्दो जाह्नवीमभिवर्त्तते ॥ १० ॥
वारिसंक्षोभजो राम! प्रणामं नियतः कुरु।
ताभ्यां तु तावुभौ कृत्वा प्रणाममतिधार्म्मिकौ ॥ ११ ॥
तीरं दक्षिणमासाद्य जग्मतुर्लघुविक्रमौ।
स वनं घोरसंकाशं दृष्ट्वा नरवरात्मजः ॥ १२ ॥
अविप्रहतमैक्ष्वाकुः पप्रच्छ मुनिपुङ्गवम्।
अहो वनमिदं दुर्गं झिल्लिकागणसंयुतम् ॥ १३ ॥

तेन मनोनिर्मितत्वेन तस्मात् सरसः या सुस्राव सा इत्यन्वयः * ॥ ९ ॥

सरसः यौति प्रवर्त्तत इति सरयूः। सरः प्रवृत्तेति तथोक्तमभिवचनम्। पुण्यत्वे हेतुर्ब्रह्मसरश्च्युतत्वं तस्या अयं सन्निधिरावः। या जाह्नवीमभिवर्त्तते तया सह सङ्गच्छते तस्मा अयं शब्द इत्यर्थः ॥१०॥

ताभ्यां सरयूगङ्गाभ्याम् ॥ ११ ॥

विक्रमः पादविक्षेपः घोरसङ्काशं भयप्रदर्शनम् ॥ १२ ॥

अविप्रहतं सार्थगमागमाभावात अक्षुण्णं झिल्लिका कीटवि-

* उपगच्छते आहत्य वहते। अयोध्यायाः पश्चिमभागमारभ्य उत्तरदिग्भागेन पूर्वभागमागत्याग्रदेशे गङ्गया सङ्गच्छते।

भैरवैः श्वापदैः कीर्णं शकुन्तैर्दारुणारवैः ।
नानाप्रकारैः शकुनैर्वाश्यद्भिर्भैरवस्वनैः ॥ १४ ॥
सिंहव्याघ्रवराहैश्च वारणैश्चापि शोभितम् ।
धवाश्वकर्णककुभैर्बिल्वतिन्दुकपाटलैः ॥ १५ ॥
सङ्कीर्णं बदरीभिश्च किन्न्विदं दारुणं वनम ।
तमुवाच महातेजा विश्वामित्रो महामुनिः ॥ १६ ॥
श्रूयतां वत्स काकुत्स्थ ! यस्यैतद्दारुणं वनम् ।
एतौ जनपदौ स्फीतौ पूर्वमास्तां नरोत्तम ! ॥ १७ ॥
मलदाश्च करूषाश्च देवनिर्माणनिर्म्मितौ ।
पुरा वृत्रवधे राम ! मलेन समभिप्लुतम ॥ १८ ॥
क्षुधा चैव सहस्राक्षं ब्रह्महत्या समाविशत् ।

भैरवैः भयङ्करैः श्वापदानि दुष्टमृगाः दारुणारवैः दारुणशब्दैः शकुन्तैः भासैः शकुन्तैः सर्वपक्षिभिः भैरवस्वनैः वाश्यद्भिः अतिभैरवं शब्दं कुर्वद्भिः ॥ १४ ॥

शोभितं युक्तम् । धवादयो वृक्षविशेषाः ॥ १५ ॥

किन्नु कुतोनु ॥ १६ ॥

यस्य प्राणिनः स श्रूयतामित्यन्वयः, स्फीतौ समृद्धौ ॥ १७ ॥

मलदाः करूषा इति बहुवचनं शब्दस्वभावकृतम् । देवनिर्माणेन देवयत्नेन निर्मितौ मलेन ब्रह्महत्यारूपेण ॥ १८ ॥

तमिन्द्रं मलिनं देवा ऋषयश्च तपोधनाः॥ १९॥
कलशैः स्नापयामासुर्मलञ्चास्य प्रमोचयन्।
इह भूम्यां मलं दत्त्वा देवाः कारूषमेव च॥ २०॥
शरीरजं महेन्द्रस्य ततो हर्षं प्रपेदिरे।
निर्मलो निष्करूषश्च शुद्ध इन्द्रो यथाभवत्॥ २१॥
ततो देशस्य सुप्रीतो वरं प्रादादनुत्तमम्।
इमौ जनपदौ स्फीतौ ख्यातिं लोके गमिष्यतः॥ २२॥
मलदाश्च करूषाश्च ममाङ्गमलधारिणौ।
साधु साध्विति तं देवाः पाकशासनमब्रुवन्॥ २३॥
देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता।
एतौ जनपदौ स्फीतौ दीर्घकालमरिन्दम॥ २४॥

क्षुधा बुभुक्षया समभिप्लुतमित्यनुकृष्यते। ब्रह्महत्या कृतस्य ब्रह्म-सन्तानत्वात्, देवाः वशादयः॥ १९॥

कलशैः गङ्गाजलपूर्णघटैः प्रमोचयन् प्रामोचयन् कारूषं क्षुत् दत्त्वा त्यक्तेत्यर्थः॥ २०॥

शरीरजमिति पूर्वान्वयि। प्रपेदिरे देवा इति शेषः॥ २१॥

ततः तदेत्यर्थः॥ २२॥

यस्मात् ममाङ्गमलधारिणौ तस्मात् ख्यातिं गमिष्यत इति पूर्वान्वयः॥ २३॥

मलदाश्च करूषाश्च मुदिता धनधान्यतः ।
कस्यचित्त्वथ कालस्य यक्षिणी कामरूपिणी ॥ २५ ॥
बलं नागसहस्रस्य धारयन्ती तदाह्यभूत् ।
ताड़का नाम भद्रन्ते भार्य्या सुन्दस्य धीमतः ॥ २६ ॥
मारीचो राक्षसः पुत्रो यस्याः शक्रपराक्रमः ।
वृत्तबाहुर्महाशीर्षो विपुलास्यतनुर्महान् ॥ २७ ॥
राक्षसो भैरवाकारो नित्यं त्रासयते प्रजाः ।
इमौ जनपदौ नित्यं विनाशयति राघव ! ॥ २८ ॥
मलदांश्च करूषांश्च ताड़का दुष्टचारिणी ।
सेयं पन्थानमावृत्य वसत्यत्यर्द्धयोजने ॥ २९ ॥

शक्रेण कृतां देशस्य पूजां दृष्ट्वा पाकशासनं साध्विति अब्रुवन् इति पूर्वेणान्वयः ॥ २४ ॥

कस्यचित् कियतः कालस्य अपगमे इति शेषः ॥ २५ ॥

भद्रन्ते इति विश्वामित्रस्य आशीर्वचनं बालकत्वेन । तादृशयक्षिणीनामश्रवणेन त्रासो माभूदिति । यद्वा ताड़का नाम ते भद्रं प्रथमशौर्य्यस्थानत्वेन शौर्य्यप्रसिद्धिकत्वरूपं भद्रत्वमस्या इति बोध्यम् ॥ २६ ॥ २७ ॥ २८ ॥

सेयं या विनाशयति सेत्यर्थः । आवृत्य निरुध्य अर्द्धम् अतिक्रान्तमत्यर्द्धं तादृशे योजने ॥ २९ ॥

अतएव च गन्तव्यं ताड़काया वनं यतः ।

स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ॥ २० ॥

मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ।

न हि कश्चिदिमं देशं शक्तो ह्यागन्तुमीदृशम् ॥ २१ ॥

यक्षिण्या घोरया राम ! उत्सादितमसह्यया ।

एतत्तु ते सर्वमाख्यातं यथैतद्दारुणं वनम् ।

यक्ष्या चोत्सादितं सर्वमद्यापि न निवर्त्तते ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

चतुर्विंशः सर्गः ॥ २४ ॥

यतश्चेदं ताड़कावनम् अस्माभिर्गन्तव्यम् अतएव च हेतोः हे राम ! स्वबाहुबलम् आश्रित्य इमां जहि ॥ २० ॥

ननु स्त्री कथं हन्तव्या तत्राह—मन्नियोगादिति । मदाज्ञया स्त्रीवधशङ्कां त्यज । ईदृशं ताड़काक्रान्तम् ॥ २१ ॥

अद्यापि न निवर्तते * अत्र पूर्वस्थितो जन इति शेषः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

---

* उत्सादनात् इति शेषः ।

पञ्चविंशः सर्गः ।

अथ तस्याप्रमेयस्य मुनेर्वचनमुत्तमम् ।
श्रुत्वा पुरुषशार्दूलः प्रत्युवाच शुभां गिरम् ॥ १ ॥
अल्पवीर्या यदा यक्षी श्रूयते मुनिपुङ्गव ।
कथं नागसहस्रस्य धारयत्यबला बलम् ? ॥ २ ॥
इत्युक्तं वचनं श्रुत्वा राघवस्यामितौजसः ।
हर्षयन् श्लक्ष्णया वाचा सलक्ष्मणमरिन्दमम् ॥ ३ ॥
विश्वामित्रोऽब्रवीद् वाक्यं शृणु येन बलोत्कटा ।
वरदानकृतं वीर्यं धारयत्यबला बलम् ॥ ४ ॥
पूर्वमासीत् महायक्षः सुकेतुर्नाम वीर्यवान् ।
अनपत्यः शुभाचारः स च तेपे महत् तपः ॥ ५ ॥

अथेति । अप्रमेयस्य अप्रमेयप्रभावस्य शार्दूलः श्रेष्ठः ॥ १ ॥

यदा यतः । यक्षी यक्षजातिः । श्रूयते पुराणादौ इति शेषः । अबलेति साभिप्रायम् ॥ २ ॥ ३ ॥

वीर्यं शौर्यादि । बलमात्रपरत्वे वीर्याभिधानं शौर्यादयोऽन्येऽपि गुणाः तस्यां सन्तीति ज्ञापनार्थम् ॥ ४ ॥

वरप्राप्तिमूलमाह,—पूर्वमिति । तेपे पुत्रार्थं पितामहमुद्दिश्येति शेषः ॥ ५ ॥

पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा ।
कन्यारत्नं ददौ राम ! ताडकां नाम नामतः ॥ ६ ॥
ददौ नागसहस्रस्य बलं चास्याः पितामहः ।
न त्वेव पुत्रं यक्षाय ददौ चासौ * महायशाः ॥ ७ ॥
तां तु बालां विवर्धन्तीं रूपयौवनशालिनीम् ।
जम्भपुत्राय सुन्दाय ददौ भार्यां यशस्विनीम् ॥ ८ ॥
कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्यजायत ।
मारीचं नाम दुर्धर्षं यः शापाद् राक्षसोऽभवत् ॥ ९ ॥
सुन्दे तु निहते राम ! अगस्त्यमृषिसत्तमम् ।
ताडका सह पुत्रेण प्रधर्षयितुमिच्छति ॥ १० ॥

कन्यारत्नं दिव्यरूपवतीं कन्याम् ॥ ६ ॥

तदभिसंहितगुणवता पुत्रेणात्यन्तजनपीडा भवेदिति विचार्य पुत्रं न ददौ ॥ ७ ॥

विवर्धन्तीं वर्धमानां जम्भपुत्रायेत्यत्र झझपुत्रायेति पाठे झझेः पुत्रः झझपुत्रः । अनयोरर्थयोः द्वयोर्निर्णीतोऽपि तः सम्बन्धः ॥ ८ ॥

व्यजायत प्रासोष्ट असूत ॥ ९ ॥

शापं दर्शयति सुन्देत्यादि । निहते अगस्त्येन शापं दत्त्वेति शेषः । इच्छति इच्छति स्म ॥ १० ॥

---

* "चासौ" इति वा पाठः ।

भक्ष्यार्थं जातसंरम्भा गर्जन्ती साभ्यधावत ।
आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः ॥ ११ ॥
राक्षसत्वं भजस्वेति मारीचं व्याजहार सः ।
अगस्त्यः परमामर्षः ताड़कामपि शप्तवान् ॥ १२ ॥
पुरुषादी महायक्षी विकृता विकृतानना ।
इदं रूपं विहायाद्य दारुणं रूपमस्तु ते ॥ १३ ॥
सैषा शापकृतामर्षा ताड़का क्रोधमूर्च्छिता ।
देशमुत्सादयत्येनमगस्त्याचरितं शुभम् ॥ १४ ॥
एनां राघव ! दुर्वृत्तां यक्षीं परमदारुणाम् ।

जातसंरम्भा स्वभर्तृवधजकोपवती ॥ ११ ॥

भजस्व स्वहृदेऽयोनिस्वरूपं मुक्तेति शेषः । शप्तवान् राक्षसत्वं भजस्वेति ॥ १२ ॥

तदेव विस्तरेणाह,—पुरुषादीति भवेति शेषः । तदेवोपपादयति,—इदमिति । इदं रूपं यक्षीरूपं विहाय त्यक्त्वा दारुणं रूपं राक्षसीरूपम् अस्तु भवतु । एतदेवाभिप्रेत्य पाद्मे उक्तं,—
"तौ रामलक्ष्मणौ वीरावायान्तौ पथि राक्षसीम् ।
ताड़कां नाम घोरां तां सुन्दभार्यां सुकेतुजाम् ॥"
इति ॥ १३ ॥

अमर्षात् अपकृतात् । उत्सादयन् नाशयन् शुभं विशेषतः अगस्त्याचरितमिति अगस्त्यतपःस्थानमित्यर्थः ॥ १४ ॥

गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम् ॥ १५ ॥

नह्येनां शापसंसृष्टां कश्चिदुत्सहते पुमान् ।

निहन्तुं त्रिषु लोकेषु त्वामृते रघुनन्दन ! ॥ १६ ॥

न हि ते स्त्रीवधकृते घृणा कार्य्या नरोत्तम ! ।

चातुर्वर्ण्यहितार्थं हि कर्त्तव्यं राजसूनुना ॥ १७ ॥

नृशंसमनृशंसं वा प्रजारक्षणकारणात् ।

पातकं वा सदोषं वा कर्त्तव्यं रक्षता सदा ॥ १८ ॥

राज्यभारनियुक्तानाम् एष धर्मः सनातनः ।

गो-ब्राह्मणहितार्थायेति स्त्रीवधशङ्कानिरासाय तद्धिताय क्रियमाणं पापवदाभासमानमपि धर्मायेति भावः ॥ १५ ॥

शापसंसृष्टाम् अगस्त्यशापयुताम् ॥ १६ ॥

हे नरोत्तम ! ते स्त्रीवधनिमित्ता घृणा न कार्य्या । अत्र नरोत्तमेत्यनेन पुरुषोत्तमेश्वररूपत्वात् तव पापसम्बन्धाभाव इति ध्वनितम् । चातुर्वर्ण्यहितार्थं तद्धिताय । कर्त्तव्यमित्यस्य नृशंसमित्याद्युत्तरेणान्वयः ॥ १७ ॥

वा शब्द इवार्थे । अनृशंसमिव नृशंसं क्रूरमपि कार्य्यमित्यर्थः । प्रजारक्षणकारणात् प्रजारक्षणहेतोः । एष धर्म इति धर्मजनकत्वादिति भावः । रक्षता सदेति रक्षाधर्मविशिष्टेनेति शेषः । पातकं वा मुख्यपातकं वा सदोषं वा यज्ञादिवत् सदोषम् ईषत् पापयुतं धर्मं वा सदोषं वधरूपमिति यावत् ॥ १८ ॥

अधर्म्यां जहि काकुत्स्थ ! धर्मो ह्यस्यां न विद्यते ॥ १९ ॥
श्रूयते हि पुरा शक्रो विरोचनसुतां नृप ! ।
पृथिवीं हन्तुमिच्छन्तीं मन्थरामभ्यसूदयत् ॥ २० ॥
विष्णुना च पुरा राम ! भृगुपत्नी पतिव्रता ।
अनिन्द्रं लोकमिच्छन्ती काव्यमाता निषूदिता ॥ २१ ॥
एतैश्चान्यैश्च बहुभी-राजपुत्रैर्महात्मभिः ।
अधर्मसहिता नार्य्यो हताः पुरुषसत्तमैः ।

अतोऽप्यस्या वधो न्याय इत्याह—अधर्म्यामिति धर्मादपेतां तदेवोपपादयति धर्मो हीति ॥ १९ ॥

अधर्म्यः स्त्रीवधोऽपि धर्म एवेत्यर्थं संमतिभिरुपपादयति—श्रूयते इति । पृथिवीं तदभिमानीं देवतां यद्वा तस्याः प्रजा इत्यर्थः ॥ २० ॥

अनिन्द्रं निद्रासुखरहितम् अनिन्द्रमिति पाठे इन्द्ररहितं काव्यः शुक्रः * ॥ २१ ॥

एतैः शक्रादिभिः यद्वा आर्षं बहुत्वम् एताभ्यां शक्रविष्णुभ्यामित्यर्थः । [illegible] यथा परशुरामस्य जमदग्निगुरोराज्ञया

---

* पुरा किल असुराः सुरगणपीडिताः शुक्रजननीं शरणमभिजग्मुः । सा च तेषां परित्राणाय त्रिदशान् संहर्तुमिच्छति स्म । अथ सकललोकभावनो भगवान् चक्रपाणिः वज्रिणाभ्यर्थितस्तस्याः शिरश्चिच्छेद इति पौराणिकी कथाऽनुसन्धेया ।

तस्मादेनां घृणां त्यक्त्वा जहि मच्छासनान्नृप ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

पञ्चविंशः सर्गः ॥ २५ ॥

मातृवधेऽपि न दोषस्तथास्मादिवियादात्वत्वेन गुरोर्ममाज्ञया स्त्री-
वधे तव न दोष इति भावः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

पञ्चविंशः सर्गः ॥ २५ ॥

षड्विंशः सर्गः ।



मुनेर्वचनमक्लीवं श्रुत्वा नरवरात्मजः ।
राघवः प्राञ्जलिर्भूत्वा प्रत्युवाच दृढव्रतः ॥ १ ॥
पितुर्वचननिर्देशात् पितुर्वचनगौरवात् ।
वचनं कौशिकस्येति कर्त्तव्यमविशङ्कया ॥ २ ॥
अनुशिष्टोऽस्म्ययोध्यायां गुरुमध्ये महात्मना ।
पित्रा दशरथेनाहं नावज्ञेयं हि तद्वचः ॥ ३ ॥
सोऽहं पितुर्वचः श्रुत्वा शासनाद् ब्रह्मवादिनः ।
करिष्यामि न सन्देहस्ताड़कावधमुत्तमम् ॥ ४ ॥

मुनेरिति । अक्लीवं दृढम् ॥ १ ॥

पितुरिति । कौशिकस्य वचनम् अविशङ्कया कर्त्तव्यं त्वया इत्येवंरूपान्निर्देशात् नियोगात् पितुर्वचनगौरवात् परमाप्तवाक्यत्वेन अतिप्रमाणत्वात् त्वद्वचनम् अवश्यं कर्त्तव्यत्वेन निश्चितमिति शेषः ॥ २ ॥

कदा एवं नियोगः कृत इत्यत्राह,—अन्विति । गुरवो वसिष्ठवामदेवाद्याः । अनवज्ञाने हेतुवक्त एव । तद्वचो विश्वामित्रवच इत्यनुशिष्ट इत्यन्वयः ॥ ३ ॥

सोऽहमिति । ब्रह्मवादिनः तस्य पापास्पर्शेन तत्त्वज्ञत्वात् अन्य-

गोब्राह्मणहितार्थाय देशस्य च हिताय च ।
तव चैवाप्रमेयस्य वचनं कर्त्तुमुद्यतः ॥ ५ ॥
एवमुक्त्वा धनुर्मध्ये बद्ध्वा मुष्टिमरिन्दमः ।
ज्याघोषमकरोत् तीव्रं दिशः शब्देन नादयन् ॥ ६ ॥
तेन शब्देन वित्रस्ताः ताड़कावनवासिनः ।
ताड़का च सुसंक्रुद्धा तेन शब्देन मोहिता ॥ ७ ॥
तं शब्दमभिनिध्याय राक्षसी क्रोधमूर्च्छिता ।
श्रुत्वा चाभ्यद्रवत् क्रुद्धा यत्र शब्दो विनिःसृतः ॥ ८ ॥
तां दृष्ट्वा राघवः क्रुद्धां विकृतां विकृताननाम् ।

स्यापि पापमपापं पुण्यं चेत्याह,—उत्तममिति । उत्तमधर्ममित्यर्थः ॥ ४ ॥

पुण्यत्वमेवोपपादयति,—गोब्राह्मणेति । अप्रमेयस्य तव च हिताय अस्य हितं त्वदाज्ञापरिपालनेन [illegible] वचनं कर्त्तुमुद्यतो विचिकित्सारहितोऽहं ताड़कावधं करिष्यामीति पूर्ववाक्यान्वयः ॥ ५ ॥

तीव्रं पटुश्रवणम् ॥ ६ ॥

वित्रस्ताः भीताः । मोहिता [illegible] ॥ ७ ॥

तं शब्दं श्रुत्वा च क्रुद्धा स शब्दो [illegible] विनिःसृतः तम् अभिनिध्याय शब्दनिःसरणप्रदेशं [illegible] अभ्यद्रवदिति यो-

प्रमाणेनातिवृद्धां च लक्ष्मणं सोऽभ्यभाषत ॥ ९ ॥
पश्य लक्ष्मण ! यक्षिण्या भैरवं दारुणं वपुः ।
भिद्येरन् दर्शनादस्या भीरूणां हृदयानि च ॥ १० ॥
एतां पश्य दुराधर्षां मायाबलसमन्विताम् ।
विनिवृत्तां करोम्यद्य हृतकर्णाग्रनासिकाम् ॥ ११ ॥
न ह्येनामुत्सहे हन्तुं स्त्रीस्वभावेन रक्षिताम् ।
वीर्यञ्चास्या गतिञ्चैव हन्यामिति हि मे मतिः ॥ १२ ॥
एवं ब्रुवाणे रामे तु ताड़का क्रोधमूर्च्छिता ।
उद्यम्य बाहू गर्जन्ती राममेवाभ्यधावत ॥ १३ ॥

प्रमाणेन शरीरप्रमाणेन ॥ ९ ॥

भैरवं भयङ्करं दारुणं घोरम् अस्य वपुषः चोऽप्यर्थः अभीरूणामपीत्यर्थः ॥ १० ॥

एतामिति । विनिवृत्ताम् अस्मत्सम्मुखागमनात् परावृत्तां पलायितामिति यावत् ॥ ११ ॥

कर्णादिच्छेदमात्रे हेतुमाह,—न हीति । वीर्यं पराक्रमशक्तिं, गतिम् आकाशादिगतिं पाणिपादच्छेदेनेति शेषः । [illegible] दैवर्षिमतस्य गुरुवचनानुष्ठानस्य च सिद्धिः स्त्रीवध[illegible] वीरभावानुचित इति भावः ॥ १२ ॥

राममेव, विश्वामित्रस्य दुर्धर्षत्वेन तं विहाय [illegible] राममेवेत्यर्थः ॥ १३ ॥

विश्वामित्रस्तु ब्रह्मर्षिर्हुङ्कारेणाभिभर्त्स्य ताम् ।
स्वस्ति राघवयोरस्तु जयञ्चैवाभ्यभाषत ॥ १४ ॥
उद्धुन्वाना रजो घोरं ताडका राघवावुभौ ।
रजोमेघेन महता मुहूर्त्तं सा व्यमोहयत् ॥ १५ ॥
ततो मायां समास्थाय शिलावर्षेण राघवौ ।
अवाकिरत् सुमहता ततश्चुक्रोध राघवः ॥ १६ ॥
शिलावर्षं महत् तस्याः शरवर्षेण राघवः ।
प्रतिवार्य्योपधावन्त्याः करौ चिच्छेद पत्रिभिः ॥ १७ ॥
ततश्छिन्नभुजायां तामभ्याशे परिगर्जतीम् ।
सौमित्रिरकरोत्क्रोधात् हृतकर्णाग्रनासिकाम् ॥ १८ ॥
कामरूपधरा सा तु कृत्वा रूपाण्यनेकशः ।

तां राममनुजमभिधावन्तीम् । [illegible] ॥ १४ ॥
घोरं रजः उद्धुन्वानेत्यन्वयः । रजोमेघेन [illegible] ॥ १५ ॥
मायां समास्थाय अन्तर्धानं गत्वेति यावत् । [illegible]-
दाक्षिण्यं विसृज्येति शेषः ॥ १६ ॥
पत्रिभिरिति । एकैकस्य [illegible] ॥ १७ ॥
हृते कर्णाग्रे नासिका च यस्यास्ताम् ॥ १८ ॥

* शेषः पापमाचरतेत्याद्यायाः [illegible]
[illegible] ताडकायाः क्रोध्योतिशयद [illegible] प्रकृ[illegible] ।

अन्तर्धानं गता यक्षी मोहयन्ती स्वमायया ॥ १९ ॥
अश्मवर्षं विमुञ्चन्ती भैरवं विचचार सा ।
ततस्तावश्मवर्षेण कीर्यमाणौ समन्ततः ॥ २० ॥
दृष्ट्वा गाधिसुतः श्रीमान् इदं वचनमब्रवीत् ।
अलं ते घृणया राम ! पापैषा दुष्टचारिणी ॥ २१ ॥
यज्ञविघ्नकरी यक्षी पुरा वर्धेत मायया ।
वध्यतां तावदेवैषा पुरा सन्ध्या प्रवर्त्तते ॥ २२ ॥
रक्षांसि सन्ध्याकाले तु दुर्धर्षाणि भवन्ति हि ।
इत्युक्तः स तु तां यक्षीमश्मवृष्ट्याभिवर्षिणीम् * ॥ २३ ॥

अनेकशः रूपाणि कृत्वा अन्तर्धानं गता सती स्वमायया राघवौ मोहयन्ती ॥ १९ ॥

भैरवम् अश्मवर्षमित्यन्वयः ॥ २० ॥

घृणया अलं स्त्री इति घृणा मा[illegible] । दुष्टचारिणी माया-बलया अन्तर्धानेन पाषाणादिवृष्टिकर्त्री अतो घृणा अनुचिता ॥२१॥

घृणा नोचितेत्यत्र हेत्वन्तरमाह,—यज्ञविघ्नकरीति । मायया पुरा यावत् वर्द्धेत तावत्तत्पात् पूर्वमेव एषा वध्यतां [illegible] पुरा प्रवर्त्तते [illegible] ॥ २२ ॥

किं तत इत्यत आह,—रक्षांसीति [illegible] ॥ २३ ॥

---

* "अश्मवर्षाभिवर्षतीम्" इति वा पाठः ।

दर्शयन् शब्दवेधित्वं तां रुरोध स सायकैः ।
सा रुद्धा बाणजालेन मायाबलसमन्विता ॥ २४ ॥
अभिदुद्राव काकुत्स्थं लक्ष्मणञ्च विनेदुषी ।
तामापतन्तीं वेगेन विक्रान्तामशनीमिव ॥ २५ ॥
शरेणोरसि विव्याध पपात च ममार च ।
तां हतां भीमसङ्काशां दृष्ट्वा सुरपतिस्तदा ॥ २६ ॥
साधु साध्विति काकुत्स्थं सुराश्चाप्यभिपूजयन् ।
उवाच परमप्रीतः सहस्राक्षः पुरन्दरः ॥ २७ ॥
सुराश्च सर्वे संहृष्टा विश्वामित्रमथाब्रुवन् ।
मुने कौशिक ! भद्रन्ते सेन्द्राः सर्वे मरुद्गणाः ॥ २८ ॥
तोषिताः कर्मणानेन स्नेहं दर्शय राघवे ।

शब्दमात्रेण लक्ष्यं सम्यक् निश्चित्य वेधकर्तृत्वसामर्थ्यं दर्शयन्नित्यर्थः ॥ २४ ॥

अभिदुद्रावेति । अन्तर्धानं त्यक्त्वेति शेषः ॥ २५ ॥

भीमसङ्काशां भीमरूपाम् ॥ २६ ॥

अभिपूजयन् अडभाव आर्षः । सहस्राक्षः विश्वामित्रमुवाचेत्यन्वयः ॥ २७ ॥

किमुक्तवन्तस्तत्राह मुने इति ॥ २८ ॥

तोषिताः वयमिति शेषः । अनेन कर्मणा स्वत प्रवर्त्तितताडका-

प्रजापतेः कृशाश्वस्य पुत्रान् सत्यपराक्रमान् ॥ २९ ॥
तपोबलभृतो ब्रह्मन् ! राघवाय निवेदय ।
पात्रभूतश्च ते ब्रह्मन् ! तवानुगमने रतः * ॥ ३० ॥
कर्त्तव्यं सुमहत् कर्म सुराणां राजसूनुना ।
एवमुक्त्वा सुराः सर्वे जग्मुर्हृष्टा विहायसम् ॥ ३१ ॥
विश्वामित्रं पूजयन्तस्ततः सन्ध्या प्रवर्त्तते ।
ततो मुनिवरः प्रीतस्ताड़कावधतोषितः ॥ ३२ ॥
मूर्ध्नि राममुपाघ्राय इदं वचनमब्रवीत् ।
इहाद्य रजनीं राम ! वसामः शुभदर्शन ! ॥ ३३ ॥
श्वःप्रभाते गमिष्यामस्तदाश्रमपदं मम ।
विश्वामित्रवचः श्रुत्वा हृष्टो दशरथात्मजः ॥ ३४ ॥

कथम्भूतेभ्यः । किं दर्शय महौषोऽयम् आगः शिष्य इति कोऽमूर्त्त व्यापारं प्रवर्त्तय । तमेव व्यापारमाह,—प्रजापतेरिति ॥ २९ ॥

तपसा ध्यानेन बलेन च भृताः पूर्णाः ते तव ज्ञानस्य पात्रभूतश्च राघवः, अतस्तस्मै कृशाश्वपुत्रान् निवेदय । तथा तस्यानामेवास्त्राणां कार्य्यसम्भवमिति भावः । अनुगमने शुश्रूषायां दृढ़निश्चयः ॥ ३० ॥ ३१ ॥

एवमुक्त्वा सुराः जग्मुरित्यन्वयः । प्रवर्त्तते इत्यस्य स्मेति शेषः । ३२ ॥ ३३ ॥ ३४ ॥

* "धृतः" इति वा पाठः ।

उवास रजनीं तत्र ताटकाया वने सुखम् ।
मुक्तशापं वनं तच्च तस्मिन्नेव तदाहनि ।
रमणीयं विबभ्राज यथा चैत्ररथं वनम् ॥ २५ ॥

निहत्य तां यक्षसुतां स रामः
प्रशस्यमानः सुरसिद्धसङ्घैः ।
उवास तस्मिन् मुनिना सहैव
प्रभातवेलां प्रतिबोध्यमानः ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
षड्विंशः सर्गः ॥ २६ ॥

मुक्तशापम् अपगतोपद्रवं यदा अभ्यशापया ताटकया मुक्तम् ॥ २५ ॥ प्रभातवेलां प्रतिबोध्यमान इति विश्वामित्रेण जजागारेति शेषः ॥ २६ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे षड्विंशः सर्गः ॥ २६ ॥

सप्तविंशः सर्गः ।

अथ तां रजनीमुष्य विश्वामित्रो महायशाः ।
प्रहस्य राघवं वाक्यमुवाच मधुरस्वरम् ॥ १ ॥
परितुष्टोऽस्मि भद्रं ते राजपुत्र ! महायशः ! ।
प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥ २ ॥
देवासुरगणान् वापि सगन्धर्वोरगान् भुवि ।
यैरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥ ३ ॥
तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः ।
दण्डचक्रं महत् दिव्यं तव दास्यामि राघव ! ॥ ४ ॥
धर्मचक्रं ततो वीर ! कालचक्रं तथैव च ।

अथेति । उष्येति वासं कृत्वा । प्रहस्य विनयप्राप्ति रामदर्शनज-सन्तोषजो हासः ॥ १ ॥

सर्वशः सर्वाणि ॥ २ ॥

देवासुरगणान् वापि वाशब्दार्थे गन्धर्वोरगसहितदेवासुर-गणसमूहान् अपि प्रसह्य बलेन जयिष्यसि जेष्यसि । यदि वधं दया, तदा वशीकृत्य सम्मोहनास्त्रादिना जेष्यसि, अन्येषां तु का गणना इति भावः ॥ ३ ॥

दण्डचक्रादयोऽस्त्रभेदाः ॥ ४ ॥ ५ ॥

विष्णुचक्रं तथात्युग्रमैन्द्रं चक्रं तथैव च ॥ ५ ॥

वज्रमस्त्रं नरश्रेष्ठ ! शैवं शूलवतं तथा ।

अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ! ॥ ६ ॥

ददामि ते महाबाहो ! ब्राह्ममस्त्रमनुत्तमम् ।

गदे द्वे चैव काकुत्स्थ ! मोदकी शिखरी शुभे ॥ ७ ॥

प्रदीप्ते नरशार्दूल ! प्रयच्छामि नृपात्मज ! ।

धर्मपाशमहं राम ! कालपाशं तथैव च ॥ ८ ॥

वारुणं पाशमस्त्रञ्च ददाम्यहमनुत्तमम् ।

अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनन्दन ! ॥ ९ ॥

ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा ।

आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ॥ १० ॥

वायव्यं प्रथमं नाम ददामि तव चानघ ! ।

शूलवतं शूलवतनामकम् । क्वचित्तु "शूलवरम्" इति पाठः । ब्रह्मशिरोऽस्त्रं ब्रह्मास्त्राद् अन्यत् ॥ ६ ॥

गदे द्वे मोदकीशिखरीसंज्ञे द्वे गदे गदास्त्रे अस्त्रे ॥ ७ ॥ ८ ॥

अशनि वारुणास्त्रं चेत्यर्थः । शुष्कार्द्रसंज्ञे द्वे अशनी अशनि-संज्ञके अस्त्रे ॥ ९ ॥

पिनाकिन इदं पैनाकं दयितम् अभीप्सितम् [illegible] । शिखरं नाम [illegible]मिति प्रसिद्धम् ॥ १० ॥

अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ॥ ११ ॥
शक्तिद्वयं च काकुत्स्थ ! ददामि तव राघव ! ।
कङ्कालं मुसलं घोरं कापालमथ किङ्किणीम् ॥ १२ ॥
वधार्थं रक्षसां यानि ददाम्येतानि सर्वशः ।
वैद्याधरं महास्त्रञ्च नन्दनं नाम नामतः ॥ १३ ॥
असिरत्नं महाबाहो ! ददामि नृवरात्मज ! ।
गान्धर्वमस्त्रं दयितं मोहनं नाम नामतः ॥ १४ ॥
प्रस्वापनं प्रशमनं दद्मि सौम्यञ्च राघव ! ।
वर्षणं शोषणञ्चैव सन्तापनविलापने ॥ १५ ॥
मादनं चैव दुर्धर्षं कन्दर्पदयितं तथा ।
गान्धर्वमस्त्रं दयितं मानवं नाम नामतः ॥ १६ ॥

प्रथमं मुख्यम् ॥ ११ ॥

कङ्कालादीनि असुरधार्य्याण्यस्त्राणि ॥ १२ ॥

यानि रक्षसां वधार्थं समर्थानि एतानि ददामीत्यन्वयः ॥ १३ ॥

वैद्याधरं विद्याधरसम्बन्धि नन्दनं नाम असिरत्नमित्यन्वयः । यतोऽस्मात् असीनां प्रादुर्भाव इति भावः ॥ १४ ॥

दद्मीत्यार्षम् । प्रशमनं रिपूणां क्रोधशामकमस्त्रं । विलापनं परिदेवनकारकम् ॥ १५ ॥

मादनं रिपूणां मदजनकं दुर्धर्षमित्यादस्य विशेषणम् ॥ १६ ॥

पैशाचमस्त्रं दयितं मोहनं नाम नामतः ।
प्रतीच्छ नरशार्दूल राजपुत्र महायशः ! ॥ १७ ॥
तामसं नरशार्दूल ! सौमनञ्च महाबलम् ।
संवर्त्तञ्चैव दुर्धर्षं मौषलञ्च नृपात्मज ! ॥ १८ ॥
सत्यमस्त्रं महाबाहो ! तथा मायामयं परम् ।
सौरं तेजःप्रभं नाम परतेजोऽपकर्षणम् ॥ १९ ॥
सोमास्त्रं शिशिरं नाम त्वाष्ट्रमस्त्रं सुदारुणम् ।
दारुणञ्च भगस्यापि शीतेषुमथमानवम् ॥ २० ॥
एतान् राम महाबाहो ! कामरूपान् महाबलान् ।
गृहाण परमोदारान् क्षिप्रमेव नृपात्मज ! ॥ २१ ॥
स्थितस्तु प्राङ्मुखो भूत्वा शुचिर्मुनिवरस्तदा ।
ददौ रामाय सुप्रीतो मन्त्रग्राममनुत्तमम् ॥ २२ ॥

प्रतीच्छ गृहाण ॥ १७ ॥

मौषलम् आसुरगुप्तत्वादन्यत् ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

मन्त्रग्रामम् अस्त्राणां मन्त्रमूर्त्तित्वात्, ननु बलातिबलादानप्रसङ्गेऽपि मन्त्रग्रामं गृहाणेत्युक्तमिति पुनरत्र दानं विफलमिति चेत्? न, गृहाणेत्येव तत्रोक्तत्वात्, न तु ददाविति। तेन तत्कालोपयोगि बलातिबलयोरेव तत्र दानम् इतरेषां त्वत्रेति विवेक इति

सर्वसंग्रहणं येषां दैवतैरपि दुर्लभम् ।
तान्यस्त्राणि तदा विप्रो राघवाय न्यवेदयत् ॥ २३ ॥
जपतस्तु मुनेस्तस्य विश्वामित्रस्य धीमतः ।
उपतस्थुर्महार्हाणि सर्वाण्यस्त्राणि राघवम् ॥ २४ ॥
ऊचुश्च मुदिता रामं सर्वे प्राञ्जलयस्तदा ।
इमे स्म परमोदार किङ्करास्तव राघव ॥ २५ ॥
यद् यदिच्छसि भद्रं ते तत्सर्वं करवाम वै ।
ततो रामः प्रसन्नात्मा तैरित्युक्तो महाबलः ॥ २६ ॥

कलशाक्षतः । वस्तुतो वर्णितत्वे मन्त्रसमुदायात्मके इति तद्रूपं मन्त्र-ग्राममिति तत्रार्थ इति [illegible] इति परे ॥ २२ ॥

सर्वेति । येषाम् अस्त्रादिव्यापाराणां सर्वसंग्रहणं सर्वधारणं कर्त्तुं दैवतैरपि दुर्लभं दुष्करं देवा अपि यत्किञ्चित् स्वल्पमेव जानन्तीति भावः । तानि सर्वाणि अस्त्राणि राघवाय रामाय विश्वामित्रो न्यवे-दयत् दत्तवान् राघवाय रामाय लक्ष्मणाय च [illegible] बोध्यं । [illegible] [illegible] इति बोध्यम् ॥ २३ ॥

[illegible] तान्यस्त्राणि [illegible] उपतस्थुः [illegible] उपतस्थुः उप-स्थितानि विश्वामित्रनियोगेन रामञ्च उपतस्थुः ॥ २४ ॥

सर्वे अस्त्रदेवाः मुदिताः । [illegible]रामसम्बन्धेन तुष्टाः कि-ङ्कराः आज्ञाकारा[illegible] ॥ २५ ॥ २६ ॥

प्रतिगृह्य च काकुत्स्थः समालभ्य च पाणिना ।
मानसा मे भविष्यध्वमिति तान्यभ्यचोदयत् ॥ २७ ॥
ततः प्रीतमना रामो विश्वामित्रं महामुनिम् ।
अभिवाद्य महातेजा गमनायोपचक्रमे ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
सप्तविंशः सर्गः ॥ २७ ॥

समालभ्य उपस्पृश्य । मानसाः सदा मनस्थिताः यद्यपि भगवतो रामस्य सर्वं विदितमेव, तथापि विद्या गुरूपदेशप्राप्तैव फलदा, न अन्यथा, इति लोकान् बोधयितुं विश्वामित्रोपदेशग्रहणमिति बोध्यम् ॥ २७ ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे सप्तविंशः सर्गः ॥ २७ ॥

अष्टाविंशः सर्गः ।



प्रतिगृह्य ततोऽस्त्राणि प्रहृष्टवदनः शुचिः ।
गच्छन्नेव च काकुत्स्थो विश्वामित्रमथाब्रवीत् ॥ १ ॥
गृहीतास्त्रोऽस्मि भगवन् ! दुराधर्षः सुरैरपि ।
अस्त्राणां त्वहमिच्छामि संहारान् मुनिपुङ्गव ! ॥ २ ॥
एवं ब्रुवति काकुत्स्थे विश्वामित्रो महातपाः ।
संहारान् व्याजहाराथ धृतिमान् सुव्रतः शुचिः ॥ ३ ॥
सत्यवन्तं सत्यकीर्त्तिं धृष्टं रभसमेव च ।
प्रतिहारतरं नाम परांमुखमवांमुखम् ॥ ४ ॥
लक्ष्यालक्ष्याविमौ चैव दृढनाभसुनाभकौ ।
दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ ॥ ५ ॥

गच्छन् गमिष्यन् ॥ १ ॥

संहारान् ज्ञातुमिति शेषः । उपसंहारापरिज्ञाने पुनः प्रयोगानर्हतया अप्रामाण्यात् तद्ज्ञानेच्छा । संहारो नाम प्रयुक्तस्यास्त्रस्य मन्त्रविशेषेण पुनः स्वात्मनि स्थापनम् ॥ २ ॥

एवमिति । उक्तास्त्राणां संहारमार्गमुपदिश्य । अथ अनन्तरं तत्प्रश्नसन्तुष्टः परम ऋषिः अन्यान्यपि अस्त्राणि उपदिशति स्म ॥ ३ ॥

तदाह,—सत्यवन्तमित्यादि । ददामीति सर्वत्र शेषः ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

पद्मनाभमहानाभौ दुन्दुनाभसुनाभकौ ।
ज्योतिषं शकुनञ्चैव नैराश्यविमलावुभौ ॥ ६ ॥
यौगन्धरविनिद्रौ च दैत्यप्रमथनौ तथा ।
शुचिर्बाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा ॥ ७ ॥
सार्चिमाली धृतिमाली वृत्तिमान् रुचिरस्तथा ।
पित्र्यः सौमनसश्चैव विधूतमकरावुभौ ।
करवीरं रतिं चैव धनधान्यौ च राघव ! ॥ ८ ॥
कामरूपं कामरुचिं मोहमावरणं तथा ।
जृम्भकं सर्पनाथञ्च पन्थानवरुणौ * तथा ॥ ९ ॥
कृशाश्वतनयान् राम ! भास्वरान् कामरूपिणः ।
प्रतीच्छ मम भद्रं ते पात्रभूतोऽसि राघव ! ॥ १० ॥
बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना ।
दिव्यभास्वरदेहाश्च मूर्तिमन्तः सुखप्रदाः ॥ ११ ॥

सार्चिमाल्यादयोऽन्ये, तांश्च ददामीत्यर्थः ॥ ७ ॥ ८ ॥

भास्वरान् तेजोमयान् प्रतीच्छ गृहाण । पात्रभूतो योग्यपात्र-स्त्वेति शेषः । मम मत्तः ॥ १० ॥

बाढमिति पञ्चीकारे । प्रहृष्टेनान्तरात्मना प्रत्यग्रहीदिति शेषः । मूर्तिमन्तः शरीरवन्तः ॥ ११ ॥

* "पन्नगमवरुणावुभौ" इति वा पाठः ।

केचिद् अङ्गारसदृशाः केचिद् धूमोपमास्तथा ।
चन्द्रार्कसदृशाः केचित् प्रह्वाञ्जलिपुटास्तथा ॥ १२ ॥
रामं प्राञ्जलयो भूत्वाब्रुवन् मधुरभाषिणः ।
इमे स्म नरशार्दूल ! शाधि किं करवाम ते ॥ १३ ॥
गम्यतामिति तानाह यथेष्टं रघुनन्दनः ।
मानसाः कार्य्यकालेषु साहाय्यं मे करिष्यथ ॥ १४ ॥
अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम् ।
एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतम् ॥ १५ ॥
स च तान् राघवो ज्ञात्वा विश्वामित्रं महामुनिम् ।
गच्छन्नेवाथ मधुरं श्लक्ष्णं वचनमब्रवीत् ॥ १६ ॥

प्रह्वाञ्जलिपुटाः प्रह्वाः नम्राः ते च ते अञ्जलेः पुटं संश्लेषो येषां तादृशाः ॥ १२ ॥

इमे स्म सन्निहिता वयमिति शेषः । शाधि आज्ञापय ॥ १३ ॥

गम्यताम् इदानीमिति शेषः । कार्य्यकालेषु मानसाः मनसि सन्निहिता भूत्वा साहाय्यं करिष्यथ ॥ १४ ॥

प्रदक्षिणं सकलदेवताधिदैवतत्वात् रामस्य प्रदक्षिणकरणम् ॥ १५ ॥

एतद्गतम् ।

*ततस्तु रामः काकुत्स्थः आश्रमात् समवाप्तिम् ।

किमेतन् मेघसङ्काशं पर्वतस्याविदूरतः ।

वृक्षषण्डमितो भाति परं कौतूहलं हि मे ॥ १७ ॥

दर्शनीयं मृगाकीर्णं मनोहरमतीव च ।

नानाप्रकारैः शकुनैर्वल्गुभाषैरलङ्कृतम् ॥ १८ ॥

निःसृताः स्म मुनिश्रेष्ठ ! कान्ताराद् रोमहर्षणात् ।

अनया लवगच्छामि देशस्य सुखवत्तया ॥ १९ ॥

सर्वं मे शंस भगवन् ! कस्याश्रमपदन्त्विदम् ।

सम्प्राप्ता यत्र ते पापा ब्रह्मघ्ना दुष्टचारिणः ॥ २० ॥

तप्यमाय च तान् सर्वान् स चाज्ञाम् रघुनन्दनः ॥

ससंहारान् सुसंहृष्टः श्रीमांस्तानेव वेदयत् ॥"

इत्यधिकं दृश्यते तत्रत्यिनम् ; बलातिबलयोर्विद्ययोरप्यपि युगपदुभयोर्विश्वामित्रे वैवोपदेशप्रदानसम्भवात् । स तान् उपदिष्टान् राघवो रामः चात्वा मवतो मुनितः प्रयोगवत्त्वेति शेषः ॥ १६ ॥

मेघसङ्काशं कार्ष्ण्यात् नैबिड्याच । वृक्षषण्डं वृक्षसमूहः किं वनसम्बन्धि उत आश्रमसम्बन्धि इति प्रश्नः ॥ १७ ॥

वल्गुभाषैः मधुरभाषैः ॥ १८ ॥

रोमहर्षणात् । तादृशयौ निर्भीषणत्वात् तत्र भयानकत्वेन रोमहर्षणत्वम् । अनया देशस्य सुखवत्तया इदमाश्रमपदं तद् गच्छामि ॥ १९ ॥

आश्रमपदं निर्णीय वद् जानेति शंस इति पृच्छति, सर्वमिति शंस ।

तव यज्ञस्य विघ्नाय दुरात्मानौ महामुने ! ।
भगवंस्तस्य को देशः सा यत्र तव याज्ञिकी ॥ २१ ॥
रक्षितव्या क्रिया ब्रह्मन् ! मया वध्याश्च राक्षसाः ? ।
एतत् सर्वं मुनिश्रेष्ठ ! श्रोतुमिच्छाम्यहं प्रभो ! ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
अष्टाविंशः सर्गः ॥ २८ ॥

सर्वशब्दविवक्षितं जिज्ञासान्तरं स्वयमेवाह,—संप्राप्ता इति । ते महाघ्नाः तव यज्ञस्य विघ्नाय यत्र संप्राप्ताः स देशः कः ? ॥ २० ॥
यत्र च तव याज्ञिकी क्रिया मया रक्षितव्या, यत्र च राक्षसा वध्याः, भगवन् ! तस्य त्वदाश्रमस्य को देशः ? कः प्रदेश इत्यन्वयः ॥ २१ ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

एकोनत्रिंशः सर्गः ।



अथ तस्याप्रमेयस्य वचनं परिपृच्छतः ।
विश्वामित्रो महातेजा व्याख्यातुमुपचक्रमे ॥ १ ॥

इह राम ! महाबाहो ! विष्णुर्देवनमस्कृतः ।
वर्षाणि सुबहून्यत्र तथा युगशतानि च ॥ २ ॥

तपश्चरणयोगार्थमुवास सुमहातपाः ।
एष पूर्वाश्रमो राम ! वामनस्य महात्मनः ॥ ३ ॥

सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः ।
एतस्मिन्नेव काले तु राजा वैरोचनिर्बलिः ॥ ४ ॥

तस्य रामस्य परिपृच्छतो वचनं श्रुत्वेति शेषः । व्याख्यातुं प्रष्टोत्तरमिति शेषः ॥ १ ॥

इह वने । इह प्रदेशे ॥ २ ॥

तपश्चरणयोगार्थं स्वाचारेण लोकप्रवर्त्तनाय स्वतपश्चरणम् । वामनस्य करिष्यमाणवामनावतारस्य विष्णोः पूर्वाश्रमः वामनावतारात् पूर्वकाले तपोयोगार्थं परिगृहीत आश्रमः ॥ ३ ॥

सिद्धाश्रमत्वव्यवहारे बीजमाह,—सिद्ध इति यस्मात् अत्र महातपाः विष्णुः तपःसिद्धः जात इति । एतस्मिन् काले विष्णोस्तपःकाले ॥ ४ ॥

निर्जित्य दैवतगणान् सेन्द्रान् सहमरुद्गणान् ।
कारयामास तद्राज्यं त्रिषु लोकेषु विश्रुतः ॥ ५ ॥
यज्ञं चकार सुमहान् असुरेन्द्रो महाबलः ।
बलेस्तु यजमानस्य देवाः साग्निपुरोगमाः ।
समागम्य स्वयं चैव विष्णुमूचुरिहाश्रमे ॥ ६ ॥
बलिर्वैरोचनिर्विष्णो यजते यज्ञमुत्तमम् ।
असमाप्तव्रते * तस्मिन् स्वकार्य्यमभिपद्यताम् ॥ ७ ॥

मरुद्गणान् आमरुदादिवायुगणान् । कारयामास स्वार्थे णिच् चकारेत्यर्थः । यद्वा इन्द्रादिराज्यं स्वीयैः कैश्चिदेव कारयामासेत्यन्वयः । बलेर्यजमानस्य व्यवहारं दृष्ट्वेति शेषः । साग्निपुरोगमाः पुरोगमेन अग्निना सहिता इत्यर्थः । अग्निमुखत्वाच्च देवानां साग्निपुरोगमत्वं स्वयमेवागम्य न तु दूतमुखेन ॥ ६ ॥

यजते कर्त्रभिप्रायत्वात् आत्मनेपदम् । ननु असुरस्य बलेर्वहियो यागाद्यनुपपत्तिः यागतर्पणीयदेवताभावात् इन्द्रादीनां तद्द्वेष्यत्वात् । न च शब्दमात्रं देवतेति युक्तम् । अर्थवादप्रामाण्येन देवताया विग्रहवत्त्वस्योत्तरमीमांसायां सिद्धान्तितत्वादिति चेन्न कर्मदेवाजानदेवभेदेन देवानां द्वैविध्यात् । तत्र ये कर्मणा देवत्वं प्राप्ताः ते कर्मदेवाः । आजानदेवास्तु यज्ञनवार्थभूताः मध्ये नियमबद्धाः कर्म-

* "असमाप्ते क्रतौ" इति वा पाठः ।

ये चैनमभिवर्त्तन्ते याचितार इतस्ततः ।
यच्च यत्र यथावच्च सर्वं तेभ्यः प्रयच्छति ॥ ८ ॥
स त्वं सुरहितार्थाय मायायोगमुपाश्रितः ।
वामनत्वं गतो विष्णो ! कुरु कल्याणमुत्तमम् ॥ ९ ॥

देवेभ्यः प्राचीना एव । अत्र्याजानदेवानां हव्यत्वेऽपि आजानदेवानां यज्ञे तर्प्यत्वे न दोषः । विघ्नकर्तारोऽप्यत्र कर्मदेवा एव यज्ञाद्यधिकाराभावेऽप्याजानदेवानामेव स्वयष्टव्यदेवतान्तराभावात् कर्मदेवानामवश्येव अतएव इन्द्रादीनां यज्ञादिश्रवणं नानुपपन्नम् इत्यलम् विस्तरः । असमाप्तव्रते असमाप्तयज्ञे यज्ञार्थम् आसीनानां देवानां कार्यम् अभिपद्यतां समाप्यताम् * । ७ ।

असमाप्तव्रत इत्युक्तेः प्रयोजनं ह्यर्थयन्त[illegible] स्वयमेव वदन्ति,—ये चेति । अभिवर्तन्ते प्राप्नुवन्ति इतस्ततः नानादेशेभ्यः ; यच्च गोभूहिरण्यादिविषये यत्र वस्तु याचन्ते, तेभ्यः सर्वं यथावत् यथाहुत्थाय असमानादिदक्षिणं दत्वा [illegible] प्रयच्छति इत्यर्थः । ८ ।

माया स्वस्वरूपाच्छादनेन [illegible] तस्य योगः सम्बन्धः समाश्रितः । वामनत्वमाप्य [illegible] कल्याणमत्यर्थत्वेन [illegible] प्रार्थनम् । ९ ।

* [illegible]

एतस्मिन्नन्तरे राम ! कश्यपोऽग्निसमप्रभः ।
अदित्या सहितो राम ! दीप्यमान इवौजसा ॥ १० ॥
देवीसहायो भगवान् दिव्यं वर्षसहस्रकम् ।
व्रतं समाप्य वरदं तुष्टाव मधुसूदनम् ॥ ११ ॥
तपोमयं तपोराशिं तपोमूर्त्तिं तपात्मकम् ।
तपसा त्वां सुतप्तेन पश्यामि पुरुषोत्तमम् ॥ १२ ॥
शरीरे तव पश्यामि जगत् सर्वमिदं प्रभो ! ।

एतस्मिन्नन्तरे देवैर्वामनावतारप्रार्थनसमये । रामेति द्विः सम्बोधनं स्वाश्रमसन्निधानेन रामपृष्टैतन्महत्त्वकथनेन [illegible] बोध्यम् ॥ १० ॥

अदित्या सहितो व्रतं समाप्य, देवीसहायस्तुष्टाव इत्यन्वयः । देवी अदितिरेव । यद्वा देवी सरस्वती । वरदं [illegible] व्रतसमाप्तौ वरदानोन्मुखम् ॥ ११ ॥

स्तोत्रप्रकारमाह,—तपोमयमित्यादि । [illegible] प्रचुरतपोयुक्तमित्यर्थः । तावता पर्याप्तिं [illegible] आह,— तपोराशिं [illegible] भगवतस्तपोराशित्वम् । [illegible] वोऽस्यति [illegible] आह,—तपोमूर्त्तिमिति । [illegible] नाविर्भावानि । तपात्मकमिति [illegible] मिति [illegible] महात्मनं [illegible] । [illegible] त्वामपश्यत्वा [illegible] ॥ १२ ॥

त्वमनादिरनिर्देश्यस्त्वामहं शरणं गतः ॥ १३ ॥
तमुवाच हरिः प्रीतः कश्यपं धूतकल्मषम् ।
वरं वरय भद्रं ते वरार्होऽसि मतो मम ॥ १४ ॥
तत् श्रुत्वा वचनं तस्य मारीचः कश्यपोऽब्रवीत् ।
अदित्या देवतानाञ्च मम चैवाद्ययाचितम् ॥ १५ ॥
वरं वरद ! सुप्रीतो दातुमर्हसि सुव्रत ! ।
पुत्रत्वं गच्छ भगवन् ! अदित्या मम चानघ ! ॥ १६ ॥
भ्राता भव यवीयांस्त्वं शक्रस्यासुरसूदन ! ।
शोकार्त्तानां तु देवानां साहाय्यं कर्त्तुमर्हसि ॥ १७ ॥
अयं सिद्धाश्रमो नाम प्रसादात् ते भविष्यति ।
सिद्धे कर्मणि देवेश ! उत्तिष्ठ भगवन्नितः ॥ १८ ॥

दृश्यमानच्च वैराजं रूपमित्याह,—शरीरे इत्यादि । अनिर्देश्यः अशक्यपरिच्छेदः ॥ १३ ॥

वरम् अभीष्टम् । वरार्हः दिव्यमर्षसहस्रतपसा वरदानयोग्यः ॥ १४ ॥

मारीचः मरीचिपुत्रः । अदित्या इत्यादेः याच्यमानाया इत्यादिशेषः ॥ १५ ॥

याच्यमानवरमाह,—पुत्रत्वमित्यादि ॥ १६ ॥

यवीयान् कनिष्ठः, साहाय्यं बलिच्छलनरूपम् ॥ १७ ॥

अयं, त्वदाश्रमं तपोमयत्वं मया देवैश्च अनुभूयते इत्यर्थः । सिद्धे

अथ विष्णुर्महातेजा अदित्यां समजायत ।
वामनं रूपमास्थाय वैरोचनिमुपागमत् ॥ १९ ॥
त्रीन् पदान् अथ भिक्षित्वा प्रतिगृह्य च मेदिनीम् ।
आक्रम्य लोकान् लोकार्थी सर्वलोकहिते रतः ॥ २० ॥
महेन्द्राय पुनः प्रादान् नियम्य बलिमोजसा ।
त्रैलोक्यं स महातेजाश्चक्रे शक्रवशं पुनः ॥ २१ ॥
तेनैव पूर्वमाक्रान्त आश्रमः श्रमनाशनः ।
मयापि भक्त्या तस्यैव वामनस्योपभुज्यते ॥ २२ ॥
एतमाश्रममायान्ति राक्षसा विघ्नकारिणः ।
अत्र ते पुरुषव्याघ्र ! हन्तव्या दुष्टचारिणः ॥ २३ ॥
अद्य गच्छामहे राम ! सिद्धाश्रममनुत्तमम् ।

एतदाश्रमस्थितिसाध्ये तपःकर्मणि सिद्धे सति निष्पन्ने सति प्रयोजनाभावात् इत उत्तिष्ठ देवकार्य्यायेति शेषः ॥ १८ ॥

अथ देवकार्य्यनियोगानन्तरम् ॥ १९ ॥

आक्रम्य त्रिभिः पदैरिति शेषः । लोकार्थी लोकाक्रमणार्थी ॥ २० ॥

नियम्य बद्ध्वा ॥ २१ ॥

तेनैव वामनावतारकर्त्रा, मया विश्वामित्रेण ॥ २२ ॥

पूर्वसर्गान्तश्लोकद्वितीयप्रश्नोत्तरमाह,—एतमिति ॥ २३ ॥

तदाश्रमपदं तात! तवाप्येतद् यथा मम ॥ २४ ॥
इत्युक्त्वा परमप्रीतो गृह्य रामं सलक्ष्मणम् ।
प्रविशन्नाश्रमपदं व्यरोचत महामुनिः ॥ २५ ॥
शशीव गतनीहारः पुनर्वसुसमन्वितः ।
तं दृष्ट्वा मुनयः सर्वे सिद्धाश्रमनिवासिनः ।
उत्पत्योत्पत्य सहसा विश्वामित्रमपूजयन् ॥ २६ ॥
यथार्हं चक्रिरे पूजां विश्वामित्राय धीमते ।
तथैव राजपुत्राभ्यामकुर्वन्नतिथिक्रियाम् ॥ २७ ॥
मुहूर्त्तमथ विश्रान्तौ राजपुत्रावरिन्दमौ ।
प्राञ्जलिमुनिशार्दूलमूचतू रघुनन्दनौ ॥ २८ ॥
अद्यैव दीक्षां प्रविश भद्रं ते मुनिपुङ्गव ! ।
सिद्धाश्रमोऽयं सिद्धः स्यात् सत्यमस्तु वचस्तव ॥ २९ ॥

अनुत्तमं सर्वोत्तमम्। हे तात! तदेतदाश्रमपदं यथा मम स्वभूतं, तथा तवापि विष्णोरवतारत्वादिति गूढोऽभिसन्धिः ॥ २४ ॥

पुनर्वसू द्वे तारे ॥ २५ ॥

उत्पत्य उत्पत्य सन्तोषातिशयादिति शेषः ॥२६॥२७॥२८॥

अद्यैव प्रवेशदिनएव; कालविलम्बे फलाभावात्। सिद्धः त्वद्यज्ञसिद्ध्या अन्वर्थसिद्धसंज्ञः। तव वचः 'अद्यैव पुरुषव्याघ्र! हन्तव्या दुष्टचारिणः' इति यत् तत् सत्यमस्तु। राक्षसान् सर्वथा हनिष्ये इति भावः ॥ २९ ॥

एवमुक्तो महातेजा विश्वामित्रो महानृषिः ।
प्रविवेश तदा दीक्षां नियतो नियतेन्द्रियः ॥ ३० ॥
कुमाराविव तां रात्रिमुषित्वा सुसमाहितौ ।
प्रभातकाले चोत्थाय पूर्वां सन्ध्यामुपास्य च ॥ ३१ ॥
प्रशुची परमं जप्यं * समाप्य नियमेन च ।
हुताग्निहोत्रमासीनं विश्वामित्रमवन्दताम् ॥ ३२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सिद्धाश्रम-
प्रवेशो नाम एकोनत्रिंशः सर्गः ॥२९॥

नियतः निगृहीतान्तःकरणः ॥ ३० ॥

कुमाराविव स्कन्दविशाखाविव ॥ ३१ ॥

प्रशुची अवतारत्वात् अशुचित्वसम्भावनाराहित्येन प्रकर्षतः शुची नियमेन कर्त्तव्यं जप्यं समाप्येत्यन्वयः । "दीक्षामध्ये नाग्निहोत्रम्" इति निषेधादग्निहोत्रपदमौपासनहोमपरमिति केचित् ॥ ३२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

---

* "स्पृष्टोदकौ शुची जप्यम्"
इति वा पाठः ।

त्रिंशः सर्गः ।



अथ तौ देशकालज्ञौ राजपुत्रावरिन्दमौ ।
देशे काले च वाक्यज्ञौ अब्रूतां कौशिकं वचः ॥ १ ॥
भगवन् ! श्रोतुमिच्छावो यस्मिन् काले निशाचरौ ।
संरक्षणीयौ तौ ब्रूहि नातिवर्तेत तत्क्षणम् ॥ २ ॥
एवं ब्रुवाणौ काकुत्स्थौ त्वरमाणौ युयुत्सया ।
सर्वे ते मुनयः प्रीताः प्रशशंसुर्नृपात्मजौ ॥ ३ ॥
अद्यप्रभृति षड्रात्रं रक्षतं राघवौ युवाम् ।
दीक्षां गतो ह्येष मुनिर्मौनित्वं च गमिष्यति ॥ ४ ॥
तौ तु तद् वचनं श्रुत्वा राजपुत्रौ यशस्विनौ ।
अनिद्रं षड् अहोरात्रं तपोवनमरक्षताम् ॥ ५ ॥

अथेति । कौशिकं वचोऽब्रूतामित्यन्वयः ॥ १ ॥

तौ निशाचरौ संरक्षणीयौ यज्ञरक्षणाय निवारणीयौ यज्ञा-दित्यर्थः । तत् क्षणं च यथा यथा नातिवर्तेत नातिक्रमेत तथा ब्रूहि इत्यन्वयः ॥ २ ॥ ३ ॥

[illegible] दीक्षाभिधे षष्ठे दीक्षया तस्य मौनित्वाद् [illegible] —

उपासाञ्चक्रतुर्वीरौ यत्तौ परमधन्विनौ ।

ररक्षतुर्मुनिवरं विश्वामित्रमरिन्दमम् ॥ ६ ॥

अथ काले गते तस्मिन् षष्ठेऽहनि तथागते ।

सौमित्रिमब्रवीद् रामो यत्तो भव समाहितः ॥ ७ ॥

रामस्यैवं ब्रुवाणस्य त्वरितस्य युयुत्सया ।

प्रजज्वाल ततो वेदिः सोपाध्यायपुरोहिता ॥ ८ ॥

सदर्भचमसस्रुक्का ससमित्कुसुमोच्चया ।

विश्वामित्रेण सहिता वेदिर्जज्वाल सर्त्विजा ॥ ९ ॥

अद्येति । मौनित्वञ्च गमिष्यति, अद्यापि दीक्षितत्वात् मौन्येव, अतः परमपि षडू रात्रपर्य्यन्तं मौनित्वं प्राप्स्यति इत्यर्थः ॥४॥५॥

यत्तौ सन्नद्धौ । परमधन्विनावित्यार्षम् । विश्वामित्रं तद् यज्ञम् ॥ ६ ॥

काले यथोक्तरात्रषट्के । षष्ठे अहनि आगते इति च्छेदः । प्राप्ते इत्यर्थः । यद्वा षष्ठे अहनि गते रात्राविन्यर्थः । यत्तः सज्जः । समाहितः एकाग्रचित्तः ॥ ७ ॥

उपाध्यायो ब्रह्मा पुरोहित उपद्रष्टा ब्रह्मन् [illegible]-पूर्वम् । इदं ज्वलनं राक्षसागमनसूचक [illegible] ॥ ८ ॥

दर्भचित्रचमसस्रुग्वती * समित्कुसुमोच्चयेन सहिता इदं वेदिज्वलनं [illegible] ॥ ९ ॥

* अयमर्द्धः पाण्डुलिपि टीकायां [illegible] ।

मन्त्रवच्च यथान्यायं यज्ञोऽसौ संप्रवर्त्तते ।
आकाशे च महान् शब्दः प्रादुरासीद् भयानकः ॥ १० ॥
आवार्य्य गगनं मेघो यथा प्रावृषि दृश्यते ।
तथा मायां विकुर्वाणौ राक्षसावभ्यधावताम् ॥ ११ ॥
मारीचश्च सुबाहुश्च तयोरनुचरास्तथा ।
आगम्य भीमसङ्काशा रुधिरौघानवासृजन् ॥ १२ ॥
तां तेन रुधिरौघेण वेदिं वीक्ष्य समुक्षिताम् ।
सहसाभिद्रुतो रामस्तानपश्यत्ततो दिवि ॥ १३ ॥
तावापतन्तौ सहसा दृष्ट्वा राजीवलोचनः ।
लक्ष्मणं त्वभिसंप्रेक्ष्य रामो वचनमब्रवीत् ॥ १४ ॥

संप्रवर्त्तते स्म आकाशे महान् शब्दः प्रादुरासीच्च ॥ १० ॥

यथा प्रावृषि गगनमावार्य्य गगनमावृत्य महाशनि-महागर्जन-महावर्षादिविचित्रकार्य्यकारी मेघो दृश्यते तथा मायां प्रकटीकुर्वाणौ अभ्यधावताम् ॥ ११ ॥

कौ तौ का च सा माया? इत्यपाह,—मारीच इत्यादि । अवासृजन् ववर्षुः ॥ १२ ॥

समुक्षिताम् अभ्यासे इति शेषः । अभिद्रुतं प्राप्तो प्रधावन् तस्माद्दृष्टा ततो दिवि तानपश्यत् ॥ १३ ॥

आपतन्तौ स्वसम्मुखमागच्छन्तौ ॥ १४ ॥

पश्य लक्ष्मण ! दुर्वृत्तान् राक्षसान् पिशिताशनान् ।
मानवास्त्रसमाधूतान् अनिलेन यथा घनान् ॥ १५ ॥
करिष्यामि न सन्देहो नोत्सहे हन्तुमीदृशान् ।
इत्युक्त्वा वचनं रामश्चापे सन्धाय वेगवान् ॥ १६ ॥
मानवं परमोदारमस्त्रं परमभास्वरम् ।
चिक्षेप परमक्रुद्धो मारीचोरसि राघवः ॥ १७ ॥
स तेन परमास्त्रेण मानवेन समाहतः ।
सम्पूर्णं योजनशतं क्षिप्तः सागरसंप्लवे ॥ १८ ॥
विचेतनं विघूर्णन्तं शीतेषुबलपीडितम् ।
निरस्तं दृश्य मारीचं रामो लक्ष्मणमब्रवीत् ॥ १९ ॥
पश्य लक्ष्मण ! शीतेषुं मानवं मनुसंहितम् ।

मानवास्त्रसमाधूतान् करिष्यामि पश्येति योजना ॥ १५ ॥
ईदृशान् स्थितायुःशेषान् दुर्बलान् वा ॥ १६ ॥
परमोदारं परमश्रेष्ठम् * ॥ १७ ॥
स तेनेति । स मारीचः सागरसंप्लवे समुद्रमध्ये ॥ १८ ॥
विचेतनं चैतन्यरहितम् अतएव विघूर्णमानम् । शीतेषुरिति मानवास्त्रनामान्तरं दृश्य दृष्ट्वा ॥ १९ ॥

---

* ननु सर्वदाऽऽश्चर्येषु अस्त्रप्रयोगं प्रतिज्ञाय मारीचोरसि तत्प्रयोगः कथमिति चेन्न पूर्वश्लोके राक्षसशब्दस्य मारीचपरत्वादिति केचित् ।

मोहयित्वा नयत्येनं न च प्राणैर्वियुज्यते ॥ २० ॥
इमानपि वधिष्यामि निर्घृणान् दुष्टचारिणः।
राक्षसान् पापकर्मस्थान् यज्ञघ्नान् रुधिराशनान्॥ २१ ॥
इत्युक्त्वा लक्ष्मणञ्चाशु लाघवं दर्शयन्निव।
विगृह्य सुमहच्चास्त्रमाग्नेयं रघुनन्दनः ॥ २२ ॥
सुबाहूरसि चिक्षेप स विद्धः प्रापतद् भुवि।
शेषान् वायव्यमादाय निजघान महायशाः।
राघवः परमोदारो मुनीनां मुदमावहन् * ॥ २३ ॥
स हत्वा राक्षसान् सर्वान् यज्ञघ्नान् रघुनन्दनः।

शीतेषुं शीतेष्वित्यपरनामकं मानवास्त्रम्। मनुसंहितं मनुप्रयुक्तम्। वियुज्यते वियोजयतीति यावत्॥ २० ॥ २१ ॥ २२ ॥

निजघान दूरोत्सारण-पूर्व्वकं नाशनं वायव्यास्त्र-फलं बोध्यम् ॥ २० ॥ २४ ॥

---

* पाश्चात्यपुस्तकेषु—राघवः परमोदारः—इत्यारभ्य सार्द्धः श्लोकः यावत् न दृश्यते। अत्र तु—

"समेत्य मुनिभिः सर्व्वैर्विश्वामित्रादिभिस्तदा।
पूजितोऽभिष्टुतश्चैव जयेन च सभाजितः।
विस्मिताश्चाभवन् सर्व्वे मुनयो रामकर्म्मणा ॥"

इति पठ्यते।

ऋषिभिः पूजितस्तत्र यथेन्द्रो विजये पुरा ॥ २४ ॥

अथ यज्ञे समाप्ते तु विश्वामित्रो महामुनिः ।

निरीतिका दिशो दृष्ट्वा * काकुत्स्थमिदमब्रवीत् ॥ २५ ॥

कृतार्थोऽस्मि महाबाहो कृतं गुरुवचस्त्वया ।

सिद्धाश्रममिदं सत्यं कृतं वीर ! महायशः † ।

स हि रामं प्रशस्यैवं ताभ्यां सन्ध्यामुपागमत् ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
विश्वामित्रयज्ञो नाम त्रिंशः
सर्गः ॥ ३० ॥

निरीतिकाः निरुपद्रवाः ॥ २५ ॥

सत्यं कृतम् अन्वर्थनामकं कृतमित्यर्थः ॥ २६ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रिंशः सर्गः ॥ ३० ॥

---

* "दृष्ट्वाश्रमं कृतक्षेमम्" इति ग पाठोवाः ।

† "सिद्धाश्रमपदं चेदं भूयः सिद्धतरं कृतम्" इति पाठोवाः ।

एकत्रिंशः सर्गः ।



अथ तां रजनीं तत्र कृतार्थौ रामलक्ष्मणौ ।
ऊषतुर्मुदितौ वीरौ प्रहृष्टेनान्तरात्मना ॥ १ ॥
प्रभातायान्तु शर्वर्य्यां कृतपौर्वाह्णिकक्रियौ * ।
विश्वामित्रमृषींश्चान्यान् सहितावभिजग्मतुः ॥ २ ॥
अभिवाद्य मुनिश्रेष्ठं ज्वलन्तमिव पावकम् ।
ऊचतुः परमोदारं वाक्यं मधुरभाषिणौ ॥ ३ ॥
इमौ स्म मुनिशार्दूल ! किङ्करौ समुपागतौ ।
आज्ञापय मुनिश्रेष्ठ ! शासनं करवाव किम् ॥ ४ ॥

एवं स्वयज्ञविघ्नविनाशफलकं सर्वास्त्रसम्बन्धानुग्रहं कृत्वा भगवान् विश्वामित्रः सहजलक्ष्मीशक्तिसम्बन्धानुग्रहाय प्रवर्त्तत इत्याह, अथेति । तत्र,—यज्ञशालायाम् ॥ १ ॥

कृता पौर्वाह्णिकी क्रिया याभ्यां तौ । अभिजग्मतुः अभिवादनार्थमिति शेषः । तदुक्तं पूर्वसर्गान्ते 'सन्ध्यामुपागमत्' इति । सह· गतो विश्वामित्रो होमार्थं त्वरया शालामागत इति बोध्यम् ॥ २ ॥

मुनिश्रेष्ठं विश्वामित्रम् ॥ ३ ॥

---

* "शौचं कृत्वा महाबलौ" इति च पाठान्तरः ।

एवमुक्ते तयोर्वाक्ये सर्व एव महर्षयः।
विश्वामित्रं पुरस्कृत्य रामं वचनमब्रुवन् ॥ ५ ॥
मैथिलस्य नरश्रेष्ठ ! जनकस्य भविष्यति ।
यज्ञः परमधर्मिष्ठस्तत्र यास्यामहे वयम् ॥ ६ ॥
त्वं चैव नरशार्दूल ! सहास्माभिर्गमिष्यसि ।
अद्भुतञ्च धनूरत्नं तत्र त्वं द्रष्टुमर्हसि ॥ ७ ॥
तद्धि पूर्वं नरश्रेष्ठ ! दत्तं सदसि दैवतैः * ।

स्पष्टमन्यत् ॥ ४ ॥

तयोरिति ताभ्यामित्यर्थः । विश्वामित्रं पुरस्कृत्य कृतविश्वामित्रानुमतिका इति यावत् † ॥ ५ ॥

मैथिलस्य मिथिलाधिपतेः। परमधर्मिष्ठः उत्कटाश्रयितधर्मवान्। परमेति पृथक् पदं वा, परा मा यस्मिन् इत्यर्थकं रामसम्बोधनम् ॥ ६ ॥ ७ ॥

पूर्वं पूर्वस्मिन् काले। देवरातारख्यस्य प्राचीनजनकस्य यज्ञे सदसि

---

* "प्राग्दत्तं किल तत् तस्य न्यासभूतं महत् धनुः।
देवासुरे तदा युद्धे हते देवैः सवासवैः ।"

इति कतीयाः ।

† विश्वामित्रं पुरस्कृत्य विश्वामित्रप्रश्नतयो मुनय इति वा।

अप्रमेयबलं घोरं मखे परमभास्वरम् ॥ ८ ॥
नास्य देवा न गन्धर्वा नासुरा न च राक्षसाः।
कर्तुमारोपणं शक्ता न कथञ्चन मानुषाः ॥ ९ ॥
धनुषस्तस्य वीर्य्यं हि जिज्ञासन्तो महीक्षितः।
न शेकुरारोपयितुं राजपुत्रा महाबलाः * ॥ १० ॥
तद्धनुर्नरशार्दूल ! मैथिलस्य महात्मनः।
तत्र द्रक्ष्यसि काकुत्स्थ ! यज्ञञ्च परमाद्भुतम् ॥ ११ ॥
तद्धि यज्ञफलं तेन मैथिलेनोत्तमं धनुः।
याचितं नरशार्दूल ! सुनाभं सर्वदैवतैः ॥ १२ ॥

दैवतैर्दक्षयज्ञवधे प्रसादितात्त्र्यम्बकाल्लब्धं यज्ञप्रसादितैः शिवसहितैर्देवैर्दत्तम् अतस्तत्र तिष्ठतीति शेषः ॥ ८ ॥

तस्याद्भुतत्वमाह,—नास्येति। आरोपणं शरसन्धानयोग्यज्या-सम्बन्धः। न कथञ्चन कथमपि इत्यर्थः ॥ ९ ॥ १० ॥

तत्र मिथिलायां यज्ञञ्चेति यज्ञं द्रक्ष्यसि चेत्यन्वयः। चकारेण जानकीस्वीकारसमुच्चयः ॥ ११ ॥

कुतस्तादृशस्य धनुषस्तत्र स्थितिः ? तत्राह,—तद्धीति। उत्तमं तद्धनुः मैथिलेन निजयज्ञप्रीतदेवेभ्यः यज्ञफलत्वेन याचितं युद्धे रिपूणां जयाय सर्वदैवतैः शिवसहितैः सर्वदैवतैर्दत्तम् अतस्तत्र तिष्ठतीत्यर्थः। तदुक्तं पाद्मे, चापं शम्भोर्दयादत्तमिति। कौर्मेऽपि "प्रीतश्च भगवानी-

* "न शेकुरातोलयितुमपि पूरयितुं कुतः" इति पाठान्तरम्।

आर्यागभूतं नृपतेस्तस्य वेश्मनि राघव ।
अर्चितं विविधैर्गन्धैर्धूपैश्चागुरुगन्धिभिः ॥ १३ ॥
एवमुक्त्वा मुनिवरः प्रस्थानमकरोत् तदा ।
सर्षिसङ्घः सकाकुत्स्थ आमन्त्र्य वनदेवताः ॥ १४ ॥
स्वस्ति वोऽस्तु गमिष्यामि सिद्धः सिद्धाश्रमादहम् ।
उत्तरे जाह्नवीतीरे हिमवन्तं शिलोच्चयम् ॥ १५ ॥
इत्युक्त्वा मुनिशार्दूलः कौशिकः स तपोधनः ।
उत्तरां दिशमुद्दिश्य प्रस्थातुमुपचक्रमे ॥ १६ ॥
तं व्रजन्तं मुनिवरमन्वगादनुसारिणाम् ।

शशिमूली नीललोहितः । प्रददौ धनुनाशार्थं जनकायाद्भुतं प्रभुः" इति सुनाभं शोभनमुष्टिबन्धनस्थानम् ॥ १२ ॥

आर्यागभूतं यजनीयदेवताभूतमित्यर्थः । वेश्मनीत्यस्य तिष्ठति इति शेषः । अतएवाह अर्चितमित्यादि । न्यासभूतं नरपतेरिति क्वचित् पाठः । तत्रापि न्यस्यते अस्मिन् देवतेति व्युत्पत्त्या स एवार्थः । देवताध्यासश्च यागार्थं एव प्रतिमादौ ॥ १३ ॥

एवमुक्त्वेति । महर्षिगणसहारेति शेषः । मुनिवरो विश्वामित्रः । वनदेवताः वनदुर्गाद्याः ॥ १४ ॥

सिद्धः निर्विघ्नयज्ञसिद्धेति भावः । स गमिष्यतीत्यन्वयात्,—कृत-रेति ॥ १५ ॥ १६ ॥

शकटीशतमात्रन्तु प्रयाणे ब्रह्मवादिनाम् ॥ १७ ॥
मृगपक्षिगणाश्चैव सिद्धाश्रमनिवासिनः।
अनुजग्मुर्महात्मानो विश्वामित्रं तपोधनम् ॥ १८ ॥
निवर्त्तयामास ततः सर्षिसङ्घः सपक्षिणः।
ते गत्वा दूरमध्वानं लम्बमाने दिवाकरे ॥ १९ ॥
वासञ्चक्रुर्मुनिगणाः शोणाकूले समाहिताः।
तेऽस्तं गते दिनकरे स्नात्वा हुतहुताशनाः ॥ २० ॥
विश्वामित्रं पुरस्कृत्य निषेदुरमितौजसः।
रामोऽपि सहसौमित्रिर्मुनींस्तानभिपूज्य च ॥ २१ ॥
अग्रतो निषसादाथ विश्वामित्रस्य धीमतः।
अथ रामो महातेजा विश्वामित्रं तपोनिधिम् ॥ २२ ॥

अनुसारिणाम् उक्तदिगनुसारिणां पश्चाद्गामिनामिति वा। शकटीशतमात्रं शतपरिच्छिन्नशकटारोपितामिहोत्रसम्भारादिमत् ब्रह्मवादिनां यूथम् अन्वगादिति सम्बन्धः ॥ १८ ॥

पक्षिणो निवर्त्तयामासेत्यनेन स्त्रीणामनिवर्त्तनमुक्तं तदेवाह,— ते गत्वेति ॥ १९ ॥

शोणानदस्यैव शोणा इत्यपि नामेत्याहुः। वस्तुतः शोणा इति गिरिव्रजसमीपस्था नदीविशेषः इत्येतदुत्तरत्र स्फुटम्। अस्तंगते अस्तं गिरिमितीत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥

पप्रच्छ मुनिशार्दूलं कौतूहलसमन्वितः ।
भगवन् ! को न्वयं देशः सम्पन्नवनशोभितः ? ॥ २३ ॥
श्रोतुमिच्छामि भद्रं ते वक्तुमर्हसि तत्त्वतः ।
नोदितो रामवाक्येन कथयामास सुव्रतः ।
तस्य देशस्य निखिलमृषिमध्ये महातपाः ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे शोणातीर-
निवासो नाम एकत्रिंशः सर्गः ॥ ३१ ॥

अयं देशः शोणाकूलस्थः ॥ २३ ॥
निखिलं वैभवमिति शेषः ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

द्वात्रिंशः सर्गः ।

ब्रह्मयोनिर्महानासीत् कुशो नाम महातपाः ।
अक्लिष्टव्रतधर्मज्ञः सज्जनप्रतिपूजकः ॥ १ ॥
स महात्मा कुलीनायां युक्तायां * सुमहाबलान् ।
वैदर्भ्यां जनयामास चतुरः सदृशान् सुतान् ॥ २ ॥
कुशाम्बं कुशनाभञ्च असूर्त्तरजसं † वसुम् ।
दीप्तियुक्तान् महोत्साहान् क्षत्रधर्मचिकीर्षया ॥ ३ ॥

शोणाकूले देशविशेषवासने महेच्छागमनं देश इत्युपक्रमाह,— ब्रह्मयोनिरिति ब्रह्मपुत्र इत्यर्थः। अक्लिष्टव्रतश्चासौ धर्मज्ञश्चेति विग्रहः ॥ १ ॥

युक्तायाम् सर्वस्त्रीगुणयुक्तायामित्यर्थः ॥ २ ॥

असूर्त्तरजसं न विद्यते सूर्त्तं प्रवृत्तं रजो यस्य तम् वसुमिति शेषविभागादयम्। क्षत्रधर्म-चिकीर्षया तद्धर्म-रक्षि-करणेच्छया इत्यर्थः ॥३॥

---

* "आयायाम्" इति वा पाठः ।

† "असूर्त्तरजसम्" इति वा पाठः ।

तानुवाच कुशः पुत्रान् धर्मिष्ठान् सत्यवादिनः ।
क्रियतां पालनं पुत्त्रा ! धर्मं प्राप्स्यथ पुष्कलम् ॥ ४ ॥
कुशस्य वचनं श्रुत्वा चत्वारो लोकसत्तमाः ।
निवेशं चक्रिरे सर्वे पुराणां नृवरास्तदा ॥ ५ ॥
कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत् पुरीम् ।
कुशनाभस्तु धर्मात्मा पुरं चक्रे महोदयम् ॥ ६ ॥
असूर्त्तरजसो नाम धर्मारण्यं महामतिः * ।
चक्रे पुरवरं राजा वसुर्नाम गिरिव्रजम् ॥ ७ ॥
एषा वसुमती नाम वसोस्तस्य महात्मनः ।
एते शैलवराः पञ्च प्रकाशन्ते समन्ततः ॥ ८ ॥
सुमागधी नदी रम्या मगधान् विश्रुता ययौ ।
पञ्चानां शैलमुख्यानां मध्ये मालेव शोभते ॥ ९ ॥

पालनं प्रजापालनम् ॥ ४ ॥
निवेशं सन्निवेशम् ॥ ५ ॥
महोदयं महोदयनामकम् ॥ ६ ॥ ७ ॥
एषा गिरिव्रजापरपर्य्याया ॥ ८ ॥
सुमागधी मगधान् आययाविति पदच्छेदः ॥ ९ ॥

---

* "तथाऽमूर्त्तरजा वीरश्चक्रे प्राग्ज्योतिषं पुरम् ।
धर्मारण्यसमीपस्थम्——————" इति पाठान्तरम् ।

सैषा हि मागधी राम ! वसोस्तस्य महात्मनः ।
पूर्वाभिचरिता राम ! सुक्षेत्रा शस्यमालिनी ॥ १० ॥
कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम् ।
जनयामास धर्मात्मा घृताच्यां रघुनन्दन ! ॥ ११ ॥
तास्तु यौवनशालिन्यो रूपवत्यः स्वलङ्कृताः ।
उद्यानभूमिमागम्य प्रावृषीव शतह्रदाः ॥ १२ ॥
गायन्त्यो नृत्यमानाश्च वादयन्त्यस्तु राघव ! ।
आमोदं परमं जग्मुर्वराभरणभूषिताः ॥ १३ ॥
अथ ताश्चारुसर्वाङ्ग्यो रूपेणाप्रतिमा भुवि ।
उद्यानभूमिमागम्य तारा इव घनान्तरे ॥ १४ ॥
ताः सर्वा गुणसम्पन्ना रूपयौवनसंयुताः ।
दृष्ट्वा सर्वात्मको वायुरिदं वचनमब्रवीत् ॥ १५ ॥

* सा मागधी मगधादागततया मागधीत्वेन प्रसिद्धा सा वसा प्रोक्ता तस्य महंशस्य वसोर्भवति, पूर्वाभिचरिता पूर्वदिग्गामिनी । सुक्षेत्रा पार्श्वद्वयेऽपीति शेषः ॥ १० ॥

घृताच्यां तन्नामिकाप्सरसि ॥ ११ ॥

ताः शतं कन्याः ॥ १२ ॥

आमोदं सन्तोषम् ॥ १३ ॥

घनान्तरे मेघमध्ये तारा इव रेजुरिति शेषः ॥ १४ ॥ १५ ॥

अहं वः कामये सर्वा भार्य्या मम भविष्यथ ।
मानुषस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ ॥ १६ ॥
चलं हि यौवनं नित्यं मानुषेषु विशेषतः ।
अक्षयं यौवनं प्राप्ता अमर्य्यश्च भविष्यथ ॥ १७ ॥
तस्य तद् वचनं श्रुत्वा वायोरक्लिष्टकर्मणः ।
अपहास्य ततो वाक्यं कन्याशतमथाब्रवीत् ॥ १८ ॥
अन्तश्चरसि भूतानां सर्वेषां सुरसत्तम ! ।
प्रभावज्ञाश्च ते सर्वाः किमर्थमवमन्यसे ॥ १९ ॥

मत्काममनापूरये मम देवस्य मानुष्योऽपि भार्या भविष्यथेत्यादि वशीकरणायार्थवादः । ननु मानुषीणां देवसम्बन्धोऽनुचितः ; तत्राह,—मानुषस्त्यज्यतां भाव इति । मदङ्गीकारमात्रेण विलक्षणशक्त्याविर्भावान्मानुषभावत्यागे स्वत एव भवतीनां सामर्थ्यं भविष्यति । तत्फलमाह दीर्घमिति ॥ १६ ॥

मानुषेषु हि यतः विशेषेण नित्यमनुस्यूतं यौवनं चलं चपलं क्षीयमाणमिति यावत् । अतः मत्सम्बन्धेन अक्षयं यौवनमित्याद्यन्वयः ॥ १७ ॥

अपहास्य हासपूर्वकमपमान्य ॥ १८ ॥

अन्तश्चरसीति पूर्वार्द्धेन स्वभावज्ञता वायोः सूचिता । ननु युष्मत्प्रभावापेक्षया मत्प्रभावोऽधिक इति चेत् ? तत्राह,—प्रभावज्ञाश्च ते-

कुशनाभसुता देव। समस्ताः * सुरसत्तम!।
स्थानात् च्यावयितुं देवं रक्षामस्तु तपो वयम्॥ २०॥
माभूत् स कालो दुर्मेधः! पितरं सत्यवादिनम्।
अवमन्य स्वधर्मेण स्वयम्वरमुपास्महे॥ २१॥

सर्वाः तथाभ्रमं माकार्षीरिति भावः। तस्मादेवमनुचितप्रार्थनया अस्मदवमानमनुचितमित्याह,—किमर्थमित्यादि॥ १९॥

स्वप्रभावं दर्शयन्ति कुशनाभेत्यादि। स्थानाद्वायुपदात् देवमपि त्वां च्यावयितुं समर्था इति शेषः। रक्षामस्त्विति शापेन तथाकरणे हि तत्क्षयः स्यादिति भावः॥ २०॥

हे दुर्मेधः! दुर्बुद्धे यत्र काले पितरमवमन्य अपमानविषयं कृत्वा स्वधर्मेण कामेन स्वयम्वरम् उपास्महे आत्मना स्वातन्त्र्येण वयं वरमङ्गीकुर्मः सः कालः कदाचिदपि माभूदित्यन्वयः। नावमन्येति पाठस्तु क्वचित्कोऽप्यपाठः तथापाठे न इति च्छेदः छान्दसं दीर्घत्वं नः अस्माकं स कालो माभूदित्यन्वयः। क्वचित्तु नोऽवमन्यस्वेति पाठः। अतएव,

"माभूत् स कालो दहायो! पितरं सत्यवादिनम्।
कामतः समतिक्रम्य वरयेम स्वयम्वरम्॥"

इत्येतदर्थविवरणश्लोको दृश्यते क्वचित्॥ २१॥

---

* "कुशनाभसुताः सर्वाः समर्थाः" इति पाठान्तरः।

पिता हि प्रभुरस्माकं दैवतं परमं च सः ।
यस्य नो दास्यति पिता स नो भर्त्ता भविष्यति ॥ २२ ॥
तासां तु वचनं श्रुत्वा हरिः परमकोपनः ।
प्रविश्य सर्वगात्राणि बभञ्ज भगवान् प्रभुः ॥ २३ ॥
ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम् ।
प्रविश्य च सुसंभ्रान्ताः सलज्जाः साश्रुलोचनाः ॥ २४ ॥
स च ता दयिता भग्नाः कन्याः परमशोभनाः ।
दृष्ट्वा दीनास्तदा राजा सम्भ्रान्त इदमब्रवीत् ॥ २५ ॥
किमिदं कथ्यतां पुत्र्यः ! को धर्ममवमन्यते ।
कुब्जाः केन कृताः सर्वाश्चेष्टन्त्यो नाभिभाषथ ॥ २६ ॥

तत्र बीजमाह,—पिता हीति ॥ २२ ॥
हरिः वायुः क्वचित्तु वायुरित्येव पाठः ॥ २३ ॥
सलज्जाः अन्याय्यपतिप्रसङ्गतः सलज्जाः * ॥ २४ ॥
भग्नाः भग्नाङ्गाः ॥ २५ ॥
धर्ममवमन्यते बलात्कारं करोतीति यावत् रोदनादिना चेष्टन्त्यः
किं न अभिभाषथेत्यन्वयः ॥ २६ ॥

---

* लज्जापवेष्टन्त्यादिति वा ।

एवं राजा विनिश्वस्य समाधिं सन्दधे ततः ॥ २७ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे कुशवंश-
कथने वायुना कुशनाभकन्याशतप्रधर्षणं
नाम द्वात्रिंशः सर्गः ॥ ३२

एवं पृष्ट्वेति शेषः। समाधिं संदधे इति तद्वचनश्रवणैकाग्र-
चित्तोऽभूदित्यर्थः * ॥ २७ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

---

* व्यथितस्य मनसः समाधानम् इति तीर्थः।

त्रयस्त्रिंशः सर्गः ।



तस्य तद् वचनं श्रुत्वा कुशनाभस्य धीमतः ।
शिरोभिश्चरणौ स्पृष्ट्वा कन्याशतमभाषत ॥ १ ॥
वायुः सर्वात्मको राजन्! प्रधर्षयितुमिच्छति ।
अशुभं मार्गमास्थाय न धर्मं प्रत्यवेक्षते ॥ २ ॥
पितृमत्यः स्म भद्रं ते स्वच्छन्दे न वयं स्थिताः ।
पितरं नो वृणीष्व त्वं यदि नो दास्यते तव ॥ ३ ॥
तेन पापानुबन्धेन वचनं न प्रतीच्छता ।
एवं ब्रुवन्त्यः सर्वाः स्म वायुनाभिहता भृशम् ॥ ४ ॥

तस्येति । चरणौ स्पृष्ट्वा नमस्कृत्य ॥ १ ॥

प्रधर्षयितुम् अभिभवितुम् इच्छति स्म अशुभं बलात्काररूपम्, अवेक्षते स्म ॥ २ ॥

पितृमत्यः पित्राधीनाः । स्वच्छन्दे पतिस्वीकारविषये स्वातन्त्र्येण न स्थिताः न वर्तामहे यतः, अतः नः पितरं वृणीष्व त्वं ; यदि नः अस्मान् तुभ्यं स दास्यति तदा तव त्वदीयाः भविष्यामः । ते तव भद्रम् अस्तु इति योजना ॥ ३ ॥

एवं ब्रुवन्तीनां नो वचनं न प्रतीच्छता अनङ्गीकुर्वता पापान-

तासां तु वचनं श्रुत्वा राजा परमधार्मिकः ।
प्रत्युवाच महातेजाः कन्याशतमनुत्तमम् ॥ ५ ॥
क्षान्तं क्षमावतां पुत्र्यः ! कर्त्तव्यं सुमहत् क्षतम् ।
ऐकमत्यमुपागम्य कुलञ्चावेक्षितं मम ॥ ६ ॥
अलङ्कारो हि नारीणां क्षमा तु पुरुषस्य वा ।
दुष्करं तच्च वै क्षान्तं त्रिदशेषु विशेषतः ॥ ७ ॥
यादृशी वः क्षमा पुत्र्यः ! सर्वासामविशेषतः ।
क्षमा दानं क्षमा सत्यं क्षमा यज्ञश्च पुत्रिकाः ! ॥ ८ ॥

अनेन अधर्मबद्धचित्तेन एवं धर्मं ब्रुवन्त्यः सर्वाः वायुना अभिहताः स्म इति योजना ॥ ४ ॥ ५ ॥

हे पुत्र्यः ! क्षमावतां क्षमावद्भिः कर्तुमर्हं यत् क्षान्तं क्षमा, तत् सुमहत् क्षतं, महती क्षमा क्षतेति यावत् । गात्रभङ्गोत्थक्रोध-वेगसहनमतिदुष्करमिति भावः । यच्च कुलम् अवेक्षितं कामवेग-सहनं क्षतं तदपि सुमहत् ॥ ६ ॥

पुरुषस्येवेति । अविशेषेणेति शेषः । तत्तु दुष्करं यत् त्रिदश-विषये क्षान्तं कामवेगसहनं क्षतं, तत् अतिदुष्करं तेषाम् अभि-रूपादिकमनीयगुणबाहुल्यात् ॥ ७ ॥

स्वकन्यानां क्षमां श्लाघयन् तादृशीं क्षमां स्वकुले प्रार्थयते,— यादृशीति । भो पुत्र्यः ! यादृशी युष्माकं क्षमा, तादृशी अस्मत्कुले सर्वासामस्तु इति शेषः । अथवा अविशेषतः स्वकन्यापुत्रयोरविशे-

[illegible] यशः क्षमा धर्मः क्षमायां निष्ठितं जगत् ।
विसृज्य कन्याः काकुत्स्थ ! राजा त्रिदशविक्रमः ॥ ९ ॥
मन्त्रज्ञो मन्त्रयामास प्रदानं सह मन्त्रिभिः ।
देशे काले च कर्त्तव्यं सदृशे प्रतिपादनम् ॥ १० ॥
एतस्मिन्नेव काले तु चूली नाम महाद्युतिः ।
ऊर्द्ध्वरेताः शुभाचारो ब्राह्मं तप उपागमत् ॥ ११ ॥
तपस्यन्तमृषिं तत्र गन्धर्वी पर्युपासते ।
सोमदा नाम भद्रं ते ऊर्मिलातनया तदा ॥ १२ ॥
सा च तं प्रणता भूत्वा शुश्रूषणपरायणा ।

सेवेत्यर्थः । क्षमायाः प्रार्थनीयत्वे निमित्तमाह,—क्षमेत्यादि । दान-सत्यवचनयज्ञसमाधिजसकलधर्मफला क्षमा ; सकलजगदाधार-भूता च क्षमा ; अतः सा उपादेया इत्यर्थः ॥ ८ ॥ ९ ॥

प्रदानं कन्याप्रदानम् उचिते देशे काले सदृशे सकुलादिसदृशे पात्रे प्रदानं कर्त्तव्यम् इति मन्त्रप्रकारः ॥ १० ॥

ऊर्द्ध्वरेताः ब्रह्मचारी ब्राह्मं तपः ब्रह्मविषये चित्तैकाग्र्यम् । "मनसश्चेन्द्रियाणाञ्च ऐकाग्र्यं परमं तपः" इति स्मृतिः ॥ ११ ॥

यदा चूली तपश्चरति तदा ऊर्मिलातनया सोमदा नाम गन्धर्वी तं पर्युपासते स्म ; मय्यनुग्रहं कुरु इति प्रार्थनया सेवते स्म । पर्युपा-सते इत्यत्र छान्दस आर्षः ॥ १२ ॥

तमिति । प्रतियोगे द्वितीया तत्समीपे आसेत्यर्थः ॥ १३ ॥

उवास काले धर्मिष्ठा तस्यास्तुष्टोऽभवद्गुरुः ॥ १३ ॥
स च तां कालयोगेन प्रोवाच रघुनन्दन ! ।
परितुष्टोऽस्मि भद्रं ते किं करोमि तव प्रियम् ॥ १४ ॥
परितुष्टं मुनिं ज्ञात्वा गन्धर्वी मधुरस्वरम् ।
उवाच परमप्रीता वाक्यज्ञा वाक्यकोविदम् ॥ १५ ॥
लक्ष्म्या समुदिता ब्राह्म्या ब्रह्मभूतो महातपाः ।
ब्राह्म्येण तपसा युक्तं पुत्रमिच्छामि धार्मिकम् ॥ १६ ॥
अपतिश्चास्मि भद्रं ते भार्या चास्मि न कस्यचित् ।
ब्राह्म्येणोपगतायाश्च दातुमर्हसि मे सुतम् ॥ १७ ॥

कालयोगेन शुश्रूषाजनितधर्मपरिपाकार्हकालसम्बन्धेन । अनेन दिव्ययोगिनीयोगिनोः अकल्मषतपःप्रवृत्तिः सूचिता ॥ १४ ॥ १५ ॥

ब्राह्म्या लक्ष्म्या ब्रह्मवर्चसेन । ब्रह्मभूतः ब्रह्मात्मभावनया । अत-एव महातपाः यतस्त्वमीदृशः अतः ब्राह्मेण तपसा युक्तं पुत्रमि-च्छामि । ब्राह्मं तपः ब्रह्मविषयमैकाग्र्यं ; यद्वा ब्राह्मं तपः स्वाध्यायः ॥ १६ ॥

ननु पुत्रप्रार्थना पत्न्या उचिता तत्राह,—अपतिश्चास्मि । इतः परमपि अस्मि अहं न कस्यचित् भार्य्या भविष्यामीति शेषः । अनेन नैष्ठिकब्रह्मचारिणीत्वं सूचितम् । तथापि यथा पुत्रावाप्तिर्भवति तथा ते भवत् अनुग्रहोऽस्तु । नन्वेवं नैष्ठिकब्रह्मचर्य्ये कथं पुत्रलाभः सम्भाव्येत ? अत आह,—ब्राह्मेणेति । उपगतायाः शिष्यत्वं

[तस्याः] प्रसन्नो ब्रह्मर्षिर्ददौ ब्राह्ममनुत्तमम् ।
ब्रह्मदत्त इति ख्यातं मानसं चूलिनः सुतम् ॥ १८ ॥
स राजा ब्रह्मदत्तस्तु पुरीमध्यवसत् तदा ।
काम्पिल्यां परया लक्ष्म्या देवराजो यथा दिवम् ॥ १९ ॥
स बुद्धिं कृतवान् राजा कुशनाभः सुधार्मिकः ।
ब्रह्मदत्ताय काकुत्स्थ ! दातुं कन्याशतं तदा ॥ २० ॥
तमाहूय महातेजा ब्रह्मदत्तं महीपतिः ।
ददौ कन्याशतं राजा सुप्रीतेनान्तरात्मना ॥ २१ ॥
यथाक्रमं तदा पाणिं जग्राह रघुनन्दन ! ।
ब्रह्मदत्तो महीपालस्तासां देवपतिर्यथा ॥ २२ ॥

ब्राह्मयाः, ब्राह्मेण ब्रह्मसम्बन्धिना उपायेन मे सुतं दातुमर्हसि, सनकादय इव मानसपुत्रो देय इति भावः ॥ १७ ॥

तस्याः सोमदायाः प्रसन्नः चूलिन नामा ब्रह्मर्षिः ब्राह्मं ब्रह्म-तपसा युक्तं ब्राह्मयादत्तत्वात् ब्रह्मदत्त इति ख्यातं मानसं सुतं ददौ इत्यन्वयः । फली फलिन इतिवत् चूली चूलिन इति प्रयोगेनोभयं साधु ॥ १८ ॥

राजा, गन्धर्व्याः सोमदायाः क्षत्रियात्वात्, काम्पिल्यां कम्पिलेन निर्मिताम् ॥ १९ ॥ २० ॥ २१ ॥

देवपतिर्यथा इन्द्रसदृशो महीपाल इत्यर्थः ॥ २२ ॥

स्पृष्टमात्रे तदा पाणौ विकुब्जा विगतज्वराः ।
युक्तं परमया लक्ष्म्या बभौ कन्याशतं तदा ॥ २३ ॥
स दृष्ट्वा वायुना मुक्ताः कुशनाभो महीपतिः ।
बभूव परमप्रीतो हर्षं लेभे पुनः पुनः ॥ २४ ॥
कृतोद्वाहं तु राजानं ब्रह्मदत्तं महीपतिम् ।
सदारं प्रेषयामास सोपाध्यायगणं तदा ॥ २५ ॥
सोमदापि तु संहृष्टा * पुत्रस्य सदृशीं क्रियाम् ।

तदा तेन राज्ञा पाणौ स्पृष्टमात्रे ताः कन्याः विकुब्जाः कुब्जत्वरहिता आसन् इति शेषः । ब्राह्मतपोयुक्तत्वादेवं सामर्थ्यं राज्ञः । एवञ्च सति तदा तत्कन्याशतं परया लक्ष्म्या बभौ इत्यन्वयः ॥२३॥

स राजा वायुना मुक्ता दृष्ट्वेत्यन्वयः । भग्ना इति पाठस्तु चिन्त्यः । केचित्तु तत्पाठे पूर्वं भग्ना इति व्याचख्युः ॥ २४ ॥

प्रेषयामास काम्पिल्यं प्रतीति शेषः ॥ २५ ॥

सदृशीं क्रियां दारक्रियामित्यर्थः । प्रतिनन्दनप्रकारमाह,—स्पृष्ट्वेत्यादि । प्रशस्य च गता इत्यर्थः । आश्चर्यमासां धैर्यं यद्देवश्रेष्ठस्याप्यनादरः, धन्योऽयं राजा, यस्य कन्या ईदृश्यः । अहो मे भाग्यं !

---

* "सोमदापि सुतं दृष्ट्वा"
इति दाक्षिणात्यपुस्तकेषु दृश्यते ।

कन्यायश्च गन्धर्वा सुषास्ताः प्रत्यनन्दत ॥ २६ ॥
स्पृष्ट्वा स्पृष्ट्वा च ताः कन्याः कुशनाभं प्रशस्य च ॥ २७ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे ब्रह्मदत्त-
परिणये कन्याशतकुब्जतापनयनं नाम
त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

यस्या मे ईदृश्यः सुषाः, इत्येवं प्रतिनन्दनम् । अनेन स्त्रीमाहात्म्यं
तपोमाहात्म्यञ्च दर्शितम् ॥ २६ ॥ २७ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

चतुस्त्रिंशः सर्गः।



कृतोद्वाहे गते तस्मिन् ब्रह्मदत्ते च राघव!।

अपुत्रः पुत्रलाभाय पौत्रीमिष्टिमकल्पयत् ॥ १ ॥

इष्ट्यान्तु वर्त्तमानायां कुशनाभं महीपतिम्।

उवाच परमोदारः कुशो ब्रह्मसुतस्तदा ॥ २ ॥

पुत्रस्ते सदृशः पुत्र! भविष्यति सुधार्मिकः।

गाधिं प्राप्स्यसि तेन त्वं कीर्त्तिं लोके च शाश्वतीम् ॥ ३ ॥

एवमुक्त्वा कुशो राम! कुशनाभं महीपतिम्।

जगामाकाशमाविश्य ब्रह्मलोकं सनातनम् ॥ ४ ॥

ब्रह्मदत्ते चेति। चकारार्थः कन्याशतसमुच्चयार्थो वा पुत्रलाभाय पुत्रप्राप्तये ॥ १ ॥

कुशः कुशनाभपिता ॥ २ ॥

कुशवाक्यमाह,—पुत्र इत्यादि। सदृशः त्वत्सदृशः। कोऽसौ तत्राह,—गाधिं गाधिनामानं प्राप्स्यसि, तेन लोके शाश्वतीं कीर्त्तिञ्च प्राप्स्यसि ॥ ३ ॥

कुशो नामेति पाठे एतत् कुशवंशं नाम प्रसिद्धमित्यर्थः। आकाशमाविश्य आकाशरूपो भूत्वा अनेन तस्य मुक्तत्वं सूचितम्। तेन कुशवंशस्य माहात्म्यातिशयः सूचितः ॥ ४ ॥

कस्यचित्त्वथ कालस्य कुशनाभस्य धीमतः ।
जज्ञे परमधर्मिष्ठो गाधिरित्येव नामतः ॥ ५ ॥
स पिता मम काकुत्स्थ ! गाधिः परमधार्मिकः ।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन ! ॥ ६ ॥
पूर्वजा भगिनी चापि मम राघव ! सुव्रता ।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥ ७ ॥
सशरीरा गता स्वर्गं भर्तारमनुवर्तिनी ।
कौशिकी परमोदारा प्रवृत्ता च महानदी ॥ ८ ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥ ९ ॥

कस्यचित्त्वथ कालस्य कस्यचित् कालस्य अनन्तरमित्यर्थः ॥५॥

मम विश्वामित्रस्य कुशवंशप्रसूतत्वादहं कौशिकः ॥ ६ ॥

न केवलमहमेव गाधेः पुत्रः मम पूर्वजा ज्येष्ठा नाम्ना सत्यवतीति प्रसिद्धा ऋचीके प्रतिपादिता ऋचीकाय दत्ता इति नाम प्रसिद्धम् ॥ ७ ॥

सशरीरस्वर्गगतौ हेतुः,—भर्तारमनुवर्त्तिनीति, सहगमनं कृतवतीत्यर्थः। अपि च अन्यदपि तस्याश्चरितं कौशिकी नाम्नी महानदी तद्रूपा प्रवृत्ता च जाता ॥ ८ ॥

हितकार्य्यार्थं, हितकामार्थमिति पाठे हितम् आमुष्मिकं कामः ऐहिकं तदुभयदानार्थम् ॥ ९ ॥

ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम् ।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ! ॥ १० ॥
सा तु सत्यवती पुण्या सत्ये धर्मे प्रतिष्ठिता ।
पतिव्रता महाभागा कौशिकी सरितां वरा ॥ ११ ॥
अहं हि नियमाद् राम ! हित्वा तां समुपागतः ।
सिद्धाश्रममनुप्राप्य सिद्धोऽस्मि तव तेजसा ॥ १२ ॥
एषा राम ! ममोत्पत्तिः स्वस्य वंशस्य कीर्त्तिता ।
देशस्य हि महाबाहो ! यन्मां त्वं परिपृच्छसि ॥ १३ ॥
गतोऽर्धरात्रः काकुत्स्थ ! कथाः कथयतो मम ।

यतो भगिन्यां स्नेहसंयुक्तः अतः हिमवत्पार्श्वे कौशिक्यां नियतः नित्यं सुखं वसामीत्यन्वयः ॥ १० ॥

इतश्च तस्यां वास इत्याह,—सात्विति । सत्ये धर्मे प्रतिष्ठिता तज्जलपानादिना सत्यात् मनो न निवर्त्तते इति भावः ॥ ११ ॥

नन्वेवं कथं सिद्धाश्रमे स्थितिः ? अत आह,—अहं हीति । नियमात् गयापिण्डदानवत् सिद्धाश्रमैकसाध्ययागजन्यसिद्धिहेतोः आगमनकार्य्येण, तदनुग्रहात् सिद्धमित्याह,—सिद्धाश्रममित्यादि ॥१२॥

उपसंहरति,—एषेति । मम गाधेः सकाशादुत्पत्तिः कीर्त्तिता, स्वस्य वंशस्य उत्पत्तिः ब्रह्मपुत्रात् कुशात् उत्पत्तिः कीर्त्तिता, देशस्य कौशाम्ब्यादिभिरित्यर्थः । पृच्छसि पर्यपृच्छः तत् सर्वमुक्तमिति शेषः ॥ १३ ॥

निद्रामभ्येहि भद्रं ते माभूद् विघ्नोऽध्वनीह नः ॥ १४ ॥
निष्पन्दास्तरवः सर्वे निलीना मृगपक्षिणः ।
नैशेन तमसा व्याप्ता दिशश्च रघुनन्दन ! ॥ १५ ॥
शनैर्विसृज्यते सन्ध्या नभो नेत्रैरिवावृतम् ।
नक्षत्रतारागहनं ज्योतिर्भिरवभासते ॥ १६ ॥
उत्तिष्ठते च शीतांशुः शशी लोकतमोनुदः ।
ह्लादयन् प्राणिनां लोके मनांसि प्रभया स्वया ॥ १७ ॥
नैशानि सर्वभूतानि प्रचरन्ति ततस्ततः ।
यक्षराक्षससङ्घाश्च रौद्राश्च पिशिताशनाः ॥ १८ ॥

अतः परं न प्रस्थव्यमित्याह,—गत इति । विघ्नः गन्तव्याध्वनि निद्राभावप्रयुक्तश्रममूलः ॥ १४ ॥

अर्द्धरात्रचिह्नान्याह,—निष्पन्दा इति । पक्षिचलनाभावादिति भावः । तदाह निलीना इति ॥ १५ ॥

शनैर्विसृज्यते वियुज्यते इत्यर्थः । वर्त्तमानसामीप्ये भूते लट् । सन्ध्याशब्देन तदुपासनयोग्यसमयकालसाहित्येन सार्थ्यमनुरूपः । नक्षत्रतारागहनं नभः चक्षुष्मत् नेत्रैरावृतमिव । तत् ज्योतिर्भिः तारकाभिः अवभासते ॥ १६ ॥

उत्तिष्ठते उदेतुं क्रमते इति तङ् ॥ १७ ॥

नैशानि निशाप्रभवानि तान्येवाह यक्षेत्यादि ॥ १८ ॥

एवमुक्त्वा महातेजा विरराम महामुनिः ।
साधु साध्विति ते सर्वे मुनयो ह्यभ्यपूजयन् ॥ १९ ॥
कुशिकानामयं वंशो महान् धर्मपरः सदा ।
ब्रह्मोपमा महात्मानः कुशवंश्या नरोत्तमाः ॥ २० ॥
विशेषेण भवानेव विश्वामित्र ! महायशः ! ।
कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव ॥ २१ ॥
मुदितैर्मुनिशार्दूलैः प्रशस्तः कुशिकात्मजः ।
निद्रामुपागमत् श्रीमानस्तं गत इवांशुमान् ॥ २२ ॥

अभ्यपूजयन् अस्तुवन् ॥ १९ ॥

स्तुतिप्रकारमाह,—कुशिकानामित्यादि । ब्रह्मोपमाः ब्रह्मर्षितुल्याः ॥ २० ॥

हे महायशो विश्वामित्र ! भवानेव विशेषेण महात्मेति शेषः । यत्तपसा ब्राह्मणत्वं प्राप्त इति भावः । किञ्च यस्य तव भगिनी तव कुलस्योद्द्योतकरी उद्धारकर्त्री सरितां श्रेष्ठा अनेन सकलजगदुद्धारकत्वं तस्याः सूचितम् ॥ २१ ॥

प्रशस्तः स्तुतः "अस्तं गत इवांशुवान्" इति पाठः * ॥ २२ ॥

---

* टीकाकारधृतः पाठोऽपि अस्मत्संगृहीतेषु पुस्तकेषु "अस्तं गत इवांशुमान्" इति अभिन्नतयैव दृश्यते ।

रामोऽपि सहसौमित्रिः किञ्चिदागतविस्मयः ।
प्रशस्य मुनिशार्दूलं निद्रां समुपसेवते ॥ २१ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे कौशिकवंश-
कीर्त्तनं नाम चतुस्त्रिंशः सर्गः ॥ ३४ ॥

सेवते सेवते स्म ॥ २१ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

पञ्चत्रिंशः सर्गः ।



उपास्य रात्रिशेषं तु शोणाकूले महर्षिभिः ।
निशायां सुप्रभातायां विश्वामित्रोऽभ्यभाषत ॥ १ ॥
सुप्रभाता निशा राम ! पूर्वा सन्ध्या प्रवर्त्तते ।
उत्तिष्ठोत्तिष्ठ भद्रं ते गमनायाभिरोचय ॥ २ ॥
तत् श्रुत्वा वचनं तस्य कृतपूर्वाह्णिकक्रियः ।
गमनं रोचयामास वाक्यं चेदमुवाच ह ॥ ३ ॥
अयं शोणः शुभजलोऽगाधः पुलिनमण्डितः ।
कतरेण पथा ब्रह्मन् ! सन्तरिष्यामहे वयम् ॥ ४ ॥
एवमुक्तस्तु रामेण विश्वामित्रोऽब्रवीदिदम् ।
एष पन्था मयोद्दिष्टो येन यान्ति महर्षयः ॥ ५ ॥
ते गत्वा दूरमध्वानं गतेऽर्द्धदिवसे तदा ।
जाह्नवीं सरितां श्रेष्ठां ददृशुर्मुनिसेविताम् ॥ ६ ॥

रात्रिशेषं उपास्य निद्रया अतिवाह्य ॥ १ ॥

गमनाय गमनं कर्तुम् ॥ २ ॥ ३ ॥

अयं शोण इति शोणैव शोण इति व्यपदिष्टः । कतरेण पथा सन्तरिष्यामहे इत्यन्वयः । प्रश्नबीजमगाध इति अतलस्पर्श इत्यर्थः ॥ ४ ॥

उद्दिष्टः गन्तव्यत्वेन निश्चितः ॥ ५ ॥ ६ ॥

तां दृष्ट्वा पुण्यसलिलां हंससारससेविताम् ।
बभूवुर्मुनयः सर्वे मुदिताः सहराघवाः ॥ ७ ॥
तस्यास्तीरे तदा सर्वे चक्रुर्वासपरिग्रहम् ।
ततः स्नात्वा यथान्यायं सन्तर्प्य पितृदेवताः ॥ ८ ॥
हुत्वा चैवाग्निहोत्राणि प्राश्य चामृतवद्धविः ।
विविशुर्जाह्नवीतीरे शुभा मुदितमानसाः ॥ ९ ॥
विश्वामित्रं महात्मानं परिवार्य्य समन्ततः ।
विष्ठिताश्च यथान्यायं राघवौ च यथार्हतः ॥ १० ॥
सम्प्रहृष्टमना रामो विश्वामित्रमथाब्रवीत् ।
भगवन् ! श्रोतुमिच्छामि गङ्गां त्रिपथगां नदीम् ।
त्रैलोक्यं कथमाक्रम्य गता नदनदीपतिम् ॥ ११ ॥

सारसः पक्षिविशेषः ॥ ७ ॥

वासपरिग्रहं संमार्जनादिना आवासस्थानं चक्रुरित्यर्थः ॥ ८ ॥

अमृतवत् अमृततुल्यं पञ्चयज्ञावशिष्टमन्नम् । यद्वा अमृतवत् तत्सदृशं गङ्गाजलं हविश्च प्रागुक्तं प्राश्येत्यर्थः ॥ ९ ॥

विष्ठिताः विशेषेण स्थिताः । यथार्हतः यथावस्थानमर्हतस्तथा स्थितौ इत्यर्थः ॥ १० ॥

गङ्गां श्रोतुं गङ्गाविषयकं किञ्चित् श्रोतुम् इत्यर्थः । श्रोतव्यं विषयमाह,—त्रैलोक्यम् इत्यादि ॥ ११ ॥

चोदितो रामवाक्येन विश्वामित्रो महामुनिः ।

वृद्धिं जन्म च गङ्गाया वक्तुमेवोपचक्रमे ॥ १२ ॥

शैलेन्द्रो हिमवान् राम ! धातूनामाकरो महान् ।

तस्य कन्याद्वयं राम ! * रूपेणाप्रतिमं भुवि ॥ १३ ॥

या मेरुदुहिता राम ! तयोर्माता सुमध्यमा ।

नाम्ना मेना मनोज्ञा वै पत्नी हिमवतः प्रिया ॥ १४ ॥

तस्यां गङ्गेयमभवद् † ज्येष्ठा हिमवतः सुता ।

उमा नाम द्वितीयाभूत् कन्या तस्यैव राघव ! ॥ १५ ॥

अथ ज्येष्ठां सुराः सर्वे देवकार्यचिकीर्षया

शैलेन्द्रं वरयामासुर्गङ्गां त्रिपथगां नदीम् ॥ १६ ॥

वृद्धिं त्रैलोक्यव्याप्तिरूपाम् ॥ १२ ॥

धातूनां स्वर्णादीनाम् ॥ १३ ॥

या मेरुदुहिता मेना नाम, सा तयोः कन्ययोर्माता इत्यन्वयः ॥१४॥

तस्यां मेनायां या ज्येष्ठा हिमवतः सुता कुटिका नाम, सा इयं

गङ्गाऽभवदित्यर्थः । तस्यैव हिमवतः ॥ १५ ॥

देवकार्यं वक्ष्यमाणं भुववीर्यधारणम् । त्रिपथगां स्वर्गभूपाताल-

मार्गगाम् इदं वर्तमानापदेशेन वरणञ्च तस्याः शिवभार्य्यात्वाय ॥१६॥

---

* "जातम्" इति पाठान्तरः ।

† "गङ्गा समभवत्" इति पाठान्तरः ।

ददौ धर्मेण हिमवांस्तनयां लोकपावनीम् ।
स्वच्छन्दपथगां गङ्गां त्रैलोक्यहितकाम्यया ॥ १७ ॥
प्रतिगृह्य त्रिलोकार्थं त्रिलोकहितकाङ्क्षिणः ।
गङ्गामादाय तेऽगच्छन् कृतार्थेनान्तरात्मना ॥ १८ ॥

धर्मेण कन्यादानधर्मेण स्वच्छन्दपथगामित्यपि वर्तमानापदेशेन स्वेच्छामार्गेण प्रवहादिवायुमार्गगमनशीलाम् ॥ १७ ॥

त्रिलोकार्थं तारकतो भीतः त्रिलोकरक्षकपुत्रोत्पत्त्यर्थम् । अगच्छन् ब्रह्मलोकम् । तत्र ब्रह्मशापवशाद् जलरूपताप्राप्तिरित्यादि वामनपुराणोक्तदिशा मध्ये ऊह्यम् । वामनपुराणकथान्तस्य प्रायेणात्र प्रत्यभिज्ञानात् । एवं हि तत्राख्यायिका,—उमा ज्येष्ठा कुटिला नाम हिमवत्कन्या देवैः शिववीर्यधारणाय हिमवन्तं प्रार्थिता । तेन दत्तया तया सह देवा ब्रह्मलोकं गत्वा ब्रह्मणे निवेदितवन्तः । ब्रह्मणा च असमर्थेयं तद्धारणे, इत्युक्ताऽवश्यं धारयामीति कथितवाक्यावज्ञानेन ब्रह्मणा 'जलरूपा भव' इति शप्ता तत्रैव ब्रह्माण्डोर्ध्वकटाहे जलरूपेण स्थिता । तस्यामेव वह्निना शिववीर्यं क्षिप्तमिति ।

"विष्णुश्रिया प्रसरता कटाहे भेदितेऽम्बरात् ।
कुटिला विष्णुपादान्तात् पपाताकुञ्चिता ततः ॥
तस्माद् विष्णुपदी ख्याता————————"

इति वामनपुराणोक्तेरेव ब्रह्माण्डोर्ध्वकटाहे वर्तते ति ज्ञायते । पतन-समये च ब्रह्माण्डवायुजवेन सहैव पतितं तज्जलं ब्रह्मणा कमण्डलौ धृतं [illegible] शिवानन्द [illegible] इति [illegible]-

या चान्या शैलदुहिता कन्यासीत् रघुनन्दन ! ।
उग्रं सुव्रतमास्थाय तपस्तेपे तपोधना ॥ १९ ॥
उग्रेण तपसा युक्तां ददौ शैलवरः सुताम् ।
रुद्रायाप्रतिरूपाय उमां लोकनमस्कृताम् ॥ २० ॥
एते ते शैलराजस्य सुते लोकनमस्कृते ।
गङ्गा च सरितां श्रेष्ठा उमा देवी च राघव ! ॥ २१ ॥
एतत् ते सर्वमाख्यातं यथा त्रिपथगामिनी ।

संहितादौ स्पष्टम् । ततो भगवता पदारोपणे तेनैव कमण्डलुजलेन तत्पादप्रक्षालनं कृत्वा तज्जलं कमण्डलावेव क्षिप्तम् । शङ्कर-संहितोक्तरीत्या गौरीविवाहोत्तरं लीलया गौर्य्या पाणिभ्यां शिव-नयनाच्छादने कृते शिवेन ललाटनेत्रं प्रकाशितम् । ततो भयाद् गौरीपाणिस्वेदजलं च्युतं, तदपि ब्रह्मणा कमण्डलौ स्थापितमित्यपि तत्रोक्तम् । गौरीविवाहकथनेन सूचितं च । भगीरथप्रार्थनया च ब्रह्मरूपः सर्व्वपितृजनसमूहवतो दत्तः सर्वमुक्तजलमुपनम्य पुराणेषु भगीरथसम्बन्धश्रवणात् । विस्तरस्त्वत्र तत्तद्गङ्गामाहात्म्यप्रकाशे द्रष्टव्यः ॥ १८ ॥

कन्या व्रततपस्विनी । अग्रे शिवशीर्षस्थजन्मादि वक्ष्यत एतद्वर्णनम् । उग्रं सुव्रतं पर्णभोजनस्यापि त्यागरूपमवन्तं तपः शिवध्यान-रूपम् ॥ १९ ॥ २० ॥ २१ ॥

यथा च त्रिपथगामिनी गङ्गा तथा प्रतिपादयतीति शेषः । तदेव

खं गता प्रथमं तात ! गतिं गतिमतां वर ! ॥ २२ ॥

सुरलोकं समारूढ़ा विपापा जलवाहिनी ॥ २३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
गङ्गायाः सुरलोकगमनकीर्त्तनं नाम
पञ्चत्रिंशः सर्गः ॥ ३५ ॥

विश्वबोति,—खमित्यादि । प्रथमं खं गता आकाशमार्गं गता ॥२२॥
पश्चात् सुरलोकं समारूढ़ाऽभवत् जलवाहिनी तरलभावं
जाता । विपापा सकलपापघ्नी ॥ २३ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥

षट्त्रिंशः सर्गः।



उक्तवाक्ये मुनौ तस्मिन् उभौ राघवलक्ष्मणौ।
प्रतिनन्द्य कथां वीरावूचतुर्मुनिपुङ्गवम्॥ १॥
धर्मयुक्तमिदं ब्रह्मन्! कथितं परमं त्वया।
दुहितुः शैलराजस्य ज्येष्ठाया वक्तुमर्हसि॥
विस्तरं विस्तरज्ञोऽसि दिव्यमानुषसम्भवम्॥ २॥
त्रीन् पथो हेतुना केन प्लावयेत् लोकपावनी?।
कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा?॥ ३॥
त्रिषु लोकेषु धर्मज्ञ! कर्मभिः कैः समन्विता?॥ ४॥

उक्तवाक्ये इति उपरते इत्यर्थः॥ १॥

वक्तुमर्हसीत्यस्य विस्तरमित्यनेनान्वयः। दिव्यमानुषसम्भवं दि
लोकनिबन्धनञ्च॥ २॥

शुश्रूषितं विवृणोति,—त्रीनित्यादि। भूर्भुवःस्वर्मार्गानित्यर्थं
प्लावयेत् व्याप्नुयात् इत्येको विकल्पः।

द्वितीयमाह,—कथमिति। त्रिपथगेति प्रसिद्धिः किं निब
नेति द्वितीयः॥ ३॥

कर्मभिश्चरितैः कैः समन्वितेति तृतीयः। तयोर्हिमवत्कन्य

तथा ब्रुवति काकुत्स्थे विश्वामित्रस्तपोधनः ।
निखिलेन कथां सर्वां ऋषिमध्ये न्यवेदयत् ॥ ५ ॥
पुरा राम ! कृतोद्वाहः शितिकण्ठो महातपाः ।
दृष्ट्वा च भगवान् * देवीं मैथुनायोपचक्रमे ॥ ६ ॥
तस्य संक्रीडमानस्य महादेवस्य धीमतः ।
शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम् ॥ ७ ॥
न चापि तनयो राम ! तस्यामासीत् परन्तप ! ।
सर्वे देवाः समुद्युक्ताः पितामहपुरोगमाः ॥ ८ ॥
यदिहोत्पद्यते भूतं कस्तत् प्रतिसहिष्यति ।
अभिगम्य सुराः सर्वे प्रणिपत्येदमब्रुवन् ॥ ९ ॥

प्रस्तावेऽपि सर्वस्योद्धारकत्वात् गङ्गाविषयक एव भगवतः प्रश्न इत्यूह्यम् ॥ ४ ॥

निखिलेन कार्त्स्न्येन विस्तरेणेति यावत् । उद्वाहो विवाहः ॥५॥६॥

गतं क्रीडयेति शेषः ॥ ७ ॥

समुद्युक्ताः सेनानीप्राप्त्यर्थं परमयत्नेन रुद्रोमयोः संयोजनं कृत्वापि तस्यां रुद्रतेजसो मोचनं वारयितुं समुद्युक्ता बभूवुरित्यर्थः । समुद्विग्ना इति पाठस्तु सुगम एव ॥ ८ ॥

पुत्रार्थं संयोजनोद्योगवतां तन्निवारणोद्योगोऽनुचितस्तथाच,—

---

* "दृष्ट्वा" इति पाठान्तरः ।

देवदेव ! महादेव ! लोकस्यास्य हिते रत ! ।
सुराणां प्रणिपातेन प्रसादं कर्त्तुमर्हसि ॥ १० ॥
न लोका धारयिष्यन्ति तव तेजः सुरोत्तम ! ।
ब्राह्मेण तपसा युक्तो देव्या सह तपश्चर ॥ ११ ॥
त्रैलोक्यहितकामार्थं तेजस्तेजसि धारय ।
रक्ष सर्वानिमां लोकान् नालोकं कर्त्तुमर्हसि ॥ १२ ॥
देवतानां वचः श्रुत्वा सर्वलोकमहेश्वरः ।
बाढ़मित्यब्रवीत् सर्वान् पुनश्चेदमुवाच ह ॥ १३ ॥

यदिहेति इह उमायाम् उत्पद्यते उत्पत्स्यते अब्रुवन् इति विचार्येत्यादि ॥ ९ ॥ १० ॥

प्रसादविषयमाह,—न लोका इति । भूरादिलोकास्तत्प्रभावेत्यर्थः । ब्राह्मेण तपसा ब्रह्मानन्यताध्यानेन तपस्येत्यर्थः * ॥११॥

तेजोरेतः तेजसि आत्मनि । मत्तेजसि मया धृते को लाभस्तत्राह,—रक्ष सर्वानिति । धृत्वेति शेषः । ननु शम्भोः स्वतेजोधारणे कथं लोकरक्षेति चेत्? शृणु, यदेतत् पुरुषे रेतो भवति आदित्यस्य तद्रूपम् इति श्रुतेस्तद्रेतो रूपं तेज एव आदित्यमण्डलं तद्धृतौ सकलं जगत् रक्षितं भवति विपर्य्यये विपर्य्यय इत्याशयः तदेवाह,—नालोकमिति । आदित्यविनाशे हि सर्वलोकविनाशप्रसङ्ग इति भावः ॥ १२ ॥ १३ ॥

---

* वेदाध्ययनेन तपसा इति नागोजीभट्टः ।

धारयिष्याम्यहं तेजस्तेजस्येव सहोमया ।
त्रिदशाः पृथिवी चैव निर्वाणमधिगच्छतु ॥ १४ ॥
यदिदं क्षुभितं स्थानान्मम तेजो ह्यनुत्तमम् ।
धारयिष्यति कस्तन्मे ब्रुवन्तु सुरसत्तमाः ! ॥ १५ ॥
एवमुक्तास्ततो देवाः प्रत्यूचुर्वृषभध्वजम् ।
यत् तेजः क्षुभितं तेऽद्य तद् धरा धारयिष्यति ॥ १६ ॥
एवमुक्तः सुरपतिः प्रमुमोच महाबलः ।
तेजसा पृथिवी येन व्याप्ता सगिरिकानना ॥ १७ ॥

धारयिष्यामीति । सहोमया उमापि स्वरजोरूपं तेजोऽग्निं स्वस्वरूपेण तेजसा धारयिष्यति । यदेतत् स्त्रियां लोहितं भवति अग्नेस्तद्रूपमिति श्रुतेः । भो त्रिदशाः ! अनेन तेजोधारणेन पृथिवी चकारात् सर्वलोकः निर्वाणं सुखं प्राप्नोतु । अन्यथा ऐश्वरतेजोजन्यस्य दुर्धार्षत्वेन दुर्दर्शत्वेन च पृथिव्याः लोकस्य च पीडा स्यादिति भावः ॥१४॥

दिव्यवर्षशतभोगवशात् स्थानतः च्युतस्य शुक्रांशस्य धारणासम्भवेन तद्धारणसमर्थमात्मस्थानं निरूपयन्नित्याह,—यदिदमिति । स्थानात् हृदयपुण्डरीकचलनवशात् क्षुभितं चिरकालभोगवशात् स्खलितम् अनुत्तमं देवकार्यार्थं सुतसमर्थत्वेन सर्वोत्तमं भवत्प्रार्थनया उमागर्भानर्हं को धारयिष्यति ? ॥ १५ ॥

उत्तरमाहुः,—एवमिति । धरा धारयिष्यतीति तस्या अग्नेर्धारणशक्तिमत्त्वादिति भावः ॥ १६ ॥ १७ ॥

ततो देवाः पुनरिदमूचुश्चापि कृताञ्जनम्।
आविश त्वं महातेजो रौद्रं वायुसमन्वितः ॥ १८ ॥
तदग्निना पुनर्व्याप्तं सञ्जातं श्वेतपर्वतम्।
दिव्यं शरवनञ्चैव पावकादित्यसन्निभम्॥ १९ ॥
यत्र जातो महातेजाः कार्त्तिकेयोऽग्निसम्भवः।
अथोमाञ्च शिवञ्चैव देवाः सर्षिगणास्तथा ॥ २० ॥
पूजयामासुरत्यर्थं सुप्रीतमनसस्तदा।
अथ शैलसुता राम! त्रिदशान् इदमब्रवीत् ॥ २१ ॥

पृथिव्यां मुक्तस्य तेजसोधारणार्थम् अग्नेः पृथिव्यधिपतित्वेन पृथिव्यभिमानित्वात् तन्नियुज्यते,—तत इति। पुनःशब्दो वाक्यालङ्कारे। कृताञ्जनं देवीक्रोडेशाञ्जलम् अन्याहृशाग्नेः रौद्रतेजःप्रवेशासम्भवात्। वायुसमन्वित इत्यनेन चालनसखाः प्रवेशोपायः उक्तः॥१८॥

तदग्निनेति। उक्ताग्निना चालनपूर्वकप्रवेशात् तत तेजो बहु सत् केवलश्वेतपर्वतरूपं जातं तद्रूपं तेजःप्रवेशप्रदेशे तन्महिम्ना दिव्यं पावकादित्यसन्निभं शरवनञ्चाभूत् ॥ १९ ॥

यत्रेति। किञ्चित्कालं धृतत्वात् कार्त्तिकेयत्ववदेव अग्निसम्भवत्वं बोध्यम् ॥ २० ॥

सुप्रीतमनसः लोकानुग्रहाय मूलतेजसो धृतत्वात् देवकार्य्यार्थं स्कन्नतेजसश्च दत्तत्वात् सन्तोषः। क्रियमाणामपि पूजाम् उमा देवी नाङ्गीकरोति स्म, प्रत्युत क्रुद्धैवाभूदित्याह,—अथ शै-

समन्युरशपत् सर्वान् क्रोधसंरक्तलोचना ।
यस्मान्-निवारिता चाहं सङ्गता पुत्रकाम्यया ॥ २२ ॥
अपत्यं स्वेषु दारेषु नोत्पादयितुमर्हथ ।
अद्यप्रभृति युष्माकमप्रजाः सन्तु पत्नयः ॥ २३ ॥
एवमुक्त्वा सुरान् सर्वान् शशाप पृथिवीमपि ।
अवने ! नैकरूपा त्वं बहुभार्या भविष्यसि ॥ २४ ॥
न च पुत्रकृतां प्रीतिं मत्क्रोधकलुषीकृता ।
प्राप्स्यसि त्वं सुदुर्मेधे ! मम पुत्रमनिच्छती ॥ २५ ॥

ोति । किमब्रवीत् तदाह,—अशपदिति । शापरूपं वचोऽब्रवीदित्यर्थः ॥ २१ ॥

मन्युकारणमाह,—यस्मादिति ॥ २२ ॥

शापस्वरूपमाह,—अपत्यमित्यादि ॥ २३ ॥

एवमुक्त्वा शापरूपं वच इति शेषः । अवने ! पृथ्वि ! नैकरूपा एकस्यैव क्षेत्रेऽनेकबीजफलजनकत्वात् । बहुभार्या अनेकभूपतिभोग्या ॥ २४ ॥

न च पुत्रकृतां प्रीतिं वराहादुत्पन्नस्यापि नरकासुरस्य भौमस्य कृष्णावतारे तेनैव हननात् सुदुर्मेध इति । नित्यमसिच् प्रजामेधयोरित्यसिच् । सुतरां दुष्टा मेधा यस्यास्तत्सम्बोधनं सुदुर्मेधः । मम पुत्रमनिच्छतीति तेजोधारणानुमत्या यद्येवा तत्तेजोधारणं नानुमन्येत, तर्हि स पुत्रो ममैव स्यादित्याशयः ॥ २५ ॥

तान् सर्वान् पीड़ितान् दृष्ट्वा सुरान् सुरपतिस्तदा ।
गमनायोपचक्राम दिशं वरुणपालिताम् ॥ २६ ॥
स गत्वा तप आतिष्ठत् पार्श्वे तस्योत्तरे गिरेः ।
हिमवत्प्रभवे शृङ्गे सह देव्या महेश्वरः ॥ २७ ॥
एष ते विस्तरो राम शैलपुत्र्या निवेदितः ।
गङ्गायाः प्रभवं चैव शृणु मे सहलक्ष्मणः ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे पार्वत्याः शापदानं नाम षट्त्रिंशः सर्गः ॥ ३६ ॥

पीड़ितान् देवीशापदुःखितान् । उपचक्राम पादन्यासं कृतवान् ॥ २६ ॥

तस्य गिरेः हिमालयस्य उत्तरे पार्श्वे हिमवत्प्रभवाख्ये शृङ्गे ॥ २७ ॥

उपसंहरति,—एष इति । त्रिषु लोकेषु धर्मैः कर्मभिः कैः समन्वितेति प्रश्नोत्तरतया वक्तव्यस्य गर्भधारणरूप-गङ्गाचरितस्य शेषतया शैलपुत्र्या विस्तारो निवेदितः । प्रकृतं प्रश्नोत्तरं वक्तुं प्रतिजानीते गङ्गाया इति । प्रभवमिति छान्दसो क्लसः, स्वेतेजोधारणरूपं भावमित्यर्थः ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

सप्तत्रिंशः सर्गः ।



तप्यमाने तदा देवे सेन्द्राः साग्निपुरोगमाः ।
सेनापतिमभीप्सन्तः पितामहमुपागमन् ॥ १ ॥
ततोऽब्रुवन् सुराः सर्वे भगवन्तं पितामहम् ।
प्रणिपत्य सुराराम ! * सेन्द्राः साग्निपुरोगमाः ॥ २ ॥
येन सेनापतिर्देव ! दत्तो भगवता पुरा ।
स तपः परमास्थाय तप्यते स्म सहोमया ॥ ३ ॥

देवे शिवे । सेन्द्राः देवा इति शेषः । साग्निपुरोगमाः अग्निना पुरोगमेन सहिता इत्यर्थः । "सेन्द्राः सर्षिगणाः पुरा" इति क्वचित् पाठः ॥ १ ॥

अत्र सुराः सर्वे इति पुनरुक्तम् ! अतः पाठान्तरमन्वेषणीयम् । द्वितीयार्द्धे सुराराम † इति पाठः । रामसम्बोधनमेतत् ॥ २ ॥

येन सर्वेण सेनापतिर्वीर्यारूपो नो दत्तः । स परमास्थाय परं मौनमङ्गीकृत्य तपः तप्यते अनुतिष्ठति ॥ ३ ॥

---

* "प्रणिपत्याञ्जलिं बद्धा" इति गौडीयाः ।

† सुराणाम् आरामः सन्तोषो यत्र ।

यदत्रानन्तरं कार्य्यं लोकानां हितकाम्यया।

संविधत्स्व विधानज्ञ। त्वं हि नः परमा गतिः॥ ४॥

देवतानां वचः श्रुत्वा सर्वलोकपितामहः।

सान्त्वयन् मधुरैर्वाक्यैस्त्रिदशानिदमब्रवीत्॥ ५॥

शैलपुत्र्या यदुक्तं तत् न प्रजाः स्वासु पत्निषु।

तस्या वचनमक्लिष्टं सत्यमेव न संशयः॥ ६॥

इयमाकाशगङ्गा च यस्यां पुत्रं हुताशनः।

जनयिष्यति देवानां सेनापतिमरिन्दमम्॥ ७॥

ज्येष्ठा शैलेन्द्रदुहिता मानयिष्यति तं सुतम्।

उमायास्तद् बहुमतं भविष्यति न संशयः॥ ८॥

अनन्तरं वीजदानस्य परमानन्तरं यत् कार्य्यं पुत्राकारसम्पत्तये विधेयं, तत् सन्विधत्स्व॥ ४॥

सान्त्वयन् इत्यकार्य्याचाभखिन्नानिति शेषः॥ ५॥

यत् यस्मात् शैलपुत्र्या 'अप्रजा भविष्यथ' इत्युक्तं, तत् तस्मात् युष्माकं स्वासु पत्निसु न प्रजाः सन्तीति शेषः। पत्निषिति छान्दसम्। अतस्तस्या वचनमक्लिष्टम् अमोघम्। स्वत्र प्रजाश्चायेति पाठकल्पना छान्दसत्वकल्पना च निष्फलैव॥ ६॥

तर्हि का गतिस्तत्राह,—इयमिति। यस्यां हुताशनः पुत्रं जनयिष्यति, सेयम् आकाशगङ्गा आस्ते इति शेषः॥ ७॥

'ज्येष्ठा उमा कनिष्ठापत्यत्वात् स्वापत्यवत् मानयिष्यतीत्यर्थः।'

तत् श्रुत्वा वचनं तस्य कृतार्था रघुनन्दन ! ।

प्रणिपत्य सुराः सर्वे पितामहमपूजयन् ॥ ९ ॥

ते गत्वा पर्व्वतं राम ! कैलासं धातुमण्डितम् ।

अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः ॥ १० ॥

देवकार्यमिदं देव ! समाधत्स्व हुताशन ! ।

शैलपुत्र्यां महातेजो गङ्गायां तेज उत्सृज ॥ ११ ॥

देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः ।

गर्भं धारय वै देवि ! देवतानामिदं प्रियम् ॥ १२ ॥

इत्येतद् वचनं श्रुत्वा दिव्यं रूपमधारयत् ।

स तस्या महिमां दृष्ट्वा समन्तादवशीर्य्यत ॥ १३ ॥

इति कतकः, तन्न ; पूर्वं गङ्गाया एव ज्येष्ठत्वोक्त्या तेन विरोधात् । तस्माद् ज्येष्ठा गङ्गा स्वकनिष्ठामपत्यत्वात् मानयिष्यतीत्यर्थः । उमाशिवसंयोगेन च्युतरेतोरजोभ्याम् उत्पत्तेरुमापत्यत्वम् । अतएवाह,—उमाया इति । तत्र स्वापत्यसम्मानम् ॥ ८ ॥ ९ ॥

कैलासं पर्वतं गत्वा इत्यन्वयः ॥ १० ॥

समाधत्स्व कुरु । महातेज इति सम्बुद्धिः । शैलपुत्र्यां गङ्गायाम् ऐश्वं तेजः उत्सृज इत्यन्वयः ॥ ११ ॥

प्रतिज्ञाय तथा करोमीति प्रतिज्ञाय । इदं गर्भधारणं देवतानां प्रियमित्यन्वयः ॥ १२ ॥

दिव्यं रूपम् अधारयत् कोऽयं कीदृशं तेज इति शेषः । तस्या

समन्ततस्तदा देवीमभ्यषिञ्चत पावकः।
सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन! ॥ १४ ॥
तमुवाच ततो गङ्गा सर्वदेवपुरोगमम्।
अशक्ता धारणे देव! तेजस्तव समुद्धतम् ॥ १५ ॥
दह्यमानाग्निना तेन सम्प्रव्यथितचेतना।
अथाब्रवीदिदं गङ्गां सर्वदेवहुताशनः ॥ १६ ॥
इह हैमवते पार्श्वे गर्भोऽयं सन्निवेश्यताम्।
श्रुत्वा त्वग्निवचो गङ्गा तं गर्भमतिभास्वरम् ॥ १७ ॥
उत्ससर्ज महातेजाः स्रोतोभ्यो हि तदानघ! ।

महिमां दिव्यरूपवैभवम्। सः ऐश्वरतेजोराशिः पारदः अवशीर्य्यत शीर्णः। उत्तमक्षीरर्णने रसेश्वरस्य तद्ग्रहणाय उच्छूनं वियोजन-पर्य्यन्तमिति सुप्रसिद्धम्। यद्वा स अग्निः अवशीर्य्यत ऐश्वरं तेज-स्त्यक्तवानित्यर्थः ॥ १३ ॥

अभ्यषिञ्चतेति। रसेश्वरेणेति शेषः। स्रोतांसि नाड्यः ॥ १४ ॥

पुरोगमः पुरोयायी हितकरश्च। तव आग्नेयेन तेजसा सम्बन्धात् समुद्धतम् अत्युग्रं तेजः शैवं यतस्तस्य धारणे अहमशक्ता इत्य-न्वयः ॥ १५ ॥

संप्रव्यथितचेतना अस्मीति शेषः। सर्वदेवहुताशनं सर्वदेवो-द्देशेन हुतस्य भक्षकः ॥ १६ ॥

सन्निवेश्यतां स्थाप्यताम् ॥ १७ ॥

यदस्या निर्गतं तस्मात् तप्तजाम्बूनदप्रभम् ॥ १८ ॥
काञ्चनं धरणीं प्राप्तं हिरण्यमतुलप्रभम् ।
ताम्रं कार्ष्णायसं चैव तैक्ष्ण्यादेवाभिजायत ॥ १९ ॥
मलं तस्याभवत् तत्र त्रपुसीसकमेव च ।
तदेतद् धरणीं प्राप्य नानाधातुरवर्धत ॥ २० ॥
निक्षिप्तमात्रे गर्भे तु तेजोभिरभिरञ्जितम् ।
सर्वं पर्वतसन्नद्धं सौवर्णमभवद् वनम् ॥ २१ ॥

स्रोतोभ्य उत्क्षिप्य तत् तेजः हिमवत्पार्श्वे उत्ससर्ज इत्यन्वयः । यत् यस्मात् अस्याः निर्गतं, तत् तस्मात् गङ्गागर्भतो निर्गमात् तत् तेजः । जाम्बूनदाकारसुमेरुकन्यापत्यत्वाद् गङ्गायास्तप्तं जाम्बूनदं सुवर्णं तेन समप्रभम् आसीदिति शेषः ॥ १८ ॥

अतएव धरणीं प्राप्तं साक्षात्तत्सम्बद्धधरणीस्थं वस्तु काञ्चनमकरोत् । तत समीपवर्त्ति भूसंस्थम् अतुलप्रभं हिरण्यं रजतम् अकरोत् । तत्तेजःसम्बन्धितैक्ष्ण्यादेव तद्व्यवहितभूस्थं वस्तुजातं ताम्रं कार्ष्णायसं लोहम् अभिजायत, अडभाव आर्षः ॥ १९ ॥

तत् तस्य गर्भस्य मलं त्रपुसीसञ्च अभवत् अयं भावः । तैक्ष्ण्यमलगन्धमुक्तेन शुद्धेन स्पर्शतो विद्धं स्वर्णं, गन्धयुक्तेन विद्धं रजतं, तैक्ष्ण्ययुक्तेन विद्धं ताम्रं लोहञ्च, मलयुक्तेन विद्धं त्रपुसीसे इति । नानाधातुः तद्रूपम् ॥ २० ॥

न च स्पर्शवेधित्वमेव तस्य, अपि तु रूपवेधित्वमपीत्याह,—निक्षिप्तेत्यादि । सन्नद्धं सम्बद्धम् ॥ २१ ॥

जातरूपमिति ख्यातं तदा प्रभृति राघव ! ।
सुवर्णं पुरुषव्याघ्र ! हुताशनसमप्रभम् ॥ २२ ॥
तं कुमारं ततो जातं सेन्द्राः सहमरुद्गणाः ।
क्षीरसम्भावनार्थाय कृत्तिकाः समयोजयन् * ॥ २३ ॥
ताः क्षीरं जातमात्रस्य कृत्वा समयमुत्तमम् ।
ददुः पुत्रोऽयमस्माकं सर्वासामिति निश्चिताः ॥ २४ ॥
ततस्तु देवताः सर्वाः कार्त्तिकेय इति ब्रुवन् ।
पुत्रस्त्रैलोक्यविख्यातो भविष्यति न संशयः ॥ २५ ॥

जातरूपं रूपेण जातमित्यर्थः ॥ २२ ॥

तं कुमारमिति । ततः रुद्रतेजसः जातं क्रमेण साकारतां प्राप्तम् । क्षीरसम्भावनार्थाय क्षीरपानप्रयोजनसिद्ध्ये । कृत्तिकाः कृत्तिकाभिः । यद्वा समयोजयन्नित्यस्य प्रैरयन्नित्यर्थः ॥ २३ ॥

अथ ताः कृत्तिकाः अस्माकं सर्वासां पुत्रो भवत्विति उत्तमं समयं कृत्वा निश्चिताः तद्विषयकनिश्चयवत्यः । जातमात्रस्य तस्य क्षीरं ददुरित्यन्वयः ॥ २४ ॥

ततः सर्वदेवताः युष्माकमयं पुत्रः कार्त्तिकेय इति त्रैलोक्यविख्यातो भविष्यति, अत्र न सन्देहः इति ब्रुवन् अब्रुवन्नित्यर्थः । अडभाव आर्षः ॥ २५ ॥

---

* "समपूजयन्" इति दाक्षिणात्याः ।

तेषां तद् वचनं श्रुत्वा स्कन्नं गर्भपरिस्रवे ।
स्नापयन् परया लक्ष्म्या दीप्यमानं यथानलम् ॥ २६ ॥

स्कन्द इत्यब्रुवन् देवाः स्कन्नं गर्भपरिस्रवे ।
कार्त्तिकेयं महाबाहुं काकुत्स्थ! ज्वलनोपमम् ॥ २७ ॥

प्रादुर्भूतं ततः क्षीरं कृत्तिकानामनुत्तमम् ।
षण्णां षडाननो भूत्वा जग्राह स्तनजं पयः ॥ २८ ॥

गृहीत्वा क्षीरमेकाह्ना सुकुमारवपुस्तदा ।
अजयत् स्वेन वीर्येण दैत्यसैन्यगणान् विभुः ॥ २९ ॥

तेषां देवानां तत् स्वेष्टानुकूलं वचनं श्रुत्वा स्कन्नम् आदौ शम्भोः सकाशात् स्कन्नं पश्चाद् गङ्गाया गर्भात् परिस्रवे सति परया लक्ष्म्या दीप्यमानम् अनलमिव दुःस्पर्शं दुःस्पर्शतानिवृत्तिप्रयोजकशैत्यसिद्धये ताः स्नापयन् अस्नापयन्नित्यर्थः ॥ २६ ॥

ततः स्कन्नपरिस्रुतत्वहेतोः पूर्वं कार्त्तिकेयत्वेनोक्तं स्कन्द इत्यन्वर्थनाम्ना अब्रुवन्नित्यन्वयः । स्कन्नपरिस्रुत इत्यर्थे स्कन्द इति पृषोदरादित्वात् साधुः ॥ २७ ॥

ततः कृत्तिकानां क्षीरं प्रादुर्भूतम् आसीदिति शेषः । ततः षण्णामपि स्तनजं पयः क्षुधातिशयेन षडाननो भूत्वा जग्राह ॥ २८ ॥

एवं तदा षड्भिर्मुखैः यावदपेक्षितं क्षीरं गृहीत्वा एकाह्ना एकदिनेनैव सुकुमारवपुरपि स्वतेजसैव दैत्यसैन्यगणान् अजयत् ॥ २९ ॥

सुरसेनागणपतिम् अभ्यषिञ्चन् महाद्युतिम्।
ततस्तममराः सर्वे समेत्याऽग्निपुरोगमाः॥ ३०॥
एष ते राम! गङ्गाया विस्तरोऽभिहितो मया।
कुमारसम्भवश्चैव धन्यः पुण्यस्तथैव च॥ ३१॥
भक्तश्च यः कार्त्तिकेये काकुत्स्थ! भुवि मानवः।
आयुष्मान् पुत्रपौत्रैश्च स्कन्दसालोक्यतां व्रजेत्॥ ३२॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे कार्त्तिकेयोत्पत्तिर्नाम सप्तत्रिंशः सर्गः॥ ३७॥

ततः सकलासुरजयहेतोः सर्वेऽग्निपुरोगमा देवाः समेत्य सुरसेनागणपतिं तम् अभ्यषिञ्चन् इत्यन्वयः॥ ३०॥

उपसंहरति,—एष इत्यादि॥ ३१॥

धन्यत्वपुण्यत्वे विवृणोति,—भक्तश्चेति। ऐहलौकिकफलेन धन्यत्वम् आमुष्मिकेण पुण्यत्वम्। पुत्रपौत्रैश्च इत्यस्य युक्तः सन् इत्यादौ इति शेषः॥ ३२॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे सप्तत्रिंशः सर्गः॥ ३७॥

अष्टत्रिंशः सर्गः ।



तां कथां कौशिको रामे निवेद्य मधुराक्षराम् ।
पुनरेवापरं वाक्यं काकुत्स्थमिदमब्रवीत् ॥ १ ॥
अयोध्याधिपतिर्वीरः पूर्वमासीन्-नराधिपः ।
सगरो नाम धर्मात्मा प्रजाकामः स चाप्रजः ॥ २ ॥
वैदर्भदुहिता राम ! केशिनी नाम नामतः ।
ज्येष्ठा सगरपत्नी सा धर्मिष्ठा सत्यवादिनी ॥ ३ ॥
अरिष्टनेमिदुहिता सुपर्णभगिनी तु सा ।
द्वितीया सगरस्यासीत् पत्नी सुमतिसंज्ञिता ॥ ४ ॥
ताभ्यां सह महाराजः पत्नीभ्यां तप्तवांस्तपः ।
हिमवन्तं समासाद्य भृगुप्रस्रवणे गिरौ ॥ ५ ॥
अथ वर्षशते पूर्णे तपसाराधितो मुनिः ।

अथ "[illegible] हेतुना केन ?" इत्यादिप्रश्नोत्तरं वक्तुमाह,—[illegible] कथामिति । अपरं वाक्यं वक्ष्यमाणं प्रश्नोत्तरम् ॥ १ ॥
[illegible] तस्मात् प्रजाकामोऽभूदित्यन्वयः ॥ २ ॥ ३ ॥
अरिष्टनेमिः कश्यपः । [illegible] सुपर्णभगिनी[illegible] ॥ ४ ॥

सगराय वरं प्रादात् भृगुः सत्यवतां वरः ॥ ६ ॥
अपत्यलाभः सुमहान् भविष्यति तवानघ ! ।
कीर्त्तिं चाप्रतिमां लोके प्राप्स्यसे पुरुषर्षभ ! ॥ ७ ॥
एका जनयिता तात ! पुत्रं वंशकरं तव ।
षष्टिं पुत्रसहस्राणि अपरा जनयिष्यति ॥ ८ ॥
भाषमाणं नरव्याघ्रं राजपत्न्यौ प्रसाद्य तम् ।
ऊचतुः परमप्रीते कृताञ्जलिपुटे तदा ॥ ९ ॥
एकः कस्याः सुतो ब्रह्मन् ! का बहून् जनयिष्यति ।
श्रोतुमिच्छावहे ब्रह्मन् ! सत्यमस्तु वचस्तव ॥ १० ॥
तयोस्तद्वचनं श्रुत्वा भृगुः परमधार्मिकः ।
उवाच परमां वाणीं स्वच्छन्दोऽत्र विधीयताम् ॥ ११ ॥

भृगुप्रस्रवणे भृग्वधिष्ठितं प्रस्रवणं प्रवाहो यस्मिन् गिरौ हिमवत्पादपर्वते ॥ ५ ॥ ६ ॥ ७ ॥

तातेत्युपलालने । जनयिता जनयिष्यति षष्टिमिति । विभक्ति-वचनान्तत्वात् [illegible] ॥ ८ ॥

राजपुत्र्यौ [illegible] ॥ ९ ॥

इच्छावहे इच्छावः ॥ १० ॥

स्वच्छन्दः स्वेच्छा । विधीयतां व्याप्रियताम् । स्वेच्छयैव वंशकरपुत्रवती बहुपुत्रवती वा भवितुमिति तात्पर्यम् ॥ ११ ॥

एको वंशकरो वास्तु बहवो वा महाबलाः ।
कीर्त्तिमन्तो महोत्साहाः का वा कं वरमिच्छति ॥ १२ ॥
मुनेस्तु वचनं श्रुत्वा केशिनी रघुनन्दन ! ।
पुत्रं वंशकरं राम ! जग्राह नृपसन्निधौ ॥ १३ ॥
षष्टिं पुत्रसहस्राणि सुपर्णभगिनी तदा ।
महोत्साहान् कीर्त्तिमतो जग्राह सुमतिः सुतान् ॥ १४ ॥
प्रदक्षिणमृषिं कृत्वा शिरसाभिप्रणम्य तम् ।
जगाम स्वपुरं राजा सभार्यो रघुनन्दन ! ॥ १५ ॥
अथ काले गते तस्य ज्येष्ठा पुत्रं व्यजायत ।
असमञ्ज इति ख्यातं केशिनी सगरात्मजम् ॥ १६ ॥
सुमतिस्तु नरव्याघ्र ! गर्भतुम्बं व्यजायत ।
षष्टिः पुत्रसहस्राणि तुम्बभेदाद् विनिःसृताः ॥ १७ ॥
घृतपूर्णेषु कुम्भेषु धात्र्यस्तान् समवर्धयन् ।

तदेवाह,—एको वंशकरो वेति । वंशकरः वंशविवर्द्धनः ॥१२॥ नृपसन्निधौ इत्यनेन तस्यापि साक्षित्वमात्रं न तु वरनियम-कर्त्तृतेति सूचितम् ॥ १३ ॥
सुपर्णो गरुडः ॥ १४ ॥ १५ ॥
व्यजायत प्रसूतवती ॥ १६ ॥

कालेन महता सर्वे यौवनं प्रतिपेदिरे ॥ १८ ॥

अथ दीर्घेण कालेन रूपयौवनशालिनः ।

षष्टिः पुत्रसहस्राणि सगरस्याभवंस्तदा ॥ १९ ॥

स च ज्येष्ठो नरश्रेष्ठः सगरस्यात्मसम्भवः ।

बालान् गृहीत्वा तु जले सरय्वा रघुनन्दन ! ॥ २० ॥

प्रक्षिप्य प्राहसन् नित्यं मज्जतस्तान् निरीक्ष्य वै ।

एवं पापसमाचारः सज्जनप्रतिबाधकः ॥ २१ ॥

पौराणामहिते युक्तः पित्रा निर्वासितः पुरात् ।

तस्य पुत्रोऽंशुमान् नाम असमञ्जस्य वीर्यवान् ॥ २२ ॥

सम्मतः सर्वलोकस्य सर्वस्यापि प्रियंवदः ।

ततः कालेन महता मतिः समभिजायत ॥ २३ ॥

गर्भं तुम्बं तुम्बफलाकारगर्भपिण्डं व्यजायत प्रसूतवती कार्थं ततः पुत्रोदय इत्यत आह,—षष्ठिरित्यादि ॥ १७ ॥ १८ ॥

दीर्घेण कालेन यौवनशालित्वे हेतुत्वात् तृतीया ॥ १९ ॥

ज्येष्ठः असमञ्जः बालान् गृहीत्वा जले प्रक्षिप्य मज्जतः तान् समीक्ष्य नित्यं प्राहसत् । प्राहसन्निति पाठे स्थितो भवतीति शेषः । सज्जनप्रतिबाधकः सज्जनपीडकः ॥ २० ॥ २१ ॥

निर्वासितो निष्कासितः । तस्य असमञ्जस्य इतहारो असमञ्जस्यः पदन्तः सामञ्जेति बोध्यम् ॥ २२ ॥

[illegible] श्रेष्ठः [illegible]मिति विश्रुता ।

[illegible] कृत्वा निश्चयं राजा सोपाध्यायगणस्तदा ॥ २४ ॥

[illegible]कर्मादि वेदज्ञो यज्ञं समुपचक्रमे ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सगरपुत्र-

जननं नाम [illegible]त्रिंशः सर्गः ॥ ३८ ॥

[illegible] ॥ २३ ॥ २४ ॥

[illegible]स्य निश्चयं कृत्वा इति [illegible]नान्वयः ॥ २५ ॥

इति रामाभिरामे [illegible] रामायणतिलके

बालकाण्डे [illegible]त्रिंशः सर्गः ॥ ३८ ॥

एकोनचत्वारिंशः सर्गः ।



विश्वामित्रवचः श्रुत्वा कथान्ते रघुनन्दनः ।
उवाच परमप्रीतो मुनिं दीप्तमिवानलम् ॥ १ ॥
श्रोतुमिच्छामि भद्रं ते विस्तरेण कथामिमाम् ।
पूर्वजो मे कथं ब्रह्मन् ! यज्ञं वै समुपाहरत् ॥ २ ॥
तस्य तद् वचनं श्रुत्वा कौतूहलसमन्वितः ।
विश्वामित्रस्तु काकुत्स्थम् उवाच प्रहसन्निव ॥ ३ ॥
श्रूयतां विस्तरो राम ! सगरस्य महात्मनः ।
शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ ४ ॥
विन्ध्यपर्वतमासाद्य निरीक्षेते परस्परम् ।

कथान्ते यज्ञोपक्रमकथान्ते इत्यर्थः ॥ १ ॥

इमां यज्ञसम्बन्धिनीम् ॥ २ ॥

प्रहसन्निव विकसितवदनः अपूर्ववृत्तान्ततया श्रवणकौतुकेन [illegible] । अतएव मुनेर्हर्षः । स्ववंश्य इति रामस्यापि कौतुकं [illegible] समाप्त इति ॥ ३ ॥

सगरस्य महात्मनः यज्ञस्येत्यर्थः ॥ ४ ॥

तयोर्मध्ये समभवत् यज्ञः स पुरुषोत्तम ! ॥ ५ ॥
स हि देशो नरव्याघ्र ! प्रशस्तो यज्ञकर्मणि ।
तस्याश्वचर्यां काकुत्स्थ ! दृढधन्वा महारथः ॥ ६ ॥
अंशुमानकरोत् तात ! सगरस्य मते स्थितः ।
तस्य पर्वणि तं यज्ञं यजमानस्य वासवः ॥ ७ ॥
राक्षसीं तनुमास्थाय यज्ञीयाश्वमपाहरत् * ।
ह्रियमाणे तु काकुत्स्थ ! तस्मिन्नश्वे महात्मनः ॥ ८ ॥

मध्ये महापर्वतविरोधाभावात् विन्ध्यपर्वतं हिमवान् तथा विन्ध्योऽपि हिमवन्तम् इत्येवं परस्परमासाद्य उच्चत्वेन साम्यं प्राप्य औन्नत्यातिशयेन वीक्षानिरोधकाभावात्। परस्परं निरीक्षेते पश्यत इत्यर्थः। तयोर्मध्ये आर्य्यावर्त्तभूमौ "आर्य्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमागयोः" इति वचनात् ॥ ५ ॥

प्रशस्तः प्रशस्तत्वेन प्रसिद्धः उक्तवचनात्। अश्वचर्य्यां रक्षार्थमश्वानुगमनम् ॥ ६ ॥

मते शासने। पर्वणि उक्थ्याहे अश्वमेधे उक्थ्यसंस्थायाम्। तत्र द्वितीये अश्वालम्भनदिवसे अश्वविशसनात् प्राक्। तं यज्ञं विह्वलमिति शेषः ॥ ७ ॥

यज्ञीयाश्वं यज्ञार्हमश्वम् ॥ ८ ॥

---

* "यजतस्तस्य तं यज्ञमुत्थाप्य धरणीतलात्।
तमश्वं यज्ञियं नागो महारामन्तरूपवान् ॥"
इति वङ्गीयाः।

उपाध्यायगणाः सर्वे यजमानमथाब्रुवन्।
अयं पर्वणि वेगेन यज्ञीयाश्वोपनीयते * ॥ ९ ॥
हर्त्तारं जहि काकुत्स्थ! हयश्चैवोपनीयताम्।
यज्ञच्छिद्रं भवत्येतत् सर्वेषामशिवाय नः ॥ १० ॥
तत् तथा क्रियतां राजन्! यज्ञोऽच्छिद्रः कृतो भवेत् * ।
सोपाध्यायवचः श्रुत्वा तस्मिन् सदसि पार्थिवः ॥ ११ ॥
षष्टिं पुत्रसहस्राणि वाक्यमेतदुवाच ह ।
गतिं पुत्रा! न पश्यामि रक्षसां पुरुषर्षभाः ॥ १२ ॥

अयं यज्ञियोऽश्वः पर्वणि वेगेन अपनीयते अपह्रियते ॥ ९ ॥
अतः हर्त्तारम् अश्वहर्त्तारं जहि, अश्वश्च शीघ्रमुपनीयताम्।
यज्ञच्छिद्रं यज्ञविघ्नः ॥ १० ॥

अच्छिद्र इति छेदः। यथा यज्ञः अच्छिद्रो भवेद् इत्यन्वयः।
सोपाध्यायवचः उपाध्यायसहित-ऋत्विग्गण-वचः ॥ ११ ॥

भो पुरुषर्षभाः पुत्रकाः! मन्त्रपूतैर्महाभागैः यद्यपि महा-क्रतुः आस्थितः अधिष्ठितः, तथापि रक्षसां मायया यदि छिद्रं स्यात्, तदा आत्मनो गतिं न पश्यामि, तस्मात् गच्छत विचिनध्वम् आने-ष्यत इत्यर्थः इति केचित्। परे तु 'आस्थितो हि' इति पाठः। हि

* "केनापि नागरूपेण हृतश्चोऽश्वः स यज्ञियः।" इति वङ्गीयाः।

* "यथाऽच्छिद्रः क्रतुर्भवेत्" इति प०।

मन्त्रपूतैर्महाभागैरास्थितोऽपि महाक्रतुः ।
तद्गच्छथ विचिन्वध्वं पुत्रका ! भद्रमस्तु वः ॥ १३ ॥
समुद्रमालिनीं सर्वां पृथिवीमनुगच्छथ ।
एकैकं योजनं पुत्रा ! विस्तारमभिगच्छत ॥ १४ ॥
यावत्तुरगसन्दर्शस्तावत् खनत मेदिनीम् ।
तमेव हयहर्तारं मार्गमाणा ममाज्ञया ॥ १५ ॥
दीक्षितः पौत्रसहितः सोपाध्यायगणस्त्वहम् ।
इह स्थास्यामि भद्रं वो यावत्तुरगदर्शनम् ॥ १६ ॥
ते सर्वे हृष्टमनसो राजपुत्रा महाबलाः ।
जग्मुर्महीतलं राम ! पितुर्वचनयन्त्रिताः ॥ १७ ॥
योजनायाम-विस्तारम् एकैको धरणीतलम् ।

यस्मात् ईदृशैर्महाभागैः आस्थितोऽयं क्रतुः अतः अतोऽन्न गतौ ह्रतस्य गतिं न पश्यामि, ननु तस्मात् केनापि देवेन हृत इति तमन्वेषयत इत्यर्थः इत्याह ॥ १२ ॥ १३ ॥

अनुगच्छथ अन्वेषयत । यस्य तादृशाभाव आशङ्क्यात् ॥ १४ ॥

यदि भूमौ न लभ्यते, तदा आह,—यावत्तुरगेत्यादि ॥ १५ ॥

तस्य तुरगानुगमनम् अयुक्तम्, इत्याह,—दीक्षित इत्यादि दीक्षस्य प्रवासनिषेधात् पौत्रस्य बाधकत्वात् चेत् इति भावः ॥ १६ ॥

यन्त्रिता नियुक्ताः ॥ १७ ॥

बिभिदुः पुरुषव्याघ्रा वज्रस्पर्शसमैर्भुजैः ॥ १८ ॥
शूलैरशनिकल्पैश्च हलैश्चापि सुदारुणैः ।
भिद्यमाना वसुमती ननाद रघुनन्दन ! ॥ १९ ॥
नागानां बध्यमानानाम् असुराणाञ्च राघव ! ।
राक्षसानां दुराधर्षं सत्त्वानां निनदोऽभवत् ॥ २० ॥
योजनानां सहस्राणि षष्टिं तु रघुनन्दन ! ।
बिभिदुर्धरणीं राम ! रसातलमनुत्तमम् *॥ २१ ॥
एवं पर्वतसम्बाधं जम्बुद्वीपं नृपात्मजाः ।
खनन्तो नृपशार्दूल ! सर्वतः परिचक्रमुः ॥ २२ ॥
ततो देवाः सगन्धर्वाः सासुराः सहपन्नगाः ।
सम्भ्रान्तमनसः सर्वे पितामहमुपागमन् ॥ २३ ॥

आयामो दैर्घ्यं विस्तारो विशालता तद्युक्तम् । सरबीतलम्
एकैकः अन्वेषयामास इत्यर्थः । बिभिदुरिति पृथिव्यामहद्धे वि
शेषः ॥ १८ ॥

भिद्यमाना सर्वत इति शेषः ॥ १९ ॥ २० ॥

अनुत्तम रसातलं विचेतुमिव सगरी योजनानां षष्टिसहस्राणि
बिभिदुरित्यन्वयः ॥ २१ ॥

---

* "अर्द्धं यावद् रसातलम् ।" इति प० ।

ते प्रसाद्य महात्मानं विषण्णवदनास्तदा ।
ऊचुः परमसन्त्रस्ताः पितामहमिदं वचः ॥ २४ ॥
भगवन् ! पृथिवी सर्वा खन्यते सगरात्मजैः ।
बहवश्च महात्मानो वध्यन्ते जलचारिणः ॥ २५ ॥
अयं यज्ञहरोऽस्माकम् अनेनाश्वोपनीयते ।
इति ते सर्व्वभूतानि हिंसन्ति सगरात्मजाः ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सगरपुत्रै-
रश्वान्वेषणे पृथिवीखननं नाम एकोन-
चत्वारिंशः सर्गः ॥ ३९ ॥

पर्वतसम्बाधं पर्वतनिविडम् ॥ २२ ॥ २३ ॥ २४ ॥
महात्मानः सिद्धगन्धर्वादयः ॥ २५ ॥
'यज्ञहनः' इति पाठे हन्तीति हनः । अपनीयते अपनीयते स्म ।
सर्वभूतानि तत्रसङ्करहितान्यपि ॥ २६ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

चत्वारिंशः सर्गः ।



देवतानां वचः श्रुत्वा भगवान् वै पितामहः ।
प्रत्युवाच सुसंत्रस्तान् कृतान्तबलमोहितान् *॥ १ ॥
यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः ।
महिषी माधवस्यैषा स एव भगवान् प्रभुः ॥ २ ॥
कापिलं रूपमास्थाय धारयत्यनिशं धराम् ।
तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः ॥ ३ ॥
पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः ।

कृतान्तबलमोहितान् कृतः सर्वलोकस्य अन्तो नाशो यैः तादृशानि यानि बलानि सगरसुतबलानि तैर्मोहितान् मूर्च्छितान् ॥ १ ॥

एषा वसुधा ॥ २ ॥

धारयति योगबलेनेति शेषः ॥ २ ॥

पृथिव्या विभेदश्च सनातनः प्रतिकल्पम् अवश्यंभाव्यः । श्रौतस्मार्तसागरादिशब्दैर्दृष्ट एव । अतश्च न शोकः कार्य्य इति भावः ।

---

* "सर्वदेवानिदं वचः ।" इति ष० ।

सगरस्य च पुत्राणां विनाशोऽदीर्घदर्शिनाम् ॥ ४ ॥
पितामहवचः श्रुत्वा त्रयस्त्रिंशदरिंदमाः ।
देवाः परमसंहृष्टाः पुनर्जग्मुर्यथागतम् ॥ ५ ॥
सगरस्य च पुत्राणां प्रादुरासीन्-महात्मनः ।
पृथिव्यां भिद्यमानायां निर्घातसमनिस्वनः ॥ ६ ॥
ततो भित्वा महीं सर्व्वां कृत्वा चापि प्रदक्षिणम् ।
सहिताः * सागराः सर्व्वे पितरं वाक्यमब्रुवन् ॥ ७ ॥
परिक्रान्ता मही सर्व्वा सत्त्ववन्तश्च सूदिताः ।
देवदानवरक्षांसि पिशाचोरगपन्नगाः ॥ ८ ॥
न च पश्यामहेऽश्वं ते अश्वहर्त्तारमेव च ।

एवं दीर्घदर्शिनां दीर्घदर्शिभिः । सगरपुत्रविनाशोऽयं दृष्ट एव ; अतस्तत्रापि शोकोऽनुचितः । शेषे षष्ठी । यद्वा अदीर्घदर्शिनामिति च्छेदः ॥ ४ ॥

त्रयस्त्रिंशत् । अष्टौ वसवः । एकादश रुद्राः । द्वादशादित्याः । अश्विनौ च ॥ ५ ॥

निर्घातसमनिस्वनः । निर्घातनिस्वनसदृश इत्यर्थः ॥ ६ ॥

'ततो भित्वा' इति पाठः ॥ ७ ॥

सत्त्ववन्तो जलजन्तवः ॥ ८ ॥

---

* "उपेत्य" इति च० ।

किं करिष्याम भद्रं ते बुद्धिरत्र विचार्यताम् ॥ ९ ॥
तेषां तद् वचनं श्रुत्वा पुत्राणां राजसत्तमः ।
समन्युरब्रवीद् वाक्यं सगरो रघुनन्दन ! ॥ १० ॥
भूयः खनत भद्रं वो विभेद्य वसुधातलम् ।
अश्वहर्त्तारमासाद्य कृतार्थाश्च निवर्त्तत ॥ ११ ॥
पितुर्वचनमासाद्य सगरस्य महात्मनः ।
षष्टिः पुत्रसहस्राणि रसातलमभिद्रवन् ॥ १२ ॥
खन्यमाने ततस्तस्मिन् ददृशुः पर्व्वतोपमम् ।
दिशागजं विरूपाक्षं धारयन्तं महीतलम् ॥ १३ ॥
सपर्व्वतवनां कृत्स्नां पृथिवीं रघुनन्दन ! ।
धारयामास शिरसा विरूपाक्षो महागजः ॥ १४ ॥
यदा पर्व्वणि काकुत्स्थ ! विश्रामार्थं महागजः ।

ते अस्मासु परं अनुग्रहबुद्धिरस्तु । वयं किं करिष्याम सर्वोपक्रान्दसः । बुद्धिरुपायः ॥ ९ ॥ १० ॥

भूयो विभेद्येत्यन्वयः । कृतार्थाश्च कृतार्थाश्चेत् तदा निवर्त्तत निवर्त्तध्वमित्यर्थे आर्षम् । एतत् अन्यथा न निवृत्तिरित्यर्थः ॥११॥१२॥

खन्यमाने इति । षष्टियोजनसहस्रपरमपीति शेषः दिशा इत्यावन्तम् ॥ १३ ॥

कृत्स्नां तदेकपदे आवच्छिन्नामिति शेषः ॥ १४ ॥

खेदाच्चालयते शीर्षं भूमिकम्पस्तदा भवेत् ॥ १५ ॥
ते तं प्रदक्षिणं कृत्वा दिशापालं महागजम् ।
मानयन्तो हि ते राम ! जग्मुर्भित्त्वा रसातलम् * ॥ १६ ॥
ततः पूर्वां दिशं भित्त्वा दक्षिणां बिभिदुः पुनः ।
दक्षिणस्यामपि दिशि ददृशुस्ते महागजम् ॥ १७ ॥
महापद्मं महात्मानं सुमहत्पर्व्वतोपमम् ।
शिरसा धारयन्तं गां विस्मयं जग्मुरुत्तमम् ॥ १८ ॥
ते तं प्रदक्षिणं कृत्वा सगरस्य महात्मनः ।
षष्टिपुत्रसहस्राणि पश्चिमां बिभिदुर्द्दिशम् ॥ १९ ॥
पश्चिमायामपि दिशि महान्तमचलोपमम् ।
दिशागजं सौमनसं ददृशुस्ते महाबलाः ॥ २० ॥
ते तं प्रदक्षिणं कृत्वा पृष्ट्वा चापि निरामयम् ।

यदा पर्व्वणि यस्मिन् काले यस्मिन् क्षणे। "तिथिभेदे क्षणे पर्व्व" इत्यमरः ॥ १५ ॥

मानयन्तः दिग्गजमिति शेषः। हिः स्वार्थे ॥ १६ ॥ १७ ॥ १८ ॥
प्रदक्षिणं कृत्वा दिग्गजमिति शेषः ॥ १९ ॥ २० ॥

---

* "मन्यमाना दिशां पालं दक्षिणां बिभिदुर्द्दिशम् ।" इति स० ।

खनन्तः समुपाक्रान्ता दिशं सोमवतीं तदा * ॥ २१ ॥
उत्तरस्यां रघुश्रेष्ठ! ददृशुर्हिमपाण्डुरम्।
भद्रं भद्रेण वपुषा धारयन्तं महीमिमाम् ॥ २२ ॥
समालभ्य ततः सर्व्वे कृत्वा चैनं प्रदक्षिणम्।
षष्टिः पुत्रसहस्राणि बिभिदुर्व्वसुधातलम् ॥ २३ ॥
ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम्।
रोषादभ्यखनन् सर्व्वे पृथिवीं सगरात्मजाः ॥ २४ ॥
ते तु सर्वे महात्मानो भीमवेगा महाबलाः।
ददृशुः कपिलं तत्र वासुदेवं सनातनम् ॥ २५ ॥
हयञ्च तस्य देवस्य चरन्तमविदूरतः।
प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन! ॥ २६ ॥

निरामयं कुशलम्। सोमवतीम् उदीचीम् ॥ २१ ॥
भद्रं भद्राख्यम् ॥ २२ ॥
समालभ्य स्पृष्ट्वा ॥ २३ ॥
प्रागुत्तराम् ऐशानीम्। प्रथितां सर्व्वकर्म्माहत्वेन प्रसिद्धाम् ॥ २४ ॥
कापिलं कपिलरूपधारिणम् ॥ २५ ॥
तस्य कपिलस्य ॥ २६ ॥

---

* "प्रोत्खनन्तो ययुर्वीरा दिशं हैमवतीमपि।" इति स०।

ते तं यज्ञहनं * ज्ञात्वा क्रोधपर्याकुलेक्षणाः ।
खनित्रलाङ्गलधरा नानावृक्षशिलाधराः ॥ २७ ॥
अभ्यधावन्त संक्रुद्धास्तिष्ठ तिष्ठेति चाब्रुवन् ।
अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि ॥ २८ ॥
दुर्मेधस्त्वं हि संप्राप्तान् विद्धि नः सगरात्मजान् ।
श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ! ॥ २९ ॥
रोषेण महताविष्टो हुङ्कारमकरोत् तदा ।
ततस्तेनाप्रमेयेण कपिलेन महात्मना ।
भस्मराशीकृताः सर्वे काकुत्स्थ ! सगरात्मजाः ॥ ३० ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
कपिलेन सगरपुत्रभस्मीकरणं नाम
चत्वारिंशः सर्गः ॥ ४० ॥

तं कपिलम् । हन्तीति हनः । पचाद्यच् । अविचारतस्तमेव अश्वापहारद्वारा यज्ञहन्तारं ज्ञात्वेत्यर्थः ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

* "हयहरम्" इति क० ।

एकचत्वारिंशः सर्गः।



पुत्रांश्चिरगतान् ज्ञात्वा सगरो रघुनन्दन !।
नप्तारमब्रवीद् राजा दीप्यमानं स्वतेजसा ॥ १ ॥
शूरश्च कृतविद्यश्च पूर्वैस्तुल्योऽसि तेजसा।
पितॄणां गतिमन्विच्छ येन चाश्वोपवाहितः ॥ २ ॥
अन्तर्भौमानि सत्त्वानि वीर्यवन्ति महान्ति च।
तेषान्तु प्रतिघातार्थं सासिं गृह्णीष्व कार्मुकम् ॥ ३ ॥
अभिवाद्याभिवाद्यांश्च हत्वा विघ्नकरानपि।
सिद्धार्थः सन् निवर्त्तस्व मम यज्ञस्य पारगः ॥ ४ ॥
एवमुक्तोऽंशुमान् सम्यक् * सगरेण महात्मना
धनुरादाय खड्गञ्च जगाम लघुविक्रमः ॥ ५ ॥

चिरगतान् अप्रत्यागच्छत इति शेषः। नप्तारं पौत्रम् ॥ १ ॥
पूर्वैः पितृभिः गतिं वृत्तान्तं येन च अश्वोपवाहितः देशान्तरं प्रापितः, तद्गतिञ्च अन्विच्छ अन्वेषय ॥ २ ॥
अन्तर्भौमानि भूमेरन्तर्जातानि सत्त्वानि प्राणिनः ॥ ३ ॥
अभिवाद्यान् नमस्कारार्हान्। मम यज्ञस्य पारगः पारप्रापकश्च भव इत्यर्थः ॥ ४ ॥ ५ ॥

---

* "राम !" इति क०।

स खातं पितृभिर्मार्गम् अन्तर्भौमं महात्मभिः ।
प्रापद्यत नरश्रेष्ठ ! तेन राज्ञाभिचोदितः ॥ ६ ॥
देवदानवरक्षोभिः पिशाचपतगोरगैः ।
पूज्यमानं महातेजा दिशागजमपश्यत ॥ ७ ॥
स तं प्रदक्षिणं कृत्वा पृष्ट्वा चैव निरामयम् ।
पितॄन् स परिपप्रच्छ वाजिहर्तारमेव च ॥ ८ ॥
दिशागजस्तु तत् श्रुत्वा प्रत्युवाच महामतिः ।
आसमञ्ज ! कृतार्थस्त्वं सहाश्वः शीघ्रमेष्यसि ॥ ९ ॥
तस्य तद् वचनं श्रुत्वा सर्वानेव दिशागजान् ।
यथाक्रमं यथान्यायं प्रष्टुं समुपचक्रमे ॥ १० ॥
तैश्च सर्वैर्दिशापालैर्वाक्यज्ञैर्वाक्यकोविदैः ।
पूजितः सहयश्चैवागन्तासीत्यभिचोदितः ॥ ११ ॥

पितृभिः खातं भूमेरन्तर्विद्यमानं मार्गं पितृवृत्तान्तपरिज्ञानाय प्रापद्यत प्राप्तः ॥ ६ ॥ ७ ॥

निरामयं कुशलम् ॥ ८ ॥

आसमञ्ज असमञ्जपुत्र इति सम्बोधनम् । हनू-चमात्यार्थः ॥ ९ ॥ १० ॥

वाक्यं शब्दमर्थं, कारके शोभितवाक्यवक्तारः; तदुचितवचन-

षष्टिं पुत्रसहस्राणि स्वर्गलोकं गमिष्यति ।

निर्गच्छाश्वं महाभाग ! सङ्गृह्य पुरुषर्षभ ! ।

यज्ञं पैतामहं वीर ! निर्वर्तयितुमर्हसि ॥ २१ ॥

सुपर्णवचनं श्रुत्वा सोऽंशुमानतिवीर्यवान् ।

त्वरितं हयमादाय पुनरायान्-महातपाः ॥ २२ ॥

ततो राजानमासाद्य दीक्षितं रघुनन्दन ! ।

न्यवेदयद्-यथावृत्तं सुपर्णवचनं तथा ॥ २३ ॥

तच्छ्रुत्वा घोरसङ्काशं वाक्यमंशुमतो नृपः ।

यज्ञं निर्वर्तयामास यथाकल्पं यथाविधि ॥ २४ ॥

स्वपुरं त्वगमच्छ्रीमान् इष्टयज्ञो महीपतिः ।

षष्टिं सहस्राणि सागरान् स्वर्गलोकं गमिष्यति प्रापयिष्यतीत्यर्थः । 'नयिष्यति' इति पाठे नेष्यतीत्यर्थः । अनेन सगरपुत्राणां मन्वाद्युक्त-प्रायश्चित्ताविषयत्वं सूचितम् । तत्प्रायश्चित्तविषयाणामपि पापिनां पुद्गलस्य गङ्गाजलस्पर्शः सर्वपापप्रायश्चित्तमिति सूचितम् । अकृत-प्रायश्चित्तानामपि महापातकिनामैहिकायोग्यानां गङ्गाजल-स्पृष्टपुद्गलानां विनापि प्रायश्चित्तान्तरं तत्काल एव संसर्गादि-ऐहिकक्रियायोग्यत्वं च सूचितम् ॥ २० ॥

अश्वं गृहीत्वा निर्गच्छ । निर्वर्तयितुं समापयितुम् ॥ २१ ॥२२॥

वृत्तं पितृव्यवृत्तम् । तथा सुपर्णवचनं यथा तथा न्यवेदयत् ॥ २३ ॥ २४ ॥

गङ्गायास्त्वागमे राजा निश्चयं नाध्यगच्छत ॥ २५ ॥

अगत्वा निश्चयं राजा कालेन महता महान् ।

त्रिंशद्वर्षसहस्राणि राज्यं कृत्वा दिवं गतः ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सगरयज्ञ-

समाप्तौ सगरस्वर्गगमनं नाम एकचत्वारिंशः

सर्गः ॥ ४१ ॥

दृष्टवच इति बहुव्रीहिः ॥ २५ ॥

आगमे भूमावागमे निश्चयं उपायविमर्शं नाध्यगच्छदेति तद्भावः ॥ २६ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥

द्विचत्वारिंशः सर्गः ।



कालधर्मं गते राम ! सगरे प्रकृतीजनाः ।
राजानं रोचयामासुरंशुमन्तं सुधार्मिकम् ॥ १ ॥
स राजा सुमहानासीदंशुमान् रघुनन्दन !
तस्य पुत्रो महानासीद् दिलीप इति विश्रुतः ॥ २ ॥
तस्मै राज्यं समादिश्य दिलीपे रघुनन्दन ! ।
हिमवच्छिखरे रम्ये तपस्तेपे सुदारुणम् ॥ ३ ॥
द्वात्रिंशच्छतसाहस्रं वर्षाणि सुमहायशाः ।
तपोवनगतो राजा स्वर्गं लेभे तपोधनः * ॥ ४ ॥
दिलीपस्तु महातेजाः श्रुत्वा पैतामहं वधम् ।
दुःखोपहतया बुद्ध्या निश्चयं नाध्यगच्छत ॥ ५ ॥

कालधर्मो मृत्युः । प्रकृतिजनाः अमात्यवर्गाः । दीर्घः छान्दसः । रोचयामासुः न्यायप्राप्तत्वादेव ऐच्छन् ॥ १ ॥ २ ॥

दिलीपे दिलीपाय । तपस्तेपे पितृगतये गङ्गाया भूलोकावतारणाय इति शेषः ॥ ३ ॥ ४ ॥

पैतामहं वधं पितामहानां सागराणामपमृत्युम् ॥ ५ ॥

---

* "द्वात्रिंशतं सहस्राणि वर्षाणाममितद्युतिः ।
तपस्तप्त्वा महाघोरं स्वर्गं लेभे महामनाः ॥" इति ग० ।

कथं गङ्गावतरणं कथं तेषां जलक्रिया ।
तारयेयं कथं चैतान् इति चिन्तापरोऽभवत् ॥ ६ ॥
तस्य चिन्तयतो नित्यं धर्मेण विदितात्मनः ।
पुत्रो भगीरथो नाम जज्ञे परमधार्मिकः ॥ ७ ॥
दिलीपस्तु महातेजा यज्ञैर्बहुभिरिष्टवान् ।
त्रिंशद्वर्षसहस्राणि राजा राज्यमकारयत् ॥ ८ ॥
अगत्वा निश्चयं राजा तेषामुद्धरणं प्रति ।
व्याधिना नरशार्दूल ! कालधर्ममुपेयिवान् ॥ ९ ॥
इन्द्रलोकं गतो राजा स्वार्जितेनैव कर्मणा ।
राज्ये भगीरथं पुत्रम् अभिषिच्य नरर्षभः ॥ १० ॥
भगीरथस्तु राजर्षिर्धार्मिको रघुनन्दन ! ।
अनपत्यो महाराजः प्रजाकामः स च प्रजाः ॥ ११ ॥
मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ।

निश्चयानधिगममभिनयति,—कथम् इति ॥ ६ ॥
धर्मेण विदितेति धर्मेण प्रसिद्ध इत्यर्थः ॥ ७ ॥
अकारयत् कृतवान् ॥ ८ ॥
व्याधिना पितृणामुद्धरणाभावजन्यदुःखजेन तद्दिलीपवंश्यो रघुपुत्रको दिलीपः, कालिदासोक्तोऽन्य एवेति बोध्यम् ॥ ९ ॥ १० ॥
स च प्रजा इत्यस्य मन्त्रिषु आधायेत्युत्तरेणान्वयः ॥ ११ ॥

तपो दीर्घं समातिष्ठद् गोकर्णे रघुनन्दन ! ॥ १२ ॥
ऊर्द्ध्वबाहुः पञ्चतपा मासाहारो जितेन्द्रियः ।
तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः ॥ १३ ॥
अतीतानि महाबाहो ! तस्य राज्ञो महात्मनः ।
सुप्रीतो भगवान् ब्रह्मा प्रजानां प्रभुरीश्वरः ॥ १४ ॥
ततः सुरगणैः सार्द्धमुपागम्य पितामहः ।
भगीरथं महात्मानं तप्यमानमथाब्रवीत् ॥ १५ ॥
भगीरथ ! महाराज ! प्रीतस्तेऽहं जनाधिप ! ।
तपसा च सुतप्तेन वरं वरय सुव्रत ! ॥ १६ ॥
तमुवाच महातेजाः सर्वलोकपितामहम् ।
भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः ॥ १७ ॥
यदि मे भगवान् प्रीतो यद्यस्ति तपसः फलम् ।

प्रजास्वराज्यञ्च मन्त्रिषु आधाय गङ्गावतरणेच्छुस्तप आतिष्ठत्। गोकर्णो हिमवत्पादविशेषः। दक्षिणा दिक् तीर्थविशेषो वा ॥ १२ ॥

पञ्चतपाः पञ्चाग्निमध्ये तपो यस्य। मासाहारः मासे गते आहारो यस्य। वर्षसहस्राणि अतीतानीत्यन्वयः ॥ १३ ॥

तस्य राज्ञः सुप्रीत इत्यन्वयः ॥ १४ ॥ १५ ॥

तपसा चेति चस्त्वर्थे ॥ १६ ॥ १७ ॥

सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः ॥ १८ ॥
गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम्।
स्वर्गं गच्छेयुरत्यन्तं सर्वे च प्रपितामहाः ॥ १९ ॥
देव ! याचे ह सन्तत्यै नावसीदेत् कुलञ्च नः।
इक्ष्वाकूणां कुले देव ! एष मेऽस्तु वरः परः ॥ २० ॥
उक्तवाक्यं तु राजानं सर्वलोकपितामहः।
प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम् ॥ २१ ॥
मनोरथो महानेष भगीरथ महारथ ! ।

यद्यल्लोप्यादि असन्दिग्धे सन्दिग्धवचनं वेदाश्चेत् प्रमाणं स्युरिति मत्सचिवं स्वर्गमात्रेण स्वर्गतिसाधनं सलिलम् ॥ १८ ॥

अभीष्टोत्तमुखकसलिलप्राप्तिं दर्शयति,—गङ्गाया इति। एषां भस्मनि गङ्गाया सलिलेन क्लिन्ने सति एते अत्यन्तम् अक्षय्यं यथा भवति तथा स्वर्गं गच्छेयुर्नान्यथेत्यर्थः ॥ १९ ॥

इक्ष्वाकूणां कुले जातस्य मम सन्ततिर्देया यथा नः कुलं नावसीदेत्। सन्तत्यै इति चतुर्थी प्रथमार्थे। एष परो वरः द्वितीयवर इत्यर्थः। परे तु सन्तत्यै तदर्थं नः कुलं नावसीदेदिति च याचे मत्कुलेऽसन्ततिः कोऽपि माभूद् इत्यर्थः। उपसंहरति,—इक्ष्वाकूणामिति। तत्कुले जातस्य एष एव परो वरोऽस्तु नातोऽधिकं द्वितीयं वरान्तरं याचे इत्यर्थः। एतेन पूर्वपरोपकारिता भगीरथस्य दर्शितेत्याहुः ॥ २० ॥ २१ ॥

एवं भवतु भद्रं ते इक्ष्वाकुकुलवर्द्धन ! ॥ २२ ॥
इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता ।
तां वै धारयितुं राजन् ! हरस्तत्र नियुज्यताम् ॥ २३ ॥
गङ्गायाः पतनं राजन् ! पृथिवी न सहिष्यते ।
तां वै धारयितुं राजन् ! नान्यं पश्यामि शूलिनः ॥ २४ ॥
तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत् ।
जगाम त्रिदिवं देवैः सह सर्वैर्मरुद्गणैः ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे गङ्गावतरणे भगीरथाय ब्रह्मणो वरदानं नाम द्विचत्वारिंशः सर्गः ॥ ४२ ॥

मनोरथः तावक इति शेषः ॥ २२ ॥
स्वसमीपे स्थितत्वादियमिति निर्देशः ॥ २३ ॥
हरनियोगे हेतुमाह,—गङ्गाया इति । तां गङ्गाम् ॥ २४ ॥
गङ्गामाभाष्य राजानं यथाकालमनुग्रहाय इत्युक्त्वा देवैराजागजैः मरुद्भिः कर्मदेवैः ॥ २५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

त्रिचत्वारिंशः सर्गः ।



देवदेवे गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीडिताम् ।
कृत्वा वसुमतीं राम ! वत्सरं समुपासत ॥ १ ॥
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः ।
उमापतिः पशुपती-राजानमिदमब्रवीत् ॥ २ ॥
प्रीतस्तेऽहं नरश्रेष्ठ ! करिष्यामि तव प्रियम् ।
शिरसा धारयिष्यामि शैलराजसुतामहम् ॥ ३ ॥
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ।
तदा सातिमहद् रूपं कृत्वा वेगञ्च दुःसहम् ॥ ४ ॥
आकाशादपतद् राम ! शिवे शिवशिरस्युत ।
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा ॥ ५ ॥

देवदेवे आजानजानामपि देवानां देवे पूज्ये अङ्गुष्ठाग्रेण निपीडितां समुपासनेत्यार्षं वत्सरं समुपास्ते इत्यर्थः उमापतिम् इति शेषः ॥ १ ॥ २ ॥ ३ ॥

तदा सातीति । ईश्वरेण धारणाङ्गीकारे सति गर्वादित्यर्थः ॥ ४ ॥

शिवे शोभने । तादृशरूपमास्थाय, —अचिन्तयदित्यादि ॥ ५ ॥

विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम्।
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः॥ ६ ॥
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि॥ ७ ॥
हिमवत्प्रतिमे राम! जटामण्डलगह्वरे।
सा कथञ्चिन्-महीं गन्तुं नाशक्नोद् यत्नमास्थिता॥ ८ ॥
नैव सा निर्गमं लेभे जटामण्डलमन्ततः।
तत्रैवाबभ्रमद् देवी संवत्सरगणान् बहून्॥ ९ ॥

तस्यावलेपनमिति सन्धिरार्षः। अवलेपनं तस्यापि स्रोतसा अभिभवनचिन्तारूपं गर्वम्॥ ६ ॥

तिरोभावयितुं जटामण्डले तिरोधानेन अभिभूतां कर्तुम्॥७॥

जटामण्डलेन गह्वरे दुष्प्रवेशे निर्गमे यत्नमास्थितापि महीं गन्तुं नाशक्नोदित्यन्वयः॥ ८ ॥

नैवेति। जटामण्डलं भ्रान्त्वा प्रान्तमागतापि अन्ततः तत्प्रान्तभागतोऽपि निर्गमं न लेभे प्रान्तभागेऽपि तन्मध्यत्वात् भ्रमस्य मायया भ्रमवतीत्वादृगात्। यद्यपि शिवस्यैव मायया गङ्गाजलरूपमिति पुराणेतिहासादिषु प्रसिद्धम्। तस्य चाहं ममेत्यभिमानहीनस्यायमहङ्कारः शिवस्य तादृशस्य तत्पराभवाहङ्कारोऽत्यन्तमनुचितस्तथा तादृश्या गङ्गायाः प्रान्तभागे मध्यत्वभ्रमोऽप्यत्यन्तमनुचितः। अत एवोक्तमन्यत्र,—

तामपश्यत् पुनस्तत्र तपः परममास्थितः ।
स तेन तोषितश्चासीद् अत्यन्तं रघुनन्दन ! ॥ १० ॥
विससर्ज ततो गङ्गां हरो विन्दुसरः प्रति ।
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥ ११ ॥
ह्लादिनी पावनी चैव नलिनी च तथैव च ।
तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः ॥ १२ ॥
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी ।
तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु दिशं शुभाः ॥ १३ ॥
सप्तमी चान्वगात् तासां भगीरथरथं तदा ।

"परमात्मा शिवो ह्यन्यस्तस्माद् अन्या च जाह्नवी ।
इति यः सेवते गङ्गां न स मोक्षस्य भाजनम् ॥"

इति। तथापि लीलामात्रत्वाददोषः। शिवविष्णोः परस्परमुपास्योपासकभाववदिति बोध्यम्। तर्हि किं ज्ञातवती तत्राह,—तत्रैवेति। अबभ्रमत्। आर्षत्वात् सन्धिरत्वं न ॥ ९ ॥

अथ तां जटाटवी-तिरोहितां गङ्गां भगीरथः अपश्यत्। पुनश्च तत्र, तत्प्राप्तिविषये हरमुद्दिश्य परमं तप आस्थितः। स हरः तेन तपसा ॥ १० ॥

ततस्तुष्टः सन् हरः विन्दुसरः प्रति हिमवत्स्थितब्रह्मनिर्मितसरोविशेषं प्रति गङ्गां विससर्जेत्यन्वयः ॥ ११ ॥ १२ ॥ १३ ॥

भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ १४ ॥
प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजेत् ।
गगनाच्छङ्करशिरस्ततो धरणिमागता ॥ १५ ॥
असर्पत जलं तत्र तीव्रशब्दपुरस्कृतम् ।
मत्स्यकच्छपसङ्घैश्च शिशुमारगणैस्तथा ॥ १६ ॥
पतद्भिः पतितैश्चैव व्यरोचत वसुन्धरा ।
ततो देवर्षिगन्धर्वा यक्षसिद्धगणास्तथा ॥ १७ ॥
व्यलोकयन्त ते तत्र गगनाद् गां गतां तदा ।
विमानैर्नगराकारैर्हयैर्गजवरैस्तदा ॥ १८ ॥
पारिप्लवगताश्चापि देवतास्तत्र विष्ठिताः ।
तदद्भुततमिमं लोके गङ्गावतरमुत्तमम् ॥ १९ ॥

एतेन भगीरथतपोहेतुकं त्रिपथगागमनमुक्तम् अथ चरित-
प्रश्नोत्तरमाह,—भगीरथोऽपीति ॥ १४ ॥

अनुव्रजदित्यडभाव आर्षः ॥ १५ ॥

तीव्रशब्दपुरस्कृतमित्यत्र हेतुर्गगनाद् इत्यादिना उक्तः शिशु-
मारः कप्याकारो जलचरविशेषः ॥ १६ ॥ १७ ॥

गगनाद् गां गतां हरजटाकाशाद् भुवमित्यर्थः । विमानैरित्या-
देरुत्तरत्र इति शेषः ॥ १८ ॥

पारिप्लवगताः सम्भ्रमं गताः सम्भ्रमं प्राप्ता इत्यर्थः इत्येके ।

दिदृक्षवो देवगणाः समीयुरमितौजसः ।
सम्पतद्भिः सुरगणैस्तेषाञ्चाभरणौजसा ॥ २० ॥
शतादित्यमिवाभाति गगनं गततोयदम् ।
शिशुमारोरगगणैर्मीनैरपि च चञ्चलैः ॥ २१ ॥
विद्युद्भिरिव विक्षिप्तैराकाशमभवत् तदा ।
पाण्डुरैः सलिलोत्पीडैः कीर्य्यमाणैः सहस्रधा ॥ २२ ॥
शारदाभ्रैरिवाकीर्णं गगनं हंससंप्लवैः ।
क्वचिद् द्रुततरं याति कुटिलं क्वचिदायतम् ॥ २३ ॥
विनतं क्वचिदुद्भूतं क्वचिद् याति शनैः शनैः ।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः ॥ २४ ॥

यानिश्चवो यानभेदशिविकादिरूपः । शिबिकादियानस्था इत्यर्थः । इत्यन्ये ॥ १९ ॥

देवगणा वस्वादयः । सम्पतद्भिः आगच्छद्भिः ॥ २० ॥

तन्मूर्च्छिकामुपमामाह,—शतादित्यमिवेति ॥ २१ ॥

विक्षिप्तैः निःसृतैः । विद्युच्छब्दः पुंलिङ्गोऽपि एतत्प्रामाण्यात् सलिलोत्पीडैः फेनैः सहस्रधाकरणं वायावुपाधितः आकाशमभवत् व्याप्तमिति शेषः ॥ २२ ॥

शारदाभ्रैरिव हंससंप्लवैः हंससमूहैः सङ्कीर्णं गगनम् अभवदिति पूर्व्वेणान्वयः । आयतं विस्तृतं प्रवाहम् ॥ २३ ॥

विनतम् अगाधदेशे सङ्कुचितम् । उद्भूतं पाषाणादियोगात् ॥२४॥

मुहुरूर्द्ध्वपथं गत्वा पपात वसुधां पुनः ॥ २५ ॥
तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः ।
व्यरोचत तदा तोयं निर्मलं गतकल्मषम् ।
तत्रर्षिगणगन्धर्वा वसुधातलवासिनः ॥ २६ ॥
भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः ।
शापात् प्रपतिता ये च गगनाद् वसुधातलम् ॥ २७ ॥
कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः ।
धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः ॥ २८ ॥
पुनराकाशमाविश्य स्वान् लोकान् प्रतिपेदिरे ।
मुमुदे मुदितो लोकस्तेन तोयेन भास्वता ॥ २९ ॥

मुहुरिति । ऊर्द्ध्वपथगमने सलिलयोरभ्याघातो निमित्तं शङ्कर-शिरसि भ्रष्टम् ॥ २५ ॥

निर्मलं नैर्मल्ये प्रागुक्तम् अद्वयं हेतुः गतकल्मषं स्वजलस्पर्शवतां प्राणिनां नाशितपापम् ॥ २६ ॥

भवाङ्गं शिवमूर्द्धा । पस्पृशुः सस्नुः । न केवलं पापसंहारमात्रं गङ्गायाः कृत्यम् अपि तु पुण्यलोकप्रापणमपीत्याह,—शापादि-त्यादि । गगनात् उर्द्ध्वस्थानात् ॥ २७ ॥

गतकल्मषाः मुक्तशापाः अनेन ब्रह्मशापपरिहारोऽपि गङ्गा-स्नानफलमिति कृतपापानां तज्जलस्पर्श तत्पापनाशपूर्वकं स्वर्गप्राप्तिः कैमुतिकन्यायेनैव सिद्धेति बोध्यम् ॥ २८ ॥

कृताभिषेको गङ्गायां बभूव गतकल्मषः ।
भगीरथो हि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ ३० ॥
प्रायादग्रे महाराजस्तं गङ्गा पृष्ठतोऽन्वगात् ।
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः ॥ ३१ ॥
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः ।
सर्पाश्चाप्सरसो राम ! भगीरथरथानुगाः ॥ ३२ ॥
गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये ।
यतो भगीरथो राजा ततो गङ्गा यशस्विनी ॥ ३३ ॥
जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी ।
ततो हि यजमानस्य जह्नोरद्भुतकर्मणः ॥ ३४ ॥
गङ्गा संप्लावयामास यज्ञवाटं महात्मनः ।
तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव ! ॥ ३५ ॥
अपिबत् तु जलं सर्वं गङ्गायाः परमाद्भुतम् ।

मुदितः दर्शनमात्रेण मुमुदे स्नानपानादिना ॥२९॥३०॥३१॥३२॥

भगीरथरथानुगाः सन्तो गङ्गामन्वगमन्नित्यन्वयः । यतः येन मार्गेण ॥ ३३ ॥

अद्भुतकर्मणः वक्ष्यमाणगङ्गापानरूपाश्चर्याभिप्रायमेतत् ॥ ३४ ॥

तस्यावलेपनं तस्या अवलेपनं गर्वमित्यर्थः ॥ ३५ ॥

ततो देवाः सगन्धर्वाः ऋषयश्च सुविस्मिताः ॥ ३६ ॥
पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम् ।
गङ्गां चापि नयन्ति स्म दुहितृत्वे महात्मनः ॥ ३७ ॥
ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् प्रभुः ।
तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च ॥ ३८ ॥
जगाम च पुनर्गङ्गा भगीरथरथानुगा ।
सागरं चापि संप्राप्ता सा सरित्प्रवरा तदा ॥ ३९ ॥
रसातलमुपागच्छत् सिध्यर्थं तस्य कर्मणः ।
भगीरथोऽपि राजर्षिर्गङ्गामादाय यत्नतः । ४० ॥
पितामहान् भस्मकृतानपश्यद् गतचेतनः ।

अपिबत् अगस्त्यः समुद्रजलमिव योगप्रभावेनेति भावः। परमाद्भुतं तदभवत् लोकस्येति शेषः ॥ ३६ ॥

पूजयन्ति स्तोत्रादिनेति शेषः। अनुनयन्तीति पाठे शैलराजदुहितुः कथमन्यदुहितृत्वमिति विमतिवारणाय गङ्गानुनयः ॥३७॥

तुष्टः गङ्गायाः स्वदुहितृत्वप्रापणात् तस्मात्। यतः पीतां पुनरसृजत् तस्मादित्यर्थः ॥ ३८ ॥

सागरं सगरसुतखातं संप्राप्ता तत्पूरणायेति शेषः। सागरन्तु तस्यागस्त्येन पानोत्तरमित्यन्यत्र स्फुटम् ॥ ३९ ॥

तस्य कर्मणः सिध्यर्थं भगीरथस्य स्ववंश्योद्धारकर्मणः सिध्यर्थं प्रयत्नतः प्रागुक्तयत्नैः ॥ ४० ॥

अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम् ॥ ४१ ॥
प्लावयत् पूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम ! ॥ ४२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सगर-
पुत्राणां स्वर्गमनं नाम त्रिचत्वारिंशः
सर्गः ॥ ४३ ॥

भस्मसात्कृतान् कपिलकोपाग्निना भस्मभावं प्राप्तान् ॥ ४१ ॥
प्लावयत् सेचयति स्म अतएव पूतपाप्मानः ॥ ४२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥

चतुश्चत्वारिंशः सर्गः ।



स गत्वा सागरं राजा गङ्गयानुगतस्तदा ।
प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः ॥ १ ॥
भस्मन्यथाप्लुते राम ! गङ्गायाः सलिलेन वै ।
सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् ॥ २ ॥
तारिता नरशार्दूल ! दिवं याताश्च देववत् ।
षष्टिः पुत्रसहस्राणि सगरस्य महात्मनः ॥ ३ ॥
सागरस्य जलं लोके यावत् स्थास्यति पार्थिव ! ।
सगरस्यात्मजाः सर्वे दिवि स्थास्यन्ति देववत् ॥ ४ ॥
इयञ्च दुहिता ज्येष्ठा तव गङ्गा भविष्यति ।

उक्तमेव विस्तरेणाह,—स गत्वेति। भस्मसात्कृताः कार्त्स्न्येन भस्म कृताः भूमेस्तलं पातालम् ॥ १ ॥ २ ॥

तारिताः प्रेतत्वात् देववत् स्वर्गं प्राप्ताश्च । अनेन न प्रेतत्ववि-मुक्तिस्वर्गप्राप्ती भस्मनोऽपि गङ्गासम्बन्धे परं किमुतास्थिप्रक्षेपादे-रित्युक्तम् ॥ ३ ॥

यावत् सागरस्य जलं स्थास्यति, तावद् दिवि स्थास्यन्तीत्यर्थः ।

त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता ॥ ५ ॥
गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च ।
त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता ॥ ६ ॥
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ! ।
कुरुष्व सलिलं राजन्! प्रतिज्ञामपवर्जय ॥ ७ ॥
पूर्वकेण हि ते राजन्! तेनातियशसा तदा ।
धर्मिणां प्रवरेणाथ नैष प्राप्तो मनोरथः ॥ ८ ॥
तथैवांशुमता वत्स ! लोकेऽप्रतिमतेजसा ।
गङ्गां प्रार्थयता नेतुं प्रतिज्ञा नापवर्जिता ॥ ९ ॥

तन्निमित्तमपि तया गङ्गया तत्खातस्य सागरस्य पूरणमिति भावः ॥४॥५॥

त्वत्कृतनामादिति विश्रुतत्वमेव दर्शयति,—गङ्गेत्यादि । त्रिपथगेति नाम्नोऽन्वर्थत्वं दर्शयति,—त्रीनित्यादि । अनेन कथं गङ्गा त्रिपथगा इत्यस्य उत्तरं संवृतम् ॥ ६ ॥

कुरुष्वेति । गङ्गाजलसेकतो जातप्रायश्चित्तत्वात् सलिलदान-योग्यतासंपत्तेः प्रतिज्ञां गङ्गानयनप्रदानेन सागरोद्धारये इत्येवं-रूपां [illegible]दुपदिष्टाम् अपवर्जय समाप्तां कुरु इत्यन्वयः ॥ ७ ॥

पूर्वकेण सगरेण [illegible] गङ्गानयनरूपः । पूर्वकेणेति [illegible] [illegible] कृता [illegible] ॥

गङ्गां नेतुं भूलोके प्रापयितुं प्रार्थयता प्रतिज्ञा न अपवर्जिता न फलपर्यवसायिनी कृता ॥ ९ ॥

राजर्षिणा गुणवता महर्षिसमतेजसा।
मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च ॥ १० ॥
दिलीपेन महाभाग ! तव पित्रातितेजसा।
पुनर्न शकिता नेतुं गङ्गां प्रार्थयतानघ ! ॥ ११ ॥
सा त्वया समतिक्रान्ता प्रतिज्ञा पुरुषर्षभ ! ।
प्राप्तोऽसि परमं लोके यशः परमसम्मतम् ॥ १२ ॥
तच्च गङ्गावतरणं त्वया कृतमरिन्दम ! ।
अनेन च भवान् प्राप्तो धर्मस्यायतनं महत् ॥ १३ ॥
प्लावयस्व त्वमात्मानं नरोत्तम ! सदोचिते।
सलिले पुरुषश्रेष्ठ ! शुचिः पुण्यफलो भव ॥ १४ ॥

मत्तुल्येति ब्रह्मतुल्येत्यर्थः ॥ १० ॥

गङ्गां नेतुं प्रार्थयता सा गङ्गा नेतुं न शकितेत्यर्थः। यत्तु गङ्गामानेतुं न शकिता न च विचारिता प्रतिज्ञेति शेषः। चिन्ताविषयमपि न प्रापितेत्यर्थः। इति तत्प्रार्थयतेति पदस्वरसविरोधाच्चिन्त्यम् ॥ ११ ॥

समतिक्रान्ता निस्तीर्णा परमसम्मतं परमम् उत्कृष्टं च तत् सम्मतं सर्वलोकसम्मतमित्यर्थः ॥ १२ ॥

धर्मस्यायतनं धर्मप्राप्यस्थानं महत् ब्रह्मलोकरूपम् ॥ १३ ॥

यथास्या ब्रह्मलोकप्रापकत्वं तदाह,—प्लावयस्वेति। आत्मानं

पितामहानां सर्व्वेषां कुरुष्व सलिलक्रियाम् ।
स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप ! ॥ १५ ॥
इत्येवमुक्त्वा देवेशः सर्व्वलोकपितामहः ।
यथागतं तथागच्छद् देवलोकं महायशाः ॥ १६ ॥
भगीरथस्तु राजर्षिः कृत्वा सलिलमुत्तमम् ।
यथाक्रमं यथान्यायं सागराणां महायशाः ॥ १७ ॥
कृतोदकः शुची राजा स्वपुरं प्रविवेश ह ।
समृद्धार्थो नरश्रेष्ठः स्वराज्यं प्रशशास ह ॥ १८ ॥

स्वदेहं सदोचित सिंहकर्कटमध्येऽपि स्नानादिव्यवहारोचिते भूप्रवहनदीनामेव तत्काले भौमत्वमूलरजःसम्बन्धात् स्नानाद्यनर्हत्वं पुण्यफल इति मत्वर्थीयाजन्ते बहुव्रीहिर्वा । अनेन स्नानमात्रेण गङ्गा ब्रह्मलोकप्राप्तिकरीति सूचितम् ॥ १४ ॥

सागराणां जातप्रायश्चित्तत्वसन्देहापनुत्त्यै गङ्गाजलसम्बन्धस्य सर्वपापप्रायश्चित्तत्वबोधनाय च पुनस्तेषां सलिलं कार्य्यमित्याह,—पितामहानामित्यादि । लोकं गम्यतां कृतोदकक्रियेण स्वपुरमिति शेषः । अयं नियोगो राजधर्मपरिपालनाय ॥ १५ ॥

यथा आगतमिति छेदः देवलोकं ब्रह्मलोकम् ॥ १६ ॥

यथाक्रमं ज्येष्ठक्रमेण यथान्यायं सूत्रक्रमेण उत्तमम् उत्तमलोकप्रापकम् ॥ १७ ॥

कृतोदक इति पश्चेषामपीति शेषः ॥ १८ ॥

प्रममोद च लोकस्तं नृपमासाद्य राघव ! ।
नष्टशोकः समृद्धार्थो बभूव विगतज्वरः ॥ १९ ॥
एष ते राम ! गङ्गाया विस्तरोऽभिहितो मया ।
स्वस्ति प्राप्नुहि भद्रं ते सन्ध्याकालोऽतिवर्त्तते ॥ २० ॥
धन्यं यशस्यमायुष्यं पुण्यं स्वर्ग्यमथापि च ।
यः श्रावयति विप्रेषु क्षत्त्रियेष्वितरेषु च ॥ २१ ॥
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च ।
इदमाख्यानमायुष्यं गङ्गावतरणं शुभम् ॥ २२ ॥
यः शृणोति च काकुत्स्थ ! सर्व्वान् कामानवाप्नुयात् ।
सर्वे पापा प्रणश्यन्ति आयुः कीर्त्तिश्च वर्द्धते ॥ २३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे सागराणां सलिलक्रिया नाम चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

नष्टशोकः नष्टतद्वियोगजशोकः । विगतज्वरः कथमस्मत्तातानां भविष्यतीति चिन्ताचिन्तः ॥ १९ ॥

उपसंहरति,—एष इति स्वस्तिभद्रयोः तत्प्रीत्यादरसूचनार्थं ग्रहणम् ॥ २० ॥

आख्यानश्रवणफलमाह,—धन्यमिति ॥ २१ ॥ २२ ॥ २३ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

पञ्चचत्वारिंशः सर्गः ।



विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विस्मयं परमं गत्वा विश्वामित्रमथाब्रवीत् ॥ १ ॥
अत्यद्भुतमिदं ब्रह्मन्! कथितं परमं त्वया ।
गङ्गावतरणं पुण्यं सागरस्यापि पूरणम् ॥ २ ॥
क्षणभूतेव नौ रात्रिः संवृत्तेयं परन्तप! ।
इमां चिन्तयतः सर्व्वां निखिलेन कथां तव ॥ ३ ॥
तस्य सा शर्वरी सर्वा मम सौमित्रिणा सह ।
जगाम चिन्तयानस्य विश्वामित्रकथां शुभाम् ॥ ४ ॥
ततः प्रभाते विमले विश्वामित्रं तपोधनम् ।
उवाच राघवो वाक्यं कृताह्निकमरिन्दमः ॥ ५ ॥

अब्रवीत् राघवस्ते इति शेषः ॥ १ ॥

पूरणं गङ्गयेति शेषः ॥ २ ॥

इमां तव कथां त्वदुक्तां कथां चिन्तयतो मम रामस्य रात्रिः क्षणभूतेव संवृत्ता अतीता । एवमाश्चर्य्यभूता त्वदुक्ता गङ्गाकथेति भावः ॥ ३ ॥

विश्वामित्रेति सम्बोधनम् उक्तस्य एव अर्थस्य आदरातिशय-बोधनाय पुनरुपादानम् ॥ ४ ॥ ५ ॥

गता भगवती रात्रिः श्रोतव्यं परमद्भुतम्।
तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम्॥ ६॥
नौरेषा हि सुखास्तीर्णा ऋषीणां पुण्यकर्मणाम्।
भगवन्तमिह प्राप्तं ज्ञात्वा त्वरितमागता॥ ७॥
तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः।
सन्तारं कारयामास सर्षिसङ्घस्य कौशिकः॥ ८॥
उत्तरं तीरमासाद्य संपूज्यर्षिगणं ततः।
गङ्गाकूले निविष्टास्ते विशालां ददृशुः पुरीम्॥ ९॥
ततो मुनिवरस्तूर्णं जगाम सहराघवः।
विशालां नगरीं रम्यां दिव्यां स्वर्गोपमां तदा॥ १०॥
अथ रामो महाप्राज्ञो विश्वामित्रं महामुनिम्।
पप्रच्छ प्राञ्जलिर्भूत्वा विशालामुत्तमां पुरीम्॥ ११॥

भगवती गङ्गाकथाश्रवणात् पूज्या ॥६॥
सुखास्तीर्णा सुखं शुभम् आस्तीर्णं यस्यां सा। त्वरितमागता सर्वस्तव सेवार्थमित्याशयः॥ ७॥
कारयामास नाविकैरिति शेषः॥ ८॥
संपूज्य ऋषिगणं तत्तीरस्थमिति शेषः॥ ९॥
विशालां जगाम पूर्वदृष्टामिति शेषः॥ १०॥
विशालां परिपप्रच्छ विशालाविषये प्रश्नं कृतवानित्यर्थः॥ ११॥

कतमो राजवंशोऽयं विशालायां महामुने ! ।
श्रोतुमिच्छामि भद्रं ते परं कौतूहलं हि मे ॥ १२ ॥
तस्य तद् वचनं श्रुत्वा रामस्य मुनिपुङ्गवः ।
आख्यातुं तत् समारेभे विशालायाः पुरातनम् ॥ १३ ॥
श्रूयतां राम ! शक्रस्य कथां कथयतः श्रुताम् ।
अस्मिन् देशे हि यद् वृत्तं शृणु तत्त्वेन राघव ! ॥ १४ ॥
पूर्वं कृतयुगे राम ! दितेः पुत्रा महाबलाः ।
अदितेश्च महाभागा वीर्य्यवन्तः सुधार्मिकाः ॥ १५ ॥
ततस्तेषां नरव्याघ्र ! बुद्धिरासीन्-महात्मनाम् ।
अमरा विजराश्चैव कथं स्यामो निरामयाः ॥ १६ ॥

विशालायां सम्प्रतिवर्त्तत इति शेषः ॥ १२ ॥

विशालायाः पुरातनमिति पाठः । पुरातनं तत्पुरीनिर्मितेः प्राक्तनं वृत्तान्तम् । विशालस्येति पाठे तन्नगरीनिर्माता राजा विशालो नाम । यद्वा विशालस्य विशाला नगर्य्यधिष्ठानदेशस्येत्यर्थः ॥ १३ ॥

शक्रस्य कथां विशालावैभवप्रतिपादिकां कथां कथयतः सकाशात् मया श्रुताम् अस्मिन् देशे विशालानगर्य्यधिष्ठानदेशे यद्वृत्तं पुरातनं तद्विषयां तत्त्वेन शृण्विति योजना ॥ १४ ॥

सुधार्मिका इत्यादि पुत्रविशेषणम् आसन्निति शेषः ॥ १५ ॥

अमराः मरणरहिताः । विजरा जरारहिताः । निरामयाः रोगरहिताः ॥ १६ ॥

तेषां चिन्तयतां तत्र बुद्धिरासीद् विपश्चिताम् ।
क्षीरोदमथनं कृत्वा रसं प्राप्स्याम तत्र वै ॥ १७ ॥
ततो निश्चित्य मथनं योक्त्रं कृत्वा च वासुकिम् ।
मन्थानं मन्दरं कृत्वा ममन्थुरमितौजसः ॥ १८ ॥
अथ वर्षसहस्रेण योक्त्रसर्पशिरांसि च ।
वमन्तोऽतिविषं तत्र ददंशुर्दशनैः शिलाः ॥ १९ ॥
उत्पपाताग्निसङ्काशं हालाहलमहाविषम् ।
तेन दग्धं जगत् सर्वं सदेवासुरमानुषम् ॥ २० ॥
अथ देवा महादेवं शङ्करं शरणार्थिनः ।
जग्मुः पशुपतिं रुद्रं त्राहि त्राहीति तुष्टुवुः ॥ २१ ॥
एवमुक्तस्ततो देवैर्देवदेवेश्वरः प्रभुः ।
प्रादुरासीत् ततोऽत्रैव शङ्खचक्रधरो हरिः ॥ २२ ॥

रसम् अमृतरूपं रसायनम् ॥ १७ ॥

योक्त्रं मन्थनरज्जुम् ॥ १८ ॥

योक्त्रसर्पः मन्थनरज्जुभूतः सर्पः । वमन्त इति पुंस्त्वमार्षम् । अति अतिप्रशस्तं विषम् ॥ १९ ॥

उत्पपातेति । तत इत्यादिः शिलादंशनादित्यर्थः । दष्टशिलाखण्डा एव महाविषरूपं भूत्वा उत्पपात ॥ २० ॥ २१ ॥

प्रभुर्महादेवः । ततः महादेवप्रादुर्भावानन्तरम् ॥ २२ ॥

उवाच न स्मितं कृत्वा रुद्रं शूलधरं हरिः ।

दैवतैर्मथ्यमाने तु यत् पूर्वं समुपस्थितम् ॥ २३ ॥

तत् त्वदीयं सुरश्रेष्ठ ! सुराणामग्रतो हि यत् ।

अग्रपूजामिह स्थित्वा गृहाणेदं विषं प्रभो ! ॥ २४ ॥

इत्युक्त्वा च सुरश्रेष्ठस्तत्रैवान्तरधीयत ।

देवतानां भयं दृष्ट्वा श्रुत्वा वाक्यं तु शार्ङ्गिणः ॥ २५ ॥

हालाहलं विषं घोरं संजग्राहामृतोपमम् ।

देवान् विसृज्य देवेशो जगाम भगवान् हरः ॥ २६ ॥

ततो देवाः सुराः सर्वे ममन्थूरघुनन्दन ! ।

प्रविवेशाथ पातालं मन्थानः पर्वतोत्तमः ॥ २७ ॥

ततो देवाः सगन्धर्वास्तुष्टुवुर्मधुसूदनम् ।

त्वं गतिः सर्वभूतानां विशेषेण दिवौकसाम् ॥ २८ ॥

स्मितं कृत्वा छलेन विषदानात् स्मितम् ॥ २३ ॥

यत् यतो भवान् सुराणामग्रतः तेषां मध्ये श्रेष्ठ इत्यर्थः ॥ २४ ॥

सुरश्रेष्ठः विष्णुः ॥ २५ ॥

अमृतोपमं यथा भवति तथा संजग्राहेत्यन्वयः । पूर्वं देवेषु मथनसाहाय्यतया स्थितोऽपि विषपानानन्तरं सन्तोष्य तांस्त्यक्त्वा जगामामृतकुम्भमिति शेषः ॥ २६ ॥

मन्थानः पर्वतोत्तमः मन्दरः ॥ २७ ॥ २८ ॥

पालयास्मान् महाबाहो ! गिरिमुद्धर्तुमर्हसि ।
इति श्रुत्वा हृषीकेशः कामठं रूपमास्थितः ॥ २९ ॥
पर्वतं पृष्ठतः कृत्वा शिश्ये तत्रोदधौ हरिः ।
पर्वताग्रं तु लोकात्मा हस्तेनाक्रम्य केशवः ॥ ३० ॥
देवानां मध्यतः स्थित्वा ममन्थ पुरुषोत्तमः ।
अथ वर्षसहस्रेण आयुर्वेदमयः पुमान् ॥ ३१ ॥
उदतिष्ठत् सुधर्मात्मा सदण्डः सकमण्डलुः ।
अथ धन्वन्तरिर्नाम अप्सराश्च सुवर्चसः ॥ ३२ ॥
अप्सु निर्मथनादेव रसात् तस्माद् वरस्त्रियः ।
उत्पेतुर्मनुजश्रेष्ठ ! तस्मादप्सरसोऽभवन् ॥ ३३ ॥
षष्टिः कोट्योऽभवन् तासामप्सराणां सुवर्चसाम् ।
असंख्येयास्तु काकुत्स्थ ! यास्तासां परिचारिकाः ॥ ३४ ॥

कामठं काच्छपम् ॥ २९ ॥

शिश्ये स्थितवान् । जलेशय इत्यादौ स्थित्यर्थस्य शेतेर्दर्शनात् ॥ ३० ॥

ममन्थ पुरुषोत्तमः, अनेन शक्तिवैचित्र्यं प्रकटीकृतम् ॥ ३१ ॥

धन्वन्तरिरुदतिष्ठदित्यन्वयः । अप्सर इत्यार्षम् । उदतिष्ठन् इत्यनुकर्षः ॥ ३२ ॥

अप्सु क्षीरसमुद्रे । तस्मात् क्षीरोदसारभूतादित्यर्थः ॥ ३३ ॥

न ताः स्म प्रतिगृह्णन्ति सर्वे ते देवदानवाः ।
अप्रतिग्रहणादेव ता वै साधारणाः स्मृताः ॥ ३५ ॥
वरुणस्य ततः कन्या वारुणी रघुनन्दन ! ।
उत्पपात महाभागा मार्गमाणा परिग्रहम् ॥ ३६ ॥
दितेः पुत्रा न तां राम ! जगृहुर्वरुणात्मजाम् ।
अदितेस्तु सुता वीर ! जगृहुस्तामनिन्दिताम् ॥ ३७ ॥
असुरास्तेन दैतेयाः सुरास्तेनादितेः सुताः ।
हृष्टाः प्रमुदितास्त्वासन् वारुणीग्रहणात् सुराः ॥ ३८ ॥
उच्चैःश्रवा हयःश्रेष्ठो मणिरत्नञ्च कौस्तुभम् ।

षष्टिः कोट्यः षष्टिकोटिसङ्ख्याः प्रधाना अप्सरसामभवन् अपरिमितपरिचारकोपेताः । षष्टिकोट्यप्सरसो जाता इत्यर्थः ॥ ३४ ॥

ता उक्ताप्सरसः न प्रतिगृह्णन्ति ममैवेमाः नान्यस्येति नाङ्गीकुर्वन्ति सर्वे देवा दानवाश्चेत्यर्थः । तासां विशिष्य पत्यनिच्छयैव संमुग्धाकारतया स्थितत्वात् तासां विशिष्यप्रतिग्रहाभावः । अत एव तासां साधारण्यम् ॥ ३५ ॥

वारुणीसुराधिदेवतापरिग्रहं केनचित् असाधारण्येनाङ्गीकारम् ॥ ३६ ॥

अदितिसुताङ्गीकारे हेतुरनिन्दितामिति । निर्बन्धस्त्वत्र मानुषविषयं शास्त्रे देवतानामनधिकारात् ॥ ३७ ॥

उदतिष्ठन् नरश्रेष्ठ! तथैवामृतमुत्तमम्॥ ३९॥
अथ तस्य कृते राम! महानासीत् कुलक्षयः।
अदितेस्तु ततः पुत्रा दितिपुत्रानयोधयन्॥ ४०॥
एकतामगमन् सर्वे असुरा राक्षसैः सह।
युद्धमासीन् महाघोरं वीर! त्रैलोक्यमोहनम्॥ ४१॥
यदा क्षयं गतं सर्वं तदा विष्णुर्महाबलः।
अमृतं सोऽहरत् तूर्णं मायामास्थाय मोहिनीम्॥ ४२॥
ये गताभिमुखं विष्णुमक्षरं पुरुषोत्तमम्।
संपिष्टास्ते तदा युद्धे विष्णुना प्रभविष्णुना॥ ४३॥

असुराः सुरापरिग्रहराहित्यात्। सुराः सुरापरिग्रहसत्त्वात्॥३८॥ ॥ ३९॥

तस्य अमृतस्य कृते तन्निमित्तम्॥ ४०॥

कलहप्रवर्तनानन्तरम् असुरा राक्षसैः सह एकताम् अगमन् बलसिद्ध्यर्थमिति शेषः। वीरेति संबुद्धिः परमिति क्वचित् पाठः॥४१॥

सर्वं परस्परप्रहारेण देवासुरात्मकं क्षयं गतं क्षयप्रायं सर्वं तदा दैत्या राक्षसैरेकत्वेन बलत्वात् मा हरन्तु इति बुद्ध्या मोहिनीं काममोहजननीं मायां मायातनुम् आस्थाय तूर्णं शीघ्रम् अमृतमहरत्॥ ४२॥

गताभिमुखमिति सन्धिरार्षः। ये सुरा असुरा वा मायामूर्त्या

अदितेरात्मजा वीरा दितेः पुत्रान् निजघ्निरे ।
अस्मिन् घोरे महायुद्धे दैतेयादित्ययोर्भृशम् ॥ ४४ ॥
निहत्य दितिपुत्रांस्तु राज्यं प्राप्य पुरन्दरः ।
शशास मुदितो लोकान् सर्षिसङ्घान् सचारणान् ॥ ४५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे समुद्र-
मन्थनं नाम पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

गृहीतामृतं विष्णुम् अमृतजिघृक्षया अभिमुखं गताः प्राप्ताः सर्वे मूर्धन्तराख्यानेन प्रभविष्णुना विष्णुना युद्धे संपिष्टाः ॥ ४३ ॥

दितेः पुत्रान्निजघ्निरे धार्मिकत्वात् विष्ण्वनुग्रहाच्च । दैतेयादित्ययोः सुरासुरवर्गयोः ॥ ४४ ॥

तुशब्दः राज्यमिति अनन्तरं योज्यः राज्यममृतं च प्राप्येत्यर्थः ॥ ४५ ॥

अत्र "ममन्थुरमितौजसः" इति श्लोकानन्तरम् "अथ वर्ष" इत्यादि आयुर्वेदमयः पुमान् इत्यन्त श्योदशश्लोकाः प्रक्षिप्ता इति वदन्तः । अमृतप्रदानराजभिरस्कंदाद्यवर्णनवत् द्वादशश्लोकात्मकस्याप्यवर्णनमिति तदाशयः ।

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

षट्चत्वारिंशः सर्गः ।



हतेषु तेषु पुत्रेषु दितिः परमदुःखिता ।
मारीचं काश्यपं राम ! भर्त्तारमिदमब्रवीत् ॥ १ ॥
हतपुत्रास्मि भगवंस्तव पुत्रैर्महात्मभिः ।
शक्रहन्तारमिच्छामि पुत्रं दीर्घतपोर्जितम् ॥ २ ॥
साहं तपश्चरिष्यामि गर्भं मे दातुमर्हसि ।
ईश्वरं शक्रहन्तारं त्वमनुज्ञातुमर्हसि ॥ ३ ॥
तस्यास्तद् वचनं श्रुत्वा मारीचः काश्यपस्तदा ।
प्रत्युवाच महातेजा दितिं परमदुःखिताम् ॥ ४ ॥
एवं भवतु भद्रं ते शुचिर्भव तपोधने ! ।

किं तत इत्यत्राह,—हतेष्वित्यादि । मारीचं मरीचेरपत्यम् ॥१॥
दीर्घेण तपसा अर्जितम् ॥ २ ॥
ईश्वरं त्रैलोक्यनाथम् इंद्रघ्नमिति पाठान्तरम् । तत्र इंद्रघ्नमित्यस्यैव विवरणं शक्रहन्तारमिति ॥ ३ ॥ ४ ॥
शुचिर्भव पुत्रोत्पत्तिं यावदिति शेषः ॥ ५ ॥
पूर्णे वर्षसहस्रे त्विति अनन्तरश्लोकस्थेनान्वयः । शुचिर्यदि भवि-

जनयिष्यसि पुत्रं त्वं शक्रहन्तारमाहव ॥ ५ ॥
पूर्णे वर्षसहस्रे तु शुचिर्यदि भविष्यसि ।
पुत्रं त्रैलोक्यहन्तारं मत्तस्त्वं जनयिष्यसि ॥ ६ ॥
एवमुक्त्वा महातेजाः पाणिना संममार्ज ताम् ।
तामालभ्य ततः स्वस्ति इत्युक्त्वा तपसे ययौ ॥ ७ ॥
गते तस्मिन् नरश्रेष्ठ! दितिः परमहर्षिता ।
कुशप्लवं समासाद्य तपस्तेपे सुदारुणम् ॥ ८ ॥
तपस्तस्यां हि कुर्व्वन्त्यां परिचर्य्यां चकार ह ।
सहस्राक्षो नरश्रेष्ठ! परया गुणसम्पदा ॥ ९ ॥
अग्निं कुशान् काष्ठमपः फलं मूलं तथैव च ।
न्यवेदयत् सहस्राक्षो यचान्यदपि काङ्क्षितम् ॥ १० ॥

शुचीति वत्सरसहस्रमपीति शेषः। त्रैलोक्यहन्तारं तदधिपशक्रहन्तारम् ॥ ६ ॥

पाणिना संममार्ज तादृशपुत्रप्रतिबन्धहेतुपापक्षयार्थमिति शेषः अथ ताम् आलभ्य स्पृष्ट्वा स्वस्ति गर्भभर्म तवास्तु इत्युक्त्वा स काश्यपः तपसे ययावित्यन्वयः ॥ ७ ॥

कुशप्लवं विशालाख्यं पूर्वदेशस्थतपोवनम् ॥ ८ ॥

गुणसम्पदा शुश्रूषोपयोगिगुणसम्पदा ॥ ९ ॥

तामेव गुणसम्पदमाह,—अग्निमित्यादि ॥ १० ॥

गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा ।
शक्रः सर्व्वेषु कालेषु दितिं परिचचार ह ॥ ११ ॥
पूर्णे वर्षसहस्रे सा दशोने रघुनन्दन ! ।
दितिः परमसंहृष्टा सहस्राक्षमथाब्रवीत् ॥ १२ ॥
तपश्चरन्त्या वर्षाणि दश वीर्य्यवतां वर ! ।
अवशिष्टानि भद्रं ते भ्रातरं द्रक्ष्यसे ततः ॥ १३ ॥
यमहं त्वत्कृते पुत्र ! तमाधास्ये जयोत्सुकम् ।
त्रैलोक्यविजयं पुत्र ! सह भोक्ष्यसि विज्वरः ॥ १४ ॥
याचितेन सुरश्रेष्ठ ! पित्रा तव महात्मना ।
वरो वर्षसहस्रान्ते मम दत्तः सुतं प्रति ॥ १५ ॥
इत्युक्त्वा च दितिस्तत्र प्राप्ते मध्यं दिनेश्वरे ।

पुत्रत्वाद् गात्रसम्बाहनादि । सर्व्वेषु कालेषु तस्या अनुचित-तीत्यर्थेति भावः । ननु तद्-हन्तृपुत्रस्य शौरिदितेः कथं तत्परिचर्य्या-स्वीकारः इति चेत् ? देवमाययैवेति मन्तव्यम् ॥ ११ ॥

दशोने दशभिरूने ॥ १२ ॥ १३ ॥

हे पुत्र ! यं पुत्रम् अहं त्वत्कृते तवार्थं याचितवती तं तव जयोत्सुकम् आधास्ये विगतवैरं भ्रातृस्नेहवन्तमेव करिष्ये इत्यन्वयः । त्रैलोक्यविजयं भ्रातृसहितं सह तेन भ्रात्रा सह ॥ १४ ॥ १५ ॥

दिनेश्वरे सूर्य्ये मध्यं प्राप्ते सति छायायां शीर्षस्थाने पादौ कृत्वा

निद्रयापहृता देवी पादौ कृत्वाथ शीर्षतः ॥ १६ ॥
दृष्ट्वा तामशुचिं शक्रः पादयोः कृतमूर्द्धजाम् ।
शिरःस्थाने कृतौ पादौ जहास च मुमोद च ॥ १७ ॥
तस्याः शरीरविवरं प्रविवेश पुरन्दरः ।
गर्भञ्च सप्तधा राम ! चिच्छेद परमात्मवान् ॥ १८ ॥

दितिः निद्रया अपहृता गृहीतेत्यर्थः । अनेन दिवास्वापरूपपापेन शय्यापादस्थाने मस्तककरणेन चाशुचित्वं सूचितम् । केचित्तु उपविष्टाया एव प्रकृतया पादपर्य्यन्तं शिरःसम्बन्धेन शीर्षपादसम्बन्धः, तेन ब्राह्मणस्य शूद्रस्पर्श इव शिरसः पादस्पर्शे अशुचित्वं सूचितम् । तपसि स्थितायाः शय्यासम्बन्धाभावेन पूर्वव्याख्याया अयुक्तत्वादित्याहुः । परे तु भूशयनेऽपि दक्षिणपूर्वदिशोः शिरःस्थापनयोग्यतायाः स्मृतीमूक्तेः । तद्वैपरीत्येन शयनस्य अशुचित्वसूचकत्वम् अस्त्येवेत्याहुः ॥ १६ ॥

पादयोः तत्स्थापनदेशे कृतमूर्धजाम् । मूर्धजसम्बन्धे मूर्धसम्बन्धोऽपि जात एव । अतएवाशुचिम् ; तथा,—शिरःस्थाने तया पादौ कृतौ, अतस्तामशुचिं दृष्ट्वेत्यर्थः । अत्र एकेनैव उभयलाभे उभयोपादानं स्पष्टार्थं, वस्तुतो वक्रग्रीवतया वक्रपादतया वा शयने परस्परस्थानव्यत्ययाभावेन तथा अशुचित्वमित्यत्यन्ताशुचित्वप्रतिपादनाय उभयोपादानमिति बोध्यम् । मुमोद प्राप्तच्छिद्रत्वादिति भावः । मोदवशादेव जहास च ॥ १७ ॥

शरीरविवरं योनिविवरम् । आत्मवान् सावधानः ॥ १८ ॥

भिद्यमानस्ततो गर्भो वज्रेण शतपर्वणा ।

रुरोद सुस्वरं राम ! ततो दितिरबुध्यत ॥ १९ ॥

मारुदो मारुदश्चेति गर्भं शक्रोऽभ्यभाषत ।

बिभेद च महातेजा रुदन्तमपि वासवः * ॥ २० ॥

न हन्तव्यं न हन्तव्यमित्येव दितिरब्रवीत् ।

निष्पपात ततः शक्रो मातुर्वचनगौरवात् ॥ २१ ॥

प्राञ्जलिर्वज्रसहितो दितिं शक्रोऽभ्यभाषत ।

अशुचिर्देवि ! सुप्तासि पादयोः कृतमूर्द्धजा ॥ २२ ॥

शतपर्वणा शतकोटिना । अबुध्यत भिद्यमानगर्भस्य रोदनशब्दे-नेत्यर्थः ॥ १९ ॥ २० ॥

न हन्तव्यमिति । विभागेऽपि प्राणवियोजनं माकुर्वित्यर्थः ।२१।२२।

तदन्तरं छिद्रम् । आहवे शक्रस्य मम हन्तारम् असुरच्छेदन-

---

* "बिभेद सप्तधा गर्भं वज्रेण शतपर्वणा ।

एकैकं चैव गर्भाग्रं पुनश्चिच्छेद सप्तधा ॥"

इति वङ्गीयपुस्तकेषु दृश्यते । विष्णुपुराणादौ तु एवमेव प्रथमं सप्तधा भिन्नस्याप्यतिकोपेन पुनरेकैकशः सप्तधाकरणमिति वर्णित-मासीत् । यथा,—

"सोऽभवत् सप्तधा गर्भस्तमिन्द्रः कुपितः पुनः ।

एकैकं सप्तधा चक्रे वज्रेणातिविदारिणा ॥"

इति वि०-पु०—१म-अंश०—२१-अ०—३६-श्लो० ।

तदन्तरमहं लब्ध्वा शक्रहन्तारमाहवे ।
अभिन्दं सप्तधा देवि ! तन्मे त्वं क्षन्तुमर्हसि ॥ २१ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे शक्रेण
दितिगर्भभेदनं नाम षट्चत्वारिंशः
सर्गः ॥ ४६ ॥

न्यायेन अभिन्दम् । तन्मे अपराधकर्म त्वं क्षन्तुमर्हसि, पूर्वतनीं सेवां स्मृत्वेति शेषः ॥ २१ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

सप्तचत्वारिंशः सर्गः ।



सप्तधा तु कृते गर्भे दितिः परमदुःखिता ।
सहस्राक्षं दुराधर्षं वाक्यं सानुनयाब्रवीत् ॥ १ ॥
ममापराधाद् गर्भोऽयं सप्तधा शकलीकृतः ।
नापराधो हि देवेश ! तवात्र बलसूदन ! ॥ २ ॥
प्रियं त्वत्कृतमिच्छामि मम गर्भविपर्य्यये ।
मरुतां सप्त सप्तानां स्थानपाला भवन्तु ते ॥ ३ ॥
वातस्कन्धा इमे सप्त चरन्तु दिवि पुत्रक ! ।
मारुता इति विख्याता दिव्यरूपा ममात्मजाः ॥ ४ ॥

सप्तधा त्विति । दुराधर्षं न्याय्योपायेन जेतृत्वादित्याशयः ॥ १ ॥
ममापराधात् अशुचित्वरूपात् ॥ २ ॥

गर्भविपर्य्यये गर्भविपत्तौ यत् त्वया कृतं कर्म, तत् तव च मम च यथा प्रियं भवति, तथा इच्छामि; तत्प्रकारमाह,—मरुतामिति। सप्तानां मरुतां वा तत्तत्स्थानविशेषाणां सप्त इमे ते त्वदधीनाः स्थानपाला लोकरक्षिणो भवन्तु इत्यन्वयः ॥ ३ ॥

तदर्थमेव हे पुत्रक ! मारुता इति नाम्ना प्रसिद्धा दिव्यरूपा मम पुत्राः ये इमे वातस्कन्धा इति सप्त प्रसिद्धाः तेषु चरन्तु इत्यन्वयः ॥४॥

ब्रह्मलोकं चरत्वेक इन्द्रलोकं तथापरः ।
दिव्यवायुरिति ख्यातस्तृतीयोऽपि महायशाः ॥ ५ ॥
चत्वारस्तु सुरश्रेष्ठ ! दिशो वै तव शासनात् ।
सञ्चरिष्यन्ति भद्रं ते कालेन हि * ममात्मजाः ॥ ६ ॥
त्वत्कृतेनैव नाम्ना वै मारुता इति विश्रुताः ।
तस्यास्तद्वचनं श्रुत्वा सहस्राक्षः पुरन्दरः ॥ ७ ॥
उवाच प्राञ्जलिर्वाक्यमितीदं * बलसूदनः ।
सर्वमेतद् यथोक्तं ते भविष्यति न संशयः ॥ ८ ॥

एक इति । एको गण इत्यर्थः । प्रथमं सप्तधा विभज्य पुनरेकशः सप्तधाकरणमित्यस्य अर्थस्य पुराणान्तरे स्पष्टमुक्तत्वात् । इहापि "बिभेद च महातेजा रुदन्तमपि—" इत्यादिना ध्वनितत्वाच्चेति बोध्यम् । एवमपर इत्याद्यपि व्याख्येयम् । 'इन्द्रलोकम्' इति 'ब्रह्मलोकम्' इति प्रचुरः पाठः । दिव्यवायुः दिवि अन्तरिक्षे भव इत्यर्थः ॥ ५ ॥

दिशः पूर्वादिमहादिशः ॥ ६ ॥

त्वत्कृतेन "मारुदो मारुदः" इति वचनमूलेन ॥ ७ ॥

यथोक्तं ब्रह्मादिस्थानपालकत्वम् ॥ ८ ॥

---

* "देवभूताः" इति पाठान्तरः ।

* "दितिं च" इति पाठान्तरः ।

विचरिष्यन्ति भद्रं ते देवरूपास्तवात्मजाः ।
एवं तौ निश्चयं कृत्वा मातापुत्रौ तपोवने ॥ ९ ॥
जग्मतुस्त्रिदिवं राम ! कृतार्थाविति नः श्रुतम् ।
एष देशः स काकुत्स्थ ! महेन्द्राध्युषितः पुरा ॥ १० ॥
दितिं यत्र तपःसिद्धामेवं परिचचार सः ।
इक्ष्वाकोस्तु नरव्याघ्र ! पुत्रः परमधार्मिकः ॥ ११ ॥
अलम्बुषायामुत्पन्नो विशाल इति विश्रुतः ।
तेन चासीदिह स्थाने विशालेति पुरी कृता ॥ १२ ॥
विशालस्य सुतो राम ! हेमचन्द्रो महाबलः ।
सुचन्द्र इति विख्यातो हेमचन्द्रादनन्तरम् ॥ १३ ॥
सुचन्द्रतनयो राम ! धूम्राश्व इति विश्रुतः ।
धूम्राश्वतनयश्चापि सृञ्जयः समपद्यत ॥ १४ ॥
सृञ्जयस्य सुतः श्रीमान् सहदेवः प्रतापवान् ।

मातापुत्रौ दितीन्द्रौ ॥ ९ ॥

वर्णितेन्द्रचरितस्य प्रकृतप्रसक्तमाह,—एष इति । स एष इत्यन्वयः ॥ १० ॥

एवं प्रागुक्तरीत्या एवंभूते देशे । विशालोत्पत्तिप्रकारमाह,—इक्ष्वाकोस्त्विति ॥ ११ ॥

विशालेति । कृता आसीदित्यन्वयः ॥ १२ ॥

कुशाश्वः सहदेवस्य पुत्रः परमधार्मिकः ॥ १५ ॥
कुशाश्वस्य महातेजाः सोमदत्तः प्रतापवान् ।
सोमदत्तस्य पुत्रस्तु * काकुत्स्थ ! इति विश्रुतः ॥ १६ ॥
तस्य पुत्रो महातेजाः संप्रत्येष पुरीमिमाम् ।
आवसत् परमप्रख्यः सुमतिर्नाम दुर्जयः ॥ १७ ॥
इक्ष्वाकोस्तु प्रसादेन सर्वे वैशालिका नृपाः ।
दीर्घायुषो महात्मानो वीर्यवन्तः सुधार्मिकाः ॥ १८ ॥
इहाद्य रजनीमेकां सुखं स्वप्स्यामहे वयम् ।
श्वःप्रभाते नरश्रेष्ठ ! जनकं द्रष्टुमर्हसि ॥ १९ ॥
सुमतिस्तु महातेजा विश्वामित्रमुपागतम् ।
श्रुत्वा नरवरश्रेष्ठः प्रत्यागच्छन्महायशाः ॥ २० ॥
पूजाञ्च परमां कृत्वा सोपाध्यायः सबान्धवः ।

कतरोऽत्र वंश इति प्रश्नस्य उत्तरमाह,—विशालस्येत्यादि ॥१३॥ ॥ १४ ॥ १५ ॥ १६ ॥

इमां पुरीं संप्रति आवसदित्यन्वयः ॥ १७ ॥

वैशालिकाः, विशालायां निवासो येषां ते इत्यर्थः । अनेन त्वत्समानवंशोऽयमिति सूचितम् ॥ १८ ॥

---

* "पुत्रोऽभूत्" इति पाठान्तरः ।

प्राञ्जलिः कुशलं पृष्ट्वा विश्वामित्रमथाब्रवीत् ॥ २१ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे विषयं मुने ।
संप्राप्तो दर्शनं चैव नास्ति धन्यतरो मम ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विशा-
लागमनं नाम सप्तचत्वारिंशः
सर्गः ॥ ४७ ॥

अतएवाह,—कुशलादीनि ॥ २१ ॥
मम मत्तः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

अष्टचत्वारिंशः सर्गः ।

पृष्ट्वा तु कुशलं तत्र परस्परसमागमे ।
कथान्ते सुमतिर्वाक्यं व्याजहार महामुनिम् ॥ १ ॥

इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ।
गजसिंहगती वीरौ शार्दूलवृषभोपमौ ॥ २ ॥

पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्धरौ ।
अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ ३ ॥

यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ ।
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ! ॥ ४ ॥

पृष्ट्वेति । सुमतिर्नाम विशालाराजः महामुनिं विश्वामित्रम् । कथान्ते विश्वामित्रेण कथ्यमानकथान्ते ॥ १ ॥

गजसिंहगती गजवद् धीरमन्दगती, सिंहवद् अप्रतिहतगती; यद्वा प्रभुत्वाद् गजगतिः रामः, अन्यगतिर्लक्ष्मणः । तथा शार्दूलाकृतिः रामः, वृषभाकृतिर्लक्ष्मणः ॥ २ ॥

पद्मपत्रविशालाक्षौ इत्यनेन भाग्यसम्पत् सूचिता । वीरधर्मसूचकं खड्गेत्यादि ॥ ३ ॥

यदृच्छया, दैववशसम्पन्ननिमित्तविशेषेण—यया कयाचित्

भूषयन्ताविमं देशं चन्द्रसूर्य्याविवाम्बरम् ।
परस्परेण सदृशौ प्रमाणेङ्गितचेष्टितैः ॥ ५ ॥
किमर्थञ्च नरश्रेष्ठौ संप्राप्तौ दुर्गमे पथि ।
वरायुधधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः * ॥ ६ ॥
तस्य तद् वचनं श्रुत्वा यथावृत्तं न्यवेदयत् ।
विश्वामित्रवचः श्रुत्वा राजा परमविस्मितः ॥ ७ ॥

स्वेच्छया इत्यर्थो वा ; देवलोकात् गां भुवं प्राप्तौ अवतीर्णौ अमराविव स्थितौ किमर्थं किं वा प्रयोजनमुद्दिश्य कथम् अतिसुकुमारचरणत्वात् केन प्रकारेण पद्भ्यामिह प्राप्तौ, कस्य वा सुताविति शेषः ? ॥ ४ ॥

भूषयन्तौ स्वतेजसेति शेषः । प्रमाणं शरीरोन्नत्यादि, इङ्गितम् आन्तराशयबोधकं, चेष्टितं वचनगमनादि ; तैस्तादृशगुणधान्तरा-भावात् परस्परसदृशौ ॥ ५ ॥

आदरातिशयात् पुनः पृच्छति, किमर्थं चेत्यादि,—दुर्गमे कान्तारसम्बन्धात् ॥ ६ ॥

यथावृत्तं न्यवेदयत्, दशरथकुमारौ अस्मद्यज्ञविघ्ननिवारणाय मद्-आकारणात् मदुपलालनात् सिद्धाश्रमं प्राप्य तत्र विघ्नकर्त्तॄन् राक्षसादीन् हत्वा पथि ताड़कां च हत्वा जनकदिदृक्षया एतद्देशमागतौ इति न्यवेदयत् ॥ ७ ॥

---

* "कस्य पुत्रौ महामुने !" इति पाठान्तरम् ।

अतिथी परमं प्राप्तौ पुत्रौ दशरथस्य तौ ।
पूजयामास विधिवत् सत्काराहौं महाबलौ ॥ ८ ॥
ततः परमसत्कारं सुमतेः प्राप्य राघवौ ।
उष्य तत्र निशामेकां जग्मतुर्मिथिलां ततः ॥ ९ ॥
[illegible] मुनयः सर्वे जनकस्य पुरीं शुभाम् ।
साधु सा[illegible] प्रशंसन्तो मिथिलां समपूजयन् ॥ १० ॥
मिथिलोपवने तत्र आश्रमं दृश्य राघवः ।
पुराणं निर्जनं रम्यं पप्रच्छ मुनिपुङ्गवम् ॥ ११ ॥
इदमाश्रमसङ्काशं किं न्विदं मुनिवर्जितम् ।
श्रोतुमिच्छामि भगवन्! कस्यायं पूर्व आश्रमः ॥ १२ ॥
तत् श्रुत्वा राघवेणोक्तं वाक्यं वाक्यविशारदः ।
प्रत्युवाच महातेजा विश्वामित्रो महामुनिः ॥ १३ ॥

परममत्यन्तमादरणीयौ प्राप्तौ अतिथी, तौ पूजयामासेत्यन्वयः ॥ ८ ॥

सुमतेरिति पञ्चमी । उष्य उषित्वा आर्षमेतत् ॥ ९ ॥

पूजाप्रकारः साधु साध्विति प्रशंसनम् ॥ १० ॥

मिथिलोपवने मिथिलासमीपवने दृश्य दृष्ट्वा । पुराणम्—इत्यादि त्रयम् आश्रमविशेषणम् ॥ ११ ॥

मुनिराहित्याद् आश्रमवादस्य अप्रयुक्तम् । अतएवाश्रमसङ्काश-

तत्ते कथयिष्यामि शृणु तत्त्वेन राघव ! ।
यस्यैतदाश्रमपदं शप्तं कोपान्महात्मनः ॥ १४ ॥
गौतमस्य नरश्रेष्ठ ! पूर्वमासीन्महात्मनः ।
आश्रमो दिव्यसङ्काशः सुरैरपि सुपूजितः ॥ १५ ॥
स चात्र तप आतिष्ठद्-अहल्यासहितः पुरा ।
वर्षपूगान्यनेकानि राजपुत्र ! महायशः ! ॥ १६ ॥
तस्यान्तरं विदित्वा च सहस्राक्षः शचीपतिः ।
मुनिवेषधरो भूत्वा अहल्यामिदमब्रवीत् ॥ १७ ॥
ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ! ।

माश्रमवदवभासमानम् । अत इदं किम् ? तस्यैव विवरणं, कस्यायं पूर्वः पूर्वसम्भूतः ॥ १२ ॥ १३ ॥

अहल्यानुग्रहहेतु-कालस्मृतिज-सन्तोषे हन्तेति । यस्यैतद् आश्रमपदं भवति, महात्मनः कोपाद् यथा शप्तं प्राप्तशापं, तत् ते कथयिष्यामीत्यन्वयः ॥ १४ ॥

दिव्यसङ्काशः द्युभवाश्रमतुल्यः ॥ १५ ॥

अनेकानि वर्ष-पूगानि अनेकवर्षसमूहान् ॥ १६ ॥

तस्य आश्रमस्य अन्तरं मुनिसन्निधानरहितं कालम् । शचीपतिरित्यनेन शचीतोऽपि सौन्दर्यम् अहल्याया ध्वनितम् । मुनिवेषधरः गौतमवेषधरः । "मम रूपं समास्थाय" इति वक्ष्यमाणत्वात् ॥ १७ ॥

सङ्गमं त्वहमिच्छामि त्वया सह सुमध्यमे ! ॥ १८ ॥
मुनिवेषं सहस्राक्षं विज्ञाय रघुनन्दन ! ।
मतिं चकार दुर्मेधा देवराजकुतूहलात् ॥ १९ ॥
अथाब्रवीत् सुरश्रेष्ठं कृतार्थेनान्तरात्मना ।
कृतार्थास्मि सुरश्रेष्ठ ! गच्छ शीघ्रमितः प्रभो ! ॥ २० ॥
आत्मानं मां च देवेश ! सर्वथा रक्ष गौरवात् ।
इन्द्रस्तु प्रहसन् वाक्यमहल्यामिदमब्रवीत् ॥ २१ ॥

ऋतुकालं प्राप्तोक्तरतिकालम् अर्थिनो रत्यर्थिनः । सुसमाहिते ! सङ्गमोचितकल्पप्रसाधनवति ! अतिसुन्दरि ! इति वा । तेन स्वाभिलाष्यदिव्यस्त्रीत्वं सूचितम् ॥ १८ ॥

सहस्राक्षं विज्ञाय । "ऋतुकालं प्रतीक्षन्ते नार्थिनः" इति वचनात् तपसा चाश्रमवर्त्तिसर्वप्राणिज्ञातस्य भयाभावाय गौतमवेषोऽयमिन्द्र इति ज्ञात्वेत्यर्थः । देवराजकुतूहलात्, स मामभिलषतीति कौतुकात् दिव्यरतिकौतुकाच्च इत्यर्थः । दुर्मेधा अहल्या तेन सह रत्यर्थं मतिं चकार इत्यन्वयः ॥ १९ ॥

कृतार्था त्वादृशदिव्यपुरुषलाभात् प्राप्ततपःफला ॥ २० ॥

शीघ्रगमने हेतुः;—मम अहल्यायाः, आत्मन इन्द्रस्य च, शापतो रक्षणम्, तदाह,—आत्मानमित्यादि । प्रहसन्निति विचित्रस्त्रीचरितेन प्रहासः रक्षणस्य दुर्लभत्वाद् वा । गौतमतपोभङ्गस्य स्वेष्टस्य करणेन अग्निमशापादिभयमल्पम् इति वा ॥ २१ ॥

सुश्रोणि ! परितुष्टोऽस्मि गमिष्यामि यथागतम् ।
एवं सङ्गम्य तु तदा निश्चक्रामोटजात् ततः ॥ २२ ॥
स संभ्रमात् त्वरन् राम ! शङ्कितो गौतमं प्रति ।
गौतमं सन्ददर्शाथ प्रविशन्तं महामुनिम् ॥ २३ ॥
देवदानवदुर्द्धर्षं तपोबलसमन्वितम् ।
तीर्थोदकपरिक्लिन्नं दीप्यमानमिवानलम् ॥ २४ ॥
गृहीतसमिधं तत्र सकुशं मुनिपुङ्गवम् ।
दृष्ट्वा सुरपतिस्त्रस्तो विषण्णवदनोऽभवत् ॥ २५ ॥
अथ दृष्ट्वा सहस्राक्षं मुनिवेषधरं मुनिः ।
दुर्वृत्तं वृत्तसम्पन्नो रोषाद् वचनमब्रवीत् ॥ २६ ॥
मम रूपं समास्थाय कृतवानसि दुर्मते ! ।
अकर्त्तव्यमिदं यस्माद् विफलस्त्वं भविष्यसि ॥ २७ ॥
गौतमेनैवमुक्तस्य सरोषेण महात्मना ।
पेततुर्वृषणौ भूमौ सहस्राक्षस्य तत्क्षणात् ॥ २८ ॥

सङ्गम्य अहल्यया सहेति शेषः ॥ २२ ॥

स इन्द्रः संभ्रमात् गौतमभयात् त्वरन् निश्चक्राम इत्यन्वयः । निर्गमसमये गौतमं प्रति तदागमनं प्रति शङ्कितश्चासीदिति शेषः । अथ निष्क्रमणसमनन्तरमेव ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥

तथा दृष्ट्वा च वै शक्रं भार्य्यामपि च प्रभवान् ।
इह वर्षसहस्राणि बहूनि निवसिष्यसि ॥ २९ ॥
वातभक्षा निराहारा तप्यन्ती भस्मशायिनी ।
अदृश्या सर्वभूतानाम् आश्रमेऽस्मिन् वसिष्यसि ॥ ३० ॥
यदैतच्च वनं घोरं रामो दशरथात्मजः ।

मम गौतमस्य, कृतवानि: मद्भार्य्याभोगरूपम् अकार्य्यम् । तस्माद् विफलः विगतवृषणः ॥ २७ ॥ २८ ॥ २९ ॥

शापस्वरूपं वातभक्ष्येत्यादि । तप्यन्ती स्वकृताकार्य्यस्मरणेन पीड़िता । पुराणादिप्रसिद्धशिलारूपप्राप्तिशापस्तु कल्पान्तरीया इति न विरोधः । अत्र शिलारूपत्वे तात्पर्य्यकत्वेन वातभक्ष्येत्यनेन विरोधः स्पष्ट एवेति केचित् । वस्तुतस्तु अदृश्येत्यस्य स्वरूपेणादृश्या, शिलाप्रतिमारूपेण सर्वदृश्येत्यर्थः । न च तावता चैतन्यहानिरिति क्षुधादिपीड़ा स्यादेव इत्यतो वातभक्षा, तदतिरिक्ताहाराभावाच्च निराहारा ; तप्यन्ती स्वकर्मणेति शेषः । तादृश्यपि भस्मशायिनी, न तु स्थिता, इति न कश्चिद् विरोधः । इन्द्रशापोऽप्युपलक्षणमत्र अनन्तभगवतः शापस्य, तदुक्तं पाद्मे,—

"शापदग्धा पुरा भर्त्रा राम ! शक्रापराधतः ।
अहल्याख्या शिला जज्ञे शतलिङ्गः कृतः स्वराड् ॥"

इति शिला, तत्प्रतिमाकारा । शतशब्दोऽनन्तवाची, लिङ्गशब्देन भगाकारं चिह्नम् । स्वराडिन्द्रः ॥ ३० ॥

शापान्तमाह,— यदेति । घोरमित्यनेन मनिराश्रित्यसूचनम्

आगमिष्यति दुर्धर्षस्तदा पूता भविष्यसि ॥ ३१ ॥
तस्यातिथ्येन दुर्वृत्ते ! लोभमोहविवर्जिता ।
मत्सकाशं मुदा युक्ता स्वं वपुर्धारयिष्यसि ॥ ३२ ॥
एवमुक्त्वा महातेजा गौतमो दुष्टचारिणीम् ।
इममाश्रममुत्सृज्य सिद्धचारणसेविते ॥ ३३ ॥
हिमवच्छिखरे रम्ये तपस्तेपे महातपाः ॥ ३४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे अहल्याशापकीर्त्तनं नाम अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

रामो यदा आगमिष्यति, तदा आगमनकाले जायमानचरणविन्यासेन अनायासतस्तत्पादस्पर्शात् पूता व्यभिचारकृतपापनाशेन पवित्रा भविष्यसि, पावित्र्येण च तपस्विनां दृश्या भविष्यसि ॥ ३१ ॥

ततो मत्सकाशं मत्सान्निध्यं प्राप्ता स्वं वपुः पूर्ववत् सर्वदृश्यं भस्मना अनावृतं धारयिष्यसीत्यर्थः । इतरत् स्पष्टम् ॥३२॥३३॥३४॥

कतककारस्तु "यदैतत्"—इत्यादि शापान्तप्रतिपादकं "स्वं वपुर्धारयिष्यसि"—इत्यन्तं श्लोकद्वयं प्रक्षिप्तमित्याह। "एवमुक्त्वा"—इत्यादि सार्द्धश्लोकस्तु प्रामाणिक एव, एवञ्च द्वात्रिंशत्श्लोक एवात्र इत्याहुः।

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

एकोनपञ्चाशः सर्गः ।



अफलस्तु ततः शक्रो देवानग्निपुरोगमान् ।
अब्रवीत् त्रस्तनयनः सिद्धगन्धर्वचारणान् ॥ १ ॥
कुर्वता तपसो विघ्नं गौतमस्य महात्मनः ।
क्रोधमुत्पाद्य हि मया सुरकार्य्यमिदं कृतम् ॥ २ ॥
अफलोऽस्मि कृतस्तेन क्रोधात् सा च निराकृता ।
शापमोक्षेण महता तपोऽस्यापहृतं मया ॥ ३ ॥
तस्मात् सुरवराः सर्वे सर्षिसङ्घाः सचारणाः ।

धर्मधुरन्धरस्यापि शक्रस्य अधर्मे प्रवृत्तौ बीजं दर्शयितुमाह,—अफल इति । अवृषण इत्यर्थः । त्रस्तेति त्रासेन स्वकारस्य दैन्यं सूच्यते ॥ १ ॥

सुरकार्य्यमिति । अन्यथा ह्युग्रतपसा सकलदेवस्थानापहारकत्वेन कृतः स्यादिति भावः ॥ २ ॥

सा अहल्या दुश्चारिणीति निराकृता, उक्तशापपूर्वं त्यक्ता । एवमपि सुरकार्य्यनिष्पत्तिः कथम्? तत्राह,—शापेति । स्वस्मिन् गौतमकर्तृकशापमोक्षणेन अस्य तपो मया हृतम् । महतः शापेन विना न तपोव्यय इति भावः । तपोव्ययसम्पादकक्रोधोत्पादनमेव कार्य्यं मया कृतमिति तात्पर्य्यम् ॥ ३ ॥

सुरकार्यकरं यूयं सफलं कर्तुमर्हथ ॥ ४ ॥

शतक्रतोर्वचः श्रुत्वा देवाः साग्निपुरोगमाः ।
पितृदेवानुपेत्याहुः सर्वे सह मरुद्गणैः ॥ ५ ॥

अयं मेषः सवृषणः शक्रो ह्यवृषणः कृतः ।
मेषस्य वृषणौ गृह्य शक्रायाशु प्रयच्छत ॥ ६ ॥

अफलस्तु कृतो मेषः परां तुष्टिं प्रदास्यति ।
भवतां हर्षणार्थञ्च ये च दास्यन्ति मानवाः ।
अक्षयं हि फलं तेषां यूयं दास्यथ पुष्कलम् ॥ ७ ॥

अग्नेस्तु वचनं श्रुत्वा पितृदेवाः समागताः ।

सफलं मां कर्तुमर्हथ । सर्वे इत्यस्य मारवाड़पाठे हे सर्वे सुरवराः सर्वे यूयमित्यन्वयो ज्ञेयः । परन्तु यूयमित्येव पाठः प्राचीनः ॥ ४ ॥

पितृदेवाः कव्यवाहनादयः तानुपेत्य हव्यवाहनाभिमुखेनाहुः । अग्नेस्तु वचनं श्रुत्वेति वक्ष्यमाणत्वात् ॥ ५ ॥

अयं मेषः, यो भवतां हविष्ट्वेन कल्पितः । गृह्य गृहीत्वा ॥ ६ ॥

अफलस्त्विति । नन्विदमयुक्तं न हि मेषा अवृषणा दृश्यन्ते इति चेत्, भवदुद्देशेन कृतो हविष्ट्वेन कल्पितो योऽफलः षण्ढो मेषः । यद्वा वृषणाभिन्नो यो मेषावयवो भवद्धविष्ट्वेन कल्पितः स भवतां परां तुष्टिं दास्यतीत्यन्वयात् । ये वा अफलं मेषं भवतां हर्षणार्थं तोषाय भवद्भ्यो दास्यन्ति, तेषाम् अक्षयं फलं यूयं दास्यथ इत्यन्वयः ॥ ७ ॥

उत्पाद्य मेषवृषणौ सहस्राक्षे न्यवेशयन् ॥ ८ ॥
तदा प्रभृति काकुत्स्थ ! पितृदेवाः समागताः ।
अफलान् भुञ्जते मेषान् फलैस्तेषामयोजयन् ॥ ९ ॥
इन्द्रस्तु मेषवृषणस्तदाप्रभृति राघव ! ।
गौतमस्य प्रभावेण तपसा च महात्मनः ॥ १० ॥
तदागच्छ महातेज ! आश्रमं पुण्यकर्मणः ।
तारयैनां महाभागाम् अहल्यां देवरूपिणीम् ॥ ११ ॥
विश्वामित्रवचः श्रुत्वा राघवः सहलक्ष्मणः ।
विश्वामित्रं पुरस्कृत्य आश्रमं प्रविवेश ह ॥ १२ ॥
ददर्श च महाभागां तपसा द्योतितप्रभाम् ।

समागताः मिलिताः ॥ ८ ॥

अफलान् अण्डान् तदंशरहितान् वा, यतस्तेषां फलैः फलाभ्यां वृषणाभ्यामिन्द्रमयोजयन् ॥ ९ ॥

तदा प्रभृति ततो हेतोः इन्द्रो मेषवृषण इत्यन्वयः । तपसा प्रभावेण तपःकृतप्रभावेण च शापचारेण च ॥ १० ॥

महातेज इति रामसम्बोधनम् । पुण्यकर्मणो गौतमस्य । ननु ताड़कयेव घोररूपया अहल्यया अवरुद्धमाश्रमं कथं गच्छेयम् ? अत आह,—देवरूपिणीमिति । शापस्य एतदवधिकत्वात् अद्य त्वत्पाद-स्पर्शनान्मुक्तशापतया देवरूपिणीमित्यर्थः । एनां तारय भर्तृप्रत्या-पत्तिफलकमातिथ्यं गृहीत्वा भर्तृप्रापणेनैनामनुगृहाण ॥११॥१२॥

लोकैरपि समागम्य दुर्निरीक्ष्यां सुरासुरैः ॥ १३ ॥
प्रयत्नान्निर्मितां धात्रा दिव्यां मायामयीमिव ।
धूमेनाभिपरीताङ्गीं दीप्तामग्निशिखामिव ॥ १४ ॥
सतुषाराहतां साभ्रां पूर्णचन्द्रप्रभामिव ।
मध्येऽम्भसो दुराधर्षां दीप्तां सूर्य्यप्रभामिव ॥ १५ ॥
सा हि गौतमवाक्येन दुर्निरीक्ष्या बभूव ह ।
त्रयाणामपि लोकानां यावद् रामस्य दर्शनम् ॥ १६ ॥

ददर्शेति । आश्रमप्रवेशकाले अनायासतः स्वचरणसार्शाद् व्यभिचारकृतपापनाशेन शापनिवृत्त्या शापवशात् सुरासुरैः समागम्य मिलित्वापि सर्वलोकैर्दुर्निरीक्ष्यां विश्वामित्रो यथावदत् देवरूपिणीमिति तथा ददर्शेत्यर्थः । तदुक्तं तपसा द्योतितप्रभामिति । एवं दर्शनं तत्समये रामलक्ष्मणविश्वामित्राणामेव, सर्वदृश्यत्वं तु भगवदातिथ्यकार्य्यमिति बोध्यम् ॥ १३ ॥

प्रयत्नादित्यादिना दिव्यरूपत्वमुक्तम् ॥ १४ ॥

रामादेरपि दर्शनं नात्यन्तस्पष्टतया किन्त्वेवंरूपेण । भर्तृसन्तोषकरस्य भर्तृसान्निध्यस्य शापान्तकरणस्याभावादित्याह । धूमेनेति । धूमेनाभिपरीतानि व्याप्तानि अङ्गानि यस्याः सा उपमानार्थं भस्मावृतत्वेन । अम्भसः सलिलस्य तद्युक्तमेघस्य मध्यस्थां रविप्रभामिव ददर्श दुराधर्षां स्प्रष्टुमशक्याम् ॥ १५ ॥

तथादर्शने हेतुमाह,—सा हि इति । त्रयाणामपि लोकानां

शापस्यान्तमुपागम्य तेषां दर्शनमागता ॥ १७ ॥

राघवौ तु तदा तस्याः पादौ जगृहतुर्मुदा ।

दुर्निरीक्ष्यत्वशापवशाद् रामादीनामप्येवं दर्शनविषया जाता, अन्येषां तु अदृश्यैव, रामादीनां तु दुःखदृश्येत्यर्थः ॥ १६ ॥

शापस्यान्तं तदन्तस्यावधिकालं प्राप्य तेषां रामादीनां दर्शनं पूर्वोक्तप्रकारेण दर्शनविषयत्वं प्राप्तेत्यर्थः । तथा च पाद्मे,—

"गच्छतस्तस्य रामस्य पादस्पर्शान्महाशिला ।

काचिद् योषाभवत् सोऽपि विस्मितो मुनिरब्रवीत् ॥

शिला तत्प्रतिमाकारा । सोऽपि रामः । विस्मितः स एवासीत् । तथाभूतं तं दृष्ट्वा मुनिरवदत् इत्यर्थः ।

"शापदग्धा पुरा भर्त्रा राम ! शक्रापराधतः ।

अहल्याख्या शिला जज्ञे शतलिङ्गीकृतः स्वराट् ।

त्वदङ्घ्रिस्पर्शनात् तस्यै शापान्तं प्राह गौतमः ।

तस्मादियं ते पादाब्जस्पर्शात् शुद्धाभवत् प्रभो ! ॥

इति

यदुद्धारार्थं त्वं मया इहानीतः, सैषा एवेति शेषः । एवं मदुक्तरीत्या सर्व्वेषामविरोधः सम्भवति कल्पान्तरपरत्वेनाविरोधवर्णनं कतकाद्युक्तं चिन्त्यम् । यद्यपि तेन धूमेनेत्यादिसार्द्धश्लोके तामेव दुर्निरीक्ष्यामिति शेषं पूरयित्वा दुर्निरीक्ष्यत्वे हेतुमाह,—सा हीति । तेषां दर्शनमित्यत्र तेषां त्रयाणां लोकानामिति व्याख्यातं तदपि क्लिष्टम् ॥ १७ ॥

तदा स्वपदस्पर्शमात्रेण शिलारूपतापरित्यागे गौतमवचः स्म-

स्मरन्ती गौतमवचः प्रतिजग्राह सा हि तौ ॥ १८ ॥
पाद्यमर्घ्यं तथातिथ्यं चकार सुसमाहिता ।
प्रतिजग्राह काकुत्स्थो विधिदृष्टेन कर्मणा ॥ १९ ॥
पुष्पवृष्टिर्महत्यासीद् देवदुन्दुभिनिःस्वनैः ।
गन्धर्वाप्सरसां चैव महानासीत् समुत्सवः ॥ २० ॥
साधु साध्विति देवास्ताम् अहल्यां समपूजयन् ।
तपोबलविशुद्धाङ्गीं गौतमस्य वशानुगाम् ॥ २१ ॥
गौतमोऽपि महातेजा अहल्यासहितः सुखी ।

रन्ती मदाश्रमप्राप्तराघवपूजया पुनर्मत्सम्बन्ध इत्येवं तद्वचः स्मरन्तीत्यर्थः। स्वशिलात्वपरित्यागमात्रेण तु तस्मिन् रामत्वनिश्चयोऽस्याः। तौ रामपादौ प्रतिजग्राह स्पृष्ट्वा प्रणनाम। यत्तु तौ रामलक्ष्मणौ प्रतिजग्राह पूज्यत्वबुद्धिमकरोदिति तन्न, अग्रे काकुत्स्थ इत्येकवचनप्रयोगात् ॥ १८ ॥

सुसमाहिता अप्रमत्ता काकुत्स्थो रामः तस्यैव मुख्यतया पूजनात् ॥ १९ ॥

देवदुन्दुभिनिःस्वनैः सह पुष्पवृष्टिरासीत्, रामस्य अहल्यायाश्चेत्यर्थः ॥ २० ॥

रामपूजया निष्पापत्वाद् अहल्यायाः पूजा। तपोबलविशुद्धाङ्गीं तद्बलजन्यरामस्पर्शेन शुद्धाङ्गीम्। अतएव गौतमस्य वशां तद्गतचित्ताम्, अतएव पूर्वं परत्र काले शरीरेणापि तदनुगाम् ॥२१॥

रामं संपूज्य विधिवत् तपस्तेपे महातपाः ॥ २२ ॥

रामोऽपि परमां पूजां गौतमस्य महामुनेः ।

सकाशाद् विधिवत् प्राप्य जगाम मिथिलां ततः ॥ २३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे अहल्याशापविमोचनं नाम एकोनपञ्चाशः सर्गः ॥४९॥

अहल्यासहितः सुखीत्यनेन योगबलाद् रामागमनं ज्ञात्वा तद्बलादेव झटिति तदाश्रमप्राप्तिर्गौतमस्येति बोध्यम् ॥२२॥२३॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

पञ्चाशः सर्गः ।



ततः प्रागुत्तरां गत्वा रामः सौमित्रिणा सह ।
विश्वामित्रं पुरस्कृत्य यज्ञवाटमुपागमत् ॥ १ ॥
रामस्तु मुनिशार्दूलम् उवाच सहलक्ष्मणः ।
साध्वी यज्ञसमृद्धिर्हि जनकस्य महात्मनः ॥ २ ॥
बहूनीह सहस्राणि नानादेशनिवासिनाम् ।
ब्राह्मणानां महाभाग ! वेदाध्ययनशालिनाम् ॥३॥
ऋषिवाटाश्च दृश्यन्ते शकटीशतसङ्कुलाः ।
देशो विधीयतां ब्रह्मन् ! यत्र वत्स्यामहे वयम् ॥ ४ ॥
रामस्य वचनं श्रुत्वा विश्वामित्रो महामुनिः ।

प्रागुत्तराम् ऐशानीं ततः गौतमाश्रमात् ॥ १ ॥ २ ॥
बहूनीति । दृश्यन्त इति शेषः ॥ ३ ॥
शकटीशतम् अग्निहोत्रसम्भारवाहकम् । ऋषिवाटाः यज्ञार्थमागतानां साग्निहोत्रऋषीणां निवासाः । एवं नैविद्यात् कालासदेशविचारः । देश इत्यादि । देशो निवासस्थानं विधीयतां विचार्यताम् ॥ ४ ॥

निवासमकरोद् देशे विविक्ते सलिलान्विते ॥ ५ ॥
विश्वामित्रमनुप्राप्तं श्रुत्वा नृपवरस्तदा ।
शतानन्दं पुरस्कृत्य पुरोहितमनिन्दितः ॥ ६ ॥
ऋत्विजोऽपि महात्मानस्त्वर्घ्यमादाय सत्वरम् ।
प्रत्युज्जगाम सहसा विनयेन समन्वितः ॥ ७ ॥
विश्वामित्राय धर्मेण ददौ धर्मपुरस्कृतम् ।
प्रतिगृह्य तु तां पूजां जनकस्य महात्मनः ॥ ८ ॥
पप्रच्छ कुशलं राज्ञो यज्ञस्य च निरामयम् ।
स तांश्चाथ मुनीन् पृष्ट्वा सोपाध्यायपुरोधसः ॥ ९ ॥
यथार्हम् ऋषिभिः सर्वैः समागच्छत् प्रहृष्टवत् ।

विविक्ते सलिलान्विते इत्यनेनानुष्ठानसौकर्य्यम् ॥ ५ ॥ ६ ॥

ऋत्विजोऽपीत्यत्र पुरस्कृत्येत्यनुकर्षः । महात्मान इति द्वितीयार्थे व्यत्ययेन प्रथमा ॥ ७ ॥

धर्मेण शास्त्रमार्गेण ददौ अर्घ्यमिति शेषः । धर्मपुरस्कृतमित्यर्घ्यविशेषणम् । "महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्" इति शास्त्रोक्तेन धर्मसाधनेन पुरस्कृतं तत्सहितमिति यावत् ॥ ८ ॥

राज्ञः कुशलं निरामयं यज्ञस्य निरामयं कुशलं निर्विघ्नत्वमविकलत्वं वा यज्ञस्य कुशलं स विश्वामित्रः तान् अर्घ्यदातॄन् पृष्ट्वा कुशलमिति शेषः ॥ ९ ॥

यथार्हं यथान्यायम् । प्रहृष्टवत् प्रहर्षवत् तोषसहितं यथा

अथ राजा मुनिश्रेष्ठं कृताञ्जलिरभाषत ॥ १० ॥
आसने भगवानास्तां सहैभिर्मुनिपुङ्गवैः ।
जनकस्य वचः श्रुत्वा निषसाद महामुनिः ॥ ११ ॥
पुरोधा ऋत्विजश्चैव राजा च सह मन्त्रिभिः ।
आसनेषु यथान्यायमुपविष्टाः समन्ततः ॥ १२ ॥
दृष्ट्वा स नृपतिस्तत्र विश्वामित्रमथाब्रवीत् ।
अद्य यज्ञसमृद्धिर्मे सफला दैवतैः कृता ॥ १३ ॥
अद्य यज्ञफलं प्राप्तं भगवद्दर्शनान्-मया ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ! ॥ १४ ॥
यज्ञोपसदनं ब्रह्मन् ! प्राप्तोऽसि मुनिभिः सह ।
द्वादशाहं तु ब्रह्मर्षे ! दीक्षामाहुर्मनस्विनः *॥ १५ ॥

भवति तथेत्यर्थः । समागच्छत् सन्तोषसहितमालिङ्गनं यथा भवति तथा सर्वैः सङ्गतो बभूवेत्यर्थः ॥ १० ॥ ११ ॥ १२ ॥

यज्ञसमृद्धिरङ्गवैकल्यराहित्यं साद्गुण्यञ्च । अतएव सफला कृता ऋद्धिरिति शेषः ॥ १३ ॥ १४ ॥

---

* ——————————शेषमाहुर्मनीषिणः † ।

इति पाठान्तरः ।

---

† द्वादशाहं शेषं, द्वादशदिनानि अवशिष्टानि यज्ञस्येति ।

ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक ।
इत्युक्त्वा मुनिशार्दूलं प्रहृष्टवदनस्तदा ॥ १६ ॥
पुनस्तं परिपप्रच्छ प्राञ्जलिः प्रयतो नृपः ।
इमौ कुमारौ भद्रं ते देवतुल्यपराक्रमौ ॥ १७ ॥
गजसिंहगती वीरौ शार्दूलवृषभोपमौ ।
पद्मपत्रविशालाक्षौ खड्गतूणीधनुर्द्धरौ ।
अश्विनाविव रूपेण समुपस्थितयौवनौ ॥ १८ ॥
यदृच्छयैव गां प्राप्तौ देवलोकादिवामरौ ।
कथं पद्भ्यामिह प्राप्तौ किमर्थं कस्य वा मुने ! ॥ १९ ॥
वरायुधधरौ वीरौ कस्य पुत्रौ महामुने ! ।
भूषयन्ताविमं देशं चन्द्रसूर्याविवाम्बरम् ॥ २० ॥

तत्र हेतुमाह, यज्ञोपसदनमिति । यज्ञस्थानं द्वादशाहं द्वादशादिमानि दीक्षां कर्त्तव्यत्वेनाहुः । दीक्षायास्तावन्ति दिनान्यवशिष्टानि ऋत्विज आहुः ॥ १५ ॥

विश्वामित्रस्य योगेन सर्वसामर्थ्यादाह, देवान् द्रष्टुमर्हसीति॥१६॥

इमौ कुमारावित्यादि व्याख्यातप्रायम् ॥ १७ ॥ १८ ॥

पद्भ्याम् वाहनरहिताभ्यां पद्मपत्रकोमलत्वात् कथमेतत् दूरं प्राप्ताविति विस्मयः, किमर्थमिति प्रयोजनप्रश्नः कस्य वेति पुत्राविति शेषः । उत्तरश्लोको यदि प्रमाणं, तर्हि तस्यैव विवरणं बोध्यम् ।

परस्परस्य सदृशौ प्रमाणेङ्गितचेष्टितैः ।
काकपक्षधरौ वीरौ श्रोतुमिच्छामि तत्त्वतः * ॥ २१ ॥
तस्य तद् वचनं श्रुत्वा जनकस्य महात्मनः ।
निवेदयद् अमेयात्मा पुत्रौ दशरथस्य तौ ॥ २२ ॥
सिद्धाश्रमनिवासञ्च राक्षसानां बधं तथा ।
तत्रागमनमव्यग्रं विशालायाश्च दर्शनम् ॥ २३ ॥
अहल्यादर्शनं चैव गौतमेन समागमम् ।
महाधनुषि जिज्ञासां कर्त्तुमागमनं तथा ॥ २४ ॥

केचित् तु कस्येत्यस्य पुरुषस्य कार्य्यं साधयितुमिति शेषमाकलयन्ति। जनप्रश्नेनैव गतार्थम् ॥ १९ ॥ २० ॥ २१ ॥

निवेदयदिति पाठे अड्-अभाव आर्षः ॥ २२ ॥

तत्र अव्यग्रमागमनं रक्षःसमाक्रान्तेऽपि मार्गे भयरहितमागमनम् ॥ २३ ॥

महाधनुषि जिज्ञासां तद्विषयां रामस्य दिदृक्षां, ज्ञानमिह दर्शनरूपम्। यद्वा धनुर्निष्ठसारजिज्ञासाम् ॥ २४ ॥

---

* ———————कुमाराविव पावकौ ।
रूपौदार्य्यगुणैः पुंसां दृष्टिचित्तापहारकौ ।
प्रकाशय कुलमस्माकं मामुद्धर्तुमिहागतौ ॥ इति पाठान्तरम् ।

एतत् सर्वं महातेजा जनकाय महात्मने।

निवेद्य विररामाथ विश्वामित्रो महामुनिः ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

जनकसमागमो नाम पञ्चाशः

सर्गः ॥ ५० ॥

तथा हरस्य तस्य सज्यीकरणादिकञ्च कर्त्तुमागमनमित्येतत् सर्वं निवेद्य। "विरराम तदा" इति पाठेऽर्थश्चिन्त्यः ॥ २५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

एकपञ्चाशः सर्गः ।



तस्य तद् वचनं श्रुत्वा विश्वामित्रस्य धीमतः ।
हृष्टरोमा महातेजा शतानन्दो महातपाः ॥ १ ॥
गौतमस्य सुतो ज्येष्ठस्तपसा द्योतितप्रभः ।
रामसन्दर्शनादेव परं विस्मयमागतः ॥ २ ॥
एतौ निषण्णौ संप्रेक्ष्य शतानन्दो नृपात्मजौ ।
सुखासीनौ मुनिश्रेष्ठं विश्वामित्रमथाब्रवीत् ॥ ३ ॥
अपि ते मुनिशार्दूल ! मम माता यशस्विनी ।
दर्शिता राजपुत्राय तपोदीर्घमुपागता ? ॥ ४ ॥
अपि रामे महाभागा मम माता यशस्विनी ।

तस्येति । हृष्टरोमा स्वमातुः शापोद्धारश्रवणजसन्तोषेण आत-रोमाञ्चः ॥ १ ॥

परं विस्मयम् इति भगवद्दर्शनस्य अन्यासुलभत्वात् ॥ २ ॥

निषस्नावासने ॥ ३ ॥

उक्तमप्यर्थमुत्कण्ठातिशयेन पुनः पृच्छति,—दार्श्याय अपि ते इति । अपिः प्रश्ने । ते त्वया ॥ ४ ॥

वन्यैरुपाहरत् पूजां पूजार्हे सर्वदेहिनाम् ? ॥ ५ ॥
अपि रामाय कथितं यद् वृत्तं तत् पुरातनम् ।
मम मातुर्महातेजो ! दैवेन दुरनुष्ठितम् ? ॥ ६ ॥
अपि कौशिक ! भद्रं ते गुरुणा मम सङ्गता ।
मम माता मुनिश्रेष्ठ ! रामसन्दर्शनादितः ? ॥ ७ ॥
अपि मे गुरुणा रामः पूजितः कुशिकात्मज ! ।
इहागतो महातेजाः पूजां प्राप्य महात्मनः ? ॥ ८ ॥
अपि शान्तेन मनसा गुरुर्मे कुशिकात्मज ! ।
इहागतेन रामेण पूजितेनाभिवादितः ? ॥ ९ ॥

रामे रामविषये पूजार्हे इति रामविशेषणम् ॥ ५ ॥

दैवेन इन्द्रेण दुरनुष्ठितं गौतमवेषधारणपूर्वकं तत्कर्तृकदुरनुष्ठानरूपं मातुर्यद् वृत्तं चरितं पुरातनं, तद् रामाय कथितमित्यन्वयः । महातेज इति विश्वामित्रसम्बोधनम् ॥ ६ ॥

मम गुरुणा मम मातेत्यन्वयः । अत्र वारद्वयं ममेति प्रयोगो हर्षातिशयात् । रामसन्दर्शनादित इत्यस्य गतशापेति शेषः । आदिना पूजापादस्पर्शौ ॥ ७ ॥

महातेजा रामः मद्गुरोः सकाशात् पूजां प्राप्य इह यज्ञभूमावागतः ? इति पृष्टस्यैवार्थस्य भङ्ग्यन्तरेण प्रश्नः ॥ ८ ॥

शान्तेन मनसा उपलक्षितो मे गुरुरिहागतेन गौतमाश्रमे आगतेन गौतमपूजितेन रामेणाभिवादितः । न तु मन्मातृदोषात्

तत् श्रुत्वा वचनं तस्य विश्वामित्रो महामुनिः ।
प्रत्युवाच शतानन्दं वाक्यज्ञो वाक्यकोविदम् ॥ १० ॥
नातिक्रान्तं मुनिश्रेष्ठ ! यत् कर्त्तव्यं कृतं मया ।
सङ्गता मुनिना पत्नी भार्गवेणेव रेणुका ॥ ११ ॥
तत् श्रुत्वा वचनं तस्य विश्वामित्रस्य धीमतः ।
शतानन्दो महातेजा रामं वचनमब्रवीत् ॥ १२ ॥
स्वागतं ते नरश्रेष्ठ ! दिष्ट्या प्राप्तोऽसि राघव ! ।
विश्वामित्रं पुरस्कृत्य महर्षिमभिपूजितम् ॥ १३ ॥
अचिन्त्यकर्मा तपसा ब्रह्मर्षिरमितप्रभः ।
विश्वामित्रो महातेजा वेत्स्येनं परमां गतिम् ॥ १४ ॥

विस्मृत इति प्रश्नान्तरम् । पूजाङ्गीकारबन्दने अतिरस्कारचिह्न-मिति भावः ॥ ९ ॥ १० ॥

यत् कर्त्तव्यं तन्नातिक्रान्तं न विस्मृतं, किन्तु मया कृतमेवेत्यर्थः । भार्गवो जमदग्निः तत्कोपहृता रेणुका परशुराममाता यथा जम-दग्निना सङ्गता तद्वदित्यर्थः ॥ ११ ॥ १२ ॥

दिष्ट्या भाग्येन ॥ १३ ॥

विश्वामित्रयत्नत एव तेन सह प्राप्तिः, तत एव च मातुः शापो-द्धार इति तं स्तौति अचिन्त्येत्यादिना,—मनसाप्यन्येनाशक्यचिन्तन-मतिसृष्ट्यादिकर्त्ता । परमाकृतिं जगतः परमहितप्रदम् । अन्ये तव मम चेत्याहुः ॥ १४ ॥

नास्ति धन्यतरो राम ! त्वत्तोऽन्यो भुवि कश्चन ।
गोप्ता कुशिकपुत्रस्ते येन तप्तं महत् तपः ॥ १५ ॥
श्रूयतां चाभिधास्यामि कौशिकस्य महात्मनः ।
यथाबलं यथातत्त्वं तन्मे निगदतः शृणु ॥ १६ ॥
राजासीदेष धर्मात्मा दीर्घकालमरिन्दमः ।
धर्मज्ञः कृतविद्यश्च प्रजानां च हिते रतः ॥ १७ ॥
प्रजापतिसुतस्त्वासीत् कुशो नाम महीपतिः ।
कुशस्य पुत्रो बलवान् कुशनाभः सुधार्मिकः ॥ १८ ॥
कुशनाभसुतस्त्वासीत् गाधिरित्येव विश्रुतः ।
गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः ॥ १९ ॥
विश्वामित्रो महातेजाः पालयामास मेदिनीम् ।
बहुवर्षसहस्राणि राजा राज्यमकारयत् ॥ २० ॥
कदाचित् तु महातेजा योजयित्वा वरूथिनीम् ।
अक्षौहिणीपरिवृतः परिचक्राम मेदिनीम् ॥ २१ ॥

गोप्ता अन्नदानादिना ॥ १५ ॥

बलं तपोबलं यथा यादृशं तत्त्वं ब्रह्मर्षित्वञ्च यथा तत् शृणु इत्यर्थः । "वृत्तम्" इति क्वचित् पाठः । वृत्तं चरितम् ॥ १६ ॥ १७ ॥

स राजा कस्य पुत्रस्तत्राह,—प्रजापतीत्यादि ॥ १८ ॥ १९ ॥

अकारयत्, स्वार्थे णिः ॥ २० ॥

नगराणि च राष्ट्राणि सरितश्च महागिरीन् ।
आश्रमान् क्रमशो राजा विचरन्नाजगाम ह ॥ २२ ॥
वसिष्ठस्याश्रमपदं नानापुष्पलताद्रुमम् ।
नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥ २३ ॥
देवदानवगन्धर्वैः किन्नरैरुपशोभितम् ।
प्रशान्तहरिणाकीर्णं द्विजसङ्घनिषेवितम् ॥ २४ ॥
ब्रह्मर्षिगणसङ्कीर्णं देवर्षिगणसेवितम् ।
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ॥ २५ ॥
सततं संकुलं श्रीमद् ब्रह्मकल्पैर्महात्मभिः ।
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ॥ २६ ॥
फलमूलाशनैर्दान्तैर्जितदोषैर्जितेन्द्रियैः ।

वरूथिनीं चतुरङ्गबलं योजयित्वा समुपस्थाय तद्रूपाक्षौहिणी-संख्यसेनापरिवृतो भूत्वा ॥ २१ ॥ २२ ॥ २३ ॥

तपोऽतिशयात् प्रशान्तहरिणत्वम् ॥ २४ ॥

ज्ञानमात्राधिकृतनारदाद्या देवलोकसञ्चारिणो देवर्षयः ज्ञान-कर्मोभयाधिकृता ब्रह्मर्षयो भूप्रतिष्ठा । अग्नितुल्यैर्ऋषिभिः सङ्कुलं व्याप्तमित्यन्वयः ॥ २५ ॥

तथा ब्रह्मकल्पैः चतुर्मुखतुल्यैः तस्येव सहजतपोवैभवात् अब्भक्षादिभिः संकुलम् ॥ २६ ॥

ऋषिभिर्बालखिल्यैश्च जपहोमपरायणैः ॥ २७ ॥

अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम् ।

वसिष्ठस्याश्रमपदं ब्रह्मलोकमिवापरम् ।

ददर्श जयतां श्रेष्ठो विश्वामित्रो महाबलः ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्रप्रभावकीर्त्तने विश्वामित्रेण वसिष्ठाश्रमगमनं नाम एकपञ्चाशः सर्गः ॥५१॥

ब्रह्मरोमनखजा बालखिल्या वैखानसाश्च । "ये नखास्ते वैखानसा, ये बालास्ते बालखिल्याः" इति श्रुतिरिति कतकः ॥ २७ ॥

परमकल्याणस्वभावत्वाद् ब्रह्मलोकोपमाश्रमस्य । जयतां शूराणाम् ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

द्विपञ्चाशः सर्गः ।

तं दृष्ट्वा परमप्रीतो विश्वामित्रो महाबलः ।
प्रणतो विनयाद्वीरो वसिष्ठं जपतां वरम् ॥ १ ॥
स्वागतं तव चेत्युक्तो वसिष्ठेन महात्मना ।
आसनं चास्य भगवान् वसिष्ठो आदिदेश ह ॥ २ ॥
उपविष्टाय च तदा विश्वामित्राय धीमते
यथान्यायं मुनिवरः फलमूलमुपाहरत् ॥ ३ ॥
प्रतिगृह्य च तां पूजां वसिष्ठाद्राजसत्तमः ।
तपोऽग्निहोत्रशिष्येषु कुशलं पर्यपृच्छत ।
विश्वामित्रो महातेजा वनस्पतिगणे तदा ॥ ४ ॥
सर्वत्र कुशलं प्राह वसिष्ठो राजसत्तमम् ॥ ५ ॥

वसिष्ठं प्रणतो वसिष्ठेन स्वागतमिति उक्तश्चेति योजना ॥ १ ॥
आदिदेश अदापयत् ॥ २ ॥
फलमूलमिति जातित्वादेकवत्त्वम् ॥ ३ ॥
वनस्पतिशब्देन वृक्षमात्रं, न तु विना पुष्पं फलवन्तस्त एव । तद्विषयेऽपि कुशलं पर्यपृच्छत । सर्वत्र तत्प्रश्नसर्वविषये ॥ ४ ॥ ५ ॥

सुखोपविष्टं राजानं विश्वामित्रं महातपाः ।
पप्रच्छ जपतां श्रेष्ठो वसिष्ठो ब्रह्मणः सुतः ॥ ६ ॥
कच्चित् ते कुशलं राजन् ! कच्चिद्-धर्मेण रञ्जयन् ।
प्रजाः पालयसे राजन् ! राजवृत्तेन ? धार्मिक ! ॥ ७ ॥
कच्चित् ते सम्भृता भृत्याः कच्चित् तिष्ठन्ति शासने ।
कच्चित् ते विजिताः सर्वे रिपवो ? रिपुसूदन ! ॥ ८ ॥
कच्चित् बलेषु कोशेषु मित्रेषु च परन्तप ! ।
कुशलं ते नरव्याघ्र ! पुत्रपौत्रे ? तथानघ ! ॥ ९ ॥
सर्वत्र कुशलं राजा वसिष्ठं प्रत्युदाहरत् ।
विश्वामित्रो महातेजा वसिष्ठं विनयान्वितः ॥ १० ॥

जपतां तपस्विनाम् ॥ ६ ॥

कच्चिदिति प्रश्ने । हे धार्मिक ! धर्मेण तदनुष्ठानेन प्रजा रञ्जयन् ; राजवृत्तेन न्यायेन अर्जितमर्थस्य—"वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ।" इत्युक्तेन राजवृत्तेन पालयसे इत्यन्वयः ॥ ७ ॥

संभृताः वेतनदानादिना ॥ ८ ॥

बलेषु चतुरङ्गेषु, कोशेषु अर्थसमूहेषु, पुत्रपौत्रे गवाश्वप्रभृतित्वाद् एकवत्त्वम् ॥ ९ ॥

एको वसिष्ठशब्दो वरिष्ठवाची ॥ १० ॥

कृत्वा तौ सुचिरं कालं धर्मिष्ठौ ताः कथास्तदा ।
मुदा परमया युक्तौ प्रीयेतां तौ परस्परम् ॥ ११ ॥
ततो वसिष्ठो भगवान् कथान्ते रघुनन्दन ! ।
विश्वामित्रमिदं वाक्यम् उवाच प्रहसन्निव ॥ १२ ॥
आतिथ्यं कर्तुमिच्छामि बलस्यास्य महाबल ! ।
तव चाप्रमेयस्य यथार्हं संप्रतीच्छ मे ॥ १३ ॥
सत्क्रियां हि भवानेतां प्रतीच्छतु मया कृताम् ।
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥ १४ ॥
एवमुक्तो वसिष्ठेन विश्वामित्रो महामुनिः ।
कृतमित्यब्रवीद् राजा पूजावाक्येन मे त्वया ॥ १५ ॥
फलमूलेन भगवन् ! विद्यते यत् तवाश्रमे ।
पाद्येनाचमनीयेन भगवद्-दर्शनेन च ॥ १६ ॥

तौ उक्तविशेषणकौ वसिष्ठविश्वामित्रौ ताः कथाः अन्योन्य-कुशलप्रश्नोत्तरादिरूपाः । प्रीयेताम् अड्-अभाव आर्षो लङि ॥११॥

प्रहसन्निव उत्तमातिथिलाभजहर्षेण ॥ १२ ॥

संप्रतीच्छ मे मत्कृतम् आतिथ्यमङ्गीकुरु ॥ १३ ॥

हेतुगर्भं विशेषणम्, अतिथिश्रेष्ठ इति ॥ १४ ॥

पूजावाक्येन आतिथ्यं करिष्यामीत्येवंरूपेणैव मम पूजनं कृत-मिति राजाब्रवीत् ॥ १५ ॥

सर्व्वथा च महाप्राज्ञ ! पूजार्हेण सुपूजितः ।
नमस्तेऽस्तु गमिष्यामि मैत्रेणेक्षस्व चक्षुषा ॥ १७ ॥
एवं ब्रुवन्तं राजानं वसिष्ठः पुनरेव हि ।
न्यमन्त्रयत धर्म्मात्मा पुनःपुनरुदारधीः ॥ १८ ॥
बाढ़मित्येव गाधेयो वसिष्ठं प्रत्युवाच ह ।
यथाप्रियं भगवतस्तथास्तु मुनिपुङ्गव ! ॥ १९ ॥
एवमुक्तस्तथा तेन वसिष्ठो जपतां वरः ।
आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषाम् ॥ २० ॥
एह्येहि शवले ! क्षिप्रं शृणु चापि वचो मम ।
सबलस्यास्य राजर्षेः कर्त्तुं व्यवसितोऽस्म्यहम् ॥ २१ ॥

विद्यते यत् तवाश्रमे फलमूलं तेन पूजित इत्यनेन राजभोज्या-भावात् अनेनैव वयं सन्तुष्टा इति ध्वनिः ॥ १६ ॥

पूजार्हेण त्वयेति शेषः । मैत्रेण स्नेहयुक्तेन । मत्वर्थो याज-न्तम् ॥ १७ ॥

निमन्त्रणं भोजनाङ्गीकाराय प्रार्थनम् ॥ १७ ॥

बाढ़मित्यस्य विवरणं, यथाप्रियमित्यादि ॥ १९ ॥

तेन विश्वामित्रेण कल्माषीं चित्रवर्णां होमधेनुम् ॥ २० ॥

शवले तन्नामे ! । अस्य राजर्षेर्महार्हेण भोजने सत्कारं कर्त्तुं व्यवसितोऽस्मि उद्युक्तोऽस्मि ; तं मे व्यवसायं संविधत्स्व सम्पादय तदुपयोगिपदार्थदानेनेति शेषः ॥ २१ ॥

भोजनेन महार्हेण सत्कारं संविधत्स्व मे ।
यस्य यस्य यथाकामं षड्-रसेष्वभिपूजितम् ॥ २२ ॥
तत्सर्व्वं कामधुग् दिव्ये ! अभिवर्ष कृते मम ।
रसेनान्नेन पानेन लेह्यचोष्येण संयुतम् ।
अन्नानां निचयं सर्व्वं सृजस्व शबले ! त्वर ॥ २३ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्रप्रभावकीर्त्तने विश्वामित्रनिमन्त्रणं नाम द्विपञ्चाशः सर्गः ॥ ५२ ॥

षड् रसेषु मधुरादिषु यस्य यस्य यदभिपूजितम् अभीष्टम् ॥ २२ ॥ तत् सर्वं यथाकामं तत्प्रीत्यनतिक्रमेण मम कृते मत्तोषार्थं रसेन अन्नेन रसयुक्तान्नेन भक्ष्यशष्कुल्यादिना रसेनेति सर्वान्वयि-पानेन पानकरसादिना लेह्यं जिह्वयाह्यं, क्षौद्रादि चोष्यम्, अधरपुटग्राह्यम् आम्रफलादि, अन्नानां शाल्यन्नादीनां निचयं राशिम् ॥ २३ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

त्रिपञ्चाशः सर्गः ।

एवमुक्ता वसिष्ठेन प्रययौ ... ।
विदधे कामधुक् कामान् यस्य यस्येप्सितं यथा ॥ १ ॥
इक्षून् मधूंस्तथा लाजान् मैरेयांश्च वरासवान् ।
पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि ॥ २ ॥
उष्णाढ्यस्योदनस्यापि राशयः पर्वतोपमाः ।
मृष्टान्नानि च सूपांश्च दधिकुल्यास्तथैव च ॥ ३ ॥
नानास्वादुरसानाञ्च खाण्डवानां तथैव च ।

यस्य यस्य यथा यथेप्सितं तथा तथा सर्वान् कामान् विदधे ... ॥ १ ॥

तदेव प्रपञ्चयति,—इक्षूनिति । सविकारान् इक्षून् मधून् क्षौद्राणि । मैरेयस्तु धातकी धातकी गुडादिभिः कृतं मद्यम् । भक्ष्यान् पूपादीन् उच्चावचान् अनेकविधान् ॥ २ ॥

उष्णाढ्यस्य उष्णत्वगुणयुक्तस्य राशयः ...न्निति शेषः । मृष्टानि ...नि ...भेदाः दधिकुल्याः ... दध्यादेरपि ॥ ३ ॥

अनेकविधस्वादुरसयुक्तानां खाण्डवानां भक्ष्यविशेषाणाम् ।
... भोजनानि भोजनपात्राणि गौडानि ।

भोजनानि * सुपूर्णानि गौडानि च सहस्रशः ॥ ४ ॥
सर्वमासीत् सुसन्तुष्टं हृष्टपुष्टजनायुतम् ।
विश्वामित्रबलं राम ! वसिष्ठेन सुतर्पितम् ॥ ५ ॥
विश्वामित्रो हि राजर्षिर्हृष्टपुष्टस्तदाभवत् ।
सान्तःपुरवरो राजा सब्राह्मणपुरोहितः ॥ ६ ॥
सामात्यो मन्त्रिसहितः सभृत्यः पूजितस्तदा ।
युक्तः परमहर्षेण वसिष्ठमिदमब्रवीत् ॥ ७ ॥
पूजितोऽहं त्वया ब्रह्मन् ! पूजार्हेण सुसत्कृतः ।
श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ! ॥ ८ ॥
गवां शतसहस्रेण दीयतां शबला मम ।

राजतानि आसन्निति शेषः । रजते गुड इत्यभिधानमिति कतक-कृत ॥ ४ ॥

हर्षश्चित्तसन्तोषः, पुष्टिर्देहपुष्टिस्तद्युक्तजनैरासमन्तात् युक्तम् ॥५॥

अन्तःपुरश्रेष्ठैः सहितः ॥ ६ ॥

अमात्याः कर्मसचिवाः, मन्त्रिणो मन्त्रस्य सचिवाः । पूजितः आतिथ्येन सत्कृतः ॥ ७ ॥

पूजार्हेण मादृशपूजाकरणयोग्येन । पूजित इत्यस्यैव विवरणम्, आदरातिशयद्योतनाय सुसत्कृत इति । हर्षाद् वा पुनरुक्तिदोषः ॥ ८ ॥

* "भाजनानि" इति पाश्चात्याः ।

रत्नं हि भगवन्नेतद् रत्नहारी च पार्थिवः ॥ ९ ॥
तस्मान्मे शबलां देहि ममैषा धर्मतो द्विज ।
एवमुक्तस्तु भगवान् वासिष्ठो मुनिपुङ्गवः ॥ १० ॥
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ।
नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ॥ ११ ॥
राजन् दास्यामि शबलां राशिभी रजतस्य वा ।
न परित्यागमर्हेयं मत्सकाशादरिन्दम ॥ १२ ॥
शाश्वती शबला मह्यं कीर्तिरात्मवतो यथा ।
अस्यां हव्यञ्च कव्यञ्च प्राणयात्रा तथैव च ॥ १३ ॥
आयत्तमग्निहोत्रञ्च बलिर्होमस्तथैव च ।
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा ।

अतस्त्वयैषा मह्यमर्पणीयेति शेषः ॥ ९ ॥

धर्मतः न्यायतः, पार्थिवस्य रत्नहारित्वात् रत्नरूपत्वाच्च ममैषा योग्येति शेषः ॥ १० ॥ ११ ॥ १२ ॥

कुतः स्वयं परित्यागं नार्हसि इत्यत आह,—शाश्वतीति । यथा आत्मवतो राजयोगवतो विद्यादिजा कीर्तिः शाश्वती नित्यसम्बद्धा । एवं मह्यं ब्रह्मदत्ता शबला नित्यं मत्सम्बद्धा । एवमादरे बीजमाह,—हव्यं दैवं, कव्यं पित्र्यम् । प्राणयात्रा जीवनम् ॥ १३ ॥

आयत्तमत्र राजर्षे! सर्व्वमेतन्न संशयः ॥ १४ ॥
सर्व्वस्वमेतत् सत्येन मम तुष्टिकरी तथा ।
कारणैर्बहुभी राजन्! न दास्ये शबलां तव ॥ १५ ॥
वसिष्ठेनैवमुक्तस्तु विश्वामित्रोऽब्रवीत् तदा ।
संरब्धतरमत्यर्थं वाक्यं वाक्यविशारदः ॥ १६ ॥
हैरण्यकक्ष्याग्रैवेयान् सुवर्णाङ्कुशभूषितान् ।
ददामि कुञ्जराणां ते सहस्राणि चतुर्द्दश ॥ १७ ॥
हैरण्यानां रथानाञ्च श्वेताश्वानां चतुर्युजाम् ।
ददामि ते शतान्यष्टौ किङ्किणीकविभूषितान् ॥ १८ ॥

आयत्तमधीनम् । बलिर्भूतबलिः, होमा वस्वरवादिः । आयत्त इत्यस्य सर्वत्रानुकर्षः । स्वाहाकारवषट्कारौ तत्साध्ययज्ञौ । विद्या इति । एतत्पयःप्राशनेन चित्तशुद्धिः प्रागल्भ्यदेहपाटवाच्च तत्साध्यविद्यानाम् एतदायत्तत्वम् एतत् सर्वम् आतिथ्यादि ॥ १४ ॥

एतत् शबलारूपमेव मे सर्वस्वं, सत्येन शपे इति शेषः । तथा दर्शनादिना मम तुष्टिकरी च । कारणैर्बहुभिः साभिप्रायं चेतद् बोध्यम् ॥ १५ ॥

संरब्धतरमत्याग्रहयुक्तम् । हैरण्याः हिरण्यविकाराः । कक्षाः पृष्ठोपितमध्यबन्धनार्थपट्टरज्जवः ग्रैवेयं ग्रीवालङ्कारपट्टरज्ज्वादि ॥ १६ ॥ १७ ॥

श्वेताश्वानां चतुर्युजां चतुःसङ्ख्यकश्वेताश्वयुक्तानाम् इत्यर्थः ।

हयानां देशजातानां कुलजानां महौजसाम् ।
सहस्रमेकं दश च ददामि तव सुव्रत ! ॥ १८ ॥
नानावर्णविभक्तानां वयस्थानां तथैव च ।
ददाम्येकां गवां कोटिं शबला दीयतां मम ॥ २० ॥
यावदिच्छसि रत्नानि हिरण्यं वा द्विजोत्तम ! ।
तावद् ददामि ते सर्वं दीयतां शबला मम ॥ २१ ॥
एवमुक्तस्तु भगवान् विश्वामित्रेण धीमता ।
न दास्यामीति शबलां प्राह राजन् ! कथञ्चन ॥ २२ ॥
एतदेव हि मे रत्नमेतदेव हि मे धनम् ।
एतदेव हि सर्वस्वमेतदेव हि जीवितम् ॥ २३ ॥
दर्शश्च पौर्णमासश्च यज्ञाश्चैवाप्तदक्षिणाः ।

आर्षः समासः, हयानामिति पाठः । कोटिशीकाविभूषितानिति षष्ठ्यर्थे द्वितीया, रथानां विशेषणमेतत् ॥ १८ ॥

देशो बाह्लीकादि, कुलमुच्चैःश्रवआदीनां, गन्धर्वकुलं वा । गन्धर्वकुलजातत्वमिति पुराणवचनात् ॥ १९ ॥

अनेकवर्णविभक्तानां प्राप्तभेदानां वयस्थानां तरुणीनां "वयस्थस्तरुणो युवा" इति कोशात् एका कोटिमित्यन्वयः ॥ २० ॥

यावदिति इतोऽप्यधिकं वा यावदिच्छसीत्यर्थः ॥ २१ ॥ २२ ॥

एतत् शबलाख्यं वस्तु ॥ २३ ॥

एतदेव हि मे राजन् ! विविधाश्च क्रियास्तथा ॥ २४ ॥
अतोमूला क्रियाः सर्वाः मम राजन् ! न संशयः ।
बहुना किं प्रलापेन न दास्ये कामदोहिनीम् ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने वसिष्ठविश्वामित्रसंवादो नाम
त्रिपञ्चाशः सर्गः ॥ ५३ ॥

आहरणिका इत्यनेन इत्यादिवद् दक्षिणापि एतदधीनेति सूचितम् ॥ २४ ॥

एतदेव क्रिया, इत्यस्यैव विवरणम्,—अतोमूलाः एतन्मूला इत्यर्थः । सर्वथा दानाभावे हेतुगर्भं विशेषणं कामदोहिनीम् इच्छाविषयदोहनशीलां, काव्यलिङ्गमलङ्कारः ॥ २५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

चतुःपञ्चाशः सर्गः ।



कामधेनुं वसिष्ठोऽपि यदा न त्यजते मुनिः ।
तदास्य शबलां राम ! विश्वामित्रोऽन्वकर्षत ॥ १ ॥
नीयमाना तु शबला राम ! राज्ञा महात्मना ।
दुःखिता चिन्तयामास रुदन्ती शोककर्षिता ॥ २ ॥
परित्यक्ता वसिष्ठेन किमहं सुमहात्मना ।
याहं राजभृतैर्दीना ह्रियेय भृशदुःखिता ॥ ३ ॥
किं मयापकृतं तस्य महर्षेर्भावितात्मनः ।
यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्मिकः ॥ ४ ॥
इति सञ्चिन्तयित्वा तु निश्वस्य च पुनः पुनः ।
जगाम वेगेन तदा वसिष्ठं परमौजसम् ॥ ५ ॥

अथ दण्डोपायप्रवृत्तिमाह,—कामधेनुमिति । न त्यजते नात्यजत् । अन्वकर्षद् बलादिति शेषः ॥ १ ॥ २ ॥

राजभृतैः राजसेवकैः । "भटैः" इति क्वचित् पाठः । [illegible] [illegible] लिङ् । भृशदुःखिता भृशेन अतिशयेन दुःखितास्मीति [illegible] भृशशब्दो बहुपर्य्यायो वा ॥ ३ ॥

अपकृतं अपराधम् । दृष्ट्वा ज्ञात्वापि । भक्तां [illegible] ॥ ४ ॥

निर्धूय तांस्तदा भृत्यान् शतशः शत्रुसूदन ।
जगामानिलवेगेन पादमूलं महात्मनः ॥ ६ ॥
शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् ।
वसिष्ठस्याग्रतः स्थित्वा रुदन्ती मेघनिस्वना ॥ ७ ॥
भगवन् ! किं परित्यक्ता त्वयाहं ब्रह्मणः सुत ! ।
यस्माद् राजभटा मां हि नयन्ते त्वत्सकाशतः ॥ ८ ॥
एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् ।
शोकसन्तप्तहृदयां स्वसारमिव दुःखिताम् ॥ ९ ॥
न त्वां त्यजामि शबले ! नापि मेऽपकृतं त्वया ।
एष त्वां नयते राजा बलान्मत्तो महाबलः ॥ १० ॥
न हि तुल्यं बलं मह्यं राजा त्वद्य विशेषतः ।

शबली भृत्यान् स्वकर्षकान् । पादमूलं पादसमीपम् । महात्मनो वसिष्ठस्य ॥ ६ ॥

[illegible] । क्रोशनमार्तशब्दः । रुदन्ती एव ऋषि-समीपमागतम् । [illegible] ॥ ७ ॥

सकाशः समीपम् ॥ ८ ॥

स्वसा भगिनी ॥ ९ ॥

[illegible] । मत्तोऽपि [illegible] ॥ १० ॥

मह्यं मे । न हि [illegible]

बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च ॥ ११ ॥
इयमक्षौहिणी पूर्णा * गजवाजिरथाकुला ।
हस्तिध्वजसमाकीर्णा तेनासौ बलवत्तरः ॥ १२ ॥
एवमुक्ता वसिष्ठेन प्रत्युवाच विनीतवत् ।
वचनं वचनज्ञा सा ब्रह्मर्षिममितप्रभम् ॥ १३ ॥
न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः ।
ब्रह्मन्! ब्रह्मबलं दिव्यं क्षात्राच्च बलवत्तरम् ॥ १४ ॥

इच्छागतां तदाह,—राजा त्वित्यादि । राजत्वात्तु तपोबलेन न वध्य इति भावः । तदुक्तं किष्किन्धायां,—

"दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ।
राजानो वानरश्रेष्ठ! प्रदातारो न संशयः ॥
तान् न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् ।
देवा मानुषरूपेण चरन्त्येते महीतले ॥"

इति । अथ विशेषतः अवध्य इति शेषः । अथ ज्ञातातिथ्यके हि मे येनातिथित्वाद् विशेषतोऽवध्य इति भावः । बली राजेत्यनेन दुराधर्षत्वमुक्तम् । पृथिवीपतिक्षत्रियत्वेन तद्वधस्य महापातकत्वमप्यबोधितम् ॥ ११ ॥

बलित्वमेव उपपादयति,—इयमिति । [illegible] ॥ १२ ॥

विनीतवत् विनयान्वितम् ॥ १३ ॥

* "हिता" इति पाठान्तरम् ।

अप्रमेय बलं तुभ्यं न त्वया बलवत्तरः ।
विश्वामित्रो महावीर्यस्तेजस्तव दुरासदम् ॥ १५ ॥
नियुङ्क्ष्व मां महातेजस्त्वं ब्रह्मबलसंभृताम् ।
तस्य दर्पं बलं यत्नं नाशयामि दुरात्मनः ॥ १६ ॥
इत्युक्तस्तु तया राम ! वसिष्ठस्तु महायशाः ।
सृजस्वेति तदोवाच बलं परबलार्दनम् ॥ १७ ॥
तस्य तद् वचनं श्रुत्वा सुरभिः सासृजत् तदा ।
तस्या हुम्भा-रवोत्सृष्टाः पह्लवाः शतशो नृप ! ॥ १८ ॥
नाशयन्ति बलं सर्वं विश्वामित्रस्य पश्यतः ।
स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः ॥ १९ ॥

न बलं अल्पबलम् । बलवत्तराः क्षत्रियादिभ्यः । ब्राह्मात् क्षत्रियबलादपि बलवत्तरम् अधिकम् ॥ १४ ॥

तुभ्यं तव न त्वया सदृशोऽपीति शेषः । बलवत्तर इति दूरे इति शेषः । महावीर्यः महावीर्योऽपि तव हेतुस्तेजस्तव इत्यादि ॥ १५ ॥

ननु त्वमेव तस्य बलं नाशय, तत्राह,—नियुङ्क्ष्वेति । कामधेनुत्वात् नियोगापेक्षा, परकार्यार्थसृष्टत्वेन तस्याः सामर्थ्यात् । ब्रह्मबलसंभृतां तादृशकार्यसमर्थत्वेन मां ध्यात्वेत्यर्थः ॥ १६ ॥ १७ ॥

हुम्भा नाम गवां शब्दाः । पह्लव-शक-यवन-काम्बोज-बर्बरा म्लेच्छजातिविशेषाः ॥ १८ ॥

पह्लवान् मायया ... शस्त्रैरुच्चावचैरपि ।
विश्वामित्रार्दितान् दृष्ट्वा पह्लवान् शतशस्तदा ॥ २० ॥
भूय एवासृजद् घोरान् शकान् यवनमिश्रितान् ।
तैरासीत् संवृता भूमिः शकैर्यवनमिश्रितैः ॥ २१ ॥
प्रभावद्भिर्महावीर्यैर्हेमकिञ्जल्कसन्निभैः ।
तीक्ष्णासिपट्टिशधरैर्हेमवर्णाम्बरावृतैः ॥ २२ ॥
निर्दग्धं तद् बलं सर्वं प्रदीप्तैरिव पावकैः ।
ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह ॥ २३ ॥
तैस्ते यवनकाम्बोजा बर्बराश्चाकुलीकृताः ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने विश्वामित्रेण वसिष्ठबलसम्मार्दनं
नाम चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पश्यत इत्यनादरे षष्ठी । विस्फारितं विस्तृतम् ॥ १९ ॥
अर्दिताः पीडिताः ॥ २० ॥ २१ ॥
प्रभा दुर्निरीक्ष्यं तेजः । हेम्नः किञ्जल्कस्य च सदृशैः । हेमवर्णाम्बरं पीताम्बरम् ॥ २२ ॥ २३ ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे चतुःपञ्चाशः सर्गः ॥ ५४ ॥

पञ्चपञ्चाशः सर्गः।



ततस्तानाकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान्।
वसिष्ठश्चोदयामास कामधुक्! सृज योगतः॥ १॥
तस्या हुङ्कारतो जाताः काम्बोजा रविसन्निभाः।
ऊधसस्त्वथ सम्भूता बर्बराः शस्त्रपाणयः॥ २॥
योनिदेशाच्च यवनाः शकृद्देशात् शकाः स्मृताः।
रोमकूपेषु म्लेच्छाश्च हारीताः स-किरातकाः॥ ३॥
तैस्तन्निषूदितं सर्वं विश्वामित्रस्य तत्क्षणात्।
स-पदाति-गजं साश्वं सरथं रघुनन्दन! ॥ ४॥
दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना।
विश्वामित्रसुतानां तु शतं नानाविधायुधम्॥ ५॥

आकुलान् पलायमानान्। कामधुगिति सम्बोधनम्। योगतः योगमहिम्ना॥ १॥ २॥

रोमकूपेषु रोमकूपेभ्यः म्लेच्छा, हारीताः किरातजातिविशेषाः॥ ३॥

विश्वामित्रस्य तत् सैन्यम्॥ ४॥

विश्वामित्रसुतानां शतं, ऋषिरेव धेनोर्बलम् अतोऽयमेव नाशनीय इत्याशयेन वसिष्ठमभ्यधावत्॥ ५॥

अभ्यधावत् सुसंक्रुद्धं वसिष्ठं जपतां वरम् ।
हुङ्कारेणैव तान् सर्वान् निर्ददाह महानृषिः ॥ ६ ॥
ते साश्वरथपादाता वसिष्ठेन महात्मना ।
भस्मीकृता मुहूर्त्तेन विश्वामित्रसुतास्तथा ॥ ७ ॥
दृष्ट्वा विनाशितान् सर्वान् बलं च सुमहायशाः ।
सव्रीडं चिन्तयाविष्टो विश्वामित्रोऽभवत् तदा ॥ ८ ॥
समुद्र इव निर्वेगो भग्नदंष्ट्र इवोरगः ।
उपरक्त इवादित्यः सद्यो निष्प्रभतां गतः ॥ ९ ॥
हतपुत्रबलो दीनो लूनपक्ष इव द्विजः ।
हतसर्वबलोत्साहो निर्वेदं समपद्यत ॥ १० ॥
स पुत्रमेकं राज्याय पालयेति नियुज्य च ।

हुङ्कारेण तपोबलसम्भृतेन क्षत्रियत्वेऽपि । पृथिवीपतित्वाभावात् तद्वधे अल्पप्रायश्चित्तं आततायित्वाच्चेति भावः ॥ ६ ॥

मुहूर्तेन भस्मीकृता इत्यपवर्गे तृतीया । मासेनानुवाकोऽधीत इतिवत् ॥ ७ ॥

सर्वान् पुत्रान् । सव्रीडमिति क्रियाविशेषणम् ॥ ८ ॥

निर्वेगत्वे समुद्रोपमा । निष्प्रभत्वं इतरे उपमे । उपरक्तो राहुग्रस्तः ॥ ९ ॥

हतसर्वबलोत्साहः सर्वाणि बलानि शारीरबाहाबलादीनि तज्जन्योत्साहहीनः । निर्वेदं सर्वस्य निष्फलत्वबुद्धिजं चित्तखेदम् ॥१०॥

पृथिवीं क्षत्रधर्मेण वनमेवाभ्यपद्यत ॥ ११ ॥
स गत्वा हिमवत्पार्श्वे किन्नरोरगसेविते ।
महादेवप्रसादार्थं तपस्तेपे महातपाः ॥ १२ ॥
केनचित्त्वथ कालेन देवेशो वृषभध्वजः ।
दर्शयामास वरदो विश्वामित्रं महामुनिम् ॥ १३ ॥
किमर्थं तपसि राजन् ! ब्रूहि यत् ते विवक्षितम् ।
वरदोऽस्मि वरो यस्ते काङ्क्षितः सोऽभिधीयताम् ॥ १४ ॥
एवमुक्तस्तु देवेन विश्वामित्रो महातपाः ।
प्रणिपत्य महादेवं विश्वामित्रोऽब्रवीदिदम् ॥ १५ ॥
यदि तुष्टो महादेव ! धनुर्वेदो ममानघ ! ।
साङ्गोपाङ्गोपनिषदः सरहस्यः प्रदीयताम् ॥ १६ ॥
यानि देवेषु चास्त्राणि दानवेषु महर्षिषु ।
गन्धर्वयक्षरक्षःसु प्रतिभान्तु ममानघ ! ॥ १७ ॥

एकम् अर्थाङ्गमिति शेषः । राज्याय राज्यं रक्षितुं पृथिवीं क्षत्रधर्मेण पालयेति नियुज्येत्यन्वयः ॥ ११ ॥ १२ ॥

दर्शयामास आत्मानमिति शेषः ॥ १३ ॥ १४ ॥ १५ ॥

साक्षादुपकारकाणि अङ्गानि आरादुपकारकाणि उपाङ्गानि। मन्त्राः उपनिषदः । समाहारद्वन्द्वेऽन्यार्थाधिगुदेति टच् । तेन सहितो धनुर्वेद इत्यर्थः । रहस्यं आचार्यमुखैकगम्यं विज्ञानतम ॥१६॥१७॥

तव प्रसादाद् भवतु देवदेव ! ममेप्सितम् ।
एवमस्त्विति देवेशो वाक्यमुक्त्वा गतस्तदा ॥ १८ ॥
प्राप्य चास्त्राणि देवेशाद् विश्वामित्रो महाबलः ।
दर्पेण महता युक्तो दर्पपूर्णोऽभवत् तदा ॥ १९ ॥
विवर्धमानो वीर्येण समुद्र इव पर्वणि ।
हतं मेने तदा राम ! वसिष्ठमृषिसत्तमम् * ॥ २० ॥
ततो गत्वाश्रमपदं मुमोचास्त्राणि पार्थिवः ।
यैस्तत् तपोवनं नाम निर्दग्धं चास्त्रतेजसा ॥ २१ ॥
उदीर्यमाणमस्त्रं तद् विश्वामित्रस्य धीमतः ।
दृष्ट्वा विप्रद्रुता भीता मुनयः शतशो दिशः ॥ २२ ॥
वसिष्ठस्य च ये शिष्या ये च वै मृगपक्षिणः ।

प्रसादात् न तूपदेशमात्रेणेति भावः ॥ १८ ॥
क्षत्रियत्वात् सहज एव दर्पस्तस्य मूर्तिरस्त्रलाभात् ॥ १९ ॥ २० ॥
यैरस्त्रैरस्त्रतेजसा स्वीयतेजसा तपोवनं निर्दग्धं भवेत्, तानि अस्त्राणि मुमोचेत्यन्वयः ॥ २१ ॥
विश्वामित्रस्य शेषे षष्ठी । तेनोदीर्यमाणं विसृज्यमानम् ॥ २२ ॥

"जितमेव तदा मेने वसिष्ठं मुनिसत्तमम् ।" इति ब०

विद्रवन्ति भयाद् भीता नानादिग्भ्यः सहस्रशः ॥ २३ ॥

वसिष्ठस्याश्रमपदं शून्यमासीन्महात्मनः ।

मुहूर्त्तमिव निःशब्दमासीदीरिणसन्निभम् ॥ २४ ॥

वदतो वै वसिष्ठस्य माभैरिति मुहुर्मुहुः ।

नाशयाम्यद्य गाधेयं नीहारमिव भास्करः ॥ २५ ॥

एवमुक्त्वा महातेजा वसिष्ठो जपतां वरः ।

विश्वामित्रं तदा वाक्यं सरोषमिदमब्रवीत् ॥ २६ ॥

आश्रमं चिरसंवृद्धं यद्विनाशितवानसि ।

दुराचारो हि यन्मूढस्तस्मात् त्वं न भविष्यसि ॥ २७ ॥

भयात् भयहेतोरस्त्रजालात् । नानादिग्भ्यो व्यत्ययेन द्वितीयार्थे चतुर्थी पञ्चमी वा ॥ २३ ॥

शून्यं सर्वप्राणिपलायनात् अतएव निःशब्दमिव । इरिणमूषरं निर्जलनिर्मानुषकान्तारसदृशमिति यावत् ॥ २४ ॥

वदतो वै वदतोऽपीत्यर्थः । तादृशस्यापि वसिष्ठस्य वचनम् अनादृत्य दुद्रुवुरित्यर्थः ॥ २५ ॥

एवमुक्त्वा पलायमानप्राणिजातं प्रतीति शेषः । इदं वक्ष्यमाणम् ॥ २६ ॥

यत् यस्मात् मे आश्रमं विनाशितवानसि यत् यस्माच्च हि प्रसिद्धो दुराचारो मूढश्च त्वं, तस्मात् न भविष्यसि नंक्ष्यसीत्यर्थः ॥२७॥

इत्युक्त्वा परमक्रुद्धो दण्डमुद्यम्य सत्वरः ।
विधूम इव कालाग्निर्यमदण्डमिवापरम् ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने विश्वामित्रेण वशिष्ठाश्रमपीडनं
नाम पञ्चपञ्चाशः सर्गः ॥५५॥

विधूमः कालाग्निरिव क्रोधात् वसिष्ठोऽपरं यमदण्डमिव दण्ड-
मुद्यम्य तस्थाविति शेषः ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

षट्पञ्चाशः सर्गः ।



एवमुक्तो वसिष्ठेन विश्वामित्रो महाबलः ।
आग्नेयमस्त्रमुद्दिश्य तिष्ठ तिष्ठेति चाब्रवीत् ॥ १ ॥
ब्रह्मदण्डं समुद्यम्य कालदण्डमिवापरम् ।
वसिष्ठो भगवान् क्रोधाद् इदं वचनमब्रवीत् ॥ २ ॥
क्षत्रबन्धो ! स्थितोऽस्म्येष यद् बलं तद् विदर्शय ।
नाशयाम्यद्य ते दर्पं शस्त्रस्य तव गाधिज ! ॥ ३ ॥
क्व च ते क्षत्रियबलं क्व च ब्रह्मबलं महत् ।
पश्य ब्रह्मबलं दिव्यं मम क्षत्रियपांसन ! ॥ ४ ॥
तस्यास्त्रं गाधिपुत्रस्य घोरमाग्नेयमुत्तमम् ।
ब्रह्मदण्डेन तत् शान्तमग्नेर्वेग इवाम्भसा ॥ ५ ॥
वारुणञ्चैव रौद्रञ्च ऐन्द्रं पाशुपतं तथा ।
ऐषिकं चापि चिक्षेप कुपितो गाधिनन्दनः ॥ ६ ॥

एवमुक्तो न भविष्यसीत्युक्तः ॥ १ ॥ २ ॥

तिष्ठ तिष्ठेति भीषयन्तं प्रति स्वभीत्यभावमाह,—स्थितोऽस्म्येष इति । [illegible] शस्त्रस्य दर्पं त्वया लब्धं, यत् चलरूपं शस्त्रं तन्नाशितं ते तव दर्पम् ॥ ३ ॥ ४ ॥

मानवं मोहनञ्चैव गान्धर्व्वं स्वापनं तथा ।
जृम्भणं मोहनं चैव सन्तापनविलापने ॥ ७ ॥
शोषणं दारुणं चैव वज्रमस्त्रं सुदुर्जयम् ।
ब्रह्मपाशं कालपाशं वारुणं पाशमेव च ॥ ८ ॥
पिनाकमस्त्रदयितं शुष्कार्द्रे अशनी तथा ।
दण्डास्त्रमथ पैशाचं क्रौञ्चमस्त्रं तथैव च ॥ ९ ॥
धर्म्मचक्रं कालचक्रं विष्णुचक्रं तथैव च ।
वायव्यं मथनञ्चैव अस्त्रं हयशिरस्तथा ॥ १० ॥
शक्तिद्वयञ्च चिक्षेप कङ्कालं मुसलं तथा ।
वैद्याधरं महास्त्रञ्च कालास्त्रमथ दारुणम् ॥ ११ ॥
त्रिशूलमस्त्रं घोरञ्च कापालमथ कङ्कणम् ।
एतान्यस्त्राणि चिक्षेप सर्वाणि रघुनन्दन ॥ १२ ॥
वसिष्ठे जपतां श्रेष्ठे तदद्भुतमिवाभवत् ।
तानि सर्वाणि दण्डेन ग्रसते ब्रह्मणः सुतः ॥ १३ ॥

क्षत्रियपांसनेत्युक्ता स्थितस्य तस्य वसिष्ठस्य ब्रह्मदण्डेन गाधिपुत्रस्याग्नेयं शस्त्रमासीत् ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥
दयितं शिवस्येति शेषः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥
ग्रसते स्म ॥ १३ ॥

तेषु शान्तेषु ब्रह्मास्त्रं क्षिप्तवान् गाधिनन्दनः ।
तदस्त्रमुद्यतं दृष्ट्वा देवाः साग्निपुरोगमाः ॥ १४ ॥
देवर्षयश्च सम्भ्रान्ता गन्धर्वाः समहोरगाः ।
त्रैलोक्यमासीत् सन्त्रस्तं ब्रह्मास्त्रे समुदीरिते ॥ १५ ॥
तदप्यस्त्रं महाघोरं ब्राह्मं ब्राह्मेण तेजसा ।
वसिष्ठो ग्रसते सर्वं ब्रह्मदण्डेन राघव ! ॥ १६ ॥
ब्रह्मास्त्रं ग्रसमानस्य वसिष्ठस्य महात्मनः ।
त्रैलोक्यमोहनं रौद्रं रूपमासीत् सुदारुणम् ॥ १७ ॥
रोमकूपेषु सर्वेषु वसिष्ठस्य महात्मनः ।
मरीच्य इव निष्पेतुरग्नेर्धूमाकुलार्चिषः ॥ १८ ॥

अग्निपुरोगमा वायुस्तत्सहिताः । अग्निसहितो वायुः पुरोगमो येषां युद्ध इति वा ॥ १४ ॥

समुदीरिते प्रयुक्ते ॥ १५ ॥

ब्राह्मेण तेजसा ब्रह्मविद्याभ्यासजेन तेजसा युक्तेन ब्रह्मदण्डेन करधृतेन ग्रसते स्म इत्यन्वयः । ब्राह्मेणैव तेजसा ब्राह्मतेजःशमनस्य साध्यत्वादिति भावः ॥ १६ ॥

त्रैलोक्यमोहनं भयात् त्रिलोकीचित्तमूर्च्छाकरम् । रौद्रं स्मरणेऽपि भयदम् । सुदारुणं दुर्दर्शं नृसिंहवीरभद्रादिवत् । 'घोरम्' इति पाठान्तरम् । तुल्योऽर्थः ॥ १७ ॥

रौद्रताद्यत्वे उपपादयति,—रामेत्यादि । रोमकूपेषु रोम-

प्राज्वलद् ब्रह्मदण्डश्च वसिष्ठस्य करोद्यतः ।
विधूम इव कालाग्निर्यमदण्ड इवापरः ॥ १९ ॥
ततोऽस्तुवन् मुनिगणा वसिष्ठं जपतां वरम् ।
अमोघं ते बलं ब्रह्मंस्तेजो धारय तेजसा ॥ २० ॥
निगृहीतस्त्वया ब्रह्मन्! विश्वामित्रो महाबलः ।
अमोघं ते बलं श्रेष्ठ लोकाः सन्तु गतव्यथाः ॥ २१ ॥
एवमुक्तो महातेजाः शमं चक्रे महातपाः ।
विश्वामित्रो विनिकृतो विनिश्वस्येदमब्रवीत् ॥ २२ ॥

कूपेभ्यः मरीच्यो विस्फुलिङ्गाः । रुषे विश्वामित्रब्रह्मास्त्राकुलत्वात् । धूमाकुलार्चिश्शमने विशेषणम् ॥ १८ ॥

विधूमकालाग्निरिव ब्रह्मदण्डश्च प्राज्वलत् तत्समर्पितब्रह्मतेजसेति भावः ॥ १९ ॥

ततोऽस्तुवन्, साधुसाध्वित्युपश्लोकितवन्तः । हे ब्रह्मन्! ते बलं अमोघमस्तु, अरातौ अविसर्जनेनाक्षीणमस्तु, प्रतिब्रह्मास्त्रं मा प्रयुङ्क्ष्वेति यावत् । धारकं तेजः, स्वतेजसा सहजेन धारय विलाप्यैकीकुरु ॥ २० ॥

मत्सरे स्थिते कथमप्रतियोगोऽत आह,—निगृहीत इति । ब्रह्मास्त्रग्रासेन नष्टसामर्थ्यः स्वत एव मृतप्रायो जात इत्यर्थः ॥२१॥

शमं चक्रे प्रतियोगिनोऽरातिनाशनादुपरत इत्यर्थः । विनिकृतः निरस्तसर्वशक्तिः ॥ २२ ॥

धिग्बलं क्षत्त्रियबलं ब्रह्मतेजोबलं बलम् ।

एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे ॥ २३ ॥

तदेतत् प्रसमीक्ष्याहं प्रसन्नेन्द्रियमानसः ।

तपो महत् समास्थास्ये यद्वै ब्रह्मत्वकारणम् ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने विश्वामित्रप्रतिज्ञा नाम
षट्पञ्चाशः सर्गः ॥ ५६ ॥

क्षत्त्रियबलं धिक् केवलं निन्द्यं बलमित्यर्थः । ब्रह्मतेजो बलं प्रशस्तं बलम् ॥ २३ ॥

प्रसन्नेन्द्रियमानसः परित्यक्तचञ्चलस्वभाव इति यावत् ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

सप्तपञ्चाशः सर्गः ।



ततः सन्तप्तहृदयः स्मरन् निग्रहमात्मनः ।
विनिश्वस्य विनिश्वस्य कृतवैरो महात्मना ॥ १ ॥
स दक्षिणां दिशं गत्वा महिष्या सह राघव ! ।
तताप परमं घोरं विश्वामित्रो महातपाः ॥ २ ॥
फलमूलाशनो दान्तश्चचार परमं तपः ।
अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ॥ ३ ॥
हविष्यन्दो मधुष्यन्दो दृढनेत्रो महारथः * ।
पूर्णे वर्षसहस्रे तु ब्रह्मा लोकपितामहः ॥ ४ ॥
अब्रवीन्मधुरं वाक्यं विश्वामित्रं तपोधनम् ।
जिता राजर्षिलोकास्ते तपसा कुशिकात्मज ! ॥ ५ ॥
अनेन तपसा त्वां हि राजर्षिरिति विद्महे ।

तत इति । कृतवैर इति इदमेव तपोनाशकमस्य ॥ १ ॥
तताप तपश्चकारेत्यर्थः ॥ २ ॥
तपसो घोरत्वं दर्शयति,—फलेत्यादि । दान्तो जितेन्द्रियः पुत्रा हविष्यन्दादयः ॥ ३ ॥

---

* "महोदरः" इति वङ्गीयपुस्तकेषु दृश्यते ।

एवमुक्त्वा महातेजा जगाम सह दैवतैः ॥ ६ ॥
त्रिविष्टपं ब्रह्मलोकं लोकानां परमेश्वरः ।
विश्वामित्रोऽपि तच्छ्रुत्वा ह्रिया किञ्चिदवाङ्मुखः ॥७॥
दुःखेन महताविष्टः समन्युरिदमब्रवीत् ।
तपश्च सुमहत् तप्तं राजर्षिरिति मां विदुः ॥ ८ ॥
देवाः सर्षिगणाः सर्वे नास्ति मन्ये तपःफलम् ।
एवं निश्चित्य मनसा भूय एव महातपाः ॥ ९ ॥
तपश्चचार धर्मात्मा काकुत्स्थ ! परमात्मवान् ।
एतस्मिन्नेव काले तु सत्यवादी जितेन्द्रियः ॥ १० ॥
त्रिशंकुरिति विख्यात इक्ष्वाकुकुलवर्द्धनः ।
तस्य बुद्धिः समुत्पन्ना यजेयमिति राघव ! ॥११ ॥

ब्रह्मर्षित्वाय ब्रह्मविद्यया तपःकारणात् । तदधिदैवतत्वात् ब्रह्माब्रवीत् ॥ ४ ॥ ५ ॥ ६ ॥

देवैः सह त्रिविष्टपं स्वर्गं गत्वा तदनु स्वं लोकं गतः लोकानां भूरादीनाम् ॥ ७ ॥

समन्युः सदैन्यः स्वं प्रत्येवेदं वचः सुमहति तपसि कृतेऽपि सर्षिगणा देवा मां राजर्षिरित्येव विदुः अवगच्छन्ति तस्माद् अस्य तपसः तत्प्राकृतीयं फलं नास्ति न भवतीति मन्ये ॥ ८ ॥ ९ ॥

परमात्मवान् परमात्मध्यानवान् परमधीरश्च ॥ १० ॥ ११ ॥

गच्छेयं सशरीरेण देवतानां परां गतिम् ।
वसिष्ठं स समाहूय कथयामास चिन्तितम् ॥ १२ ॥
अशक्यमिति चाप्युक्तो वशिष्ठेन महात्मना ।
प्रत्याख्यातो वशिष्ठेन स ययौ दक्षिणां दिशम् ॥ १३ ॥
ततस्तत्कर्मसिध्यर्थं पुत्रांस्तस्य गतो नृपः ।
वासिष्ठा दीर्घतपसस्तपो यत्र हि तेपिरे ॥ १४ ॥
त्रिशंकुस्तु महातेजाः शतं परमभास्वरम् ।
वसिष्ठपुत्रान् ददृशे तप्यमानान् मनस्विनः ॥ १५ ॥

गच्छेयं यज्ञबलेनेति शेषः । देवतानां परां गतिं स्वर्गम् ॥१२॥

अशक्यकथनपूर्वकं प्रत्याख्यानबीजं च प्रसिद्धं त्रिशंकुत्वमेवेति पुराणेषु स्पष्टम् ॥ १३ ॥

तत्कर्म सशरीरस्वर्गप्रापकयज्ञकर्म तस्य वसिष्ठस्य पुत्रा यत्र तेपिरे, तत्र गत्वेति शेषः । तस्य पुत्रान् गतः प्राप्तः ॥ १४ ॥

शतशब्देन स्वावयवगतबहुत्वेन बहुवचनम् अनभिधानात् । शतशब्दः संख्यावाची संख्येयवाची च विंशत्यादिवत् । अत्र तु संख्येयवाची । शतं वसिष्ठपुत्रान् शतसंख्यकानित्यर्थः । अत्रावयव-प्राधान्येन तद्बहुत्वेन बहुवचनं प्राप्तं तदनभिधानात् न भवति । एकवचनमेव भवति । यथा विंशतिर्ब्राह्मणाः संख्यावाचिनोऽपि एकवचनं ब्राह्मणानां शतम् इति यथा । अतः वसिष्ठपुत्रानित्यनेन शतमित्यनेन च सामानाधिकरण्यम् ॥ १५ ॥

सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान् ।
अभिवाद्यानुपूर्व्वेण ह्रिया किञ्चिदवाङ्मुखः ॥ १६ ॥
अब्रवीत् स महात्मानः सर्वानेव कृताञ्जलिः ।
शरणं वः प्रपन्नोऽहं शरण्यान् शरणं गतः ॥ १७ ॥
प्रत्याख्यातो हि भद्रं वो वसिष्ठेन महात्मना ।
यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ ॥ १८ ॥
गुरुपुत्त्रानहं सर्वान् नमस्कृत्य प्रसादये ।
शिरसा प्रणतो याचे ब्राह्मणांस्तपसि स्थितान् ॥ १९ ॥
ते मां भवन्तः सिध्यर्थं याजयन्तु समाहिताः ।
सशरीरो यथाहं वै देवलोकमवाप्नुयाम् ॥ २० ॥
प्रत्याख्यातो वसिष्ठेन गतिमन्यां तपोधनाः ! ।
गुरुपुत्त्रानृते सर्वान् नाहं पश्यामि काञ्चन ॥ २१ ॥

ह्रिया तत्पितृकृतप्रत्याख्यानजया । महात्मन इति द्वितीयार्थे महात्मान इत्यार्षम् ॥ १६ ॥

शरण्यान् रक्षणसमर्थान् । शरणं गतः । अन्येषां रक्षार्थं शरणं गतोऽपि शरणत्वं प्राप्तोऽपीत्यर्थः ॥ १७ ॥ १८ ॥

ब्राह्मणान् अन्वर्थब्राह्मणान् ॥ १९ ॥

सिद्ध्यर्थं सशरीरस्वर्गगमनसिद्धार्थम् ॥ २० ॥

इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
तस्मादनन्तरं सर्वे भवन्तो दैवतं मम ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्रप्रभावकीर्त्तने वसिष्ठेन त्रिशंकुप्रत्याख्यानं नाम सप्तपञ्चाशः सर्गः ॥ ५७ ॥

गुरुपुत्रान्‌ हे तान्‌ विना अन्यानं काञ्चन गतिमहं न पश्यामीत्यन्वयः ॥ २१ ॥

अयं श्लोकः प्रक्षिप्त इति कतकस्वरसः । तस्मात्‌ इक्ष्वाकूणां परमगतिरूपात्‌ पुरोधसो वसिष्ठादनन्तरमित्यर्थः ॥ २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥

अष्टपञ्चाशः सर्गः ।



ततस्त्रिशंकोर्वचनं श्रुत्वा क्रोधसमन्वितम् ।
ऋषिपुत्त्रशतं राम ! राजानमिदमब्रवीत् ॥ १ ॥
प्रत्याख्यातोऽसि दुर्मेधो ! गुरुणा सत्यवादिना ।
तं कथं समतिक्रम्य शाखान्तरमुपेयिवान् ॥ २ ॥
इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः ।
न चातिक्रमितुं शक्यं वचनं सत्यवादिनः ॥ ३ ॥
अशक्यमिति सोवाच वसिष्ठो भगवानृषिः ।
तं वयं वै समाहर्तुं क्रतुं शक्ताः कथन्तव ॥ ४ ॥
बालिशस्त्वं नरश्रेष्ठ ! गम्यतां स्वपुरं पुनः ।
याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव ! ॥ ५ ॥

क्रोधसमन्वितमिति ऋषिपुत्त्रशतविशेषणम् ॥ १ ॥

दुर्मेधः दुर्बुद्धे । शाखान्तरं याजनादिना रक्षकान्तरम् ॥ २ ॥

न चातिक्रमितुं शक्यम् इक्ष्वाकुभिरिति शेषः ॥ ३ ॥

सोवाचेति । सो पिलोपे चेदिति साधु । तं क्रतुं यमशक्यम् इत्युवाच तं यज्ञमित्यर्थः । कथं च कथमपि न शक्ता इत्यर्थः ॥ ४ ॥

बालिशोऽज्ञः त्रैलोक्यस्यापि सिद्ध्यर्थं याजने इत्यर्थः । भगवान् वसिष्ठः ॥ ५ ॥

अवमानं कथं कर्तुं तस्य गच्छामहे वयम् ।
तेषां तद् वचनं श्रुत्वा क्रोधपर्य्याकुलाचरम् ॥ ६ ॥
स राजा पुनरेवैतानिदं वचनमब्रवीत् ।
प्रत्याख्यातो भगवता गुरुपुत्रैस्तथैव हि ॥ ७ ॥
अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः ! ।
ऋषिपुत्रास्तु तत् श्रुत्वा वाक्यं घोराभिसंहितम् ॥ ८ ॥
शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि ।
इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमम् ॥ ९ ॥
अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः ।
नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्धजः ॥ १० ॥
चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् ।

अवमानं तेनासाध्यतयोक्तार्थस्य साधनरूपम् ॥ ६ ॥

एतान् वासिष्ठान् ॥ ७ ॥

अन्यां गतिं याजकान्तरम् । घोराभिसंहितं घोराभिप्राय-संयुक्तं कुलगुर्व्वतिक्रमेण अन्याश्रयस्य कुलनाशहेतुतया तदभिप्रायस्य घोरत्वम् ॥ ८ ॥

चण्डालत्वं गमिष्यसीति शेपुरिति योजना । तादृशपापिष्ठ-दर्शनस्य पापजनकत्वात् स्वस्वाश्रमप्रवेशस्तेषाम् ॥ ९ ॥

परुषो रूक्षाङ्गः । ध्वस्तमूर्द्धजः खर्व्वकेशः ॥ १० ॥

तं दृष्ट्वा मन्त्रिणः सर्वे त्यक्त्व चण्डालरूपिणम् ॥ ११ ॥
प्राद्रवन् सहिता राम ! पौरा येऽस्यानुगामिनः ।
एको हि राजा काकुत्स्थ ! जगाम परमात्मवान् ॥१२॥
दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम् ।
विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम् ॥ १३ ॥
चण्डालरूपिणं राम ! मुनिः कारुण्यमागतः ।
कारुण्यात् स महातेजा वाक्यं परमधार्मिकः ॥ १४ ॥
इदं जगाद भद्रं ते राजानं घोरदर्शनम् ।
किमागमनकार्य्यं ते राजपुत्र ! महाबल ! ॥ १५ ॥
अयोध्याधिपते ! वीर ! शापाच्चण्डालतां गतः ।
अथ तद्वाक्यमाकर्ण्य राजा चण्डालतां गतः ॥ १६ ॥
अब्रवीत् प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम् ।

चिता श्मशानं तत्र भवम् । पुष्पभस्मादिमाल्याङ्गरागो यस्य । अयोविकार आयसं तदाभरणः । त्यज्य त्यक्त्वा ॥ ११ ॥

अनुगामिनः सङ्गताः । प्राद्रवन् तं त्यक्त्वा गताः । परमात्मवान् धीरः ॥ १२ ॥

दह्यमान इत्यस्य दुःखेत्यादि । विश्वामित्रं जगामेति पूर्व्वान्वयः । वसिष्ठवैरित्वात् । विफलीकृतं वसिष्ठतत्पुत्रैर्विनाशितवैदिकामुष्मिकार्थम् ॥ १३ ॥ १४ ॥

प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्रैस्तथैव च ॥ १७ ॥
अनवाप्यैव तं कामं मया प्राप्तो विपर्य्ययः ।
सशरीरो दिवं यायामिति मे सौम्यदर्शन ! ॥ १८ ॥
मया चेष्टं क्रतुशतं तच्च नावाप्यते फलम् ।
अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन ॥ १९ ॥
कृच्छ्रेष्वपि गतः सौम्य ! क्षत्रधर्मेण ते शपे ।
यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ॥ २० ॥
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ।
धर्मे प्रयतमानस्य यज्ञं चाहर्तुमिच्छतः ॥ २१ ॥
परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव !

यस्त्वं शापात् चण्डालतां गतस्तस्य ते इहागमनकार्यं किमित्यन्वयः ॥ १५ ॥ १६ ॥ १७ ॥

यं काममुद्दिश्य गतस्तं काममनवाप्य । नैतावदेव अपि तु विपर्य्ययो जातिभ्रंशश्चैवंबेषरूपः । काममाह,—सशरीर इत्यादि । इति तस्य काम इति शेषः सौम्यदर्शनेति सम्बोधनम् ॥ १८ ॥

तच्च तथापि । तत्फलं सशरीरस्वर्गप्राप्तिरूपं नावाप्यत इत्यन्वयः । क्रतुशतं न कृतं त्वयेति चेत् तत्राह अनृतमिति ॥ १९ ॥

कृच्छ्रेष्वपि गतोऽनृतं न वक्ष्ये इत्यन्वयः । क्षत्रधर्मेण सत्यादिना ॥ २० ॥

शीलं सद्गुणः । वृत्तमाचारः इच्छतो ममेति शेषः ॥ २१ ॥

दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ॥ २२ ॥

दैवेनाक्रम्यते सर्वं दैवं हि परमा गतिः ।

तस्य मे परमार्तस्य प्रसादमभिकाङ्क्षतः ।

कर्तुमर्हसि भद्रं ते दैवोपहतकर्मणः ॥ २३ ॥

नान्यां गतिं गमिष्यामि नान्यत् शरणमस्ति मे ।

दैवं पुरुषकारेण निवर्त्तयितुमर्हसि ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने त्रिशङ्कोर्विश्वामित्राश्रमगमनं
नाम अष्टपञ्चाशः सर्गः ॥ ५८ ॥

न गच्छन्ति न गच्छन्ति स्म । यदेवमतो दैवमेव प्रारब्धमेव
अदृष्टमेव । परं श्रेष्ठं हिताहितप्रापणे । पौरुषम् इदानीन्तन-
धर्मानुष्ठानं निरर्थकं प्रारब्धतिरस्कारे दुर्बलमित्यर्थः ॥ २२ ॥

दैवमुक्तम् । आक्रम्यते अभिभूयते । परमा गतिः । साक्षा-
दितरतिरस्कारे लौकिकसुखदुःखदं प्रसादं दैवानुकूल्यसमर्थं त्वदीयं
प्रसादमभिकाङ्क्षतो मे प्रसादं कर्तुमर्हसि । दैवेनोपहतं विरस्कृतम्
इदानुष्ठीयमानं कर्म यस्य ॥ २३ ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

एकोनषष्टितमः सर्गः ।



उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ।
अब्रवीत् मधुरं वाक्यं साक्षात् चण्डालतां गतम् ॥ १ ॥
इक्ष्वाको ! स्वागतं वत्स ! जानामि त्वां सुधार्मिकम् ।
शरणं ते प्रदास्यामि मा भैषीर्नृपपुङ्गव ! ॥ २ ॥
अहमामन्त्रये सर्वान् महर्षीन् पुण्यकर्मणः ।
यज्ञसाह्यकरान् राजंस्ततो यक्ष्यसि निर्वृतः ॥ ३ ॥
गुरुशापकृतं रूपं यदिदं त्वयि वर्त्तते ।
अनेन सह रूपेण सशरीरो गमिष्यसि ॥ ४ ॥

उक्तेति * ॥ १ ॥ २ ॥

यज्ञसाह्यं यज्ञसाहाय्यम् ॥ ३ ॥

अनेन रूपेण गुरुपुत्रशापकृतेन चण्डालरूपेण ऋषिशापस्य अन्यथा कर्त्तुमशक्यत्वात् । गमिष्यसि स्वर्गमिति शेषः । जाति-चाण्डालत्वाभावाच्च यज्ञप्रवृत्तिः ॥ ४ ॥

---

* साक्षात् चण्डालरूपिणम् । चण्डालचिह्नधारित्वात् न जात्या चण्डालभाव इत्यर्थः । इति केचित् ।

हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप ।
यस्त्वं कौशिकमागम्य शरण्यं शरणागतः ॥ ५ ॥
एवमुक्त्वा महातेजाः पुत्रान् परमधार्मिकान् ।
व्यादिदेश महाप्राज्ञान् यज्ञसम्भारकारणात् ॥ ६ ॥
सर्वान् शिष्यान् समाहूय वाक्यमेतदुवाच ह ।
सर्वान् ऋषीन् स-वासिष्ठान् आनयध्वं ममाज्ञया ॥ ७ ॥
सशिष्यान् सुहृदश्चैव सर्त्विजः सुबहुश्रुतान् ।
यदन्यो वचनं ब्रूयात् मद्वाक्यबलचोदितः ॥ ८ ॥
तत्सर्वमखिलेनोक्तं ममाख्येयमनादृतम् ।
तस्य तद् वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया ॥ ९ ॥
आजग्मुरथ देशेभ्यः सर्वेभ्यो ब्रह्मवादिनः ।
ते च शिष्याः समागम्य मुनिं ज्वलिततेजसम् ॥ १० ॥

हस्तप्राप्तं अनायासलभ्यं, तत्र हेतुः,—यस्त्वमित्यादि ॥ ५ ॥
यज्ञसम्भारकारणात् यज्ञसामग्रीसम्पादनार्थम् ॥ ६ ॥
शिष्याणां ऋष्यानयने आज्ञा ॥ ७ ॥
सुहृदः [illegible] [illegible] । ऋत्विक्सहितान् [illegible] [illegible]-
मिति । यदिति । आहूतोऽन्यो वा अनादृतम् [illegible] [illegible]-
[illegible] निन्दात्मकं वा [illegible] [illegible] [illegible]
[illegible] ॥ ८ ॥ ९ ॥ १० ॥

अथुच वचनं सर्वं सर्वेषां ब्रह्मवादिनाम् ।
श्रुत्वा ते वचनं सर्वं समायान्ति द्विजातयः ॥ ११ ॥
सर्वदेशेषु चागच्छन् वर्जयित्वा महोदयम् ।
वासिष्ठं यच्छतं सर्वं क्रोधपर्य्याकुलाक्षरम् ॥ १२ ॥
यथाह वचनं सर्वं शृणु त्वं मुनिपुङ्गव ! ।
क्षत्रियो याजको यस्य चण्डालस्य विशेषतः ॥ १३ ॥
कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः ।
ब्राह्मणा वा महात्मनो भुक्त्वा चाण्डालभोजनम् ॥ १४ ॥
कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः ।
एतद्वचननैष्ठुर्य्यमूचुः संरक्तलोचनाः ॥ १५ ॥

ते तव ॥ ११ ॥

सर्वदेशेष्वित्यस्य स्थिता इति शेषः । आगच्छन्नित्यस्य केचिदिति शेषः । महोदयं तन्नामानमृषिं वासिष्ठं यच्छतं सर्वं तच्च वर्जयित्वेति योजना । तद्वासिष्ठशतं क्रोधपर्य्याकुलाक्षरं यथा येन प्रकारेण वचनमाह, तत्सर्वं शृणु इत्यर्थः । क्षत्रिय इत्यादि । ब्राह्मणस्यैव याजनाधिकारात् चण्डालस्य यज्ञे अनधिकाराच्च ॥ १२ ॥ १३ ॥

सुराणां देवतानां भोक्तारः ऋषीणाम् ऋत्विक्त्वेन यथाप्रि[illegible] भोक्तृत्वम् ॥ १४ ॥

पालिता इति वक्रोक्तिः । वचननैष्ठुर्य्यं [illegible] [illegible]मित्यर्थः ॥ १५ ॥

वासिष्ठा मुनिशार्दूल ! सर्वे सहमहोदयाः ।
तेषां तद् वचनं श्रुत्वा सर्वेषां मुनिपुङ्गवः ॥ १६ ॥
क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् ।
यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम् ॥ १७ ॥
भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः ।
अद्य ते कालपाशेन नीता वैवस्वत ! क्षयम् ॥ १८ ॥
सप्तजातिशतान्येव मृतपाः सम्भवन्तु ते ।
श्वमांसनियताहारा मुष्टिकानामनिर्घृणाः ॥ १९ ॥
विकृताश्च विरूपाश्च लोकाननुचरन्त्विमान् ।
महोदयश्च दुर्बुद्धिर्मामदुष्यं ह्यदूषयत् ॥ २० ॥
दूषितः सर्वलोकेषु निषादत्वं गमिष्यति ।

वासिष्ठा इत्यादयः पूर्वान्वयि । समहोदयाः महोदयेन सहिताः ॥ १६ ॥

अदुष्टत्वे हेतुः,—तप उग्रमिति । तपश्चेतसा [illegible] न हि [illegible] दूषयन्ति स्म ॥ १७ ॥

तस्मात् भस्मीभूता इत्यादि ॥ १८ ॥

सप्तजातिशतानि सप्तजन्मशतानि । मृतपाः शवरक्षादिवासिनः । मुष्टिका नाम चण्डालाः । इदानीं डोमका इति प्रसिद्धाः ॥ १९ ॥

विकृताः विकृतव्यापाराः विरूपाः विकृताकाराः अदूष्यं दूष-णीयमिति प्राप्त ॥ २० ॥

प्राणातिपातनिरतो निरनुक्रोशतां गतः ॥ २१ ॥

दीर्घकालं मम क्रोधात् दुर्गतिं वर्तयिष्यति ।

एतावदुक्त्वा वचनं विश्वामित्रो महातपाः ॥

विरराम महातेजा ऋषिमध्ये महामुनिः ॥ २२ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने वासिष्ठादिषु विश्वामित्रशापो
नाम एकोनषष्टितमः सर्गः ॥ ५९ ॥

प्राणातिपातनिरतः प्राणिनां प्राणनाशोद्यतः । अनुक्रोशो दया ॥ २१ ॥

वर्तयिष्यति प्राप्स्यति । अत्रेदं बोध्यं क्षत्रियत्वेऽपि याजने प्रवृत्तिः, तथापि शापदूषितचण्डालयाजने प्रवृत्तिः ब्राह्मणेषु वासिष्ठेषु वधादिकष्टप्रकृत्या प्रवृत्तिः एतत्सर्वं ब्राह्मणत्वेच्छया प्रवर्तमानतपसो विनाशाय दैवकृतमिति बोध्यम् । २२ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

षष्टितमः सर्गः ।



तपोबलहतान् ज्ञात्वा वासिष्ठान् समहोदयान् ।
ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत ॥ १ ॥
अयमिक्ष्वाकुदायादस्त्रिशंकुरिति विश्रुतः ।
धर्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः ॥ २ ॥
तेनानेन शरीरेण देवलोकजिगीषया ।
यथायं स्वशरीरेण देवलोकं गमिष्यति ॥ ३ ॥
तथा प्रवर्त्त्यतां यज्ञो भवद्भिश्च मया सह ।
विश्वामित्रवचः श्रुत्वा सर्व एव महर्षयः ॥ ४ ॥
ऊचुः समेताः सहसा धर्मज्ञा धर्मसंहितम् ।
अयं कुशिकदायादो मुनिः परमकोपनः ॥ ५ ॥

ज्ञात्वा योगबलेन ॥ १ ॥

इक्ष्वाकुदायादः तद्वंश्यः एवमादिगुणैर्यागाधिकारित्वं सूचितम् ॥ २ ॥

सम्प्रति स्वस्य आगमने हेतुमाह,—तेनेत्यादि ॥ ३ ॥

प्रवर्त्त्यताम् आरभ्यतां धर्मसंहितमिति क्रियाविशेषणम् । ऊचु-रित्यस्य कर्मेत्यन्येऽमिति केचित् । सहुत्तरमाह,—अयमित्यादि ॥ ४ ॥

यदाह वचनं सम्यगेतत् कार्य्यं न संशयः ।
अग्निकल्पो हि भगवान् शापं दास्यति रोषतः ॥ ६ ॥
तस्मात् प्रवर्त्त्यतां यज्ञः सशरीरो यथा दिवि ।
गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा ॥ ७ ॥
ततः प्रवर्त्त्यतां यज्ञः सर्वे समधितिष्ठत ।
एवमुक्त्वा च ऋषयः संजह्रुस्ताः क्रियास्तदा ॥ ८ ॥
याजकश्च महातेजा विश्वामित्रोऽभवत्क्रतौ ।
ऋत्विजश्चानुपूर्व्वेण मन्त्रवन्मन्त्रकोविदाः ॥ ९ ॥
चक्रुः सर्वाणि कर्माणि यथाकल्पं यथाविधि ।
ततः कालेन महता विश्वामित्रो महातपाः ॥ १० ॥
चकारावाहनं तत्र भागार्थं सर्वदेवताः ।

अग्निकल्पः अजितकामक्रोधत्वात् शापं दास्यति यतः ॥ ६ ॥

तस्मादिति ॥ ७ ॥

ततः सशरीरस्य स्वर्गगमनाय यज्ञः प्रवर्त्त्यतां सर्वे भवन्तः स्वस्थम् अधितिष्ठत प्रारभ्वम् । ताः क्रियाः स्वसार्त्विज्यकर्माणि ॥ ८ ॥

याजक अध्वर्युरिति यावत् । अतएव वक्ष्यति स्रुवमुद्यम्येति ॥ ९ ॥

यथाकल्पं कल्पशास्त्रानुसारेण यथाविधि यथा यज्ञदायानुष्ठानं कल्पशास्त्रेषु नामाप्यन्योपन्याससम्बले अनुक्तेऽपि अध्ययनेनैव प्रवृत्तत्वात् महता कालेन अधिकावधानपूर्वकमन्त्रपाठेन ॥ १० ॥

नाभ्यागमंस्तदा तत्र भागार्थं सर्वदेवताः ॥ ११ ॥
ततः कोपसमाविष्टो विश्वामित्रो महामुनिः ।
स्रुवमुद्यम्य सक्रोधस्त्रिशंकुमिदमब्रवीत् ॥ १२ ॥
पश्य मे तपसो वीर्य्यं स्वार्जितस्य नरेश्वर ! ।
एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा ॥ १३ ॥
दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर ! ।
स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलम् ॥ १४ ॥
राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज ।
उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः ॥ १५ ॥
दिवं जगाम काकुत्स्थ ! मुनीनां पश्यतां तदा ।

सर्वदेवताः प्रतीति शेषः । तदा तथापि अनधिकारिणो याजनाद् यजनाच्च ॥ ११ ॥

उद्यम्य ऊर्द्धं क्रोधेन प्रक्षिप्य कोपस्यैवाधिकावस्था क्रोधः ॥१२॥

पश्य मे इति । भागार्थं देवानामनागमनेन असाध्यत्वेऽपि स्वतपोव्ययेन त्वामभीष्टं स्वर्गं नयामीति भावः ॥ १३ ॥

सशरीरेण दुष्प्रापमित्यन्वयः । हि यदि मया स्वार्जितं स्वार्थमर्जितं यत्किञ्चिदपि तपसः फलं सञ्जातमस्ति ॥ १४ ॥

तदा——हे राजन् ! त्वं तस्य तेजसा वैभवेन सशरीरो दिवं गच्छ । गुरुत्वात् पुनर्बाधादि न दोषः ॥ १५ ॥

स्वर्गलोकं गतं दृष्ट्वा त्रिशंकुं पाकशासनः ॥ १६ ॥
सह सर्वैः सुरगणैरिदं वचनमब्रवीत् ।
त्रिशंको ! गच्छ भूयस्त्वं नासि स्वर्गकृतालयः ॥ १७ ॥
गुरुशापहतो मूढ़ ! पत भूमिमवाक्शिराः ।
एवमुक्तो महेन्द्रेण त्रिशंकुरपतत् पुनः ॥ १८ ॥
विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम् ।
तत् श्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः ॥ १९ ॥
रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ।
ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः ॥ २० ॥
सृजन् दक्षिणमार्गस्थान् सप्तर्षीन् अपरान् पुनः ।
नक्षत्रवंशमपरम् असृजत् क्रोधमूर्च्छितः ॥ २१ ॥

मुनीनां पश्यतां मुनिषु पश्यत्सु ॥ १६ ॥

स्वर्गकृतालयः स्वर्गे निजपुण्यकर्मणा कृत आलयो यस्य तादृशः स्वर्गवासार्हो नासीत्यर्थः ॥ १७ ॥

तत्र हेतुः गुरुशापेत्यादि ॥ १८ ॥ १९ ॥

आहारयत् अकरोत् ॥ २० ॥

सृजन्निति । यथा उत्तरतो ध्रुवः अचलस्तिष्ठति एवं त्रिशंकुस्तिष्ठतु । तस्य परितो यथा सप्तर्षिमण्डलं, तथा अत्रापि भवत्वित्याशयः । सृजन्निति हेतौ शतृप्रत्ययः । सृष्टिं कुर्वन् तदेवा

दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः ।
सृष्ट्वा नक्षत्रवंशञ्च क्रोधेन कलुषीकृतः ॥ २२ ॥
अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः ।
दैवतान्यपि स क्रोधात् स्रष्टुं समुपचक्रमे ॥ २३ ॥
ततः परमसंभ्रान्ताः सर्षिसङ्घाः सुरासुराः ।
विश्वामित्रं महात्मानम् ऊचुः सानुनयं वचः ॥ २४ ॥
अयं राजा महाभाग ! गुरुशापपरिक्षतः ।
सशरीरो दिवं यातुं नार्हत्येव तपोधन ! ॥ २५ ॥
तेषां तद् वचनं श्रुत्वा देवानां मुनिपुङ्गवः ।
अब्रवीत् सुमहद् वाक्यं कौशिकः सर्वदेवताः ॥ २६ ॥

दक्षिणमार्गस्थान् परानसृजत् पुनः सप्तर्षिप्रतिनक्षत्रमालामसृजत् ॥ २१ ॥

नक्षत्रवंशं भुजनक्षत्रगणम् ॥ २२ ॥

अन्यमिन्द्रं स्वसृज्यमानस्वर्गस्येति शेषः । अथ वा मया सृज्यमानस्वर्गः अनिन्द्र एवास्तु, त्रिशङ्कुरेव तदिन्द्रो भवत्वित्याशयः । एवमिन्द्रस्थाने त्रिशङ्कुं प्रतिष्ठाप्य तस्य परिवारभूतदेवतानि स्रष्टुमुपचक्रमे ॥ २३ ॥

तत इति । देवप्रतिसर्गवत् स्वस्यापि प्रतिसर्गं कुर्यात्, इति हेतोः सुरादयः संभ्रान्ताः पर्याकुलचित्ता इत्यर्थः ॥ २४ ॥

सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः ।
आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे ॥ २७ ॥
स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः ।
नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्यथ ॥ २८ ॥
यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः ।
मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ ॥ २९ ॥
एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम् ।
एवं भवतु भद्रं ते तिष्ठन्त्वेतानि सर्वशः ॥ ३० ॥
गगने तान्यनेकानि वैश्वानरपथाद् बहिः ।
नक्षत्राणि मुनिश्रेष्ठ ! तेषु ज्योतिःषु जाज्वलन् ॥ ३१ ॥
अवाक्शिरास्त्रिशंकुश्च तिष्ठत्वमरसन्निभः ।

अनुनयप्रकारमाह,—अयं राजेत्यादि । गुरुशापेन परिध्वस्तः चण्डालत्वं प्राप्तः । दिवं शक्रसदृशं त्वत्सृष्टं वा स्वर्गम् ॥ २५ ॥ २६ ॥
भद्रं व इत्यनेन अनुनयः ॥ २७ ॥
स्वर्गोऽस्तु स्वर्गपदवाच्यसुखविशेषानुभवोऽस्तु ॥ २८ ॥
लोकाः भूरादिसत्यान्ताः ॥ २९ ॥ ३० ॥
वैश्वानरपथात् ज्योतिःशास्त्र-प्रसिद्धानादिज्योतिश्चक्रमार्गात् बहिर्देशे एतानि नक्षत्राणि तिष्ठन्त्विति पूर्वेणान्वयः । तेषु त्वदीयेषु ज्योतिःषु नक्षत्रेषु जाज्वलन् ॥ ३१ ॥

अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम् ॥ ३२ ॥
इतार्थं कीर्त्तिमन्तञ्च स्वर्गलोकगतं यथा ।
विश्वामित्रस्तु धर्मात्मा सर्वदेवैरभिष्टुतः ॥ ३३ ॥
ऋषिमध्ये महातेजा बाढ़मित्येव देवताः ।
ततो देवा महात्मानः ऋषयश्च तपोधनाः ॥ ३४ ॥
जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम ! ।

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-प्रभावकीर्त्तने अपरस्वर्गसृष्टिर्नाम षष्टितमः सर्गः ॥ ६० ॥

अवाक्शिराः अस्मदुक्तावाक्शिरस्त्ववानेव त्रिशङ्कुः देवतुल्य-सुखवान् तिष्ठतु एतानि तव ज्योतींषि तं अनुयास्यन्ति च ॥ ३२ ॥
स्वर्गलोकगतं यथा स्वर्गलोकगतमिव इत्यन्तं पूर्वान्वयि ॥३३॥
बाढ़मित्येवम् आहेति शेषः । दुरायहस्य अनर्थहेतुतां प्रति-सन्धाय देवतावचनमङ्गीचकार ॥ ३४ ॥ ३५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे षष्टितमः सर्गः ॥ ६० ॥

एकषष्टितमः सर्गः।



विश्वामित्रो महातेजाः प्रस्थितान् वीक्ष्य तान् ऋषीन्।
अब्रवीत् नरशार्दूल ! सर्वांस्तान् वनवासिनः ॥ १ ॥
महान् विघ्नः प्रवृत्तोऽयं दक्षिणामास्थितो दिशम्।
दिशमन्यां प्रपत्स्यामस्तत्र तप्स्यामहे तपः ॥ २ ॥
पश्चिमायां विशालायां पुष्करेषु महात्मनः।
सुखं तपश्चरिष्यामः सुखं तद् हि तपोवनम् ॥ ३ ॥
एवमुक्त्वा महातेजाः पुष्करेषु महामुनिः।
तप उग्रं दुराधर्षं तेपे मूलफलाशनः ॥ ४ ॥
एतस्मिन्नेव काले तु अयोध्याधिपतिर्महान्।

वनवासिनः तपोवनवासिनः तान् स्वाज्ञया यज्ञार्थमागतान् प्रस्थितान् वीक्ष्य सर्वान् तानब्रवीदित्यन्वयः। 'वनवासिन' इत्यस्य स्थाने 'विनयान्वितान्' इति पाठान्तरम् ॥ १ ॥

दक्षिणां दिशम् आसमन्ताद् व्याप्य आस्थितोऽयं त्रिशंकुकृतो महाविघ्नोऽस्माकं तपोनाशकत्वात् प्रवृत्तस्तच्छायाक्रान्तत्वादयं देशोऽतःपरं तपोऽयोग्य इति भावः ॥ २ ॥

विशालायां विशालतपोवनवत्यां पश्चिमायां वर्त्तमानेषु पुष्करेषु

अम्बरीष इति ख्यातो यष्टुं समुपचक्रमे ॥ ५ ॥
तस्य वै यजमानस्य पशुमिन्द्रो जहार ह ।
प्रनष्टे तु पशौ विप्रो राजानमिदमब्रवीत् ॥ ६ ॥
पशुरभ्याहृतो राजन्! प्रनष्टस्तव दुर्नयात् ।
अरक्षितारं राजानं घ्नन्ति दोषा नरेश्वर! ॥ ७ ॥
प्रायश्चित्तं महद्ध्येतत् नरं वा पुरुषर्षभ! ।
आनयस्व पशुं शीघ्रं यावत् कर्म प्रवर्त्तते ॥ ८ ॥
उपाध्यायवचः श्रुत्वा स राजा पुरुषर्षभ! ।
अन्वियेष महाबुद्धिः पशुं गोभिः सहस्रशः ॥ ९ ॥
देशान् जनपदांस्तांस्तान् नगराणि वनानि च ।

तत्तीरतपोवनेषु इत्यर्थः। महात्मन इति महात्मान इत्यर्थकम् ऋचिकसम्बोधनमदीर्घत्वम् आर्षम् ॥ २ ॥ ४ ॥ ५ ॥

विप्रः पुरोहितः ॥ ६ ॥

अभ्याहृत इदानीमस्माभिरानीतः पशुस्तव दुर्नयात् त्वत्पापवशात् तावकरक्षिणां प्रमादाच्च प्रनष्ट इत्यन्वयः। राजपापमाह,—अरक्षितारं प्रजानामिति शेषः ॥ ७ ॥

एतत् पशुनाशरूपं महत्प्रायश्चित्तं महतः प्रायश्चित्तस्य कारणं प्रक्रान्तं कर्म यावत् प्रवर्त्तते प्रवर्त्तिष्यते तावत् ततः प्रागेव नष्टं पशुमन्विष्यानय तत्प्रतिनिधित्वेन नरं वा ... ॥ ८ ॥

आश्रमाणि च पुण्यानि मार्गमाणो महीपतिः ॥ १० ॥
स पुत्रसहितं तात ! सभार्यं रघुनन्दन ! ।
भृगुतुङ्गे समासीनम् ऋचीकं सन्ददर्श ह ॥ ११ ॥
तमुवाच महातेजाः प्रणम्याभिप्रसाद्य च ।
ब्रह्मर्षिं तपसा दीप्तं राजर्षिरमितप्रभः ॥ १२ ॥
पृष्ट्वा सर्वत्र कुशलम् ऋचीकं तमिदं वचः ।
गवां शतसहस्रेण विक्रीणीषे सुतं यदि ॥ १३ ॥
पशोरर्थे महाभाग ! कृतकृत्योऽस्मि भार्गव ! ।
सर्वे परिगता देशा यज्ञियं न लभे पशुम् ॥ १४ ॥
दातुमर्हसि मूल्येन सुतमेकमितो मम ।
एवमुक्तो महातेजा ऋचीकस्त्वब्रवीद् वचः ॥ १५ ॥
नाहं ज्येष्ठं नरश्रेष्ठ! विक्रीणीयां कथञ्चन ।

सहस्रशो गोभिर्निष्क्रयभूताभिरित्यर्थः ॥ ९ ॥ १० ॥

सपुत्रेति । स इति पृथक्पदं सोऽम्बरीषः भृगुतुङ्गं पर्वत-शृङ्गविशेषः ॥ ११ ॥ १२ ॥

तं प्रसिद्धतपसमृचीकम् इदं वक्ष्यमाणं वचोऽब्रवीदिति शेषः । यदि विक्रीणीषे तदा कृतकृत्योऽस्मि भवेयं, यतो यज्ञियं सर्वे पूर्वं परिकल्पितं पशुं क्वापि न लभे ॥ १३ ॥ १४ ॥

इतः सुतेषु सार्वविभक्तिकस्तसिः ॥ १५ ॥

ऋचीकस्य वचः श्रुत्वा तेषां माता महात्मनाम् ॥ १६ ॥
उवाच नरशार्दूलम् अम्बरीषमिदं वचः।
अविक्रेयं सुतं ज्येष्ठं भगवानाह भार्गवः ॥ १७ ॥
ममापि दयितं विद्धि कनिष्ठं शुनकं प्रभो।
तस्मात् कनीयसं पुत्रं न दास्ये तव पार्थिव! ॥ १८ ॥
प्रायेण हि नरश्रेष्ठ! ज्येष्ठाः पितृषु वल्लभाः।
मातृणाञ्च कनीयांसस्तस्माद् रक्ष्ये कनीयसम् ॥ १९ ॥
उक्तवाक्ये मुनौ तस्मिन् मुनिपत्न्यां तथैव च।
शुनःशेफः स्वयं राम! मध्यमो वाक्यमब्रवीत ॥ २० ॥
पिता ज्येष्ठमविक्रेयं माता चाह कनीयसम्।
विक्रेयं मध्यमं मन्ये राजपुत्र! नयस्व माम् ॥ २१ ॥
अथ राजा महाबाहो वाक्यान्ते ब्रह्मवादिनः।

कथञ्चन बहुनापि मूल्येन अनेनेतरयोरननुमतिः सूचिता अप्रति-षिद्धमनुमतमिति न्यायात् ॥ १६ ॥ १७ ॥
शुनक इति। कनिष्ठपुत्रनाम ॥ १८ ॥
पितृषु पितृणां रक्षिष्यामीत्यर्थे रक्ष्ये इत्यार्षम् ॥ १९ ॥
रामेति संबुद्धिः ॥ २० ॥
मध्यमं मध्यमपुत्रं विक्रेयं मातापित्रोर्विक्रेयत्वेन सम्मतं मन्येऽ-र्थादिति शेषः ॥ २१ ॥

हिरण्यस्य सुवर्णस्य कोटिभीरत्नराशिभिः ॥ २२ ॥

गवां शतसहस्रेण शुनःशेफं नरेश्वरः ।

गृहीत्वा परमप्रीतो जगाम रघुनन्दन ! ॥ २३ ॥

अम्बरीषस्तु राजर्षीरथमारोप्य सत्वरः ।

शुनःशेफं महातेजा जगामाशु महायशाः ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-

प्रभावकीर्तने अम्बरीषेण शुनःशेफक्रयो नाम

एकषष्टितमः सर्गः ॥ ६१ ॥

ब्रह्मवादिनः मध्यमपुत्रस्य ॥ २२ ॥

गृहीत्वा। क्रीत्वा यद्यप्यपत्यस्य दानक्रयौ शास्त्रनिषिद्धौ, तथापि अनेन कुशध्वजौ धर्मार्थमपत्यदानमिव यज्ञायापत्यक्रयो न विगीत इति सूचितम्। पुत्रस्य चैवं पित्रधीनतोचितेति च बोधितम् ॥२३॥

शुनःशेफं रथमारोप्येत्यन्वयः ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके

बालकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

---

(६२)

द्विषष्टितमः सर्गः ।



शुनःशेफं नरश्रेष्ठ ! गृहीत्वा तु महायशाः ।
व्यश्रमत् पुष्करे राजा मध्याह्ने रघुनन्दन ! ॥ १ ॥
तस्य विश्रममाणस्य शुनःशेफो महायशाः ।
पुष्करं ज्येष्ठमागम्य विश्वामित्रं ददर्श ह ॥ २ ॥
तप्यन्तमृषिभिः सार्द्धं मातुलं परमातुरः ।
विषण्णवदनो दीनस्तृष्णया च श्रमेण च ॥ ३ ॥
पपातांके मुनेराम ! वाक्यं चेदमुवाच ह ।
न मेऽस्ति माता न पिता ज्ञातयो बान्धवाः कुतः ॥ ४ ॥
त्रातुमर्हसि मां सौम्य ! धर्मेण मुनिपुङ्गव ! ।

व्यश्रमत् । व्यश्राम्यदिति पाठान्तरम् ॥ १ ॥

विश्रममाणस्येति विश्राम्यत इत्यर्थे आर्षम् ॥ २ ॥

तृष्णया पिपासया जिजीविषया च श्रमेण चेति विषण्णवदनत्वे दीनत्वे परमातुरत्वे च हेतुः ॥ ३ ॥

अङ्के उत्सङ्गे अपतत् । मातुलत्वात् तत्र पातः । बान्धवाः कुतो दूरादेव सर्वथा न सन्त्येवेत्यर्थः ॥ ४ ॥

त्राता त्वं हि नरश्रेष्ठ ! सर्वेषां त्वं हि भावनः ॥ ५ ॥
राजा च कृतकार्य्यः स्यादहं दीर्घायुरव्ययः ।
स्वर्गलोकमुपाश्नीयां तपस्तप्त्वा ह्यनुत्तमम् ॥ ६ ॥
स मे नाथो ह्यनाथस्य भव भव्येन चेतसा ।
पितेव पुत्रं धर्मात्मन् ! त्रातुमर्हसि किल्बिषात् ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा विश्वामित्रो महातपाः ।
सान्त्वयित्वा बहुविधं पुत्रानिदमुवाच ह ॥ ८ ॥
यत्कृते पितरः पुत्रान् जनयन्ति शुभार्थिनः ।
परलोकहितार्थाय तस्य कालोऽयमागतः ॥ ६ ॥
अयं मुनिसुतो बालो मत्तः शरणमिच्छति ।
अस्य जीवितमात्रेण प्रियं कुरुत पुत्रकाः ॥ १० ॥

धर्मेण स्वार्जितेन सर्वेषां शरणागतानां भावनः सर्वेष्टसाधनम् एको हिस्त्वर्थे ॥ ५ ॥

यथा च राजा कृतकार्य्यः स्यात्, अहं च अव्ययोधर्मलोपाभावात् दीर्घायुस्तपस्तप्त्वा स्वर्गं प्राप्नुयां तथा कुर्विति शेषः ॥ ६ ॥

किल्बिषात् जीवविपत्तिरूपात् । भव्येन प्रसन्नेन । पुत्रं ज्येष्ठम् ॥ ७।८॥

यत्कृते यत्प्रयोजनाय तदेव प्रयोजनमाह,—परलोकहितार्थाय परलोकहितरूपप्रयोजनाय । तस्य प्रयोजनस्य ॥ ९ ॥

परलोकहितं प्रयोजनमाह, अयमिति । शरणं रक्षकम् । जीवित-

सर्वे सुकृतकर्माणः सर्वे धर्मपरायणाः।
पशुभूता नरेन्द्रस्य तृप्तिमग्नेः प्रयच्छत ॥ ११ ॥
नाथवांश्च शुनःशेफो यज्ञश्चाविघ्नतो भवेत्।
देवतास्तर्पिताश्च स्युर्मम चापि कृतं वचः ॥ १२ ॥
मुनेस्तद्वचनं श्रुत्वा मधुच्छन्दादयः सुताः।
साभिमानं नरश्रेष्ठ! सलीलमिदमब्रुवन् ॥ १३ ॥
कथमात्मसुतान् हित्वा त्रायसेऽन्यसुतं विभो!।
अकार्य्यमिव पश्यामः श्वमांसमिव भोजने ॥ १४ ॥
तेषां तद्वचनं श्रुत्वा पुत्राणां मुनिपुङ्गवः।
क्रोधसंरक्तनयनो व्याहर्त्तुमुपचक्रमे ॥ १५ ॥

मानेयत्र जीवितप्रदानमात्रेण प्रियमित्यस्य मम स्वस्य च जीवतो वाक्यकारत्वादिविस्मृतेः। शुनकवत् परलोकसाधनत्वेन प्रियमित्यर्थः ॥१०॥

तत्र प्रत्ययार्थं स्तौति सर्वे इति। पशुभूताः अस्य राज्ञा पशुत्वेन यज्ञ्यादेतत्प्रतिनिधित्वेन पशुभूता नरेन्द्रस्य यज्ञे अग्नेस्तृप्तिं प्रयच्छतेत्यर्थः ॥ ११ ॥

नाथवान् मया रक्षकवान् मम युष्मत्पितुः जीवतो वाक्यकरत्वात् वचः कृतं भवति ॥ १२ ॥

साभिमानं साहङ्कारम्। सलीलं सपरिहासम् ॥ १३ ॥

लोकतः शास्त्रतश्चानुचितानुष्ठानत्वे दृष्टान्तमाह,—श्वमांसमिवेति ॥ १४ ॥ १५ ॥

निःसाध्वसमिदं प्रोक्तं धर्मादपि विगर्हितम् ।
अतिक्रम्य तु मद्वाक्यं दारुणं रोमहर्षणम् ॥ १६ ॥
अमांसभोजिनः सर्वे वासिष्ठा इव जातिषु ।
पूर्णं वर्षसहस्रन्तु पृथिव्याम् अनुवत्स्यथ ॥ १७ ॥
कृत्वा शापसमायुक्तान् पुत्रान् मुनिवरस्तदा ।
शुनःशेफमुवाचार्त्तं कृत्वा रक्षां निरामयाम् ॥ १८ ॥
पवित्रपाशैराबद्धो रक्तमाल्यानुलेपनः ।
वैष्णवं यूपमासाद्य वाग्भिरग्निमुदाहर ॥ १९ ॥
इमे च गाथे द्वे दिव्ये गायेथा मुनिपुत्रक ।
अम्बरीषस्य यज्ञेऽस्मिन् ततः सिद्धिमवाप्स्यसि ॥ २० ॥
शुनःशेफो गृहीत्वा ते द्वे गाथे सुसमाहितः ।

साध्वसं भयं पितृत्वप्रयुक्तभीतिरहितम् । जीवतो वाक्यकरणात् धर्मादपि विगर्हितं अधमम् । एवं मद्वाक्यमतिक्रम्य यतो दारुणं परुषं रोमहर्षणं रोमाञ्चविकारजनकमुक्तं तस्मादिति शेषः ॥ १६ ॥

जातिषु मुष्टिकजातिषु ॥ १७ ॥

निरामयां सर्वदुःखनाशिकां रक्षां कृत्वा शुनःशेफमुवाच ॥१८॥

वाक्यमाह,—पवित्रेति । पवित्रपाशा दर्भरशनाः वैष्णवं विष्णुदैवत्यम् । "वैष्णवो वै देवतया यूपः" इति श्रुतेः । वाग्भिरग्नेयमन्त्रैरग्निमुदाहर स्तुहि ॥ १९ ॥

त्वरया राजसिंहं तम् अम्बरीषमुवाच ह॥ २१ ॥
राजसिंह! महाबुद्धे! शीघ्रं गच्छामहे वयम्।
निर्वर्तयस्व राजेन्द्र दीक्षां च समुपाहर॥ २२ ॥
तद्वाक्यम् ऋषिपुत्रस्य श्रुत्वा हर्षसमन्वितः।
जगाम नृपतिः शीघ्रं यज्ञवाटमतन्द्रितः॥ २३ ॥
सदस्यानुमते राजा पवित्रकृतलक्षणम्।
पशुं रक्ताम्बरं कृत्वा यूपे तं समबन्धयत्॥ २४ ॥
स बद्धो वाग्भिरग्र्याभिरभितुष्टाव वै सुरौ।
इन्द्रमिन्द्रानुजञ्चैव यथावत् मुनिपुत्रकः॥ २५ ॥
ततः प्रीतः सहस्राक्षो रहस्यस्तुतितोषितः।
दीर्घमायुस्तदा प्रादात् शुनःशेफाय वासवः॥ २६ ॥

इमे मयोपदिश्यमाने इन्द्रोपेन्द्रदैवत्ये। सिद्धिं जीवितसिद्धिम्॥ २०॥ २१॥

गच्छामहे इत्यार्षत्वम्। निवर्त्तयस्व यज्ञमिति शेषः। समुपाहर कुरु॥ २२॥ २३॥

पवित्रैर्दर्भरज्जुभिः कृतपशुत्वज्ञापनं पशुं कृत्वा यज्ञपशुत्वेन संपाद्य अबन्धयत्, राजेति शेषः॥ २४॥

इन्द्रानुजो विष्णुर्यूपदेवः। अत्र पूर्वमपि उक्त्वा। तत एतौ उपदेशकाले तयोक्तत्वात्॥ २५॥

स च राजा नरश्रेष्ठ ! यज्ञस्य च समाप्तवान् ।
फलं बहुगुणं राम ! सहस्राक्षप्रसादजम् ॥ २७ ॥
विश्वामित्रोऽपि धर्मात्मा भूयस्तेपे महातपाः ।
पुष्करेषु नरश्रेष्ठ ! दशवर्षशतानि च ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्रप्रभावकीर्तने विश्वामित्रेण शुनःशेफरक्षा नाम द्विषष्टितमः सर्गः ॥ ६२ ॥

सहस्राक्ष इत्यृक्द्वयम् । विष्णोरपि रहस्यस्तुतिर्विश्वामित्रोपदिष्टा ॥ २६ ॥

समाप्तवान् फलं सम्यगाप्तवानित्यर्थः । यद्यपि बह्वृचब्राह्मणे हरिश्चन्द्रो ह वैधस ऐक्ष्वाको राजेत्यादिना हरिश्चन्द्रयज्ञे शुनःपुच्छस्याजीगर्त्तिसुतस्य पशुत्वं प्राजापत्यादिस्तुत्या च मोक्षः श्रूयते, तथापि अम्बरीषविषयमप्येतत् एतत्रामायणात् तन्मूलश्रुतिश्चान्वेष्येति बहवः । केचित् तु हरिश्चन्द्रपदं सादृश्याद् अम्बरीष एव प्रयुक्तम् । अजीगर्त्तिपदं च ऋचीके प्रयुक्तं श्रुतावस्मादेवोपबृंहणादित्याहुः ॥२७॥

भूयः पूर्वतपसः पुत्रेषु क्रोधेन नाशात् क्रोधं न करिष्यामीति सङ्कल्प्य पुनस्तपोऽकरोत् ॥ २८ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

त्रिषष्टितमः सर्गः ।



पूर्णे वर्षसहस्रे तु व्रतस्नातं महामुनिम् ।
अभ्यगच्छन् सुराः सर्वे तपःफलचिकीर्षवः ॥ १ ॥
अब्रवीत् सुमहातेजा ब्रह्मा सुरुचिरं वचः ।
ऋषिस्त्वमसि भद्रं ते स्वार्जितैः कर्मभिः शुभैः ॥ २ ॥
तमेवमुक्त्वा देवेशस्त्रिदिवं पुनरभ्यगात् ।
विश्वामित्रो महातेजा भूयस्तेपे महत्तपः ॥ ३ ॥
ततः कालेन महता मेनका परमाप्सराः ।
पुष्करेषु नरश्रेष्ठ ! स्नातुं समुपचक्रमे ॥ ४ ॥
तां ददर्श महातेजा मेनकां कुशिकात्मजः ।
रूपेणाप्रतिमां तत्र विद्युतं जलदे यथा ॥ ५ ॥

व्रतस्नातं समाप्तव्रतम् । तपःफलचिकीर्षवः तपःफलं दातुकामाः ॥ १ ॥

ऋषिस्त्वमसि । अत्र राजशब्दानुपादानेन क्षत्रजातिविशिष्टः सूचितः ॥ २ ॥ ३ ॥

परमा रूपादिभिः सर्वोत्तमा अप्सरा इत्यर्थः ॥ ४ ॥

तत्र सरसि जलदे विद्युतमिव ॥ ५ ॥

कन्दर्पदर्पवशगो मुनिस्तामिदमब्रवीत् ।
अप्सरः ! स्वागतं तेऽस्तु वस चेह ममाश्रमे ॥ ६ ॥
अनुगृह्णीष्व भद्रं ते मदनेन विमोहितम् ।
इत्युक्ता सा वरारोहा तत्रावासमथाकरोत् ॥ ७ ॥
तपसो हि महाविघ्नो विश्वामित्रमुपागमत् ।
तस्यां वसन्त्यां वर्षाणि पञ्च पञ्च च राघव ! ॥ ८ ॥
विश्वामित्राश्रमे सौम्य ! सुखेन व्यतिचक्रमुः ।
अथ काले गते तस्मिन् विश्वामित्रो महामुनिः ॥ ९ ॥
सव्रीड़ इव संवृत्तश्चिन्ताशोकपरायणः ।
बुद्धिर्मुनेः समुत्पन्ना सामर्षा रघुनन्दन ! ॥ १० ॥
सर्वं सुराणां कर्मैतत् तपोऽपहरणं महत् ।
अहोरात्रापदेशेन गताः संवत्सरा दश ॥ ११ ॥
काममोहाभिभूतस्य विघ्नोऽयं प्रत्युपस्थितः ।
स निश्वसन् मुनिवरः पश्चात्तापेन दुःखितः ॥ १२ ॥

कन्दर्पस्तत्सदर्पो मदः ॥ ६ ॥
अनुगृह्णीष्व भोगदानेनेति शेषः । वरारोहा श्रेष्ठजघना ॥ ७ ॥
पञ्च पञ्च दशवर्षाणि ॥ ८ ॥ ९ ॥
सामर्षा देवेषु विघ्नस्य तत्कृतत्वज्ञानात् ॥ १० ॥

भीतामप्सरसं दृष्ट्वा वेपन्तीं प्राञ्जलिं स्थिताम्।

मेनकां मधुरैर्वाक्यैर्विसृज्य कुशिकात्मजः ॥ १३ ॥

उत्तरं पर्वतं राम ! विश्वामित्रो जगाम ह।

स कृत्वा नैष्ठिकीं बुद्धिं जेतुकामो महायशाः ॥ १४ ॥

कौशिकीतीरमासाद्य तपस्तेपे दुरासदम्।

तस्य वर्षसहस्राणि घोरं तप उपासतः ॥ १५ ॥

उत्तरे पर्वते राम ! देवतानामभूद् भयम्।

अमन्त्रयन् समागम्य सर्वे सर्षिगणाः सुराः ॥ १६ ॥

महर्षिशब्दं लभतां साध्वयं कुशिकात्मजः।

तदाह,—सर्वमिति। अहोरात्रापदेशेन एकाहोरात्रतुल्यतया ॥ ११ ॥ १२ ॥

वेपन्तीं वेपमानां मधुरैः मत्प्रार्थनया स्थितासीति तव न कश्चन दोष इत्यादिवाक्यैः क्रोधस्य सङ्कल्पपूर्वं त्यक्तत्वादत्र शापादानम्। तेनास्य क्रोधजयो जात इत्युक्तम् ॥ १३ ॥

ततश्च बहुविघ्नदर्शनाद् उत्तरगमनम्। नैष्ठिकीं कामस्याप्यकारणं सङ्कल्प्य अत्युत्कटब्रह्मचर्य्यविषयां बुद्धिं दृढनिश्चयम्, जेतुकामः काममिति शेषः ॥ १४ ॥

कौशिकी विश्वामित्रभगिनी नदी ॥ १५ ॥

उत्तरे पर्वते इत्येतत् पूर्वान्वयि। समागम्य ब्रह्मणेति शेषः ॥१६॥

देवतानां वचः श्रुत्वा सर्वलोकपितामहः ॥ १७ ॥
अब्रवीत् मधुरं वाक्यं विश्वामित्रं तपोधनम् ।
महर्षे! स्वागतं वत्स ! तपसोग्रेण तोषितः ॥ १८ ॥
महत्त्वमृषिमुख्यत्वं ददामि तव कौशिक ! ।
ब्रह्मणस्तु वचः श्रुत्वा विश्वामित्रस्तपोधनः ॥ १९ ॥
प्राञ्जलिः प्रणतो भूत्वा प्रत्युवाच पितामहम् ।
ब्रह्मर्षिशब्दमतुलं स्वार्जितैः कर्मभिः शुभैः ॥ २० ॥
यदि मे भगवानाह ततोऽहं विजितेन्द्रियः ।
तमुवाच ततो ब्रह्मा न तावत्त्वं जितेन्द्रियः ॥ २१ ॥
यतस्व मुनिशार्दूल ! इत्युक्त्वा त्रिदिवं गतः ।
विप्रस्थितेषु देवेषु विश्वामित्रो महामुनिः ॥ २२ ॥

लभतां भगवन्निति शेषः ॥ १७ ॥

देवप्रार्थनया महर्षिशब्देनैव सम्बोधयति, महर्ष इति ॥ १८ ॥

महत्त्वस्य विवरणम् ऋषिमुख्यत्वमिति ॥ १९ ॥

प्रत्युवाचेति । पितामहमिति शेषः । अतुलं सर्वोत्तमं ब्रह्मर्षिशब्दं मदभीष्टं स्वार्जितैः कर्मभिः प्राप्यम् ॥ २० ॥

यदि यतो भगवान् न आह, न वदति ततो मन्येऽहं विजितेन्द्रियः । अत्र काकुः । न विजितेन्द्रियः इत्यर्थः । न तावदिति विकारहेतुसन्निधाने विकाराभावे स्थितत्वमिति भावः । न तावदिति काकोक्तौ ॥ २१ ॥ २२ ॥

ऊर्द्धबाहुर्निरालम्बो वायुभक्षस्तपश्चरन् ।
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ॥ २३ ॥
शिशिरे सलिले शायी रात्र्यहानि तपोधनः ।
एवं वर्षसहस्रं हि तपो घोरमुपागमत् ॥ २४ ॥
तस्मिन् सन्तप्यमाने तु विश्वामित्रे महामुनौ ।
सन्तापः सुमहानासीत् सुराणां वासवस्य च ॥ २५ ॥
रम्भामप्सरसं शक्रः सर्वैः सह मरुद्गणैः ।
उवाचात्महितं वाक्यम् अहितं कौशिकस्य च ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने विश्वामित्रतपो नाम
त्रिषष्टितमः सर्गः ॥ ६३ ॥

घर्मे ग्रीष्मे । आकाशं निरावरणदेशः ॥ २३ ॥ २४ ॥
आत्महितम् आत्मा इन्द्रः ॥ २५ ॥ २६ ॥
इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
त्रिषष्टितमः सर्गः ॥ ६३ ॥

चतुःषष्टितमः सर्गः ।



सुरकार्यमिदं रम्भे ! कर्त्तव्यं सुमहत् त्वया ।
लोभनं कौशिकस्येह काममोहसमन्वितम् ॥ १ ॥
तथोक्ता साप्सरा राम ! सहस्राक्षेण धीमता ।
व्रीड़िता प्राञ्जलिर्वाक्यं प्रत्युवाच सुरेश्वरम् ॥ २ ॥
अयं सुरपते ! घोरो विश्वामित्रो महामुनिः ।
क्रोधमुत्स्रक्ष्यते क्रूरं मयि देव ! न संशयः ॥ ३ ॥
ततो हि मे भयं देव ! प्रसादं कर्त्तुमर्हसि ।
एवमुक्तस्तया राम ! सभयं भीतया तदा ॥ ४ ॥
तामुवाच सहस्राक्षो वेपमानां कृताञ्जलिम् ।
मा भैषी रम्भे ! भद्रं ते कुरुष्व मम शासनम् ॥ ५ ॥

लोभनं प्रतारणं काममोहेन कामजनितचित्तवैवश्येन समन्वितं युक्तम् ॥ १ ॥

व्रीड़िता असामर्थ्यवचननिमित्ता व्रीड़ा ॥ २ ॥

उत्स्रक्ष्यते पाठेऽपि उत्स्रक्ष्यते इत्येवार्थः ॥ ३ ॥

हि यतोऽतः प्रसादम् एवं नियोगाभावरूपम् ॥ ४ ॥ ५ ॥

कोकिलो हृदयग्राही माधवे रुचिरद्रुमे।
अहं कन्दर्पसहितः स्थास्यामि तव पार्श्वतः ॥ ६ ॥
त्वं हि रूपं बहुगुणं कृत्वा परमभास्वरम्।
तमृषिं कौशिकं भद्रे! भेदयस्व तपस्विनम् ॥ ७ ॥
सा श्रुत्वा वचनं तस्य कृत्वा रूपमनुत्तमम्।
लोभयामास ललिता विश्वामित्रं शुचिस्मिता ॥ ८ ॥
कोकिलस्य तु शुश्राव वल्गु व्याहरतः स्वनम्।
संप्रहृष्टेन मनसा स चैनामन्ववैक्षत ॥ ९ ॥
अथ तस्य च शब्देन गीतेनाप्रतिमेन च।
दर्शनेन च रम्भाया मुनिः सन्देहमागतः ॥ १० ॥

माधवे वसन्ते कोकिलोभूत्वाऽहमित्यन्वयः ॥ ६ ॥

बहुगुणं हावभावादिगुणोपेतं रूपं रूपपरिष्कारम्। भेदयस्व कामोत्पादनेन तपसश्च्यावय ॥ ७ ॥

ललिता ललिताख्यभावयुक्ता * ॥ ८ ॥

वल्गु मनोहरं कमनीयविषयलोभात् चेतसो हर्षः ॥ ९ ॥

तस्य कोकिलस्य। गीतेन रम्भाया इति शेषः। सन्देहः खल एवास्या यदृच्छया आगमनम्, उतेन्द्रप्रेरिताया मत्तपोभङ्गार्थमित्येवं रूपम् ॥ १० ॥

---

* सुन्दरी इति वा।

सहस्राक्षस्य तत् सर्वं विज्ञाय मुनिपुङ्गवः ।
रम्भां क्रोधसमाविष्टः शशाप कुशिकात्मजः ॥ ११ ॥
यस्मां लोभयसे रम्भे ! कामक्रोधजयैषिणाम् ।
दशवर्षसहस्राणि शैली स्थास्यसि दुर्भगे ! ॥ १२ ॥
ब्राह्मणः सुमहातेजास्तपोबलसमन्वितः ।
उद्धरिष्यति रम्भे ! त्वां मत्क्रोधकलुषीकृताम् ॥ १३ ॥
एवमुक्त्वा महातेजा विश्वामित्रो महामुनिः ।
अशक्नुवन् धारयितुं कोपं सन्तापमात्मनः ॥ १४ ॥
तस्य शापेन महता रम्भा शैली तदाभवत् ।

तत्सर्वं रम्भागमनं तत्कृतप्रलोभनं च सहस्राक्षप्रेरणामूलमिति युक्त्या ध्यानेन च विज्ञाय निश्चित्य रम्भां शशापेत्यन्वयः ॥ ११ ॥

शैली शिलाप्रतिमारूपा ॥ १२ ॥

यद्यपि स्वामिनियोगतः प्रवृत्तायाः रम्भायाः शापदानमनुचितम् इन्द्रे एव तद्दानमुचितं, तथापि क्रोधावेशेन युक्तायुक्तविवेकाभावः । अतएव पश्चाद्विवेकं लब्ध्वा तामनुगृह्णाति, ब्राह्मण इति वसिष्ठ इत्यर्थ इति कतकः । एतेन कामादपि क्रोधो दुर्जय इति सूचितम् ॥ १३ ॥

आत्मनः कोपं धारयितुम् अशक्नुवन् तां शप्त्वा तपोव्ययजन्यदुःखेन सन्तापं पश्चात्तापमुपागत इति शेषः ॥ १४ ॥

वचः श्रुत्वा च कन्दर्पो महर्षेः स च निर्गतः ॥ १५ ॥
कोपेन च महातेजास्तपोऽपहरणे कृते ।
इन्द्रियैरजितै राम ! न लेभे शान्तिमात्मनः ॥ १६ ॥
बभूवास्य मनश्चिन्ता तपोऽपहरणे कृते ।
नैवं क्रोधं गमिष्यामि न च वक्ष्ये कथञ्चन ॥ १७ ॥
अथवा नोच्छ्वसिष्यामि संवत्सरशतान्यपि ।
अहं हि शोषयिष्यामि आत्मानं विजितेन्द्रियः ॥ १८ ॥
तावद् यावद्धि मे प्राप्तं ब्राह्मण्यं तपसार्जितम् ।
अनुच्छ्वसन्नभुञ्जानस्तिष्ठेयं शाश्वतीः समाः ॥ १९ ॥
न हि मे तप्यमानस्य क्षयं यास्यन्ति मूर्त्तयः ।

महर्षेः वचः श्रुत्वा कन्दर्पः स च इन्द्रश्च निर्गत इत्यन्वयः ॥१५॥

कोपेन चात् कामेन च तपोपहरणे कृते सति कामक्रोधहतत्वादेव अजितैरिन्द्रियैरित्यन्वयः । आपाततो रम्भादर्शनप्रवृत्तया कामेनापि तपःक्षयः । आत्मनो मनसः शान्तिं दुःखोपशमम् ॥ १६ ॥

न च वक्ष्ये शापादिवचनमिति शेषः ॥ १७ ॥

आत्मानं शरीरम् ॥ १८ ॥

यावत् यावता कालेन ब्राह्मण्यं प्राप्तं भवेत्, तावत् शाश्वतीः समा बहून् वत्सरान् ॥ १९ ॥

मूर्त्तयः शरीरावयवाः । तपोऽर्थत्वादनुच्छ्वासाभोजनयोः तद्वचनेन

एवं वर्षसहस्रस्य दीक्षां स मुनिपुङ्गवः ।
चकाराप्रतिमां लोके प्रतिज्ञां रघुनन्दन ! ॥ २० ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्रप्रभावकीर्त्तने रम्भाशापो नाम चतुःषष्टितमः सर्गः ॥ ६४ ॥

श्वासश्चयेवेति भावः । दीक्षाम् अनुच्छ्वासाभोजने उद्दिश्य अप्रतिमां प्रतिज्ञां सर्वथैवं करिष्ये इत्यध्यवसायम् ॥ २० ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे चतुःषष्टितमः सर्गः ॥ ६४ ॥

पञ्चषष्टितमः सर्गः ।



अथ हैमवतीं राम! दिशं त्यक्त्वा महामुनिः ।
पूर्वां दिशमनुप्राप्य तपस्तेपे सुदारुणम् ॥ १ ॥
मौनं वर्षसहस्रस्य कृत्वा व्रतमनुत्तमम् ।
चकाराप्रतिमं राम! तपः परमदुष्करम् ॥ २ ॥
पूर्णे वर्षसहस्रे तु काष्ठभूतं महामुनिम् ।
विघ्नैर्बहुभिराधूतं क्रोधो नान्तरमाविशत् ॥ ३ ॥
स कृत्वा निश्चयं राम! तप आतिष्ठताव्ययम् ।
तस्य वर्षसहस्रस्य व्रते पूर्णे महाव्रतः ॥ ४ ॥
भोक्तुमारब्धवानन्नं तस्मिन् काले रघूत्तम! ।
इन्द्रो द्विजातिर्भूत्वा तं सिद्धमन्नमयाचत ॥ ५ ॥

अथ प्रतिज्ञोत्तरं हैमवतीम् उत्तराम् ॥ १ ॥
मौनरूपं व्रतं वर्षसहस्रसम्बन्धि, मौनं चात्र काष्ठमौनम् ॥२॥
आधूतमाकुलीकृतमपि, आन्तरम् अन्तःकरणम् ॥ ३ ॥
निश्चयं क्रोधाकरणविषयकम् ॥ ४ ॥
वर्षसहस्रसम्बन्धिनि व्रते पूर्णे सति तस्मिन् काले व्रतपारण-
काले ॥ ५ ॥

तस्मै दत्त्वा तदा सिद्धं सर्वं विप्राय निश्चितः ॥ ६ ॥
निःशेषितेऽन्ने भगवानभुक्त्वैव महातपाः ।
न किञ्चिदवदद्विप्रं मौनव्रतमुपास्थितः ।
तथैवासीत् पुनर्मौनमनुच्छ्वासं चकार ह ॥ ७ ॥
अथ वर्षसहस्रञ्च नोच्छ्वसन् मुनिपुङ्गवः ।
तस्यानुच्छ्वसमानस्य मूर्ध्नि धूमो व्यजायत ॥ ८ ॥
त्रैलोक्यं येन सम्भ्रान्तमातापित*मिवाभवत् ।
ततो देवर्षिगन्धर्वाः पन्नगोरगराक्षसाः ॥ ९ ॥
मोहितास्तपसा तस्य तेजसा मन्दरश्मयः ।

सिद्धं पक्वम् निःशेषिते निरवशेषतो दत्ते अभुक्त्वैव पुनःपाका-करणादभुक्त्वैव मौनं कृत्वा आसीदित्यन्वयः ॥ ६ ॥ ७ ॥

नोच्छ्वसन् श्वासोच्छ्वासरहितः । धूम इति धूमकेतुरित्यर्थः अग्निरिति यावत् । अतएवाग्रे आतापितमिवेति वक्ष्यति अयं शुद्ध-सत्त्वगुणप्रभवोऽग्निरितरेषां रजस्तमःप्रधानानां तन्मिश्रसत्त्वप्रधा-नानां च देवादीनां तापजनक इति बोध्यम् येन वह्निना । यथा तापितः पुमान् संभ्रान्तो व्याकुलो भवति तद्वत् त्रैलोक्यं संभ्रान्त-मभूदित्यर्थः ॥ ८ ॥ ९ ॥

* "आदीपितम" इति पाठान्तरम् ।

कश्मलोपहताः सर्वे पितामहमथाब्रुवन् ॥ १० ॥
बहुभिः कारणैर्देव ! विश्वामित्रो महामुनिः ।
लोभितः क्रोधितश्चैव तपसा चाभिवर्द्धते ॥ ११ ॥
नह्यस्य वृजिनं किञ्चित् दृश्यते सूक्ष्ममप्युत ।
न दीयते यदि त्वस्य मनसा यदभीप्सितम् ॥ १२ ॥
विनाशयति त्रैलोक्यं तपसा सचराचरम् ।
व्याकुलाश्च दिशः सर्वा न च किञ्चित् प्रकाशते ॥ १३ ॥
सागराः क्षुभिताः सर्वे विशीर्य्यन्ते च पर्वताः ।
प्रकम्पते च वसुधा वायुर्वातीह संकुलः ॥ १४ ॥
ब्रह्मन् ! न प्रतिजानीमो नास्तिको जायते जनः ।

तपसा तेजसा तपोरूपेण तेजसा मोहिताः विषयाग्राहिचित्ताः कृताः। मन्दरश्मयः क्षीणतेजसः। कश्मलं दुःखम् ॥ १० ॥

तत्तद्विषयैर्लोभितः क्रोधितोऽपि निर्विघ्नमेव तौ त्यक्त्वा तपसाभिवर्द्धते इत्यन्वयः ॥ ११ ॥

सूक्ष्ममपि वृजिनम् अल्पमपि कामक्रोधरूपं यदभीप्सितं प्रार्थितम् ॥ १२ ॥

अन्यथा लोकनाश इत्याह,—विनाशयतीति। तेत्रंयुतरपाठाश्च छन्दोभङ्गः। नाशप्रकारमाह व्याकुला इति ॥ १३ ॥ १४ ॥

प्रतिजानीमः प्रतिक्रियां न जानीम इत्यर्थः। नास्तिको जायते

संमूढमिव त्रैलोक्यं संप्रक्षुभितमानसम् ।
भास्करो निष्प्रभश्चैव महर्षेस्तस्य तेजसा ॥ १५ ॥
बुद्धिं न कुरुते यावन्नाशे देव ! महामुनिः ।
तावत् प्रसाद्यो भगवन्नग्निरूपो महाद्युतिः ॥ १६ ॥
कालाग्निना यथापूर्वं त्रैलोक्यं दह्यतेऽखिलम् ॥ १७ ॥
देवराज्यं चिकीर्षेत दीयतामस्य यन्मनः * ।
ततः सुरगणाः सर्वे पितामहपुरोगमाः ॥ १८ ॥
विश्वामित्रं महात्मानं वाक्यं मधुरमब्रुवन् ।
ब्रह्मर्षे ! स्वागतं तेऽस्तु तपसा स्म सुतोषिताः ॥ १९ ॥
ब्राह्मण्यं तपसोग्रेण प्राप्तवानसि कौशिक ! ।

जगत् क्षोभवन्नास्तिक इव स्वकर्मानुष्ठानशून्य इत्यर्थः । तदाह संमूढमिवेति । संप्रक्षुभितमानसं व्याकुलचित्तम् ॥ १५ ॥

नाशे जगन्नाशे ॥ १६ ॥

पूर्वं युगान्तकाले ॥ १७ ॥

यद्यसौ देवराज्यमपि चिकीर्षेत तत् तदा तदपि अस्य दीयतामित्यर्थं इति केचित् । यद्यस्य अभीष्टं न दीयते, तदासौ देवराज्यं चिकीर्षेत अतोऽस्य यन्मनस्तत्स्थं अभिमतं तद्दीयतामित्यर्थं इत्यन्ये ॥

स्वागतं भद्रम् स्मेति विस्मयबोधे च्यार्थः ॥ १९ ॥

---

* "मतम्" इति वा पाठः ।

दीर्घमायुश्च ते ब्रह्मन्! ददामि समदद्गणः ॥ २० ॥
स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्य! यथासुखम्।
पितामहवचः श्रुत्वा सर्वेषां त्रिदिवौकसाम् ॥ २१ ॥
कृत्वा प्रणामं मुदितो व्याजहार महामुनिः।
ब्राह्मण्यं यदि मे प्राप्तं दीर्घमायुस्तथैव च ॥ २२ ॥
ओंकारोऽथ वषट्कारो वेदाश्च वरयन्तु माम्।
क्षत्रवेदविदां श्रेष्ठो ब्रह्मवेदविदामपि ॥ २३ ॥
ब्रह्मपुत्रो वसिष्ठो मामेवं वदतु देवताः।

दीर्घायुर्दानं स्वदर्शनफलम् ॥ २० ॥
स्वस्ति सुखं यथासुखम् तपस उपरते इति शेषः ॥ २१ ॥
यदि इत्यसंदिग्धे संदिग्धवचनं वेदाः प्रमाणं चेदितिवत् ॥ २२ ॥
ओमिति ब्रह्मज्ञानसाधनं वषट् इति यज्ञसाधनम्। वेदाश्च तद-पेक्षितांगोपांगादिप्रतिपादकाः। वरयंतु यथा वसिष्ठादीन् सहज-ब्राह्मणान् वरयन्ति तथा वरणं चाध्यापनयाजनयोरनुमतिः। ब्रह्मानु-ग्रहेऽपि जातिब्राह्मण्याभावात् वसिष्ठेनाङ्गीकारेऽर्थमेव सर्वम्, अत आह,—क्षत्रेत्यादि। सूर्य्यवंश्यानादिपुरोहितत्वात् तदध्यापक-त्वाच्च तेषां युद्धजयादिप्रयोजनसंपत्तये क्षत्रवेदविदाम् उपप्रयो-जनधनुर्वेदविदां श्रेष्ठः। ब्रह्मवेदा वेदचतुष्टयी ब्रह्मप्रतिपादकोप-निषद्भागवत्त्वात् ॥ २३ ॥
अन्यदपि श्रेष्ठत्वबीजम् ब्रह्मपुत्र इति। एवं ब्रह्मर्षे इति।

यद्येवं परमः कामः कृतो यान्तु सुरर्षभाः ॥ २४ ॥
ततः प्रसादितो देवैर्वसिष्ठो जपतां वरः ।
सख्यञ्चकार ब्रह्मर्षिरेवमस्त्विति चाब्रवीत् ॥ २५ ॥
ब्रह्मर्षिस्त्वं न सन्देहः सर्वं सम्पद्यते तव ।
इत्युक्त्वा देवताश्चापि सर्वा जग्मुर्यथागतम् ॥ २६ ॥
विश्वामित्रोऽपि धर्मात्मा लब्ध्वा ब्राह्मण्यमुत्तमम् ।
पूजयामास ब्रह्मर्षिं वसिष्ठं जपतां वरम् ॥ २७ ॥
कृतकामो महीं सर्वां चचार तपसि स्थितः ।

एवं वसिष्ठमुखेन ब्रह्मर्षित्वप्रापणरूपे मम परमः कामो मनोरथो यदि कृतस्तदा मद्विषये कृतकृत्याः सुरर्षभा यान्तु नान्यथेति भावः । अन्यथा पुनस्तपश्चरिष्यामीति तात्पर्य्यम् ॥ २४ ॥

ततो विश्वामित्रोक्त्यनन्तरं प्रसादितो विश्वामित्रस्य ब्रह्मर्षित्वानुमतये । एवं ब्रह्मर्षित्वम् । सख्यं विश्वामित्रेण च ॥ १५ ॥

सर्वं ब्राह्मण्यप्रयोजकं ब्राह्मणाज्जन्म तत्संस्कारादि, संपद्यते सम्पन्नं अनेन त्रिपुरुषपर्य्यन्तं विश्वामित्रस्य ब्राह्मण्यलाभः सूचितः । एतच्चान्त्यानन्तर्य्ये इति सूत्रे महाभाष्ये स्पष्टम् । इति वसिष्ठोक्तं देवता अप्युक्त्वा जग्मुरित्यन्वयः ॥ २६ ॥

पूजयामास सपरिवारस्य मम सत्कारकरणेन ब्रह्मर्षित्वप्रापक-साधनीभूतस्य सम्पादनेन कृतार्थीकृतोऽस्मि भगवतेति पूजयामास इत्यर्थः ॥ २७ ॥

एवं त्वनेन ब्राह्मण्यं प्राप्तं राम ! महात्मना ॥ २८ ॥
एष राम ! मुनिश्रेष्ठ एष विग्रहवांस्तपः ।
एष धर्मपरो नित्यं वीर्यस्यैव परायणम् ॥ २९ ॥
एवमुक्त्वा महातेजा विरराम द्विजोत्तमः ।
शतानन्दवचः श्रुत्वा रामलक्ष्मणसन्निधौ ॥ ३० ॥
जनकः प्राञ्जलिर्वाक्यमुवाच कुशिकात्मजम् ।
धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे मुनिपुङ्गव ! ॥ ३१ ॥
यज्ञं काकुत्स्थसहितः प्राप्तवानसि कौशिक ! ।
पावितोऽहं त्वया ब्रह्मन् ! दर्शनेन महामुने ! ॥ ३२ ॥
गुणा बहुविधाः प्राप्तास्तव सन्दर्शनान्मया ।
विस्तरेण च वै ब्रह्मन् कीर्त्यमानं महत् तपः ॥ ३३ ॥
श्रुतं मया महत्तेजो रामेण च महात्मना ।
सदस्यैः प्राप्य च सदः श्रुतास्ते बहवो गुणाः ॥ ३४ ॥

जगादेति विश्वामित्र इति शेषः । अथ प्रकृतशतानन्दवचनमेव-मेवमित्यादि ॥ २८ ॥

नित्यमिदानीम् अपि वीर्यस्य तपोवीर्यस्य ॥ २९ ॥ ३० ॥ ३१ ॥

पावितः पवित्रः कृतः ॥ ३२ ॥

गुणाः कर्मश्रेष्ठजातिश्रेष्ठ्यजन्याः ॥ ३३ ॥

अप्रमेयं तपस्तुभ्यम् अप्रमेयञ्च ते बलम् ।
अप्रमेया गुणाश्चैव नित्यं ते कुशिकात्मज ! ॥ १५ ॥
तृप्तिराश्चर्य्यभूतानां कथानां नास्ति मे विभो ! ।
कर्मकालो मुनिश्रेष्ठ ! लम्बते रविमण्डलम् ॥ १६ ॥
श्वःप्रभाते महातेजो द्रष्टुमर्हसि मां पुनः । *
स्वागतं जपतां श्रेष्ठ ! मामनुज्ञातुमर्हसि ॥ १७ ॥
एवमुक्तो मुनिवरः प्रशस्य पुरुषर्षभम् ।
विससर्जाशु जनकं प्रीतं प्रीतमनास्तदा ॥ १८ ॥
एवमुक्त्वा मुनिश्रेष्ठं वैदेहो मिथिलाधिपः ।
प्रदक्षिणं चकाराशु सोपाध्यायः सबान्धवः ॥ १९ ॥

महातेज इति संबुद्धिः । मया जनकेन रामेण च सह: प्राप्य स्थितैः सदस्यैश्च ते गुणाः श्रुताः ॥ १४ ॥

तुभ्यमिति तवेत्यर्थः । अप्रमेयम् इयत्ताज्ञानाविषयम् ॥ १५ ॥

कथानामिति तृप्यत इति शेषः । कर्मकाल इति अतिवर्त्तते इति शेषः । तदेवाह लम्बत इति ॥ १६ ॥

स्वागतं भद्रम् । अनुज्ञातुं कर्मणे इति शेषः ॥ १७ ॥

---

* "श्वः प्रभाते भवन्तं च द्रष्टुमेष्यामि वै पुनः ।" इति वङ्गीयाः ।

विश्वामित्रोऽपि धर्मात्मा सहरामः सलक्ष्मणः।
स्ववासमभिचक्राम पूज्यमानो महात्मभिः ॥ ४० ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
प्रभावकीर्त्तने विश्वामित्रब्रह्मर्षित्वलाभो
नाम पञ्चषष्टितमः सर्गः ॥ ६५ ॥

स्ववासं स्वनिवेशं, स्ववाढमिति पाठेऽप्ययमेवार्थः ॥ ४० ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
पञ्चषष्टितमः सर्गः ॥ ६५ ॥

षट्षष्टितमः सर्गः ।



ततः प्रभाते विमले कृतकर्मा नराधिपः ।
विश्वामित्रं महात्मानमाजुहाव सराघवम् ॥ १ ॥
तमर्चयित्वा धर्मात्मा शास्त्रदृष्टेन कर्मणा ।
राघवौ च महात्मानौ तदा वाक्यमुवाच ह ॥ २ ॥
भगवन्! स्वागतं तेऽस्तु किं करोमि तवानघ ! ।
भवानाज्ञापयतु मामाज्ञाप्यो भवताह्यहम् ॥ ३ ॥
एवमुक्तः स धर्मात्मा जनकेन महात्मना ।
प्रत्युवाच मुनिश्रेष्ठो वाक्यं वाक्यविशारदः ॥ ४ ॥
पुत्रौ दशरथस्येमौ क्षत्रियौ लोकविश्रुतौ ।
द्रष्टुकामौ धनुःश्रेष्ठं यदेतत् त्वयि तिष्ठति ॥ ५ ॥

कृतकर्मा कृतनित्यक्रियः ॥ १ ॥

कर्मणा अर्घ्यपाद्यादिसमर्पणेन राघवौ च संपूज्य वाक्यमुवाच विश्वामित्रं प्रतीति शेषः ॥ २ ॥

आज्ञाप्यः आज्ञापयितुं योग्यः । भवतेति कृत्यानां कर्त्तरि षष्ठी विकल्पात् तृतीया । आगमनप्रयोजनं बोधनीयमिति तात्पर्य्यम् ॥ ३ ॥ ४ ॥

द्रष्टुकामौ आगतौ इति शेषः ॥ ५ ॥

एतद्दर्शय भद्रं ते कृतकामौ नृपात्मजौ।
दर्शनादस्य धनुषो यथेष्टं प्रतियास्यतः ॥ ६ ॥
एवमुक्तस्तु जनकः प्रत्युवाच महामुनिम्।
श्रूयतामस्य धनुषो यदर्थमिह तिष्ठति ॥ ७ ॥
देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः।
न्यासोऽयं तस्य भगवन्! हस्ते दत्तो महात्मनः ॥ ८ ॥
दक्षयज्ञवधे पूर्वं धनुरायम्य वीर्यवान्।
विध्वस्य त्रिदशान् रोषात् सलीलमिदमब्रवीत् ॥ ९ ॥

कृतकामौ प्राप्तकामौ ॥ ६ ॥

ततो धनुर्वृत्तान्तमाह जनकः,—एवमिति। अस्य इहस्थितस्य धनुषः श्रूयतामागमनादिवृत्तान्त इति शेषः। यदर्थं यत्प्रयोजनाय तिष्ठति, तच्च श्रूयताम् ॥ ७ ॥

निमिः कूटस्थः तस्य ज्येष्ठः पुत्रो देवरातः। न्यासो निक्षेपः अयं धनूरूपः। अपरे तु नितरामास्ते देवता यत्रेति व्युत्पत्त्या न्यासो देवपूजास्थानं तत्पूजार्थं धनुर्बधार्थं च दत्त इत्यर्थः। निक्षेपपरतया व्याख्याने तु निक्षेपस्य स्वीकरणमनुचितं भगवता तद्भङ्गे च निक्षेपापहरणप्रयुक्तदोषभागिता जनकस्य स्यादिति प्राहुः ॥ ८ ॥

कैदं तत्तदाह,—दक्षेत्यादि। दक्षयज्ञवधे इति निमित्तसप्तमी। अत्र च नमनस्वीकरणपूर्वमाकृष्य सलीलमिति वधविषयप्रयासो द्योत्यते ॥ ९ ॥

यस्माद्भागार्थिनो भागान् नाकल्पयत मे सुराः ।
वराङ्गानि महार्हाणि धनुषा शातयामि वः ॥ १० ॥
ततो विमनसः सर्वे देवा वै मुनिपुङ्गव ! ।
प्रसादयन्त देवेशं तेषां प्रीतोऽभवद्भवः ॥ ११ ॥
प्रीतियुक्तस्तु सर्वेषां ददौ तेषां महात्मनाम् । *
तदेतद्देवदेवस्य धनूरत्नं महात्मनः ॥ १२ ॥
न्यासभूतं तदा न्यस्तमस्माकं पूर्वजे विभौ ।
अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः ॥ १३ ॥

भागार्थिनः स्विष्टकृदादियज्ञभागार्थिनो मम भागं यतो नाकल्पयन्त सुरा अतो वराङ्गानि शिरांसि । अकल्पयतेत्येकवचनमार्षम् । महार्हाणि महापूजायोग्यानि ॥ १० ॥

विमनसो दीनाः । भवो रुद्रः ॥ ११ ॥

ददौ संहारार्थं गृहीतं धनुरिति शेषः । देवदेवस्य रुद्रस्य देवैर्दत्तं धनूरत्नम् ॥ १२ ॥

अस्मत्पूर्वजे देवराते । तैः शिवसहितैर्देवैर्न्यासभूतं देवपूजाख्यानभूतं न्यस्तं दत्तम् । तदुक्तं कौर्मे एकविंशेऽध्याये,—

"प्रीतश्च भगवानीशस्त्रिशूली नीललोहितः ।
प्रददौ शुनःशार्थं जनकायाद्भुतं धनुः ॥" इति

---

* "प्रीतश्चापि ददौ तेषां तान्यङ्गानि महौजसाम् ।
धनुषा यानि चान्यासन् शातितानि महात्मनाम् ॥" इति ग०।

क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुता।
भूतलादुत्थिता सा तु व्यवर्धत ममात्मजा ॥ १४ ॥
वीर्य्यशुल्केति मे कन्या स्थापितेयमयोनिजा।
भूतलादुत्थितां तां तु वर्द्धमानां ममात्मजाम् ॥ १५ ॥
वरयामासुरागत्य राजानो मुनिपुङ्गव ! ।

पाद्मेऽपि च,—

"चापं शम्भोर्दयादत्तं कन्याशुल्कीकृतं मया।" इति।

यदर्थमिह तिष्ठति इत्यस्याप्युत्तरं न्यासभूतमित्यन्तेन जातं पूजास्थानत्वेन पूजार्थमित्यर्थलाभात्। यजेति कृषत इति अभिचयनार्थमिति शेषः। "कृषभेत कृषति" इत्यादि शास्त्रात्। लाङ्गलात् लाङ्गलपद्धतेः उत्थिता कन्येति शेषः ॥ १३ ॥

यतः क्षेत्रं शोधयता सीतायाः लाङ्गलपद्धतेर्मया लब्धा अतो नाम्ना सीतेति प्रसिद्धा, भूतलात् यज्ञियात्, व्यवर्धत वृद्धिं प्राप्ता। पाद्मेऽपि—

"अथ लोकेश्वरी लक्ष्मीर्जनकस्य पुरे स्वतः।
शुभक्षेत्रे हलोत्खाते तारे चोत्तरफाल्गुने ॥
अयोनिजा पद्मकरा बालार्कशतसन्निभा।
सीतामुखे समुत्पन्ना बालभावेन सुन्दरी ॥
सीतामुखोद्भवात् सीता इत्यस्यै नाम चाकरोत्।
ततोऽभूदौरसी तस्य ऊर्मिला नाम कन्यका ॥"

इति ॥ १४ ॥

तेषां वरयतां कन्यां सर्वेषां पृथिवीक्षिताम् ॥ १६ ॥
वीर्य्यशुल्केति भगवन् ! न ददामि सुतामहम् ।
ततः सर्वे नृपतयः समेत्य मुनिपुङ्गव ! ॥ १७ ॥
मिथिलामप्युपागम्य वीर्य्यं जिज्ञासवस्तदा ।
तेषां जिज्ञासमानानां शैवं धनुरुपाहृतम् ॥ १८ ॥
न शेकुर्ग्रहणे तस्य धनुषस्तोलनेऽपि वा ।
तेषां वीर्य्यवतां वीर्य्यमल्पं ज्ञात्वा महामुने ! ॥ १९ ॥
प्रत्याख्याता नृपतयस्तन्निबोध तपोधन ! ।
ततः परमकोपेन राजानो मुनिपुङ्गव ! ॥ २० ॥
अरुन्धन् मिथिलां सर्वे वीर्य्यसन्देहमागताः ।
आत्मानमवधूतं मे विज्ञाय नृपपुङ्गवाः ॥ २१ ॥

वीर्य्यशुल्का धनुःसज्जीकरणादिरूपं वीर्य्यमेव शुल्कं यस्याः । १५ ॥ १६ ॥

न ददामि न प्रादाम् ॥ १७ ॥

वीर्य्यं धनुषः सारं जिज्ञासव इत्यस्याभूवन् इति शेषः । उपाहृतं दर्शितमानीयेत्यर्थः ॥ १८ ॥

ग्रहणं धारणं, तोलनं भारपरीक्षार्थं हस्तेन चालनम् ॥ १९ ॥

प्रत्याख्याताः कन्या न दत्तेति यावत् । तदित्यव्ययम् । ततोऽनन्तरं वृत्तं तन्निबोध जानीहि । तत इति उत्तरान्वयि ॥ २० ॥

अवरुन्धन्नुपरुद्धवन्तः वीर्य्यसन्देहं धनुरारोपणसामर्थ्यविषये

रोषेण महताविष्टाः पीडयन् मिथिलां पुरीम्।
ततः संवत्सरे पूर्णे क्षयं यातानि सर्वशः ॥ २२ ॥
साधनानि मुनिश्रेष्ठ ! ततोऽहं भृशदुःखितः।
ततो देवगणान् सर्वांस्तपसाहं प्रसादयम् ॥ २३ ॥
ददुश्च परमप्रीताश्चतुरङ्गबलं सुराः।
ततो भग्ना नृपतयो हन्यमाना दिशो ययुः ॥ २४ ॥
अवीर्य्या वीर्य्यसन्दिग्धाः सामात्याः पापकारिणः।
तदेतन्मुनिशार्दूल ! धनुः परमभास्वरम् ॥ २५ ॥
रामलक्ष्मणयोश्चापि दर्शयिष्यामि सुव्रत !।
यद्यस्य धनुषो रामः कुर्य्यादारोपणं मुने ! ॥ २६ ॥

न्येषां सन्देहविषयत्वं गताः अतो बलेनैव कन्यां ग्रहीष्याम इत्यध्यवसन्नित्यर्थः। ते च सर्वे नृपा आत्मानं स्वं स्वम् आत्मानं मे मयावधूतं वीर्य्यशुल्ककरणेन तिरस्कृतं विज्ञाय ॥ २१ ॥

रोषेणाविष्टाः मिथिलामपीडयन् अडभाव आर्षः। क्षयं यातानि दुर्गस्थित्या युद्धवशादिति शेषः ॥ २२ ॥

साधनानि दुर्गरक्षणसाधनानि प्रसादयं प्रसादितवान् अडभाव आर्षः ॥ २३ ॥

[illegible] ददुः जगन्मातु रक्षणार्थं स्वकार्य्यसिद्ध्यर्थं चेदं बलदानं दिशो ययुः समूहं विहायेति शेषः ॥ २४ ॥

सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ॥ २७ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे विश्वामित्र-
जनकसंवादे धनुर्वृत्तान्तकीर्त्तनं नाम
षट्षष्टितमः सर्गः ॥ ६६ ॥

अवीर्याः अल्पवीर्याः वीर्यसन्दिग्धाः सन्दिग्धवीर्याः आहि-
ताग्न्यादित्वात् निष्ठायाः परनिपातः । तदेतत् उक्तवृत्तान्त-
कम् ॥ २५ ॥ २६ ॥ २७ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
षट्षष्टितमः सर्गः ॥ ६६ ॥

सप्तषष्टितमः सर्गः ।



जनकस्य वचः श्रुत्वा विश्वामित्रो महामुनिः ।
धनुर्दर्शय रामाय इति होवाच पार्थिवम् ॥ १ ॥
ततः स राजा जनकः सचिवान् व्यादिदेश ह ।
धनुरानीयतां दिव्यं गन्धमाल्यानुलेपितम् ॥ २ ॥
जनकेन समादिष्टाः सचिवाः प्राविशन् पुरम् ।
तद् धनुः पुरतः कृत्वा निर्जग्मुरमितौजसः ॥ ३ ॥
नृणां शतानि पञ्चाशद्व्यायतानां महात्मनाम् ।
मञ्जूषामष्टचक्रां तां समूहुस्ते कथञ्चन ॥ ४ ॥

रामाय इति द्वयसन्धिरैच्छिकः । आरोपयिष्यति सीतां ग्रहीष्यति च इति भावः ॥ १ ॥

सचिवान् समीपे विद्यमानान् अनुलेपितं युक्तम् ॥ २ ॥

प्राविशन् पुरं यज्ञवाटादित्यर्थः ॥ ३ ॥

शतानि पञ्चाशत्पञ्चसहस्राणीत्यर्थः । अनेन धनुषो दुर्वहत्वादि दर्शितम् । आयताः दीर्घाः महात्मानो हृष्टपुष्टशरीराः अष्टचक्रां रथाङ्गाष्टयुक्तां * तां दृढतरत्वेन प्रसिद्धां कथञ्चन तत्संख्या अपि महता प्रयत्नेन इत्यर्थः ॥ ४ ॥

---

* अष्टचक्रवत् शकटारोपिताम् इत्यन्ये ।

तामादाय सुमञ्जूषामायसीं यत्र तद्धनुः।
सुरोपमं ते जनकमूचुर्नृपतिमन्त्रिणः॥ ५॥
इदं धनुर्वरं राजन्! पूजितं सर्वराजभिः।
मिथिलाधिप! राजेन्द्र! दर्शनीयं यदीच्छसि॥ ६॥
तेषां नृपो वचः श्रुत्वा कृताञ्जलिरभाषत।
विश्वामित्रं महात्मानं तावुभौ रामलक्ष्मणौ॥ ७॥
इदं धनुर्वरं ब्रह्मन्! जनकैरभिपूजितम्।
राजभिश्च महावीर्य्यैरशक्तैः पूरितं तदा॥ ८॥
नैतत् सुरगणाः सर्वे नासुरा न च राक्षसाः।
गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः॥ ९॥
क्व गतिर्मानुषाणाञ्च धनुषोऽस्य प्रपूरणे।

आयसीम् अष्टलोहनिर्मिताम् सुरोपममिति जनकविशेषणम्॥५॥
यदि दर्शनीयमितीच्छसि तदा दर्शयेत्यर्थः॥ ६॥
उभौ रामलक्ष्मणौ तदाश्रयं धनुः प्रदर्शनमुद्दिश्य विश्वामित्रमभाषतेति योजना॥ ७॥
पूरितुम् अशक्तैस्तोलनादिवक्ष्यमाणव्यापाराशक्तैः राजभिस्तु जनकैर्देवराततिरिक्तैः पूजितं ऐश्वरत्वाद् ईश्वरवदेव केवलं पूजितमित्यर्थः॥ ८॥
नैतदिति। एतद्धनुः सुरादयो न सज्जीकर्तुं शक्ता इति शेषः॥९॥

आरोपणे समायोगे वेपने तोलने तथा॥ १०॥
तदेतद् धनुषां श्रेष्ठमानीतं मुनिपुङ्गव!।
दर्शयैतन्महाभाग! अनयो राजपुत्रयोः॥ ११॥
विश्वामित्रः स धर्मात्मा श्रुत्वा जनकभाषितम्।
वत्स राम! धनुः पश्य इति राघवमब्रवीत्॥ १२॥
महर्षेर्वचनाद् रामो यत्र तिष्ठति तद्धनुः।
मञ्जूषां तामपावृत्य दृष्ट्वा धनुरथाब्रवीत्॥ १३॥
इदं धनुर्वरं दिव्यं संस्पृशामीह पाणिना।
यत्नवांश्च भविष्यामि तोलने पूरणेऽपि वा॥ १४॥
बाढ़मित्यब्रवीत् राजा मुनिश्च समभाषत।

गतिः शक्तिः सामर्थ्यं चक्रवर्थे। प्रपूरणम् आकर्णाकर्षणम्। आरोपणं सज्जीकरणम्। समायोगः शरेण योजनम्। वेपनं आस्फालनम्। तोलनमुत्तम्॥ १०॥

आनीतम् अथापि त्वदाज्ञयेत्यादिः॥ ११॥ १२॥

यत्र धनुस्तिष्ठति तां मञ्जूषाम् अपावृत्य अपगतावरणां कृत्वा॥ १३॥

स्पृशामीति हर्षनौत्सुक्यस्य निवृत्तेः वाचार्थं यत्नवान् भविष्यामि किमित्यब्रवीत् अपृच्छदित्यर्थः॥ १४॥

तं राजा मुनिश्च बाढ़मित्येव चाब्रवीत् समभाषतेति प्रत्येकम-

लीलया स धनुर्मध्ये जग्राह वचनान्मुनेः ॥ १५ ॥
पश्यतां नृसहस्राणां बहूनां रघुनन्दनः ।
आरोपयत् स धर्मात्मा सलीलमिव तद्धनुः ॥ १६ ॥
आरोपयित्वा मौर्वीञ्च पूरयामास तद्धनुः ।
तद्बभञ्ज धनुर्मध्ये नरश्रेष्ठो महायशाः ॥ १७ ॥
तस्य शब्दो महानासीत् निर्घातसमनिस्वनः ।
भूमिकम्पश्च सुमहान् पर्वतस्येव दीर्य्यतः ॥ १८ ॥
निपेतुश्च नराः सर्वे तेन शब्देन मोहिताः ।
वर्जयित्वा मुनिवरं राजानं तौ च राघवौ ॥ १९ ॥

न्वयः । मध्ये मध्यप्रदेशे लीलया अनायासेन जग्राह पादाङ्गुलेनोन्नतं कृत्वा करेण जग्राह तदुक्तं पाद्मे,—

"रामोऽपि तद्धनुःकोटिं स्पृष्ट्वा पादाङ्गुलात् ततः ।
उन्नतं चापमारोप्य बभञ्जे मोहिता जनाः ॥"

इति अतिभारवद्धनुषः पादाङ्गुल्या मध्यभागपर्य्यन्तमुन्नमनं मध्ये ग्रहीतोद्धारश्च महाबलसाध्य इति महाबलवत्त्वमनेन सूचितम् ॥१५॥

पश्यतामनादरे षष्ठी ॥ १६ ॥

पूरणमाकर्षणम् ॥ १७ ॥

निर्घातोऽशनिध्वनिस्तत्सदृशस्वनसमः शब्द आसीत् दीर्य्यतः पर्वतस्य समीपदेशे यथा भूमिकम्पस्तथा भूकम्प आसीत् ॥ १८ ॥

मुनिवरो विश्वामित्रः । राजा जनकः ॥ १९ ॥

प्रत्याश्वस्ते जने तस्मिन् राजा विगतसाध्वसः।
उवाच प्राञ्जलिर्वाक्यं वाक्यज्ञो मुनिपुङ्गवम्॥ २०॥
भगवन्! दृष्टवीर्य्यो मे रामो दशरथात्मजः।
अत्यद्भुतमचिन्त्यं च अतर्कितमिदं मया॥ २१॥
जनकानां कुले कीर्तिमाहरिष्यति मे सुता।
सीता भर्तारमासाद्य रामं दशरथात्मजम्॥ २२॥
मम सत्यप्रतिज्ञा सा वीर्य्यशुल्केति कौशिक!।
सीता प्राणैर्बहुमता देया रामाय मे सुता!॥ २३॥
भवतोऽनुमते ब्रह्मन्! शीघ्रं गच्छन्तु मन्त्रिणः।
मम कौशिक! भद्रं ते अयोध्यां त्वरिता रथैः॥ २४॥
राजानं प्रश्रितैर्वाक्यैरानयन्तु पुरं मम।
प्रदानं वीर्य्यशुल्कायाः कथयन्तु च सर्वशः॥ २५॥

विगतसाध्वसः रामेण धनुरनारोपणे कन्या अविवाहितैव स्थास्यतीति या भीः स्थिता सा गतेत्यर्थः॥ २०॥

अतर्कितमिदं मया एतदारोपणमित्यर्थः॥ २१॥

आहरिष्यति सम्पादयिष्यति॥ २२॥

मम प्रतिज्ञा सत्या जातेति शेषः। प्राणैः प्राणेभ्यः॥ २३॥

मम मन्त्रिण इत्यन्वयः। अनुमते अनुमतज्ञापनसाधननिमित्तमित्यर्थः। भवतोऽनुमत्येति वार्थः॥ २४॥

मुनिगुप्तौ च काकुत्स्थौ कथयन्तु नृपाय वै ।
प्रीतियुक्तं तु राजानम् आनयन्तु सुशीघ्रगाः ॥ २६ ॥
कौशिकस्तु तथेत्याह राजा चाभाष्य मन्त्रिणः ।
अयोध्यां प्रेषयामास धर्मात्मा कृतशासनान् ॥ २७ ॥
यथावृत्तं समाख्यातुमानेतुञ्च नृपं तथा ॥ २८ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे हरधनुर्भङ्गो नाम सप्तषष्टितमः सर्गः ॥ ६७ ॥

प्रश्रितैर्विनयसहितैः सर्वशश्च सर्वमप्यन्यत् वृत्तान्तमित्यर्थः ॥२५॥
गुप्तौ रक्षितौ प्रीतियुक्तमिति क्रियाविशेषणम् ॥ २६ ॥
आभाष्य आहूय कृतशासनान् दत्तकन्यादानसन्देशशासनान् ॥२७॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

अष्टषष्टितमः सर्गः।



जनकेन समादिष्टा दूतास्ते क्लान्तवाहनाः।
त्रिरात्रमुषिता मार्गे तेऽयोध्यां प्राविशन् पुरीम्॥ १॥
ते राजवचनाद् गत्वा राजवेश्मप्रवेशिताः।
ददृशुर्देवसङ्काशं वृद्धं दशरथं नृपम्॥ २॥
बद्धाञ्जलिपुटाः सर्वे दूता विगतसाध्वसाः।
राजानं प्रश्रितं वाक्यमब्रुवन्मधुराक्षरम्॥ ३॥
मैथिलो जनको राजा साग्निहोत्रपुरस्कृतः।
मुहुर्मुहुर्मधुरया स्नेहसंरक्तया गिरा॥ ४॥

त्रिरात्रं रात्रित्रयम् उषिता मार्गे कृतवासाः। तावद्वासकरणे निमित्तं क्लान्तवाहनत्वम्। ते दूतकर्मणि नियुक्ता मन्त्रिणः तदनन्तरन्तेऽयोध्यां प्राविशन्॥ १॥

राजवचनात् जनकोऽस्मानिह प्रेषितवानिति स्वराजनामसङ्कीर्तनात् राजवेश्म दशरथवेश्म प्रवेशितास्तदीयैर्द्वारपालैरिति शेषः॥ २॥

विगतसाध्वसाः महाराजदूतत्वेन तद्भृत्यवत्तत्सन्निधौ भयरहिताः॥ ३॥

साग्निहोत्रपुरस्कृतः पुरस्कृताग्निहोत्रसहितः। आहिताग्न्यादिः।

कुशलं चाव्ययं चैव सोपाध्यायपुरोहितम्।
जनकस्त्वां महाराज! पृच्छते सपुरःसरम् ॥ ५ ॥
पृष्ट्वा कुशलमव्यग्रं वैदेहो मिथिलाधिपः।
कौशिकानुमते वाक्यं भवन्तमिदमब्रवीत् ॥ ६ ॥
पूर्वं प्रतिज्ञा विदिता वीर्य्यशुल्का ममात्मजा।
राजानश्च कृतामर्षा निर्वीर्या विमुखीकृताः ॥ ७ ॥
सेयं मम सुता राजन्! विश्वामित्रपुरस्कृतैः।
यदृच्छयागतै राजन्! निर्जिता तव पुत्रकैः ॥ ८ ॥
तच्च रत्नं धनुर्दिव्यं मध्ये भग्नं महात्मना।
रामेण हि महाबाहो! महत्यां जनसंसदि ॥ ९ ॥

पुरस्कृता मन्त्र्यादयः। अग्निहोत्रपदेन तत्साधनऋत्विजस्तैः सहित इत्यर्थः इत्यन्ये ॥ ४ ॥

कुशलं क्षेमम् अव्ययमनपायम्। त्वं महाराज! आपृच्छते। आङि नु पृच्छेरित्यात्मनेपदम्। पुरःसरा भृत्यास्तत्सहितम् ॥ ५ ॥

अनुमते अनुमतकृत्यसाधननिमित्तम् ॥ ६ ॥

वीर्यशुल्केति प्रतिज्ञा पूर्वं युष्माकं विदितेत्यन्वयः। विमुखीकृता इत्यपि विदितम् ॥ ७ ॥

तव पुत्रकैरिति। तव पुत्रेण रामेणेत्यर्थः। कमत्ययेनाल्पार्थकेन बाल्यद्योतनम्। आमातृबुद्ध्या महाबलत्वेनेश्वरबुद्ध्या च पूज्यत्वेन बहुवचनप्रयोगः ॥ ८ ॥

अस्मै देया मया सीता वीर्य्यशुल्का महात्मने ।
प्रतिज्ञां तर्तुमिच्छामि तदनुज्ञातुमर्हसि ॥ १० ॥
सोपाध्यायो महाराज ! पुरोहितपुरस्कृतः ।
शीघ्रमागच्छ भद्रं ते द्रष्टुमर्हसि राघवौ ॥ ११ ॥
प्रतिज्ञां मम राजेन्द्र ! निर्वर्तयितुमर्हसि ।
पुत्रयोरुभयोरेव प्रीतिं त्वमुपलप्स्यसे ॥ १२ ॥
एवं विदेहाधिपतिर्मधुरं वाक्यमब्रवीत् ।
विश्वामित्राभ्यनुज्ञातः शतानन्दमते स्थितः ॥ १३ ॥
दूतवाक्यं तु तत् श्रुत्वा राजा परमहर्षितः ।
वसिष्ठं वामदेवञ्च मन्त्रिणश्चैवमब्रवीत् ॥ १४ ॥
गुप्तः कुशिकपुत्रेण कौसल्यानन्दवर्द्धनः ।
लक्ष्मणेन सह भ्रात्रा विदेहेषु वसत्यसौ ॥ १५ ॥
दृष्टवीर्य्यस्तु काकुत्स्थो जनकेन महात्मना ।

तत्र पूर्वं दक्षाध्वरध्वंससमये रुद्रेण यद्बलाच्छक्रादिपुरःसरसकल-सुरजयः कृतस्तदित्यर्थः । रत्नं उत्तमं धनुः ॥ ९ ॥

प्रतिज्ञां वीर्यशुल्कतया सीतादानप्रतिज्ञां तर्तुं पूरयितुम् ॥ १० ॥ ११ ॥

उभयोरेव उभयोरपि पुत्रयोः । न केवलं रामस्यैवेत्यर्थः । प्रीतिं विवाहजाम् । एतेन लक्ष्मणाय ऊर्मिलाप्रदानं सूचितम् ॥ १२ ॥

अभ्यनुज्ञातः अभ्यनुज्ञातकन्याप्रदानकालः ॥ १३ ॥

एवं वक्ष्यमाणम् ॥ १४ ॥

सम्प्रदानं सुतायास्तु राघवे कर्तुमिच्छति ॥ १६ ॥
यदि वो रोचते वृत्तं जनकस्य महात्मनः।
पुरीं गच्छामहे शीघ्रं माभूत् कालस्य पर्ययः ॥ १७ ॥
मन्त्रिणो बाढमित्याहुः सह सर्वैर्महर्षिभिः।
सुप्रीतश्चाब्रवीद् राजा श्वोयात्रेति च मन्त्रिणः ॥ १८ ॥
मन्त्रिणस्तु नरेन्द्रस्य रात्रिं परमसत्कृताः।
ऊषुः प्रमुदिताः सर्वे गुणैः सर्वैः समन्विताः ॥ १९ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
दशरथस्य हरधनुर्भङ्गश्रवणं नाम
अष्टषष्टितमः सर्गः ॥ ६८ ॥

विदेहेषु विदेहानां निवासभूते जनपदे ॥ १५ ॥ १६ ॥

यदि वो रोचते वृत्तं यौनसम्बन्धयोग्यमित्यर्थः। पर्ययोऽतिक्रमः ॥१७॥

श्वोयात्रेति मन्त्रिणोऽब्रवीदित्यन्वयः। तदर्थमुद्यमः क्रियतामिति शेषः ॥ १८ ॥

मन्त्रिणो जनकमन्त्रिणः। गुणैः सत्कारातिशयैः। नरेन्द्रश्चेति पाठे च ऊषुरिति उवासेति विपरिणामः। नरेन्द्रस्येति पाठे जनकस्येत्यर्थः ॥ १९ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
अष्टषष्टितमः सर्गः ॥ ६८ ॥

एकोनसप्ततितमः सर्गः ।



ततो रात्र्यां व्यतीतायां सोपाध्यायः सबान्धवः ।
राजा दशरथो हृष्टः सुमन्त्रमिदमब्रवीत् ॥ १ ॥
अद्य सर्वे धनाध्यक्षा धनमादाय पुष्कलम् ।
व्रजन्त्वग्रे सुविहिता नानारत्नसमन्विताः ॥ २ ॥
चतुरङ्गबलं चापि शीघ्रं निर्यातु सर्वशः ।
ममाज्ञासमकालं च यानं युग्यमनुत्तमम् ॥ ३ ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ।
मार्कण्डेयस्तु दीर्घायुरृषिः कात्यायनस्तथा ॥ ४ ॥
एते द्विजाः प्रयान्त्वग्रे स्यन्दनं योजयस्व मे ।
यथाकालात्ययो न स्यात् दूता हि त्वरयन्ति माम् ॥ ५ ॥

ततेति ॥ १ ॥

धनाध्यक्षाः कोशरक्षाधिकारिणः । पुष्कलं बहु श्रेष्ठं च * । सुविहिताः सुरक्षिताः सुसम्पादितवस्त्राद्योचितकर्माणो वा ॥ २ ॥

यानं शिबिकादि । युग्यमश्वादि । अनुत्तमानि च श्रेष्ठानि यानानि युग्यानि यान्तु । वसिष्ठाद्यर्थमिति शेषः ॥ ३ ॥ ४ ॥

अग्रे द्विजप्रयाणं प्रयाणे कल्याणाय । प्रयान्तु । उक्तयानयुग्यैरिति शेषः । दूता जनकदूताः ॥ ५ ॥

* श्रेयान् श्रेष्ठश्च पुष्कलं इत्यमरः ।

वचनाच्च नरेन्द्रस्य सेना च चतुरङ्गिणी ।
राजानमृषिभिः सार्द्धं व्रजन्तं पृष्ठतोऽन्वगात् ॥ ६ ॥
गत्वा चतुरहं मार्गे * विदेहानभ्युपेयिवान् ।
राजा च जनकः श्रीमान् श्रुत्वा पूजामकल्पयत् ॥ ७ ॥
ततो राजानमासाद्य वृद्धं दशरथं नृपम् ।
मुदितो जनको राजा प्रहर्षं परमं ययौ ॥ ८ ॥
उवाच वचनं श्रेष्ठो नरश्रेष्ठमुदान्वितम् ।
स्वागतं ते नरश्रेष्ठ ! दिष्ट्या प्राप्तोऽसि राघव ! ॥ ९ ॥
पुत्रयोरुभयोः प्रीतिं लप्स्यसे वीर्यनिर्जिताम् ।
दिष्ट्या प्राप्तो महातेजा वशिष्ठो भगवानृषिः ॥ १० ॥
सह सर्वैर्द्विजश्रेष्ठैर्देवैरिव शतक्रतुः ।
दिष्ट्या मे निर्जिता विघ्ना दिष्ट्या मे पूजितं कुलम् ॥ ११ ॥

षष्ठयं चिन्त्यफलं पादपूरणमात्रार्थम् ॥ ६ ॥

दूतानां त्रिदिनगम्योऽपि मार्गश्चतुरङ्गबलोपेतप्रयाणत्वात् चतुर्दिनं यातो मध्ये । श्रुत्वा दशरथागमनम् ॥ ७ ॥

राजानमासाद्य मुदितो हर्षं ययौ । मोदस्यैवाधिक्यावस्था हर्षं इति भेदः ॥ ८ ॥ ९ ॥

वीर्यं शौर्यम् ॥ १० ॥

---

* केचित् "चतुरहं मार्गं" पठन्ति । तेषां तु चतुरहव्यापकं मार्गं गत्वा इति व्याख्यानम् ।

राघवैः सह संबन्धाद्वीर्य्यश्रेष्ठैर्महाबलैः ।
श्वःप्रभाते नरेन्द्र ! त्वं संवर्त्तयितुमर्हसि ॥ १२ ॥
यज्ञान्ते नरश्रेष्ठ ! विवाहमृषिसत्तमैः ।
तस्य तद्वचनं श्रुत्वा ऋषिमध्ये नराधिपः ॥ १३ ॥
वाक्यं वाक्यविदां श्रेष्ठः प्रत्युवाच महीपतिम् ।
प्रतिग्रहो दातृवशः श्रुतमेतन्मया पुरा ॥ १४ ॥
यथा वक्ष्यसि धर्मज्ञ ! तत् करिष्यामहे वयम् ।
तद्धर्मिष्ठं यशस्यञ्च वचनं सत्यवादिनः ॥ १५ ॥
श्रुत्वा विदेहाधिपतिः परं विस्मयमागतः ।
ततः सर्वे मुनिगणाः परस्परसमागमे ॥ १६ ॥

वसिष्ठे इन्द्रसादृश्यं पूर्णधर्मत्वेन । विघ्नाः कन्यादानप्रतिबन्धाः ॥११॥

राघवैः सह सम्बन्धं प्राप्य पूजितं मे कुलम् । नरेन्द्र सर्वराजश्रेष्ठ ! संवर्तयितुं निर्वर्त्तयितुं विवाहमित्यग्रिमेणान्वयः ॥ १२ ॥

यज्ञान्ते अवभृथे ॥ १३ ॥

प्रतिग्रहः कन्यागवादीनां दातृवशः यदि दाता ददाति तदा प्रतिग्राह्यं प्रतिग्रहीत्रा इति स्थितः । एतद्वाक्यं मया श्रुतम् । क्षत्रियतया प्रतिग्रहधर्मस्य अद्यापि अज्ञानमेव । सांप्रतमेवानुभवो भविष्यति इति श्रुतमित्युक्तम् ॥ १४ ॥

अतो यथा त्वं वक्ष्यसि तद् वयं करिष्यामहे ॥ १५ ॥

विस्मयं कन्याया वीर्य्यशुल्केन जितत्वात् मदनुमत्यनपेक्षायामपि राज्ञो विनयेन तादृशवचनाद् विस्मयः ॥ १६ ॥

हर्षेण महता युक्तास्तां रात्रिमवसन् सुखम्।
राजा च राघवौ पुत्रौ निशाम्य परिहर्षितः॥१७॥
उवास परमप्रीतो जनकेनाभिपूजितः।
जनकोऽपि महातेजाः क्रियाधर्मेण तत्त्ववित्।
यज्ञस्य च सुताभ्यां च कृत्वा रात्रिमुवास ह॥१८॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे दशरथस्य मिथिलागमनं नाम एकोनसप्ततितमः सर्गः॥६९॥

निशाम्य दृष्ट्वा॥१७॥

यज्ञस्यावशिष्टाः क्रियाः। सुताभ्यां दुहितृभ्याः। कन्यादानप्रयुक्ततया यत् कर्तव्यम् अङ्कुरार्पणादिलौकिकं तत् सर्वं कृत्वा उवास॥१८॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे एकोनसप्ततितमः सर्गः॥६९॥

सप्ततितमः सर्गः ।

ततः प्रभाते जनकः कृतकर्मा महर्षिभिः ।
उवाच वाक्यं वाक्यज्ञः शतानन्दं पुरोहितम् ॥ १ ॥
भ्राता मम महातेजा वीर्यवानतिधार्मिकः ।
कुशध्वज इति ख्यातः पुरीमध्यवसच्छुभाम् ॥ २ ॥
वार्याफलकपर्यन्तां पिबन्निक्षुमतीं नदीम् ।
सांकाश्यां पुण्यसङ्काशां विमानमिव पुष्पकम् ॥ ३ ॥
तमहं द्रष्टुमिच्छामि यज्ञगोप्ता स मे ततः ।

अथ ब्राह्मसम्बन्धसदृशे यौनसम्बन्धे अपेक्षितः परस्परकुलाचारः सर्गाभ्याम्। तत इति । कृतकर्मा कृतनित्यक्रियः ॥ १ ॥

पुरीमध्यवसत् । उपान्वध्याङिति कर्मत्वम् ॥ २ ॥

परबलं वारयितुमर्हा वार्याः प्राकारः तत्स्थाः आफलका यन्त्रफलका-स्तद्युक्तः पर्यन्तः परिसरो यस्याः सा तथा। इक्षुमतीं पिबन् तज्जलं पिबन् सांकाश्यां तदाख्यां नगरीं वार्यामलकपर्यन्तामिति पाठे वार्यामलका आमलकविशेषाः पर्यन्तेषु यस्या इत्यर्थः। पुण्यसङ्काशां पुण्यशब्देन तत्-फलं स्वर्गः तत्सङ्काशाम्। तदुपमामित्यर्थः। पुष्पकं विमानं कौबेरं प्रसिद्धम् ॥ ३ ॥

तम् उक्तपुरवासिनम्। यज्ञगोप्ता मिथिलायां क्रियमाणयज्ञस्य सा-

प्रीतिं सोऽपि महातेजा इमां भोक्ता मया सह ॥ ४ ॥
एवमुक्ते तु वचने शतानन्दस्य सन्निधौ ।
आगताः केचिदव्यग्रा जनकस्तान् समादिशत् ॥ ५ ॥
शासनात् तु नरेन्द्रस्य प्रययुः शीघ्रवाजिभिः ।
समानेतुं नरव्याघ्रं विष्णुमिन्द्राज्ञया यथा ॥ ६ ॥
सांकाश्यां ते समागम्य ददृशुश्च कुशध्वजम् ।
न्यवेदयन् यथावृत्तं जनकस्य च चिन्तितम् ॥ ७ ॥
तद् वृत्तं नृपतिः श्रुत्वा दूतश्रेष्ठैर्महाजवैः ।
आज्ञया तु नरेन्द्रस्य आजगाम कुशध्वजः ॥ ८ ॥
स ददर्श महात्मानं जनकं धर्मवत्सलम् ।
सोऽभिवाद्य शतानन्दं जनकं चातिधार्मिकम् ॥ ९ ॥
राजार्हं परमं दिव्यमासनं सोऽध्यरोहत ।
उपविष्टावुभौ तौ तु भ्रातरावमितद्युती ॥ १० ॥

आम्नायामेव स्थितास्मद्यज्ञार्पेक्षितसामग्रीसम्पादकत्वेन रक्षिता । इमां प्रीतिं जानकीपरिणयजाम् ॥ ४ ॥

अव्यग्राः समर्थाः । समादिशत् शतानन्देन गन्तुं प्रैरयत् ॥ ५ ॥

नरेन्द्रशासनात् शतानन्दप्रेरिताः प्रययुर्दूता इति शेषः ॥ ६ ॥ ७ ॥

नृपतिः कुशध्वजः ॥ ८ ॥

पूर्वं शतानन्दमभिवाद्य ततो जनकञ्चाभिवाद्येत्यर्थः ॥ ९ ॥

अध्यरोहत पुरोहितजनकयोरनुमत्येति शेषः ॥ १० ॥

प्रेषयामासतुर्वीरौ मन्त्रिश्रेष्ठं सुदामनम्।
गच्छ मन्त्रिपते! शीघ्रमिक्ष्वाकुममितप्रभम् ॥ ११ ॥
आत्मजैः सह दुर्धर्षमानयस्व समन्त्रिणम्।
औपकार्य्यां स गत्वा तु रघूणां कुलवर्द्धनम् ॥ १२ ॥
ददर्श शिरसा चैनमभिवाद्येदमब्रवीत्।
अयोध्याधिपते वीर! वैदेहो मिथिलाधिपः ॥ १३ ॥
स त्वां द्रष्टुं व्यवसितः सोपाध्यायपुरोहितम्।
मन्त्रिश्रेष्ठवचः श्रुत्वा राजा सर्षिगणस्तदा ॥ १४ ॥
सबन्धुरगमत् तत्र जनको यत्र वर्त्तते।
राजा च मन्त्रिसहितः सोपाध्यायः सबान्धवः ॥ १५ ॥
वाक्यं वाक्यविदां श्रेष्ठो वैदेहमिदमब्रवीत्।
विदितं ते महाराज! इक्ष्वाकुकुलदैवतम् ॥ १६ ॥
वक्ता सर्वेषु कार्य्येषु वशिष्ठो भगवानृषिः।
विश्वामित्राभ्यनुज्ञातः सह सर्वैर्महर्षिभिः ॥ १७ ॥

सुदामनं सुदामनाख्यम् ॥ ११ ॥

औपकार्य्याम् उपकार्य्याशब्दात् स्वार्थेऽण्। दशरथशिबिरसन्निवेश इत्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥

इदं वाक्यं वक्ष्यमाणम्। वसिष्ठमुखेन वक्ता वदयितुम्। इक्ष्वाकुकुलदैवतं भगवान् वसिष्ठः। इक्ष्वाकूणां सर्वेषु कार्येषु वक्तेति ते विदितमित्यन्वयः। अतो विश्वामित्राभ्यनुज्ञया ऋषिभिः सह कुलक्रमागतं-

एष वक्ष्यति धर्मात्मा वशिष्ठो मे यथाक्रमम्।
तूष्णीभूते दशरथे वशिष्ठो भगवान् ऋषिः ॥ १८ ॥
उवाच वाक्यं वाक्यज्ञो वैदेहं सपुरोधसम्।
अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ॥ १९ ॥
तस्मान्मरीचिः संजज्ञे मरीचेः काश्यपः सुतः।
विवस्वान् काश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः * ॥ २० ॥
मनुः प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः।
तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ॥ २१ ॥
इक्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः † ।
कुक्षेरथात्मजः श्रीमान् विकुक्षिरुदपद्यत ॥ २२ ॥
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान्।
बाणस्य तु महातेजा अनरण्यः प्रतापवान् ॥ २३ ॥

शासनमितिशेषः। क्रमं ज्येष्ठानुक्रमं चानतिक्रम्य। दशपुरुषविख्यातादिति न्यायेन यौनसम्बन्धापेक्षितवंशपारम्पर्यमेष वक्ष्यति ॥ १६ ॥ १७ ॥ १८ ॥

अव्यक्तशब्देन मायाशबलं ब्रह्म। ब्रह्मा चतुर्मुखः। शाश्वतत्वनित्यत्वाव्ययत्वान्यस्य आपेक्षिकाणि द्रष्टव्यानि ॥ १९ ॥ २० ॥

---

* "मरीचावङ्गिरासस्य प्रचेताः तनयोऽभवत्।
मनुः प्रचेतसः पुत्रः——————" इति वङ्गीयाः।

† "विकुक्षिरुदपद्यत" इति वङ्गीयाः।

अनरण्यात् पृथुर्जज्ञे त्रिशंकुस्तु पृथोरपि ।
त्रिशङ्कोरभवत् पुत्रो धुन्धुमारो महायशाः ॥ २४ ॥
धुन्धुमारान्महातेजा युवनाश्वो महारथः ।
युवनाश्वसुतश्चासीन्मान्धाता पृथिवीपतिः ॥ २५ ॥
मान्धातुस्तु सुतः श्रीमान् सुसन्धिरुदपद्यत ।
सुसन्धेरपि पुत्रौ द्वौ ध्रुवसन्धिः प्रसेनजित् ॥ २६ ॥
यशस्वी ध्रुवसन्धेस्तु भरतो नाम नामतः ।
भरतात् तु महातेजा असितो नाम जायत ॥ २७ ॥
यस्यैते प्रतिराजान उदपद्यन्त शत्रवः ।
हैहयास्तालजङ्घाश्च शूराश्च शशविन्दवः ॥ २८ ॥
तांश्च संप्रतियुध्यन् वै युद्धे राजा प्रवासितः ।
हिमवन्तमुपागम्य भार्याभ्यां सहितस्तदा ॥ २९ ॥
असितोऽल्पबलो राजा कालधर्ममुपेयिवान् ।
द्वे चास्य भार्ये गर्भिण्यौ बभूवतुरिति श्रुतिः ॥ ३० ॥

मनोः प्रजापतित्वं प्रजासर्गाधिकारित्वेन । पूर्वकम् आद्यम् ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥

यस्य असितस्य । प्रतिराजानः प्रतिभूता राजानः ॥ २८ ॥

सोऽसितः प्रतियुध्यन् प्रतिपक्षतया युध्यन् । प्रवासितः राज्यान्निःसारितः ॥ २९ ॥

इति श्रुतिः पुरातनकथा इत्यर्थः ॥ ३० ॥

एका गर्भविनाशार्थं सपत्न्यै सगरं ददौ ।
ततः शैलवरे रम्ये बभूवाभिरतो मुनिः ॥ ३१ ॥
भार्गवश्च्यवनो नाम हिमवन्तमुपाश्रितः ।
तत्र चैका महाभागा भार्गवं देववर्चसम् ॥ ३२ ॥
ववन्दे पद्मपत्राक्षी काङ्क्षन्ती सुतमुत्तमम् ।
तमृषिं साभ्युपागम्य कालिन्दी चाभ्यवादयत् ॥ ३३ ॥
स तामभ्यवदद् विप्रः पुत्रेप्सुं पुत्रजन्मनि ।
तव कुक्षौ महाभागे ! सुपुत्रः सुमहाबलः ॥ ३४ ॥
महावीर्यो महातेजा अचिरात् संजनिष्यति ।
गरेण सहितः श्रीमान् मा शुचः कमलेक्षणे ! ॥ ३५ ॥
च्यवनश्च नमस्कृत्य राजपुत्री पतिव्रता ।

सगरं गरसहितं भक्ष्यम् । शैलवरे हिमवति अभिरतो बभूव ॥३१॥

तत्र हिमवति । एका प्राप्तिगरा ॥ ३२ ॥

कालिन्दीति तस्या नाम । अभ्युपागम्य शरणं गत्वा । अभ्यवादयच्च । येन शुश्रूषणमप्यकरोत् ॥ ३३ ॥

पुत्रजन्मनि तद्विषयेऽभ्यवदत् उक्तवान् ॥ ३४ ॥

गरेण सहितो जनिष्यतीत्यन्वयः । मा शुचः पतिमरणजं गरदानजं च शोकं त्यज । पुत्रेणैव सुखिनी भविष्यसीति भावः ॥ ३५ ॥

पतिना रहितेति पाठे नाभाव आर्षः । तस्मात् च्यवनप्रसादात् अजायत असूत ॥ ३६ ॥

पतिना रक्षिता तस्मात् पुत्रं देवी व्यजायत ॥ ३६ ॥
सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया ।
सह तेन गरेणैव सञ्जातः सगरोऽभवत् ॥ ३७ ॥
सगरस्यासमञ्जस्तु असमञ्जादथांशुमान् ।
दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥ ३८ ॥
भगीरथात् ककुत्स्थश्च ककुत्स्थाच्च रघुस्तथा ।
रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः ॥ ३९ ॥
कल्माषपादोऽप्यभवत् तस्माज्जातस्तु शंखणः ।
सुदर्शनः शंखणस्य अग्निवर्णः सुदर्शनात् ॥ ४० ॥
शीघ्रगस्त्वग्निवर्णस्य शीघ्रगस्य मरुः सुतः ।
मरोः प्रशुश्रुकस्त्वासीदम्बरीषः प्रशुश्रुकात् ॥ ४१ ॥
अम्बरीषस्य पुत्रोऽभून्नहुषश्च महीपतिः ।
नहुषस्य ययातिस्तु नाभागस्तु ययातिजः ॥ ४२ ॥
नाभागस्य बभूवाजः अजाद् दशरथोऽभवत् ।
अस्माद् दशरथाज्जातौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥
आदिवंशविशुद्धानां राज्ञां परमधर्मिणाम् ।

यतो गरेण सह जातोऽतः सगरो नामाऽभवत् । ३७ । ३८ ।

प्रवृद्धनामा पुरुषादकः वसिष्ठशापवशाद्राक्षसोऽभवत्, वसिष्ठाय प्रतिशापं दातुमुद्यतं जलं स्वपत्न्यनुनयेन स्वपादयोरेव क्षिप्तवान्, ततः कल्माषवर्णपादत्वात्तदाख्यश्चाभवत् । ३९ । ४० । ४१ । ४२ । ४३ ।

इक्ष्वाकुकुलजातानां वीराणां सत्यवादिनाम् ॥ ४४ ॥
रामलक्ष्मणयोरर्थे मत्सुते वरये नृप ! ।
सदृशाभ्यां नरश्रेष्ठ ! सदृशे दातुमर्हसि । ४५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
रघुकुलकीर्त्तनं नाम सप्तति-
तमः सर्गः ॥ ७० ॥

यद्यपि वंशपरम्परापुराणादिष्वन्यथा [illegible], तथापि तत्र कल्प-
भेदेन विरोधपरिहारः । एकस्यानेक[illegible] । [illegible] आदितो
ब्रह्माणमारभ्य वंशेन शुद्धानां वीराणां सत्यवादिनां सम्बन्धिनो राम-
लक्ष्मणयोः इत्यर्थः ॥ ४४ ॥ ४५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

एकसप्ततितमः सर्गः ।



एवं ब्रुवाणं जनकः प्रत्युवाच कृताञ्जलिः ।
श्रोतुमर्हसि भद्रं ते कुलं नः परिकीर्त्तितम् ॥ १ ॥
प्रदाने हि मुनिश्रेष्ठ ! कुलं निरवशेषतः ।
वक्तव्यं कुलजातेन तन्निबोध महामते ! ॥ २ ॥
राजाभूत् त्रिषु लोकेषु विश्रुतः स्वेन कर्म्मणा ।
निमिः परमधर्म्मात्मा सर्वसत्त्ववतां वरः ॥ ३ ॥
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः ।
प्रथमो जनको राजा जनकादप्युदावसुः ॥ ४ ॥
उदावसोस्तु धर्म्मात्मा जातो वै नन्दिवर्द्धनः ।

अथ जनकः कन्यापितृत्वात् जामातृवर्गे प्रभुतायां अनौचित्येन स्ववंश्यं स्वयमेवाह,—एवमिति । ब्रुवाणं वसिष्ठम् अस्माभिः परिकीर्त्तितं नोऽस्माकं कुलं श्रोतुमर्हसि ॥ १ ॥

कुलजातेन सत्कुलप्रसूतेन । प्रदाने कन्यादानविषये कुलं वक्तव्यमित्यन्वयः ॥ २ ॥ ३ ॥

तस्य निमेः । मिथिर्नाम्ना च मिथिरेवेति । प्रथमो जनकः सर्वेषामस्माकं जनकशब्दव्यवहारार्थत्वे मूलभूतः ॥ ४ ॥

नन्दिवर्द्धनसुतः शूरः सुकेतुर्नाम नामतः ॥ ५ ॥
सुकेतोरपि धर्म्मात्मा देवरातो महाबलः ।
देवरातस्य राजर्षेर्बृहद्रथ इति स्मृतः ॥ ६ ॥
बृहद्रथस्य शूरोऽभून् महावीरः * प्रतापवान् ।
महावीरस्य धृतिमान् सुधृतिः सत्यविक्रमः ॥ ७ ॥
सुधृतेरपि धर्म्मात्मा धृष्टकेतुः सुधार्म्मिकः ।
धृष्टकेतोश्च राजर्षेर्हर्य्यश्व इति विश्रुतः ॥ ८ ॥
हर्य्यश्वस्य मरुः पुत्रो मरोः पुत्रः प्रतीन्धकः † ।
प्रतीन्धकस्य धर्म्मात्मा राजा कीर्त्तिरथः सुतः ॥ ९ ॥
पुत्रः कीर्त्तिरथस्यापि देवमीढ़ इति स्मृतः ।
देवमीढ़स्य विबुधो विबुधस्य महीध्रकः ‡ ॥ १० ॥
महीध्रकसुतो राजा कीर्त्तिरातो महाबलः § ।
कीर्त्तिरातस्य राजर्षेर्महारोमा ¶ व्यजायत ॥ ११ ॥
महारोम्णस्तु धर्म्मात्मा स्वर्णरोमा व्यजायत ।

नाम प्रसिद्धम् । मानतः सुकेतुः हर्य्यश्वः ॥५॥६॥७॥८॥९॥१०॥११॥१२॥

---

* "महावीर्य्यः" इति वङ्गीयाः ।
† "मधिद्रुकः" इति वङ्गीयाः ।
‡ "विबुधस्यापि धाम्यकः" इति वङ्गीयाः ।
§ "कृतिरात इति स्मृतः" इति वङ्गीयाः ।
¶ "स्वर्णरोमा" इति वङ्गीयाः ।

स्वर्णरोम्णस्तु राजर्षेर्ह्रस्वरोमा व्यजायत ॥ १२ ॥
तस्य पुत्रद्वयं राज्ञो धर्मज्ञस्य महात्मनः ।
ज्येष्ठोऽहमनुजो भ्राता मम वीरः कुशध्वजः ॥ १३ ॥
मान्तु ज्येष्ठं पिता राज्ये सोऽभिषिच्य पिता मम * ।
कुशध्वजं समावेश्य भारं मयि वनं गतः ॥ १४ ॥
वृद्धे पितरि स्वर्याते धर्मेण धुरमावहम् ।
भ्रातरं देवसङ्काशं स्नेहात्पश्यन् कुशध्वजम् ॥ १५ ॥
कस्यचित्त्वथ कालस्य साङ्काश्यादागतः पुरात् ।
सुधन्वा वीर्यवान् राजा मिथिलामवरोधकः ॥ १६ ॥
स च मे प्रेषयामास शैवं धनुरनुत्तमम् ।
सीता च कन्या पद्माक्षी मह्यं वै दीयतामिति ॥ १७ ॥

तस्य ह्रस्वरोम्णः ज्येष्ठोऽहम्। ममानुजः कुशध्वजः ॥ १३ ॥

स मम पिता मां ज्येष्ठन्तु राज्येऽभिषिच्य कुशध्वजं भारं भरणीयं यद्वा। कुशध्वजं, भारं राज्यभारं च मयि समावेश्य स्थापयित्वा वनं गत इत्यन्वयः। धुरं राज्य[illegible]रं स्नेहात्पश्यन् पालयन् ॥ १४ ॥ १५ ॥

साङ्काश्यमिति सुधन्वनगरनाम अवरोधकोऽवरुन्धन् अवरोद्धुमागतवानित्यर्थः ॥ १६ ॥

शैवं धनुः सीता च कन्या मह्यं दीयतामिति दूतान् प्रेषयामास मे इत्यन्वयः ॥ १७ ॥

* "सतां मतः" इति वा पाठः।

तस्याप्रदानाद् ब्रह्मर्षे ! युद्धमासीन् मया सह ।
स हतो विमुखो * राजा सुधन्वा तु मया रणे ॥१८॥
निहत्य तं मुनिश्रेष्ठ ! सुधन्वानं नराधिपम् ।
साङ्काश्ये भ्रातरं शूरमभिषिञ्चं कुशध्वजम् ॥१९॥
कनीयानेष मे भ्राता अहं ज्येष्ठो महामुने ! ।
ददामि परमप्रीतो वध्वौ ते मुनिपुङ्गव ! ॥२०॥
सीतां रामाय भद्रं ते ऊर्मिलां लक्ष्मणाय वै ।
वीर्यशुल्कां मम सुतां सीतां सुरसुतोपमाम् ॥२१॥
द्वितीयामूर्मिलाञ्चैव त्रिर्वदामि न संशयः ।
ददामि परमप्रीतो वध्वौ ते मुनिपुङ्गव ! ॥२२॥
रामलक्ष्मणयो राजन् ! गोदानं कारयस्व ह ।
पितृकार्यञ्च भद्रं ते ततो वैवाहिकं कुरु ॥२३॥
मघा ह्यद्य महाबाहो ! तृतीयदिवसे प्रभो ! ।

तस्य अप्रदानस्य । विमुखो युद्धविमुखः साङ्काश्ये सुधन्वनगरे ऊर्मिलां सोमिलां निजपुत्रीम् ॥१८॥१९॥२०॥२१॥

त्रिर्वदामि उक्तमपि दार्ढ्यायेत्याशयः ॥२२॥

गोदानं समावर्तनम् । वैवाहिकं विवाहादौ कर्त्तव्यम् । पितृकार्यं नान्दीमुखश्राद्धम् ॥२३॥

अद्य तृतीयदिवसे मम मिथिलाप्रवेशात् तृतीयदिवसे यज्ञसमाप्ते-

* "स हतोऽभिमुखः" इति वा पाठः ।

फल्गुन्यामुत्तरे राजंस्तस्मिन् वैवाहिकं कुरु ॥ २४ ॥
रामलक्ष्मणयोरर्थे दानं कार्य्यं सुखोदयम् ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
जनकस्य कन्याद्वयदानाङ्गीकारो नाम
एकसप्ततितमः सर्गः ॥ ७१ ॥

तृतीयदिवसे वाद्य मघानक्षत्रम् । फल्गुन्यां पूर्वफल्गुनीनक्षत्रे । उत्तरे श्रेष्ठे ; अतएव भगो यत्र प्रजापतिरित्यनेन अविरोधः । भगो हि पूर्वफल्गुनीदेवः उत्तरफल्गुन्यास्त्वर्यमेति बोध्यम् । वैवाहिकं विवाहम् । विनयादित्वात् ठक् । "मघानक्षत्रं पितरो देवता फल्गुनीनक्षत्रमर्यमा देवता फल्गुनीनक्षत्रं भगो देवता" इति तैत्तिरीयसंहितायाम् । "अर्यमणः पूर्वं फल्गुनीभगस्योत्तरे" इति तद्ब्राह्मणे चोक्तत्वेन यथा श्रुतमेव सम्यगिति तत्त्वम् । उत्तरे इति पुंस्त्वमार्षम् । यद्यपि उत्तरफल्गुनी सीतायाः जन्मर्क्षं तथापि तदृक्षे प्रथमचरणं विहाय तज्जन्मसत्त्वेन तस्याः कन्याराशित्वात् तृतीयैकादशरूपभकूटशुद्धेस्तस्य न दोषः । भकूटशुद्धौ तत्र दुष्टमिति ज्योतिःशास्त्रे प्रसिद्धम् । किञ्च, पूर्वासु तस्या द्वादशचन्द्र इति तत्र विवाहोऽनुचित एव एकनाडीदोषेण च रामसीतयोर्वियोग इति ध्येयम् ॥ २४ ॥

रामलक्ष्मणयोरर्थे तदभ्युदयाय सुखोदयं सुखोदर्कम् । दानं गो-भू-तिल-यव-हिरण्यादेर्दानं कार्यं त्वयेति शेषः ॥ २५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
एकसप्ततितमः सर्गः ॥ ७१ ॥

द्विसप्ततितमः सर्गः ।



तमुक्तवन्तं वैदेहं विश्वामित्रो महामुनिः ।
उवाच वचनं वीरं वसिष्ठसहितो नृपम् ॥ १ ॥
अचिन्त्यान्यप्रमेयाणि कुलानि नरपुङ्गव ! ।
इक्ष्वाकूणां विदेहानां नैषां तुल्योऽस्ति कश्चन ॥ २ ॥
सदृशो धर्मसम्बन्धः सदृशो रूपसम्पदा ।
रामलक्ष्मणयो राजन् ! सीता चोर्मिलया सह ॥ ३ ॥
वक्तव्यञ्च नरश्रेष्ठ ! श्रूयतां वचनं मम ।
भ्राता यवीयान् धर्मज्ञ ! एष राजा कुशध्वजः ॥ ४ ॥
अस्य धर्मात्मनो राजन् ! रूपेणाप्रतिमं भुवि ।
सुताद्वयं नरश्रेष्ठ ! पत्न्यर्थं वरयामहे ॥ ५ ॥

वीरं जनकम् ॥ १ ॥

एषां तुल्यः परस्परव्यतिरिक्तोऽपरो नास्ति ॥ २ ॥

धर्मसम्बन्धो युवयोर्विवाहसम्बन्धः सदृशोऽनुरूपः किञ्च ऊर्मिलया सह वर्त्तमाना या सीता तस्या यथायोग्ययो रामलक्ष्मणयोः यः सम्बन्धः स रूपसम्पदा सदृशः । सीतयोर्मिलयेति पाठस्तु सुगम एव ॥ ३ ॥

किञ्चिदन्यद् वक्तव्यमस्ति तत् श्रूयतामित्यन्वयः ॥ ४ ॥ ५ ॥

भरतस्य कुमारस्य शत्रुघ्नस्य च धीमतः ।
वरये ते सुते राजंस्तयोरर्थे महात्मनोः ॥ ६ ॥
पुत्रा दशरथस्येमे रूपयौवनशालिनः ।
लोकपालसमाः सर्वे देवतुल्यपराक्रमाः ॥ ७ ॥
उभयोरपि राजेन्द्र ! सम्बन्धेनानुबध्यताम् ।
इक्ष्वाकुकुलमव्यग्रं भवतः पुण्यकर्मणः ॥ ८ ॥
विश्वामित्रवचः श्रुत्वा वसिष्ठस्य मते तदा ।
जनकः प्राञ्जलिर्वाक्यमुवाच मुनिपुङ्गवौ ॥ ९ ॥
कुलं धन्यमिदं मन्ये येषां नो मुनिपुङ्गवौ ।
सदृशं कुलसम्बन्धं यदाज्ञापयतः स्वयम् ॥ १० ॥
एवं भवतु भद्रं वः कुशध्वजसुते इमे ।
पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ ॥ ११ ॥

वार्यो: पत्नीत्वार्थं ; तदाह,—भरतस्य इत्यादि। आद्याद्यं पूर्वान्वयि, तथा ते सुते सीतोर्मिले तयोरर्थे रामलक्ष्मणयोरर्थे ॥ ६ ॥

दशरथपुत्रेषु न कस्मिन्नपि वरगुणन्यूनता, इत्याह,—पुत्रा इति ॥७॥

उभयोर्वाणयोः सम्बन्धेन इक्ष्वाकुकुलं सम्बध्यताम्। तेन च सम्बन्धे पुण्यकर्मणो भवतोऽव्यग्रं चित्तं भवत्विति शेषः। स्वयम् ईदृशेन महाराजेन युगपच्चत्वा सम्बन्धचतुष्टयं कार्यमिति वदता मा क्षिपत्यर्थः ॥८॥९॥

स्वयं न तु शिष्यादिमुखेन यत् यस्मादाज्ञापयतस्तस्मादिदं कुलं धन्यं मन्ये ॥ १० ॥

एकाह्ना राजपुत्रीणां चतसृणां महामुने ।
पाणीन् गृह्णन्तु चत्वारो राजपुत्रा महाबलाः ॥ १२ ॥
उत्तरे दिवसे ब्रह्मन् ! फल्गुनीभ्यां मनीषिणः ।
वैवाहिकं प्रशंसन्ति भगो यत्र प्रजापतिः ॥ १३ ॥
[illegible] सौम्यं प्रत्युत्थाय कृताञ्जलिः ।
[illegible] जनको वाक्यमब्रवीत् ॥ १४ ॥
परो धर्मः कृतो मह्यं शिष्योऽस्मि भवतोस्तथा ।
इमान्यासनमुख्यानि आस्यतां मुनिपुङ्गवौ ॥ १५ ॥
[illegible] तथायोध्यापुरी मम ।

सहितौ [illegible] अत्र क्रमेण तात्पर्य्यम् ॥ ११ ॥

एकाह्नेति । [illegible] तृतीया एकदिवसे इत्यर्थः । चतसृणामिति दीर्घत्वमार्षम् ॥ १२ ॥

फल्गुनीभ्यामुत्तरफल्गुनीभ्याम् [illegible] द्वितीये दिवसे प्रजापतिर्देवता । [illegible] निमित्त-विकाट्भगदैवतत्वेनेति [illegible] ॥ १३ ॥

प्रत्युत्थाय आसनादुत्थाय ॥ १४ ॥

परो धर्मः [illegible] । [illegible] भवतोः शिष्योऽस्मि । [illegible] यथा दशरथस्य पुत्रयोः [illegible] । [illegible] कनीयसः कुशध्वजस्य [illegible] मर्थसिद्धम् । आसनमुख्यानि [illegible] सिंहासनानि [illegible] । [illegible] ॥ १५ ॥

ननु दशरथसिंहासनं कथं त्वया विनियुज्यते? [illegible] यथेति ।

प्रभुत्वेनास्ति सन्देहो यथार्हं कर्तुमर्हथ ॥ १६ ॥
तथा ब्रुवति वैदेहे जनके रघुनन्दनः ।
राजा दशरथो हृष्टः प्रत्युवाच महीपतिम् ॥ १७ ॥
युवामसंख्येयगुणौ भ्रातरौ मिथिलेश्वरौ ।
ऋषयो राजसङ्घाश्च भवद्भ्यामभिपूजिताः ॥ १८ ॥
स्वस्ति प्राप्नुहि भद्रं ते गमिष्यामः स्वमालयम् ।
श्राद्धकर्माणि विधिवद् विधास्य इति चाब्रवीत् ॥ १९ ॥
तमापृष्ट्वा नरपतिं राजा दशरथस्तदा ।
मुनीन्द्रौ तौ पुरस्कृत्य जगामाशु महायशाः ॥ २० ॥
स गत्वा निलयं राजा श्राद्धं कृत्वा विधानतः ।
प्रभाते काल्यमुत्थाय चक्रे गोदानमुत्तमम् ॥ २१ ॥

यथेयं मिथिला दशरथस्य यथेष्टविनियोगार्हा एवमयोध्यापुरी मम अतो युष्माकं सिंहासनप्रभुत्वे नास्ति सन्देहः अतो यथायोग्यं प्रभुत्वं कर्तुमर्हथ पूजायां बहुवचनम्। वयं सर्वे भवदधीना इत्याशयः ॥ १६ ॥

हृष्टः एवमैक्यवादेनेति शेषः ॥ १७ ॥

ऋषिसङ्घा भवद्भ्यां राजसङ्घास्ते भवद्भ्यामभिपूजिताः अनेन विनयेन सर्वोत्कर्षं प्रापिता भवद्भ्याम् एवैवं विनीतो नायमपूर्वोऽर्थो भव-यीति भावः ॥ १८ ॥

चलितव्येऽपि प्रतिष्ठाशीलत्वात् दातरि जनके चाशीः कर्त्तीत्यादि ॥ १९ ॥

मौरष्ट्रा चापल्य ॥ २० ॥

गवां शतसहस्रञ्च ब्राह्मणेभ्यो नराधिपः ।
एकैकशो ददौ राजा पुत्रानुद्दिश्य धर्मतः ॥ २२ ॥
सुवर्णशृङ्गसम्पन्नाः * सवत्साः कांस्यदोहनाः ।
गवां शतसहस्राणि चत्वारि पुरुषर्षभः ॥ २३ ॥
वित्तमन्यच्च सुबहु द्विजेभ्यो रघुनन्दनः ।
ददौ गोदानमुद्दिश्य पुत्राणां पुत्रवत्सलः ॥ २४ ॥

प्रभाते उत्थाय काल्यं प्रातःकालकर्तव्यं गोदानाख्यं कर्म चक्रे ॥ २१ ॥ तदङ्गत्वेन प्रसिद्धगोदानमाह,—गवामित्यादि। एकैकश इत्यार्षम् ॥२२॥ सम्पन्ना बहुदुग्धाः ईदृश्यो या गावस्तासां गवां चत्वारि लक्षाणि ददावित्युत्तरेणान्वयः ॥ २३ ॥

गोदानं तदाख्यं कर्मविशेषम्।

"गोदानं चौलवत्कार्यं षोडशेऽब्दे तदुच्यते ।
अत्रोपनयनं नास्ति अमन्त्रया वपनं भवेत् ॥
स्नात्वा च वाग्यतस्तिष्ठेदहःशेषं नयेदथ ।
आदित्येऽस्तमिते वाचं विसृजेदन्तिके गुरोः ॥
अहं वरं ददामीति दद्याद् गोमिथुनं ततः ॥"

इत्याश्वलायनकारिकायाम् ।
इदं समावर्तनपूर्वाङ्गम्। वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा। "गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया" इति याज्ञवल्क्यात् ॥२४॥

---

* "सुवर्णशृङ्गाः सम्पन्नाः" इति वा पाठः ।

स सुतैः कृतगोदानैर्वृतः स नृपतिस्तदा।
लोकपालैरिवाभाति वृतः सौम्यः * प्रजापतिः ॥ २५ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे गोदानं नाम द्विसप्ततितमः सर्गः ॥ ७२ ॥

सौम्यः सोम इव सौम्यः सोम्य इव सौम्यः ॥ २५ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके
बालकाण्डे द्विसप्ततितमः सर्गः ॥ ७२ ॥

---

* "वृतः साक्षात् प्रजापतिः" इति वङ्गीयाः।

त्रिसप्ततितमः सर्गः ।



यस्मिंस्तु दिवसे राजा चक्रे गोदानमुत्तमम् ।
तस्मिंस्तु दिवसे वीरो युधाजित् समुपेयिवान् ॥ १ ॥
पुत्रः केकयराजस्य साक्षाद् भरतमातुलः ।
दृष्ट्वा पृष्ट्वा च कुशलं राजानमिदमब्रवीत् ॥ २ ॥
केकयाधिपतिर्राजा स्नेहात् कुशलमब्रवीत् ।
येषां कुशलकामोऽसि तेषां संप्रत्यनामयम् ॥ ३ ॥
स्वस्रीयं मम राजेन्द्र ! द्रष्टुकामो महीपतिः ।
तदर्थमुपयातोऽहमयोध्यां रघुनन्दन ! ॥ ४ ॥
श्रुत्वा त्वहमयोध्यायां विवाहार्थं तवात्मजान् ।
मिथिलामुपयातांस्तु त्वया सह महीपते ! ॥ ५ ॥
त्वरयाभ्युपयातोऽहं द्रष्टुकामः स्वसुः सुतम् ।

समुपेयिवान् दशरथमिति शेषः ॥ १ ॥ २ ॥

केकयाधिपतिर्युधाजित्पिता कुशलमब्रवीदिति युष्मान् प्रतीति शेषः । येषामस्माकं त्वं कुशलकामोऽसि तेषामस्माकं सम्प्रत्यनामयमिति चाब्रवीत् ॥ ३ ॥

स्वस्रीयं स्वसुरपत्यं पुमांसम्,—स्वस्रीयं भरतम् ॥ ४ ॥ ५ ॥

अथ राजा दशरथः प्रियातिथिमुपस्थितम् ॥ ६ ॥
दृष्ट्वा परमसत्कारैः पूजनार्हमपूजयत् ।
ततस्तामुषितो रात्रिं सह पुत्रैर्महात्मभिः ॥ ७ ॥
प्रभाते पुनरुत्थाय कृत्वा कर्माणि तत्त्ववित् ।
ऋषींस्तदा पुरस्कृत्य यज्ञवाटमुपागमत् ॥ ८ ॥
युक्ते मुहूर्त्ते विजये सर्वाभरणभूषितैः ।
भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः ॥ ९ ॥
वसिष्ठं तु पुरस्कृत्य महर्षीनपरानपि ।
वसिष्ठो भगवानेत्य वैदेहमिदमब्रवीत् ॥ १० ॥
राजा दशरथो राजन् ! कृतकौतुकमङ्गलैः ।
पुत्रैर्नरवरश्रेष्ठो दातारमभिकाङ्क्षते ॥ ११ ॥
दातृप्रतिग्रहीतृभ्यां सर्वार्थाः सम्भवन्ति हि ।
स्वधर्मं प्रतिपद्यस्व कृत्वा वैवाह्यमुत्तमम् ॥ १२ ॥

अयोध्यायामदृष्ट्वा भरतं द्रष्टुकाम इहाभ्युपयात इत्यन्वयः ॥ ६ ॥ ७ ॥

यज्ञवाटं यज्ञशालाद्वारम् ॥ ८ ॥

"युक्ते" इत्यादि सार्द्धश्लोकस्य "उपागमत्" इति पूर्व्वेणान्वयः । युक्ते शुभलग्नादियुक्ते । विजये तदाख्ये ॥ ९ ॥

एत्य यज्ञवाटान्तर्वर्त्तिनं वैदेहम् ॥ १० ॥

दातारं दातुस्तवाज्ञां प्रवेष्टुमाकाङ्क्षते ॥ ११ ॥

दातृप्रतिग्रहीतृभ्यां योगे इति शेषः । सर्वार्थाः सकलधर्माः । हि

इत्युक्तः परमोदारो वसिष्ठेन महात्मना ।
प्रत्युवाच महातेजा वाक्यं परमधर्मवित् ॥ १३ ॥
कः स्थितः प्रतिहारो मे कस्याज्ञां संप्रतीक्षते ।
स्वगृहे को विचारोऽस्ति यथा राज्यमिदं तव ॥ १४ ॥
कृतकौतुकसर्वस्वा वेदिमूलमुपागताः ।
मम कन्या मुनिश्रेष्ठ ! दीप्ता वह्नेरिवार्चिषः ॥ १५ ॥
सद्योऽहं त्वत्प्रतीक्षोऽस्मि * वेद्यामस्यां प्रतिष्ठितः ।

यतोऽतः उत्तमं वैवाह्यं, आर्षः पन्थाः । विवाहोपयोगि लौकिकालौकिकं कर्म कृत्वा ततः स्वधर्मं प्रवेशमात्रादानरूपं प्रतिपद्यस्व तावत् द्वार्येव तिष्ठाम इति भावः ॥ १२ ॥

परमोदारः परमदाता ॥ १३ ॥

प्रतिहारो द्वारपालः येन राजा गमनं प्रतिबध्यते इति शेषः । यथेदं मम राज्यं तथा तव तत्र स्वगृहे प्रवेशे को विचारः इत्यर्थः ॥ १४ ॥

अपि च कृतसकर्तव्येन मयैव युष्मत्प्रतीक्षा क्रियते इत्याह,—कृतेति । कृतं कौतुकसर्वस्वं वैवाहिककृतत्समङ्गलानुष्ठानं यासां ताः । वेदिमूलं वेदिसमीपम् ॥ १५ ॥

सद्यः अस्मिन् क्षणे त्वां प्रतीक्षते इति त्वत्प्रतीक्षः । अविलम्ब-विलम्बं यथा तथा सर्वं विवाहकर्म भवता क्रियताम् । किमर्थं द्वार्येव स्थानेन विलम्ब्यते भवतेति शेषः ॥ १६ ॥

---

* "सद्योऽहं त्वत्प्रतीक्षश्च" इति वङ्गीयाः ।

अविघ्नं क्रियतां सर्वं किमर्थं हि विलम्ब्यते ॥ १६ ॥
तद्वाक्यं जनकेनोक्तं श्रुत्वा दशरथस्तदा ।
प्रवेशयामास सुतान् सर्वानृषिगणानपि ॥ १७ ॥
ततो राजा विदेहानां वसिष्ठमिदमब्रवीत् ।
कारयस्व ऋषे ! सर्वामृषिभिः सह धार्मिक ! ॥ १८ ॥
रामस्य लोकरामस्य क्रियां वैवाहिकीं प्रभो ! ।
तथेत्युक्त्वा तु जनकं वसिष्ठो भगवानृषिः ॥ १९ ॥
विश्वामित्रं पुरस्कृत्य शतानन्दञ्च धार्मिकम् ।
प्रपामध्ये तु विधिवद् वेदिं कृत्वा महातपाः ॥ २० ॥
अलञ्चकार तां वेदिं गन्धपुष्पैः समन्ततः ।
सुवर्णपालिकाभिश्च चित्रकुम्भैश्च साङ्कुरैः ॥ २१ ॥
अङ्कुराढ्यैः शरावैश्च धूपपात्रैः सधूपकैः ।

श्रुत्वा वसिष्ठमुखात् ॥ १७ ॥

सर्वां वैवाहिकीमित्युत्तरेणान्वयः ॥ १८ ॥

लोकरामस्य लोकप्रियस्येति यावत् ॥ १९ ॥

प्रपामध्ये यज्ञशालामध्ये इति कतकः । प्रपा मण्डप इत्यन्ये तच्चा-
ऽऽमकालेन प्रपात्वारोपः । वेदिं विवाहवेदिं इयं वेदिरग्न्यर्था ॥ २० ॥

सुवर्णपालिकाभिः साङ्कुराभिरित्यनुकर्षः चित्रकुम्भैः नानावर्णादि-
युतकुम्भैः अच्छिद्रकुम्भैरिति पाठे स्फुटनादिदोषरहितैः सर्वकुम्भैरित्यर्थः
इति कतकः । अच्छिद्रकुम्भैः करकैरिति तीर्थः ॥ २१ ॥

शंखपात्रैः स्रुवैः स्रुग्भिः पात्रैरर्घ्यादिपूजितैः ॥ २२ ॥
लाजपूर्णैश्च पात्रीभिरक्षतैरपि संस्कृतैः ।
दर्भैः समैः समास्तीर्य्य विधिवन्मन्त्रपूर्वकम् ॥ २३ ॥
अग्निमाधाय वेद्यां तु विधिमन्त्रपुरस्कृतम् ।
जुहावाग्नौ महातेजा वसिष्ठो मुनिपुङ्गवः ॥ २४ ॥
ततः सीतां समानीय सर्वाभरणभूषिताम् ।
समक्षमग्नेः संस्थाप्य राघवाभिमुखे तदा ॥ २५ ॥
अब्रवीज्जनको राजा कौशल्यानन्दवर्द्धनम् ।
इयं सीता मम सुता सहधर्मचरी तव ॥ २६ ॥
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ।
पतिव्रता महाभागा छायेवानुगता सदा ॥ २७ ॥

अर्घ्यादिपूजितैस्तद्युक्तैः ॥ २२ ॥

लाजपूर्णैश्च पात्रीभिरित्यार्षम् । संस्कृतैर्हरिद्रालेपादिसंस्कारवद्भिः समैः समप्रमाणैः समास्तीर्य्य वेदिमिति शेषः ॥२३॥

विधिना कल्पोक्तलक्षणार्पेण । मन्त्रैश्च पुरस्कृतं हविरिति शेषः । विवाहहोमादीनां वरकर्तृत्वात् तत्पुरोहितो वसिष्ठो जुहाव ॥ २४ ॥

अग्नेः समक्षं राघवाभिमुखे देशे संस्थाप्येत्यन्वयः ॥ २५ ॥

इयं त्वद्भुजवीर्यनिर्जिता मम सुतेत्याभिजात्यकथनम् । सहधर्मचरी अनेन यत्कर्त्तव्यं तदनया सहेति कारितम् ॥ २६ ॥

प्रतीच्छ प्रतिग्रहणाय तदुपयोगित्वेन पाणिना पाणिं गृह्णीष्व पाणि-

इत्युक्त्वा प्राक्षिपद् राजा मन्त्रपूतं जलं तदा।
साधु साध्विति देवानामृषीणां वदतां तदा॥ २८॥
देवदुन्दुभिनिर्घोषः पुष्पवर्षो महानभूत्।
एवं दत्त्वा सुतां सीतां मन्त्रोदकपुरस्कृताम्॥ २९॥
अब्रवीज्जनको राजा हर्षेणाभिपरिप्लुतः।
लक्ष्मणागच्छ भद्रं ते ऊर्मिलामुद्यतां मया॥ ३०॥
प्रतीच्छ पाणिं गृह्णीष्व माभूत् कालस्य पर्य्ययः।
तमेवमुक्त्वा जनको भरतञ्चाभ्यभाषत॥ ३१॥
गृहाण पाणिं माण्डव्याः पाणिना रघुनन्दन!।
शत्रुघ्नञ्चापि धर्मात्मा अब्रवीन् मिथिलेश्वरः॥ ३२॥
श्रुतकीर्तेर्महाबाहो! पाणिं गृह्णीष्व पाणिना।
सर्वे भवन्तः सौम्याश्च सर्वे सुचरितव्रताः॥ ३३॥

गृहीता हि नाविक्रमणीयेति एवमुक्तम्। छायेवानुगता भविष्यतीत्यन्वयः॥ २७॥

मन्त्रपूतं कन्यादानं मन्त्रेण पूतं जलं प्राक्षिपत् रामहस्ते इति शेषः। वदतां शब्द आसीदिति शेषः॥ २८॥

दानीयमन्त्रोदकाभ्यां पुरस्कृताम्॥ २९॥

उद्यतां दातुं कृतनिश्चयाम्॥ ३०॥

प्रतीच्छेत्यादि प्राग्व्याख्यातम्। ज्येष्ठाद्भरतात्पूर्वं लक्ष्मणपाणिग्रहणमभिप्रायात् न दोषाय॥ ३१॥ ३२॥

पत्नीभिः सन्तु काकुत्स्था माभूत् कालस्य पर्य्ययः ।
जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् ॥ ३४ ॥
चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिताः ।
अग्निं प्रदक्षिणं कृत्वा वेदिं राजानमेव च ॥ ३५ ॥
ऋषींश्चापि महात्मानः सहभार्य्या रघूद्वहाः ।
यथोक्तेन ततश्चक्रुर्विवाहं विधिपूर्वकम् ॥ ३६ ॥
पुष्पवृष्टिर्महत्यासीदन्तरिक्षात् सुभास्वरा ।
दिव्यदुन्दुभिनिर्घोषैर्गीतवादित्रनिस्वनैः ॥ ३७ ॥
ननृतुश्चाप्सरःसङ्घा गन्धर्वाश्च जगुः कलम् ।
विवाहे रघुमुख्यानां तदद्भुतमदृश्यत ॥ ३८ ॥
ईदृशे वर्त्तमाने तु तूर्य्योद्घुष्टनिनादिते ।
त्रिरग्निं ते परिक्रम्य ऊहुर्भार्य्या महौजसः ॥ ३९ ॥

सुचरितं व्रतं ब्रह्मचर्यादि यैः ॥ ३३ ॥

पत्नीभिः सहिताः सन्तु भवन्तु इत्यप्यर्थः ॥ ३४ ॥

वेदिं विवाहवेदिम् । राजानं जनकम् ॥ ३५ ॥

ऋषींश्चापि प्रदक्षिणं कृत्वेति शेषः । यथोक्तेन शास्त्रोक्तेन प्रकारेण विवाहं तत्कृत्यशेषं होमादि ॥ ३६ ॥ ३७ ॥

तदद्भुतं दुन्दुभिनिर्घोषादिसहितपुष्पवृष्ट्यादि ॥ ३८ ॥

तूर्याणां यदुद्घुष्टं घोषस्तन्निनादिते काले । त्रिरग्निमित्युपसंहारेण पुनर्वादः ॥ ३९ ॥

अथोपकार्य्यं जग्मुस्ते सभार्य्या रघुनन्दनाः।
राजाप्यनुययौ पश्यन् सर्षिसङ्घः सबान्धवः॥ ४०॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
दशरथपुत्रचतुष्टयपरिणयो नाम
त्रिसप्ततितमः सर्गः॥ ७३॥

उपकार्य्यं शिविरं पश्यन् वधूवरसंबन्धकल्याणम्॥ ४०॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
त्रिसप्ततितमः सर्गः॥ ७३॥

चतुःसप्ततितमः सर्गः ।



अथ रात्र्यां व्यतीतायां विश्वामित्रो महामुनिः ।
आपृष्ट्वा तौ च राजानौ जगामोत्तरपर्वतम् ॥ १ ॥
विश्वामित्रे गते राजा वैदेहं मिथिलाधिपम् ।
आपृष्ट्वैव जगामाशु राजा दशरथः पुरीम् ॥ २ ॥
अथ राजा विदेहानां ददौ कन्याधनं बहु ।
गवां शतसहस्राणि बहूनि मिथिलेश्वरः ॥ ३ ॥
कम्बलानाञ्च मुख्यानां क्षौमान् कोट्यम्बराणि च ।
हस्त्यश्वरथपादातं दिव्यरूपं स्वलंकृतम् ॥ ४ ॥

आपृष्ट्वा आपृच्छ्य तौ दशरथजनकौ उत्तरपर्वतं कौशिकीतटावच्छिन्नम् ॥ १ ॥

जगाम गन्तुमुद्यतोऽभूत् ॥ २ ॥

कन्याधनं विवाहकाले कन्यायै देयं धनं यौतकाख्यं तस्यैव प्रपञ्चो गवामित्यादि ॥ ३ ॥

मुख्यानां कम्बलानां नेपालादिभवानां कम्बलानां बहूनि इति सम्बन्धः । क्षौमान् बहूनिति विपरिणामः । कोट्यम्बराणि कोटिसंख्याकानि सामान्यवासांसि ॥ ४ ॥

ददौ कन्याशतं तासां दासीदासमनुत्तमम् ।
हिरण्यस्य सुवर्णस्य मुक्तानां विद्रुमस्य च ॥ ५ ॥
ददौ राजा सुसंहृष्टः कन्याधनमनुत्तमम् ।
दत्त्वा बहुविधं राजा समनुज्ञाप्य पार्थिवम् ॥ ६ ॥
प्रविवेश स्वनिलयं मिथिलां मिथिलेश्वरः ।
राजाप्ययोध्याधिपतिः सह पुत्रैर्महात्मभिः ॥ ७ ॥
ऋषीन सर्वान् पुरस्कृत्य जगाम सबलानुगः ।
गच्छन्तं तु नरव्याघ्रं सर्षिसङ्घं सराघवम् ॥ ८ ॥
घोरास्तु पक्षिणो वाचो व्याहरन्ति समन्ततः ।
भौमाश्चैव मृगाः सर्वे गच्छन्ति स्म प्रदक्षिणम् ॥ ९ ॥
तान् दृष्ट्वा राजशार्दूलो वसिष्ठं पर्य्यपृच्छत ।
असौम्याः पक्षिणो घोरा मृगाश्चापि प्रदक्षिणाः ॥ १० ॥

कन्याशतं सखीत्वेन तासां राजकुमारीणां प्रत्येकमिति शेषः । दासीदासमिति गवाश्वादित्वादेकवम् । हिरण्यं रजतं सुवर्णं हेम । षष्ठ्यन्तानां कोटिपदाध्याहारेणान्वयः ॥ ५ ॥

पार्थिवं दशरथम् ॥ ६ ॥ ७ ॥

बलैश्चतुरङ्गैरनुगैः किङ्करैश्च सहितः तथा गच्छन्तं दशरथमिति शेषः ॥ ८ ॥

पक्षिणः करटादयः । तत्र पक्षिणां घोरव्याहरणमादौ दुर्निमित्तं, ततो मृगप्रदक्षिणगमनं सुनिमित्तम् ॥ ९ ॥

किमिदं हृदयोत्कम्पि मनो मम विषीदति ।
राज्ञो दशरथस्यैतत् श्रुत्वा वाक्यं महानृषिः ॥ ११ ॥
उवाच मधुरां वाणीं श्रूयतामस्य यत् फलम् ।
उपस्थितं भयं घोरं दिव्यं पक्षिमुखाच्युतम् ॥ १२ ॥
मृगाः प्रशमयन्त्येते सन्तापस्त्यज्यतामयम् ।
तेषां संवदतां तत्र वायुः प्रादुर्बभूव ह ॥ १३ ॥
कम्पयन् मेदिनीं सर्वां पातयंश्च महाद्रुमान् ।
तमसा संवृतः सूर्य्यः सर्वेनावेदिषुर्दिशः ॥ १४ ॥
भस्मना चावृतं सर्वं संमूढमिव तद्बलम् ।
वशिष्ठो ऋषयश्चान्ये राजा च ससुतस्तदा ॥ १५ ॥
ससंज्ञा इव तत्रासन् सर्वमन्यद् विचेतनम् ।

तान् शुभाशुभसूचकोत्पातान् । असौम्याः पक्षिणो घोराः, घोरशब्दा इत्यर्थः ॥ १० ॥

इदं हृदयकम्पजनकं किमिदं सुखोदर्कं दुःखोदर्कं वेति प्रश्नः अनिश्चयात् मे मनो विषीदति ॥ ११ ॥

दिवि खे भवं दिव्यं पक्षिमुखात् च्युतं वचनं घोरं भयम् उपस्थितं आगमनावेदयतीति शेषः ॥ १२ ॥

प्रशमयन्ति प्रशमं सूचयन्तीत्यर्थः । तेषां संवदतामित्यत्र पुरः स्थिते ॥ १३ ॥

तमो भस्म चोभयमप्युत्पातजम् ॥ १४ ॥ १५ ॥

तस्मिंस्तमसि घोरे तु भस्मच्छन्नेव सा चमूः ॥ १६ ॥
ददर्श भीमसङ्काशं जटामण्डलधारिणम् ।
भार्गवं जामदग्नेयं राजा राजविमर्दनम् ॥ १७ ॥
कैलासमिव दुर्द्धर्षं कालाग्निमिव दुःसहम् ।
ज्वलन्तमिव तेजोभिर्दुर्निरीक्ष्यं पृथग्जनैः ॥ १८ ॥
स्कन्धे चासज्य परशुं धनुर्विद्युद्गणोपमम् ।
प्रगृह्य शरमुग्रञ्च त्रिपुरघ्नं यथा शिवम् ॥ १९ ॥
तं दृष्ट्वा भीमसङ्काशं ज्वलन्तमिव पावकम् ।
वशिष्ठप्रमुखा विप्रा जपहोमपरायणाः ॥ २० ॥
सङ्गता मुनयः सर्वे सञ्जजल्पुरथो मिथः ।
कच्चित् पितृवधामर्षी क्षत्रं नोत्सादयिष्यति ॥ २१ ॥

ससंज्ञा इव ईषत्संज्ञा इत्यर्थः । अन्यत्तु बलं निःसंज्ञमेव भस्मच्छन्न-
माभूदिति शेषः ॥ १६ ॥

भीमसङ्काशं भयङ्करदर्शनम् ॥ १७ ॥

कैलासमिवेत्यनेन महाकारत्वम् । दुर्धर्षं[illegible]म् । पृथग्जनैः
पामरजनैः ॥ १८ ॥

प्रभातिशयेन विद्युद्गुणोपमं धनुरस्य शरञ्च प्रगृह्य त्रिपुरघ्नं शिव-
मिव स्थितमित्यर्थः ॥ १९ ॥

जपहोमपरायणा आसन्निति शेषः । यद्यपि होमोऽग्न्यधिकरणकस्तदा-
पि च पर्वणसमये बाधितश्चाप्यपाने जुह्वति प्राणमित्यादिबोध्यः इति

पूर्वं क्षत्रवधं कृत्वा गतमन्युर्गतज्वरः ।
क्षत्रस्योत्सादनं भूयो न खल्वस्य चिकीर्षितम् ॥ २२ ॥
एवमुक्त्वार्घ्यमादाय भार्गवं भीमदर्शनम् ।
ऋषयो राम रामेति मधुरं वाक्यमब्रुवन् ॥ २३ ॥
प्रतिगृह्य तु तां पूजामृषिदत्तां प्रतापवान् ।
रामं दाशरथिं रामो जामदग्न्योऽभ्यभाषत ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
जामदग्न्यागमनं नाम चतुःसप्तति-
तमः सर्गः ॥ ७४ ॥

केचित् । परे तु जपहोमपरायणत्वमुपलक्ष्यं क्षतएनाग्रे सङ्गजल्पुरिति सङ्गच्छतेऽन्यथा ताहगहोमादिपरायणानां जल्पासम्भवादित्याहुः ॥ २० ॥

ऋषीणां परस्परजल्पमाह,—कच्चिदित्यादि श्लोकद्वयेऽपि न शब्दो ननु शब्दैकदेशो नन्वित्यर्थको वितर्के ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
चतुःसप्ततितमः सर्गः ॥ ७४ ॥

पञ्चसप्ततितमः सर्गः ।

राम ! दाशरथे ! वीर ! वीर्य्यं ते श्रूयतेऽद्भुतम् ।
धनुषो भेदनं चैव निखिलेन मया श्रुतम् ॥ १ ॥
तदद्भुतमचिन्त्यञ्च भेदनं धनुषस्तथा ।
तच्छ्रुत्वाहमनुप्राप्तो धनुर्गृह्यापरं शुभम् ॥ २ ॥
तदिदं घोरसङ्काशं जामदग्न्यं महद्धनुः ।
पूरयस्व शरेणैव स्वबलं दर्शयस्व च ॥ ३ ॥
तदहं ते बलं दृष्ट्वा धनुषोऽप्यस्य पूरणे ।
द्वन्द्वयुद्धं प्रदास्यामि वीर्य्यश्लाघ्यमहं तव ॥ ४ ॥

किमभाषतेत्यत्राह,—रामेति । निखिलेन कार्त्स्न्येन येन ताड़का-वधादिकमुपचयः ॥ १ ॥

यत् त्वया तथा अनायासेन धनुषो भेदनं कृतं, तदद्भुतमचिन्त्यं च अन्येन मनसापि अशक्यम् अतः तत् श्रुत्वा इत्यादि गृह्य गृहीत्वा ॥ २ ॥

जामदग्न्यं जमदग्नेः स्वपितुरागतं अणार्थे अण् आर्षः । शरेण पुं-पूरयस्वैव आकर्षयस्व ॥ ३ ॥

अस्यापि धनुषः पूरणे सति वीर्य्यश्लाघ्यं वीर्य्यवत् श्लाघ्यम् । वीर्य्येण तद्वता श्लाघ्यमित्यन्ये ॥ ४ ॥

तस्य तद् वचनं श्रुत्वा राजा दशरथस्तदा ।
विवर्णवदनो दीनः प्राञ्जलिर्वाक्यमब्रवीत् ॥ ५ ॥
क्षत्ररोषात् प्रशान्तस्त्वं ब्राह्मणश्च महातपाः ।
बालानां मम पुत्राणामभयं दातुमर्हसि ॥ ६ ॥
भार्गवाणां कुले जातः स्वाध्यायव्रतशालिनाम् ।
सहस्राक्षे प्रतिज्ञाय शस्त्रं प्रक्षिप्तवानसि ॥ ७ ॥
स त्वं धर्मपरो भूत्वा काश्यपाय वसुन्धराम् ।
दत्त्वा वनमुपागम्य महेन्द्रकृतकेतनः ॥ ८ ॥
मम सर्वविनाशाय संप्राप्तस्त्वं महामुने ।
न चैकस्मिन् हते रामे सर्वे जीवामहे वयम् ॥ ९ ॥
ब्रुवत्येवं दशरथे जामदग्न्यः प्रतापवान् ।

तद्वचनं द्वन्द्वयुद्धवचनम् ॥ ५ ॥

क्षत्ररोषात् तज्जन्यक्षत्रवधात् ॥ ६ ॥

सहस्राक्षे तत्सन्निधौ प्रतिज्ञाय । अतःपरं शस्त्रं न ग्रहीष्यामीत्येवं प्रत्युपगमः ॥ ७ ॥

तपसे महेन्द्रकृतकेतनत्वम् ॥ ८ ॥

त्वं तथा त्यक्तशस्त्रोऽपि मम सर्वविनाशाय कुतः संप्राप्त इत्यर्थः । सर्वनाशमेवोपपादयति,—न चेत्यादि ॥ ९ ॥ १० ॥

इमे वक्ष्यमाणलक्षणे यत् त्वया भग्नं यच्च मया धृतं ते इत्यर्थः । बलवती बलवत्तमे, सुकृते सुनिर्मिते ॥ ११ ॥

अनादृत्य तु तद्वाक्यं राममेवाभ्यभाषत ॥ १० ॥
इमे द्वे धनुषी श्रेष्ठे दिव्ये लोकाभिपूजिते।
दृढे बलवती मुख्ये सुकृते विश्वकर्मणा ॥ ११ ॥
अनुसृष्टं सुरैरेकं त्र्यम्बकाय युयुत्सवे।
त्रिपुरघ्नं नरश्रेष्ठ ! भग्नं काकुत्स्थ ! यत् त्वया ॥ १२ ॥
इदं द्वितीयं दुर्धर्षं विष्णोर्दत्तं सुरोत्तमैः।
तदिदं वैष्णवं राम ! धनुः परपुरञ्जयम् ॥ १३ ॥
समानसारं काकुत्स्थ ! रौद्रेण धनुषा त्विदम्।
तदा तु देवताः सर्वाः पृच्छन्ति स्म पितामहम् ॥ १४ ॥
शितिकण्ठस्य विष्णोश्च बलाबलनिरीक्षया।
अभिप्रायं तु विज्ञाय देवतानां पितामहः ॥ १५ ॥

युयुत्सवे त्रिपुरवासिभिरिति शेषः। त्रिपुरघ्नं तद्धननसाधनम् * ॥ १२ ॥

वैष्णवं विष्णवे दत्तं, तदिदं वैष्णवं वैष्णवत्वेन प्रसिद्धम् ॥ १३ ॥

रौद्रेण शैवेन। शैवस्येदानीमसारत्वमाह,—तदा त्विति ॥ १४ ॥

विष्णोस्त्रिपुरसंहारे शरत्वेन तदुपरिकरान्तर्भावश्रवणात् अयं बलवान् दुर्बल उत सम इत्येवं शितिकण्ठविष्ण्वोर्बलाबलज्ञानाय देवताः पितामहं पृच्छन्ति स्म स च पितामहस्तेषां देवानां उक्तमभिप्रायं विज्ञाय ॥ १५ ॥

* विश्वकर्मनिर्मितयोरेकं सुरैः त्रिपुरहननकामाय दत्तम इत्यर्थः।

विरोधं जनयामास तयोः सत्यवतां वरः * ।
विरोधे तु महद्युद्धमभवद्रोमहर्षणम् ॥ १६ ॥
शितिकण्ठस्य विष्णोश्च परस्परजयैषिणोः ।
तदा तु जृम्भितं शैवं धनुर्भीमपराक्रमम् ॥ १७ ॥
हुङ्कारेण महादेवः स्तम्भितोऽथ त्रिलोचनः ।
देवैस्तदा समागम्य सर्षिसङ्घैः सचारणैः ॥ १८ ॥
याचितौ प्रशमं तत्र जग्मतुस्तौ सुरोत्तमौ ।
जृम्भितं तद्धनुर्दृष्ट्वा शैवं विष्णुपराक्रमैः ॥ १९ ॥
अधिकं मेनिरे विष्णुं देवाः सर्षिगणास्तदा ।
धनू रुद्रस्तु संक्रुद्धो विदेहेषु महायशाः ॥ २० ॥

सत्यवतां वरः सत्यसङ्कल्पः । स्वसङ्कल्पेन देवानां मोहं निरसितुमेवात्मनोरपि रुद्रविष्ण्वोर्विरोधं जनयामास, तावपि तत्सङ्कल्पसिद्ध्यर्थमेव विरोधं चक्रतुः । इदं युद्धं दक्षयज्ञवधे बोध्यम् अतः पूर्वश्लोकेन न विरोधः ॥१६

तदा हुङ्कारेण विष्णुना शैवं धनुर्विजृम्भितं शिथिलीकृतम् । महादेवश्च स्तम्भितः ॥ १७ ॥ १८ ॥

याचिताविति स्तुतावित्यर्थः, प्रशमनिश्चयैर्देवैर्युद्धादुपरतिं याचितौ देवतानुग्रहाय प्रशमं जग्मतुः ॥ १९ ॥

विष्णुम् अधिकं श्रेष्ठं सेव्यत्वेन मेनिरे ज्ञातवन्तः । वस्तुतस्तु ब्रह्मरुद्रे

---

* "सत्यपरीक्षया" इति वा पाठः ।

देवरातस्य राजर्षेर्ददौ हस्ते महात्मनः।
इदं च वैष्णवं राम! धनुः परपुरञ्जयम्॥ २१॥
ऋचीके भार्गवे प्रादाद्विष्णुः संन्यासमुत्तमम्।
ऋचीकस्तु महातेजाः पुत्त्रस्याप्रतिकर्मणः *।
पितुर्मम ददौ दिव्यं जमदग्नेर्महात्मनः॥ २२॥
न्यस्तशस्त्रे पितरि मे तपोबलसमन्विते।
अर्जुनो विदधे मृत्युं प्राकृतां बुद्धिमास्थितः॥ २३॥

विष्णोराधिक्यदर्शनात् त्रिपुरवधे शिवस्याधिक्यदर्शनात् तयोः साम्य-मस्त्वमिति तात्पर्य्यम्। अधिकमित्यस्य स्वीयपूर्वस्थानविषयस्वरूपापेक्षया-धिकमित्यर्थः। धनूरुद्रस्त्विति। एवं युद्धदशायां क्रुद्धः पश्चाद्देवप्रार्थनया प्रसन्नः शिवः देवेभ्यो दत्त्वा ततः सर्वैर्देवैः सह युद्धार्थं धनुरिच्छतो देव-रातस्य ददौ। अतएव रुद्रेण दत्तमिति वक्ष्यमाणेन देवैर्दत्तमिति देवानां दत्तमिति उक्तग्रन्थेन च न विरोध इत्याहुः॥ २०॥

एवं च शैवस्य धनुषस्तदारभ्य शिथिलत्वेन तत् भङ्गकृतं न ते वीर्य्याधिक्यमिति भार्गवाभिप्रायः। अथ स्वधनुष आगममाह,—इदं चेत्यादि परपुरं जयमित्यार्षमसंज्ञायाम्॥ २१॥

भार्गवे भृगुपुत्रे। स उक्तरूपो विष्णुर्न्यासं प्रादात्। अप्रतिकर्मणः स्वहन्तर्य्यपि शापादिप्रतिक्रियारहितस्य॥ २२॥

न्यस्तशस्त्रे। न्यस्तं त्यक्तं विष्णुधनूरूपं शस्त्रं येन तथाभूते। तपो-

---

* "पुत्त्रस्यामिततेजसः" इति वा पाठः।

वधमप्रतिरूपं तु पितुः श्रुत्वा सुदारुणम् ।
क्षत्रमुत्सादयं रोषाज्जातं जातमनेकशः ॥ २४ ॥
पृथिवीं चाखिलां प्राप्य काश्यपाय महात्मने ।
यज्ञस्यान्तेऽददं * राम ! दक्षिणां पुण्यकर्मणे ॥ २५ ॥
दत्त्वा महेन्द्रनिलयस्तपोबलसमन्वितः ।
श्रुत्वा तु धनुषो भेदं ततोऽहं द्रुतमागतः ॥ २६ ॥
तदिदं वैष्णवं राम ! पितृपैतामहं महत् ।
क्षत्रधर्मं पुरस्कृत्य गृह्णीष्व धनुरुत्तमम् ॥ २७ ॥

बलयुते पितरि प्रान्ततां बुद्धिमाश्रितोऽर्जुनः कार्त्तवीर्य्यः मत्पितुर्मृत्युं विदधे ॥ २३ ॥

तमयोग्यं पितुर्वधं श्रुत्वा अहं रोषात् क्षत्रमुत्सादयम् उत्सादितवान् षड्भाव आर्षः ॥ २४ ॥

प्राप्य स्वबलेनेति शेषः । पुण्यकर्मणे यज्ञरूपपुण्यसाङ्गुण्यार्थम् ॥२५॥

दत्त्वा भूमिमिति शेषः । महेन्द्रो महेन्द्रपर्वतः । धनुषः शैवस्य ॥२६॥

पितृपैतामहं पितृपितामहक्रमागतम् उत्तरपदवृद्धिरार्षात् । क्षत्रधर्मं मदर्पितं मया पूर्वमङ्गीकृतं क्षत्रधर्मं न तु ब्राह्मणधर्ममाश्रित्य त्वमेतदर्थः । ब्राह्मणवत् प्राञ्जलिमाश्राय नाहं शक्त इति मा ब्रूहीत्यर्थ इति कतकः ॥ २७ ॥

---

* "तदा" इति वा पाठः ।

योजयस्व धनुःश्रेष्ठे शरं परपुरञ्जयम्।
यदि शक्तोऽसि काकुत्स्थ! द्वन्द्वं दास्यामि ते ततः ॥२८॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
जामदग्न्यधृतधनुःप्रभावकीर्तनं नाम
पञ्चसप्ततितमः सर्गः॥ ७५ ॥

शक्तोऽसि शरयोजने इति शेषः। तावतापि न त्वां त्यक्ष्यामि अपितु द्वन्द्वयुद्धं दास्यामीत्यर्थः। अन्यथा मां शरणं व्रजेति तात्पर्य्यम्॥ २८॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
पञ्चसप्ततितमः सर्गः॥ ७५ ॥

षट्सप्ततितमः सर्गः ।

श्रुत्वा तु जामदग्न्यस्य वाक्यं दाशरथिस्तदा ।
गौरवाद् यन्त्रितकथः पितू राममथाब्रवीत् ॥ १ ॥

श्रुतवानस्मि यत् कर्म कृतवानसि भार्गव ।
अनुरुध्यामहे ब्रह्मन् ! पितुरानृण्यमास्थितः ॥ २ ॥

वीर्यहीनमिवाशक्तं क्षत्रधर्मेण भार्गव ! ।
अवजानासि मे तेजः पश्य मेऽद्य पराक्रमम् ॥ ३ ॥

इत्युक्त्वा राघवः क्रुद्धो भार्गवस्य वरायुधम् ।
शरं च प्रतिजग्राह हस्ताल्लघुपराक्रमः ॥ ४ ॥

पितुर्गौरवात् [illegible] । यन्त्रिता नियन्त्रिता कथा उच्चैःकथनं येन सः ॥ १ ॥

पितुरानृण्यं पितृहन्तृक्षत्रबधेन पितृवैरशुद्धिमास्थितः सन् यत्कर्म त्रिःसप्तकृत्वः क्षत्रियवधरूपं कृतवानसि तदनुरुध्यामहेऽङ्गीकुर्मः । गुरोरानृण्यं वैरशुद्धेः कर्त्तव्यत्वात् ॥ २ ॥

यन्मां क्षत्रधर्मेण युक्तं वीर्यहीनमशक्तमिव मन्यमानोऽवजानासि तन्नानुरुध्यामहे । अतोऽद्य मे तेजः पराभिभवासहनं तन्मूलं मे पराक्रमं च पश्य ॥ ३ ॥

क्रुद्धः प्रागुक्तस्वावमानवचनेन क्रोधादेव तद्धस्तात् स्वयमेव धनुः

आरोप्य स धनू रामः शरं सज्यं चकार ह ।
जामदग्न्यं ततो रामं रामः क्रुद्धो ब्रवीदिदम् ॥ ५ ॥
ब्राह्मणोऽसीति पूज्यो मे विश्वामित्रकृतेन च ।
तस्माच्छक्तो न ते राम ! मोक्तुं प्राणहरं शरम् ॥ ६ ॥
इमां वा त्वद्गतिं राम ! तपोबलसमर्जिताम् ।
लोकानप्रतिमान् वापि हनिष्यामीति मे मतिः ॥ ७ ॥
नह्ययं वैष्णवो दिव्यः शरः परपुरञ्जयः ।

चात् भार्गवनिष्ठां वैष्णवीं शक्तिं जग्राह । तदुक्तं पाद्मे,—

"इत्युक्त्वा देवि ! वैष्णव्या शक्त्या तद्गतया सह
जग्राह वैष्णवं चापं विनयेन च लीलया ॥"

इति अत्राप्यग्रे वक्ष्यति "निर्वीर्यो जामदग्न्योऽसौ" इति । लघुः शीघ्रः पराक्रमो यस्य सः ॥ ४ ॥

आरोप्य ज्यारोपं कृत्वा शरं सज्यं ज्यायुक्तं चकार ॥ ५ ॥

जमदग्निपुत्रत्वेन ब्राह्मणोऽसीति विश्वामित्रभगिन्याः पौत्रोऽसीति पूज्यस्त्वं मेऽसि बधानर्होऽसि अतस्ते प्राणहरं शरं मोक्तुं न शक्तोऽस्मीति शेषः ॥ ६ ॥

इमां प्रत्यक्षसिद्धां गतिं गतिसाधनपादौ तच्छक्तिं वाकाशगमनादिरूपाम् लोकान् लोकप्राप्तिसाधनं धर्मम् ।

"तत्पादकमले श्मि बुद्धि लेऽथवा स्वम् ।"

इति पाद्मोक्तेः, कृतो धर्मो, उभयोर्मध्ये यदिच्छसि तदेव तदेव हन्मि ॥ ७ ॥

मोघः पतति वीर्य्येण बलदर्पविनाशनः ॥ ८ ॥
वरायुधधरं रामं द्रष्टुं सर्षिगणाः सुराः ।
पितामहं पुरस्कृत्य समेतास्तत्र सर्वशः ॥ ९ ॥
गन्धर्वाप्सरसश्चैव सिद्धचारणकिन्नराः ।
यक्षराक्षसनागाश्च तद्द्रष्टुं महदद्भुतम् ॥ १० ॥
जडीकृते तदालोके रामे वरधनुर्धरे ।
निर्वीर्य्यो जामदग्न्योऽसौ रामो राममुदैक्षत ॥ ११ ॥
तेजोभिर्गतवीर्य्यत्वाज्जामदग्न्यो जडीकृतः ।
रामं कमलपत्राक्षं मन्दं मन्दमुवाच ह ॥ १२ ॥

कुत एवम्? अत आह,—न हीति, वीर्य्येण स्वशक्त्या प्रयुक्तो बल-दर्पविनाशनः मोघो व्यर्थः ॥ ८ ॥

वरायुधं वैष्णवं धनुः। समेताः मिलिताः ॥ ९ ॥

तद्द्रष्टुमागता इति शेषः ॥ १० ॥

वरधनुर्धरे रामे अधिकरणे तस्य भार्गवस्य आलोके तेजसि संक्रान्ते सतीति शेषः।

"ततः परशुरामस्य देहान्निर्गत्य वैष्णवम्।
पश्यतां सर्वदेवानां तेजो राममुपागमत् ॥"

इति नृसिंहपुराणात् पूर्वोक्तमवगम्य। अतएव भार्गवे जडीकृते सति निर्वीर्यः स रामो राममुदैक्षत उद्धतविष्णुतेजस्त्वमपश्यदित्यर्थः ॥ ११ ॥

तदेव विवृणोति तेजोभिरित्यादि। रामसंक्रान्तैस्तेजोभिर्हेतुभिर्गत-वीर्यतया जडीकृतः परशुराम उवाच। शरवधप्रश्नोत्तरमिति शेषः ॥ १२ ॥

काश्यपाय मया दत्ता यदा पूर्वं वसुन्धरा ।

विषये मे न वस्तव्यमिति मां काश्यपोऽब्रवीत् ॥ १३ ॥

सोऽहं गुरुवचः कुर्वन् पृथिव्यां न वसे निशाम् ।

तदा प्रभृति काकुत्स्थ ! कृता मे काश्यपस्य ह ॥ १४ ॥

तामिमां मद्गतिं वीर! हन्तुं नार्हसि राघव ! ।

मनोजवं गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ १५ ॥

लोकास्त्वप्रतिमा राम ! निर्जितास्तपसा मया ।

जहि तान् शरमुख्येन माभूत् कालस्य पर्य्ययः ॥ १६ ॥

अक्षय्यं मधुहन्तारं जानामि त्वां सुरेश्वरम् ।

विषये देशे, एवमुक्तिश्च भूम्यभीत्यादिनिवृत्तये ॥ १३ ॥

गुरुवचः काश्यपवचः । निशां रात्रिं न वसे तदर्थः । तथा यदा दत्ता यदा च न वस्तव्यमित्युक्तं, तदा प्रभृतीति शेषः । पृथिव्यां न वसे इत्यर्थः । यतो ह प्रसिद्धं काश्यपस्य कृते प्रतिज्ञा कृता इति शेषः । पृथिव्यां रात्रौ न वसामीत्येवंरूपा प्रतिज्ञा कृता ॥ १४ ॥

यदेवम् अतस्तामिमामित्यादि । तां मद्गतिमाकाशगमनसाधनीभूतां यदि चेन्न हनिष्यसि, तदा मनोजवं [illegible] [illegible] च इतो महेन्द्रं गमिष्यामि, अन्यथा प्रतिज्ञाभङ्गो [illegible] स्यादिति भावः ॥ १५ ॥

[illegible] यज्ञादिरूपेण निर्जिता [illegible] । [illegible] पुण्यार्जितलोक-[illegible] [illegible] [illegible] । रामस्य [illegible], [illegible] [illegible] । पाठेऽपि—

“[illegible] [illegible] [illegible] [illegible] ।” इति ॥ १६ ॥

धनुषोऽस्य परामर्शात् स्वस्ति तेऽस्तु परन्तप ! ॥ १७ ॥
एते सुरगणाः सर्वे निरीक्षन्ते समागताः ।
त्वामप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे ॥ १८ ॥
न चेयं तव काकुत्स्थ ! व्रीडा भवितुमर्हति ।
त्वया त्रैलोक्यनाथेन यदहं विमुखीकृतः ॥ १९ ॥
शरमप्रतिमं राम ! मोक्तुमर्हसि सुव्रत ! ।
शरमोक्षे गमिष्यामि महेन्द्रं पर्वतोत्तमम् ॥ २० ॥
तथा ब्रुवति रामे तु जामदग्न्ये प्रतापवान् ।

यत "उतामृतत्वस्येशानः" इति श्रुतिप्रसिद्धं अक्षय्य लक्षितवान्, — अक्षय्यं अनाद्यन्तं केनापि पराभवं नेतुमशक्यम् एवं निश्चये हेतुर्धनुष इत्यादि । अस्य वैष्णवस्य धनुरारोपस्य परामर्शो अवबोधकत्वादि ॥ १७ ॥

अप्रतिद्वन्द्वं प्रतिभटरहितम् ॥ १८ ॥

इयं त्वद्विषये प्रवृत्तिः । व्रीडा व्रीडार्था । तत्र हेतुस्त्वयेत्यादि । विमुखीकृतत्वमात्रस्य खखिन् योजनेन अयमाशयः कृतः । एतेन स्वस्य भगवदंशत्वं रामस्य च पूर्णभगवदवतारत्वं सूचितम् । आतिदिशेन विमुखीकरणे हि व्रीडा, न तु आत्मना मायया तथाकरणे इति भावः । एतच्चवचनश्रवणेन रावणा दशरथावीन् प्रति वल्पमोचनं रामस्य पूर्वतेजोपहरणमप्यवगन्तव्येति भाति । वैष्णवतेजसोऽपि मान्यस्य सर्वे रावण-वधस्य मुख्यत्वात् । एतदर्थमेव रावणवधे बुद्ध्या सर्वेषां अनु-मागमनं पूर्वमुक्तम् ॥ १९ ॥

शरमोक्षे गमिष्यामि मायया तपसा दग्धत्वात् । पुष्पकस्य च शर-

रामो दाशरथिः श्रीमान् क्षिप्रमेव परन्तपम् ॥ २१ ॥

स हतान् दृश्य रामेण स्वांल्लोकांस्तपसार्जितान् ।

जामदग्न्यो जगामाशु महेन्द्रं पर्वतोत्तमम् ॥ २२ ॥

ततो वितिमिराः सर्वा दिशश्चोपदिशस्तथा ।

सुराः सर्षिगणा रामं प्रशशंसुरुदायुधम् ॥ २३ ॥

रामं दाशरथिं रामो जामदग्न्यः प्रपूजितः ।

ततः प्रदक्षिणीकृत्य जगामात्मगतिं प्रभुः ॥ २४ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे

जामदग्न्यपराभवो नाम षट्-

सप्ततितमः सर्गः ॥ ७६ ॥

मोक्षेण फलप्रतिबन्धे जीवन्मुक्तो भूत्वा गमिष्यामि इत्यर्थः । अने-

कोलाकावरोधः लेशः एवेति दर्शितम् ॥ २० ॥ २१ ॥

दृश्य दृष्ट्वा ॥ २२ ॥ २३ ॥

रामः दाशरथिना प्राणबलात् पूजितो नमस्कृतश्च । प्रशस्यमिति पाठा-

न्तरम् । दाशरथिं प्रदक्षिणीकृत्य अन्तर्यामित्वेन सामान्य प्रदक्षिणकरणं

च । क्षत्रियत्वाच्च तस्य प्रवरकरणं कार्यमेति बोध्यम् । आत्मगतिं स्वस्थ-

स्थानम् । स्वस्थानं जगामेत्यर्थः । प्रभुरिति प्रकृतेन सर्वजीवसमपूजनम् ॥ २४ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे

षट्सप्ततितमः सर्गः ॥ ७६ ॥

सप्तसप्ततितमः सर्गः ।

गते रामे प्रशान्तात्मा रामो दाशरथिर्धनुः ।
वरुणायाप्रमेयाय ददौ हस्ते महायशाः ॥ १ ॥
अभिवाद्य ततो रामो वसिष्ठप्रमुखानृषीन् ।
पितरं विकलं दृष्ट्वा प्रोवाच रघुनन्दनः ॥ २ ॥
जामदग्न्यो गतो रामः प्रयातु चतुरङ्गिणी ।
अयोध्याभिमुखी सेना त्वया नाथेन पालिता ॥ ३ ॥
रामस्य वचनं श्रुत्वा राजा दशरथः सुतम् ।
बाहुभ्यां संपरिष्वज्य मूर्ध्न्युपाघ्राय राघवम् ॥ ४ ॥
गतो राम इति श्रुत्वा हृष्टः प्रमुदितो नृपः ।
पुनर्जातं तदा मेने पुत्रमात्मानमेव च ॥ ५ ॥

रामे परशुरामे । प्रशान्तो गतक्रोध आत्मा चित्तं यस्य । [illegible] [illegible] चित्तं धनुर्वरुणाय दैवैः सह [illegible] [illegible] ददौ न्यासात्मनेति शेषः । वरुणस्याप्रमेयत्वं श्रुतौ [illegible] [illegible] तैत्तिरीयोपनिषदि स्पष्टम् ॥ १ ॥

विकलं परशुरामभयेन । धनुर्दानवृत्तान्तस्य [illegible] [illegible] नाम् प्रति ॥ २ ॥ ३ ॥ ४ ॥

हर्षं [illegible] प्रमोदः ॥ ५ ॥

घोषयामास तां सेनां जगामाशु ततः पुरीम्।
पताकाध्वजिनीं रम्यां तूर्योद्घुष्टनिनादिताम्॥ ६॥
सिक्तराजपथां रम्यां प्रकीर्णकुसुमोत्कराम्।
राजप्रवेशसुमुखैः पौरैर्मङ्गलपाणिभिः॥ ७॥
सम्पूर्णां प्राविशद्राजा जनौघैः समलङ्कृताम्।
पौरैः प्रत्युद्गतो दूरं द्विजैश्च पुरवासिभिः॥ ८॥
पुत्रैरनुगतः श्रीमान् श्रीमद्भिश्च महायशाः।
प्रविवेश गृहं राजा हिमवत्सदृशं प्रियम्॥ ९॥
ननन्द स्वजनै राजा गृहे कामैः सुपूजितः।
कौसल्या च सुमित्रा च कैकेयी च सुमध्यमा॥ १०॥
वधूप्रतिग्रहे युक्ता याश्चान्या राजयोषितः।
ततः सीतां महाभागामूर्मिलां च यशस्विनीम्॥ ११॥

तां सेनां प्रथमं घुषितां पश्चात् [illegible]। जगाम सेनेति शेषः। पताका ध्वजपटः ध्वजो दण्डः। पताकायुक्तध्वजवतीं पताकाः सुवर्णाः ध्वजा महान्त इत्यन्ये। रम्यां मनोहरां। उद्घुष्टं घोषः॥ ६॥

सिक्तेन राजपथेन आवरणात् रम्याम्॥ ७॥ ८॥

श्रीमद्भिः दारपरिग्रहार्थं [illegible] पुत्रैः। [illegible] सौधत्वात् हिमवत्सदृशं गृहे॥ ९॥

कामैः [illegible] सुपूजितः [illegible] ननन्द॥ १०॥

कुशध्वजसुते चोभे जगृहुर्नृपयोषितः।
मङ्गलालापनैर्होमैः शोभिताः क्षौमवाससः ॥ १२ ॥
देवतायतनान्याशु सर्वास्ताः प्रत्यपूजयन्।
अभिवाद्याभिवाद्यांश्च सर्वा राजसुतास्तदा ॥ १३ ॥
रेमिरे मुदिताः सर्वा भर्तृभिः सहिता रहः।
कृतदारा कृतास्त्राश्च सधनाः ससुहृज्जनाः ॥ १४ ॥
शुश्रूषमाणाः पितरं वर्तयन्ति नरर्षभाः।
कस्यचित्त्वथ कालस्य राजा दशरथः सुतम् ॥ १५ ॥
भरतं कैकयीपुत्रमब्रवीद् रघुनन्दनः।
अयं केकयराजस्य पुत्रो वसति पुत्रक ! ॥ १६ ॥
त्वां नेतुमागतो वीरो युधाजिन् मातुलस्तव।

वधूनां कुमाराणां प्रतिग्रहे मङ्गलाचरणपूर्वकं दर्शनस्पर्शने ॥ ११ ॥

मङ्गलालापनैर्मङ्गलार्थैरालापनैराशीर्वादैरुपलक्षिता इति शेषः। होमैर्गृहप्रवेशनीयहोमैः प्राप्तशोभनाः ॥ १२ ॥

देवतायतनानि पुरस्थदेवतायतनानि। ताः सर्वा राजसुताः स्नुषाः सर्वा राजपत्न्यः प्रत्यपूजयन् प्रणामयन्ति स्म। अभिवाद्यान् अभिवादनार्हान् अभिवाद्य ननन्दुः ॥ १३ ॥

कृतास्त्राः लब्धास्त्राः। कृतार्था इति पाठे [illegible] वर्तयन्ति पितृसुखं कुर्वन्ति। नरर्षभा रामादयः [illegible] समये इति शेषः ॥ १५ ॥ १६ ॥

श्रुत्वा दशरथस्यैतद् भरतः कैकयीसुतः॥ १७॥
गमनायाभिचक्राम शत्रुघ्नसहितस्तदा।
आपृच्छ्य पितरं शूरो रामं चाक्लिष्टकारिणम्॥ १८॥
मातॄश्चापि नरश्रेष्ठः शत्रुघ्नसहितो ययौ।
युधाजित् प्राप्य भरतं सशत्रुघ्नं प्रहर्षितः॥ १९॥
स्वपुरं प्राविशद् वीरः पिता तस्य तुतोष ह।
गते च भरते रामो लक्ष्मणश्च महाबलः॥ २०॥
पितरं देवसंकाशं पूजयामासतुस्तदा।
पितुराज्ञां पुरस्कृत्य पौरकार्याणि सर्वशः॥ २१॥
चकार रामः सर्वाणि प्रियाणि च हितानि च।
मातृभ्यो मातृकार्याणि कृत्वा परमयन्त्रितः॥ २२॥
गुरूणां गुरुकार्याणि काले कालेऽन्ववैक्षत।

मातुलकुलं प्रति। [illegible] गत्वा आमन्त्र्य इति शेषः। [illegible]॥ १७॥

अक्लिष्टं यथापि दुःखं यथा न भवति तथा कर्तुं शीलमस्य तम् रामम्॥ १८॥ १९॥ २०॥ २१॥

प्रियाणि हितानि। हितानि पथ्यानि इष्टजनकानि पौराणां परम-[illegible] यन्त्रितः [illegible]॥ २२॥

गुरूणां [illegible] परमयन्त्रितः। गुरुकार्याणि गुरुजनाभिमत[illegible]-[illegible]। [illegible]॥ २३॥

एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ॥ २३ ॥
रामस्य शीलवृत्तेन सर्वे विषयवासिनः ।
तेषामतियशा लोके रामः सत्यपराक्रमः ॥ २४ ॥
स्वयंभूरिव भूतानां बभूव गुणवत्तरः ।
रामस्तु सीतया सार्द्धं विजहार बहूनृतून् ॥ २५ ॥
मनस्वी तद्गतस्तस्या हृदि समर्पितः ।
प्रिया तु सीता रामस्य दाराः पितृकृता इति ॥२६॥
गुणाद्रूपगुणाच्चापि प्रीतिर्भूयो विवर्द्धते ।
तस्याश्च भर्त्ता द्विगुणं हृदये परिवर्त्तते ॥ २७ ॥

विषयवासिनः प्रीता इति शेषः । तेषां चतुर्णां पुत्राणां मध्ये सत्य-पराक्रमो राम एवातियशाः । भूतानां मध्ये स्वयंभूरिव गुणवत्तरो बभूवे-त्यन्वयः ॥ २४ ॥

बहूनृतून् [illegible]वर्षाणीत्यर्थं इति यावत् ॥ २५ ॥

मनस्वी प्रशस्तमनस्कः अतएव तद्गतमना नित्यं सीतागत-मनाः हृदि समर्पितः अनन्यगामात्मे षष्ठी । तस्येत्यर्थः । एतेन परस्परानु-रागो दर्शितः । पितृकृताः [illegible] पितृकृताः [illegible] विवाह एव [illegible] इति भावः ॥ २६ ॥

दैवाच्चैव किन्तु गुणात् [illegible] । [illegible] । [illegible] गुणात् । अतोऽधिकं रामस्य प्रीतिर्वर्धते स्म [illegible] हृदये गुणात् स्वगुणाच्च भर्त्ता द्विगुणं परिवर्त्तते स्म ॥ २७ ॥

अन्तर्गतमपि व्यक्तमाख्याति हृदयं हृदा।
तस्य भूयो विशेषेण मैथिली जनकात्मजा।
देवताभिः समा रूपे सीता श्रीरिव रूपिणी॥ २८॥
तया स राजर्षिसुतोऽभिकामया
समेयिवानुत्तमराजकन्यया।

तस्य रामस्यान्तर्गतं हृदयं हृदयाभिप्रायं मैथिली हृदा स्वहृदयेन अतोऽधिकं विशेषेण मैथिली जनकात्मजा रूपिणी श्रीरिव रूपे देवताभिः समा सीता। आख्याति जानाति अतो ज्ञायते भर्त्तुस्तद्धृदयस्य इति॥ २८॥

अभिकामया स्वविषयेच्छावत्या स्वेच्छाविषयया च। समेयिवान् संयुक्तः। विभुः विभुत्वशक्तिमान् अमरेश्वरो विष्णुः श्रियेव।
"स च द्वादशवर्षाणि राघवः सह सीतया।
रमयामास धर्मात्मा नारायण इव श्रिया॥"
इति पाद्मे उक्तम्। एकोनषोडशवर्षस्य विश्वामित्रेण नयनात् पञ्चदशवर्षसमाप्तौ विवाह इति बोध्यम्॥ २९॥

बालकाण्डे तु सर्गाणां कथिता सप्तसप्ततिः।
श्लोकानां द्वे सहस्रे च पञ्चाशच्च शतद्वयम्॥ १॥
आदौ वाल्मीकिना कृत्वा सर्गसंख्या शुभा तथा।
सीता यस्य सुतावधे न स रामः पातु नः सदा॥ २॥

अतीव रामः शुशुभे मुदान्वितो
विभुः श्रिया विष्णुरिवामरेश्वरः ॥ २६ ॥

इत्यार्षे रामायणे वाल्मीकीये बालकाण्डे
भरतमातुलालयगमनं नाम सप्त-
सप्ततितमः सर्गः ॥ ७७ ॥

इति रामाभिरामे श्रीरामीये रामायणतिलके बालकाण्डे
सप्तसप्ततितमः सर्गः ॥ ७७ ॥

बालकाण्डं समाप्तम् ।